तं दट्ठुं चित्तसेणो पहसियवयणो दढं जाओ ॥ ९७ ॥

रे! रे! कोवि हु पावो अहिमररूवेण आगओ एसो ।
कम्मणगारी जेणिह विमोहिओ अम्ह सामित्ति ॥ ९८ ॥

तालेह हणह बंधह एवं भणंतेहिं अंगरक्खेहिं ।
गहिओ सो हम्मंतो एवं भणिउं समाढत्तो ॥ ९९ ॥

---

**एवं चिन्तयतश्च मन्मथशरगोचरे पतितस्य ।**
**विस्मृतस्तस्याऽऽत्मा चित्रेऽवक्षिप्तचित्तस्य ॥ ९४ ॥**

**ततः क्षणान्तरतः संमीलितलोचनोऽमरकेतुः ।**
**सिंहासनात्पतितो मूर्च्छया परवशः सहसा ॥ ९५ ॥**

**हा ! हा ! हतेति भणन्त आस्थानगताः समुत्थिता लोकाः ।**
**वीजयन्ति व्यञ्जनैः शीतलसलिलेन सिञ्चन्ति ॥ ९६ ॥**

**वदने क्षिपन्ति क्षिप्रं कर्पूरं तथा मर्दयन्ति अङ्गानि ।**
**तद्दृष्ट्वा चित्रसेनः प्रहृष्टवदनो दृढं जातः ॥ ९७ ॥**

**अरे ! अरे ! कोऽपि खलु पापोऽभिमररूपेणऽऽगत एषः ।**
**कार्मणकारी येनेह विमोहितोऽस्माकं स्वामीति ॥ ९८ ॥**

**ताडयत हत बध्नीत एवं भणद्भिरङ्गरक्षकैः ।**
**गृहीत स हन्यमानः, एवं भणितुं समारब्धः ॥ ९९ ॥**

१. वम्महो=मन्मथः । २. विस्मृतः । ३. अभिमरो धनादिलोभतो मरणभयरहितं साहसकर्मकारी । ४. हम्मंतो=हन्यमानः । ५. समाढत्तो=समारब्धः ।



Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

भो! भो! भद्दा! नाहं दुट्ठो ता मा मुहा कयत्थेह[1] ।
तत्तो य तेहिं भणियं कहं न दुट्ठो तुमं पाव !? ॥ १०० ॥

कम्मणकयं हि चित्तं पयंसियं[2] कीस राइणो तुमए ? ।
तह मुच्छियम्मि देवे वियसियवयणो य किं जाओ ? ॥ १०१ ॥

ता कहसु केण रण्णो वहणत्थं पेसिओ तुमं पाव! ? ।
तो भणइ चित्तसेणो अक्खिस्सं[3] तुम्ह सव्वंपि ॥ १०२ ॥

रन्नो अब्भुदयत्थं समागओ न उण दुट्ठबुद्धीए ।
एमाइ[4] भणंतोवि हु बद्धो सो रायपुरिसेहिं ॥ १०३ ॥

एत्थंतरम्मि राया गयमुच्छो सत्थचेयणो[5] जाओ ।
अह नरवइणा भणियं मुंचह भो ! चित्तगरमेयं ॥ १०४ ॥

उच्छोडियबंधो सो रन्ना भणिओ य भद्द ! उवविससु ।
आइक्खसु मह सच्चं केण तुमं पेसिओ एत्थ ? ॥ १०५ ॥

---

**भो ! भो ! भद्राः ! नाऽहं दुष्टस्तस्मात्मा मुधा कदर्थयत ।**
**ततश्च तैर्भणितं कथं न दुष्टस्त्वं पाप ? ॥ १०० ॥**

**कार्मणकृतं हि चित्रं प्रदर्शितं कस्माद्राज्ञस्त्वया ।**
**तथा मूर्च्छिते देवे विकसितवदनश्च किं जातः ॥ १०१ ॥**

**तस्माद् कथय केन राज्ञो वधनार्थं प्रेषितस्त्वं पाप ! ।**
**ततो भणति चित्रसेन आख्यास्यामि युष्मान् सर्वमपि ॥ १०२ ॥**

**राज्ञोऽभ्युदयार्थं समागतो न पुनर्दुष्टबुद्ध्या ।**
**एवमादि भणन्नपि खलु बद्धस्स राजपुरुषैः ॥ १०३ ॥**

**अत्रान्तरे राजा गतमूर्च्छः स्वस्थचेतनो जातः ।**
**अथ नरपतिना भणितं मुञ्चत भोः! चित्रकारमेतम् ॥ १०४ ॥**

**उच्छोटितबन्धस्स राज्ञा भणितश्च भद्र ! उपविश ।**
**आचक्ष्व मम सत्यं केन त्वं प्रेषितोऽत्र ॥ १०५ ॥**

---

१. कदर्थयत । २. प्रदर्शितम् । ३. अख्यास्यामि । ४. एवमादि । ५. स्वस्थचेतनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो भणइ चित्तसेणो निसुणसु नरनाह ! एत्थ परमत्थं ।
चित्तगरवेसधारी समागओ जेण अहमेत्थ ॥ १०६ ॥

अत्थेत्थ कुसग्गपुरं सुपसिद्धं चेव देवपायाणं ।
नयरगुणोहुववेयं धणधन्नसमिद्धजणकलियं ॥ १०७ ॥

[1]पणइजणपूरियासो राया घणवाहणोत्ति तत्थासि ।
पाणप्पिया से देवी वसन्तसेणत्ति नामेण ॥ १०८ ॥

ताण य पुत्तो नरवाहणोत्ति नामेण उक्कडपयावो ।
कमलावइत्तिनामा धूया[2]अच्चंतरूववई ॥ १०९ ॥

अह अन्नया य राया दाउं नरवाहणस्स नियरज्जं ।
कमलावई य भगिणी अणुरूववरस्स दायव्वा ॥ ११० ॥

इय भणिऊण पुत्तं सुगुरुसमीवम्मि जायसंवेगो ।
संसारुच्छेयकरं सामन्नं उवगओ विहिणा ॥ १११ ॥

---

**ततो भणति चित्रसेनः निश्रृणु नरनाथ ! अत्र परमार्थम् ।**
**चित्रकारवेषधारी समागतो येन अहमत्र ॥ १०६ ॥**

**अस्त्यत्र कुशाग्रपुरं सुप्रसिद्धं चैव देवपादानाम् ।**
**नगरगुणौघोपपेतं धनधान्यसमृद्धजनकलितम् ॥ १०७ ॥**

**प्रणयिजनपूरिताशो राजा घनवाहन इति तत्राऽऽसीत् ।**
**प्राणप्रिया तस्य देवी वसन्तसेनेति नाम्ना ॥ १०८ ॥**

**तयोश्च पुत्रो नरवाहन इति नाम्नोत्कटप्रतापः ।**
**कमलावतीति नाम्नी दुहिताऽत्यन्तरूपवती ॥ १०९ ॥**

**अथान्यदा च राजा दत्त्वा नरवाहनस्य निजराज्यम् ।**
**कमलावती च भगिन्यनुरूपवरस्य दातव्या ॥ ११० ॥**

**इति भणित्वा पुत्रं सुगुरुसमीपे जातसंवेगः ।**
**संसारोच्छेदकरं श्रामण्यमुपगतो विधिना ॥ १११ ॥**

---

१. प्रणयिजनः=अर्थिसमुदयः । २. धूया=दुहिता=पुत्री ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

नरवाहणोवि राया रज्जं पालेइ पणयपडिवक्खं ।
चिट्ठइ कन्नंतेउरमज्झे कमलावइ वि सुहं ॥ ११२ ॥

एत्तो य तम्मि नयरे निवसइ वणिओ उ सागरो नाम ।
रन्नो बाल[1]सवयंसो जिणवयणे गाढमणुरत्तो ॥ ११३ ॥

सिरिमइनामा भज्जा अइप्पिया तस्स सीलसंपन्ना ।
सिरिदत्तो से पुत्तो सिरिकंता तहय दुहियत्ति ॥ ११४ ॥

सिरिकंता अणुदियहं वच्चई कमलावईए पासम्मि ।
जाया य गरुयपीई अन्नोन्नं ताण दोण्हंपि ॥ ११५ ॥

इत्थीजणजोगाओ गहियाओ कलाओ बालभावेवि ।
सगलकलानिउणस्स उ पासम्मि सुमित्तसेणस्स ॥ ११६ ॥

रायदुहियाए समयं चित्ताईयाहि विविहकीलाहिं ।
सिरिकंता कीलेत्ता विगालसमयम्मि एइ गिहं ॥ ११७ ॥

---

**नरवाहनोऽपि राजा राज्यं पालयति प्रणत (प्रनय) प्रतिपक्षः ।**
**तिष्ठति कन्याऽन्तःपुरमध्ये कमलावत्यपि सुखम् ॥ ११२ ॥**

**इतश्च तस्मिन्नगरे निवसति वणिक् तु सागरो नामा ।**
**राज्ञो बालवयस्यो जिनवचने गाढमनुरक्तः ॥ ११३ ॥**

**श्रीमतीनाम्नी भार्याऽतिप्रिया तस्य शीलसंपन्ना ।**
**श्रीदत्तस्तस्यपुत्रः श्रीकान्ता तथा च दुहितेति ॥ ११४ ॥**

**श्रीकान्ताऽनुदिवसं व्रजति कमलावत्याः पार्श्वे ।**
**जाता च गुरुप्रीतिः, अन्योन्यं तयो- र्द्वयोरपि ॥ ११५ ॥**

**स्त्रीजनयोग्या गृहीताः कलाः बालभावेऽपि ।**
**सकलकलानिपुणस्य तु पार्श्वे सुमित्रसेनस्य ॥ ११६ ॥**

**राजदुहित्रा समकं चित्रादीभिर्विविधक्रीडाभिः ।**
**श्रीकान्ता क्रीडित्वा विकालसमय एति गृहम् ॥ ११७ ॥**

---

१. बालवयस्यो बालमित्रम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिरिकंताए समयं सिणेहसाराए रायधूयाए ।
[1]वोलीणो बहुकालो नाणाविहकीडणरयाए ॥ ११८ ॥

कमसो वड्ढंतीओ तियसाण वि पत्थणिज्जरूवाओ ।
पत्ताओ पढमजोव्वणमणंगसिंगारआवासं ॥ ११९ ॥

अह अन्नया य राया मइसागरसागरेहि संजुत्तो ।
अत्थाणमंडवम्मी आसीणो [2]अच्छई जाव ॥ १२० ॥

नियसहियणसंजुत्ता ताव य कमलावई तहिं आया ।
भूसणपसाहिअंगी गेंदुयकीलाए कीलंती ॥ १२१ ॥

अह सा भगिणी रन्ना पीईए निवेसिया [3]निउच्छंगे ।
तत्तो दट्ठुं तीए रूवं तह जोव्वणमुदग्गं ॥ १२२ ॥

भणिओ रन्ना मंती मइसागर ! [4]तइय पव्वयंतेण ।
ताएण अहं भणिओ भगिणी ठाणम्मि दायव्वा ॥ १२३ ॥

---

**श्रीकान्त्या समकं स्नेहसाराया राजदुहितुः ।**
**अतिक्रान्तो बहुकालो नानाविधक्रीडारक्तायाः ॥ ११८ ॥**

**क्रमशः वर्धमाने त्रिदशानामपि प्रार्थनीयरूपे ।**
**प्राप्ते प्रथमयौवनाऽनङ्गशृङ्गारावासम् ॥ ११९ ॥**

**अथ अन्यदा च राजा मतिसागरसागरैस्संयुक्तः ।**
**आस्थानमण्डपेऽऽसीनाऽऽस्ते यावत् ॥ १२० ॥**

**निजसखीजनसंयुक्ता तावच्च कमलावती तत्राऽऽयाता ।**
**भूषणप्रसाधिताङ्गी कन्दुकक्रीडया क्रीडन्ती ॥ १२१ ॥**

**अथ सा भगिनी राज्ञा प्रीत्या निवेशिता निजोत्सङ्गे ।**
**ततो दृष्ट्वा तस्याः रूपं तथा यौवनमुदग्रम् ॥ १२२ ॥**

**भणितो राज्ञा मन्त्री मतिसागर ! तदा प्रव्रजता ।**
**तातेनाऽहं भणितो भगिनी स्थाने दातव्या ॥ १२३ ॥**

---

१. अतिक्रान्तः । २. आस्ते । ३. निउच्छंगे=निजोत्सङ्गे । ४. तदा प्रव्रजता=दीक्षां गृह्णता।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इण्हिं वरस्स उचिया जाया एसत्ति ता महं कहसु ।
को अणुरूवो पुरिसो इमीए सुकुलप्पसूओ य? ॥ १२४ ॥

मइसागरेण भणियं देवो च्चिय एत्थ जाणए उचियं ।
तत्तो रन्ना भणियं एवं मे फुरई चित्तम्मि ॥ १२५ ॥

कीरइ सयंवरो इह हक्कारिज्जंतु सव्वरायाणो ।
जो चेव हिययइट्ठो तं चेव वरेई जेणेसा ॥ १२६ ॥

मइसागरेण भणियं जं देवो आणवेइ तं किच्चं ।
नवरि[1] सयंवरकरणं संपइ उचियं न काउं जे[2] ॥ १२७ ॥

सव्वेवि निवा जइया[3] आयत्ता होंति एगनरवइणो ।
तदणुन्नाएण तया सयंवरो होइ कायव्वो ॥ १२८ ॥

एगस्स जओ वरणे सेसाणं सो निवारगो होइ ।
संपइ पुण रायाणो नरिंद ! सव्वेवि अहमिंदा ॥ १२९ ॥

---

**इदानीं वरस्योचिता जातैषा इति तस्माद् माम् कथय ।**
**कोऽनुरुपः पुरुषोऽस्याः सुकुलप्रसूतश्च ॥ १२४ ॥**

**मतिसागरेण भणितं देवश्चैवात्र जानीते उचितम् ।**
**ततो राज्ञा भणितम् - एवं मे स्फुरति चित्ते ॥ १२५ ॥**

**क्रियते स्वयंवर इहाऽऽकारयन्तु सर्वराजानः ।**
**य एव हृदयेष्टस्तमेव वरिष्यति येनैषा ॥ १२६ ॥**

**मतिसागरेण भणितं - यत् देव आज्ञापयति तत् कृत्यम् ।**
**नवरं स्वयंवरकरणं संप्रत्युचितं न कर्तुं ये ॥ १२७ ॥**

**सर्वेऽपि नृपाः यदाऽऽयत्ता भवन्ति एकनरपतेः ।**
**तदनुज्ञया तदा स्वयंवरो भवति कर्तव्यः ॥ १२८ ॥**

**एकस्य यतो वरणे शेषानां स निवारको भवति ।**
**संप्रति पुनर्राजानो नरेन्द्र ! सर्वेऽपि अहमिन्द्राः ॥ १२९ ॥**

१. आनन्तर्येऽव्ययम् । २. पादपूरणेऽव्ययमिदम् । ३. यदा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता ताणमेगवरणे सेसा सव्वेवि सत्तुणो होंति ।
न य सक्का संगामे जिणिउं सव्वेवि एगेण ॥ १३० ॥

ता अलमिमिणा नरवर ! विग्गहमूलेणं[1]णत्थबहुलेण ।
कमलावईसयंवरकरणेण एत्थ पत्थावे ॥ १३१ ॥

तत्तो रण्णा भणियं कस्सेसा तं[2]रिहि भद्द! दायव्वा ।
को व इमीए इट्ठो मणस्स इह कह णु नायव्वं ? ॥ १३२ ॥

जस्स व तस्स व रन्नो दायव्वा न य मए निययभगिणी ।
दिन्ना होइ सुदिन्ना जस्स, इमा तस्स दायव्वा ॥ १३३ ॥

एवं च जाव जंपइ राया मइसागरेण सह तत्थ ।
ताव य दुवारपालो पणामपच्चुट्ठिओ भणइ ॥ १३४ ॥

अट्ठंगनिमित्तविऊ भूयभविस्सत्थपयडणपैं[3]डिट्ठो ।
सुमईनामो इहइं समागओ देव! नेमित्ती ॥ १३५ ॥

---

तस्मात्तेषामेकवरणे शेषाः सर्वेऽपि शत्रवो भवन्ति ।
न च शक्याः संग्रामे जेतुं सर्वेऽप्येकेन ॥ १३० ॥

तस्मादलमनेन नरवर ! विग्रहमूलेनानर्थबहुलेन ।
कमलावतीस्वयंवरकरणेनाऽत्र प्रस्तावे ॥ १३१ ॥

ततो राज्ञा भणितं - कस्यैषा तर्हि भद्र ! दातव्या ।
को वाऽस्या इष्टो मनस इह कथं नु ज्ञातव्यम् ॥ १३२ ॥

यस्य वा तस्य वा राज्ञो दातव्या न च मया निजभगिनी ।
दत्ता भवति सुदत्ता यस्येयं तस्य दातव्या ॥ १३३ ॥

एवञ्च यावज्जल्पति राजा मतिसागरेण सह तत्र ।
तावच्च द्वारपालः प्रणामप्रत्युत्थितो भणति ॥ १३४ ॥

अष्टाङ्गनिमित्तविद्भूतभविष्यार्थप्रकटनपटिष्ठः ।
सुमतिनामाऽत्र समागतो देव ! नैमित्तिकः ॥ १३५ ॥

---

१. अनर्थबहुलेन । २. तर्हि । ३. पटिष्ठ=चतुर : ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो देवदंसणत्थं दुवारदेसम्मि चिट्ठइ इयाणिं ।
इय सोउं नरवइणा भणियं तुरियं पवेसेहिं ॥ १३६ ॥

तयणंतरं च सुमई निम्मलसियवसणसोहियसरीरो ।
गोरोयणकयतिलओ समागओ राइणो पुरओ ॥ १३७ ॥

[1]आसीपयाणपुव्वं दाउं [2]दुव्वक्खए नरिंदस्स ।
रन्ना कओवयारो उचियासणगम्मि उवविट्ठो ॥ १३८ ॥

रन्ना पच्चयहेउं अतीयवत्थुम्मि पुच्छिओ एसो ।
पच्चक्खं पिव सव्वं साहेइ सो [3]अवितहं जाव ॥ १३९ ॥

ताहे पहसियवयणो राया नरवाहणो इमं भणति ।
भो सुमइ! मज्झ भगिणी एसा कमलावई कण्णा ॥ १४० ॥

एईए को भत्ता होही मणवल्लहुत्ति वज्जरसु ।
सुमई निरूविऊणं निमित्तमेवं समुल्लवइ ॥ १४१ ॥

---

स देवदर्शनार्थं द्वारदेशे तिष्ठति इदानीम् ।
इति श्रुत्वा नरपतिना भणितं त्वरितं प्रवेशय ॥ १३६ ॥

तदनन्तरं च सुमतिर्निर्मलश्वेतवसनशोभितशरीरः ।
गोरोचनकृततिलकः समागतो राज्ञः पुरतः ॥ १३७ ॥

आशीःप्रदानपूर्वं दत्त्वा दुर्वाक्षतान्नरेन्द्रस्य ।
राज्ञा कृतोपचार उचितासन उपविष्टः ॥ १३८ ॥

राज्ञा प्रत्ययहेतुमतीतवस्तुनि पृष्ट एषः ।
प्रत्यक्षमिव सर्वं कथयति सोऽवितथं यावत् ॥ १३९ ॥

तदा प्रहृष्टवदनो राजा नरवाहन इदम् भणाति ।
भोः सुमते ! मम भगिन्येषा कमलावती कन्या ॥ १४० ॥

एतस्याः को भर्त्ता भविष्यति मनोवल्लभ इति कथय ।
सुमति-र्निरूप्य निमित्तमेव समुल्लपति ॥ १४१ ॥

---

१. आशीःप्रदानपूर्वम् । २. दुर्वाक्षतान् । ३. अवितथम्=सत्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरवर! चित्ते लिहियं एईए रूवयं पुलोएत्ता ।
मुच्छिज्जिस्सइ जो इह होही भत्ता इमीए सो ॥ १४२ ॥

सयलोरोह[1]पहाणा तस्स य होही इमा महादेवी ।
एत्थत्थे य नरेसर! मा काहिसि अन्नहाभावं ॥ १४३ ॥

एत्थंतरम्मि सागरसेट्ठी संलवइ सुमइनेमित्तिं ।
सिरिकंताए भत्ता को होही मज्झ धूयाए? ॥ १४४ ॥

वज्जरइ तओ सुमई कसिण[2]भुयंगेण डंसिय[3]मेयं जो ।
उज्जीविस्सइ सो च्चिय भत्ता धूयाए ते होही ॥ १४५ ॥

एवं च पुच्छिऊणं उचियं काऊण तस्स उवयारं ।
पट्ठ[4]विओ नरवइणा जहागयं पडिगओ सुमई ॥ १४६ ॥

तत्तो य भणइ मंती सोहणमहुणा नरिंद! संजायं ।
ता इण्हिं तब्भणिए कायव्वो उज्जमो होइ ॥ १४७ ॥

---

**नरवर ! चित्रे लिखितमेतस्याः रूपं प्रलोक्य ।**
**मूर्च्छिष्यते य इह भविष्यति भर्त्ताऽस्याः सः ॥ १४२ ॥**

**सकलाऽवरोधप्रधाना तस्य च भविष्यतीयं महादेवी ।**
**अत्रार्थे च नरेश्वर ! मा करिष्यसि अन्यथाभावम् ॥ १४३ ॥**

**अत्रान्तरे सागरश्रेष्ठी संलपति सुमतिनैमित्तिकम् ।**
**श्रीकान्ताया भर्त्ता को भविष्यति मम दुहितुः ? ॥ १४४ ॥**

**कथयति ततस्सुमतिः कृष्णभुजङ्गेन दष्टामेतां यः ।**
**उज्जीविष्यति स एव भर्त्ता दुहितुः तव भविष्यति ॥ १४५ ॥**

**एवञ्च पृष्ट्वोचितं कृत्वा तस्योपचारम् ।**
**प्रस्थापितो नरपतिना यथागतं प्रतिगतस्सुमतिः ॥ १४६ ॥**

**ततश्च भणति मंत्री शोभनमधुना नरेन्द्र ! सञ्जातम् ।**
**तस्मादिदानीं तद्भणिते कर्तव्य उद्यमो भवति ॥ १४७ ॥**

---

१. अवरोधः=अन्तःपुरम् । २. कसिणो=कृष्णः । ३. दष्टाम् । ४. प्रस्थापितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणियं रन्ना को इह साइसयं लिहइ चित्तकम्मंति ।
मइसागरेण भणियं सुपसिद्धो ताव इह नयरे ॥ १४८ ॥

एक्को च्चिय कमलावइउज्झायसुमित्तसेणनामस्स ।
तणओ उ चित्तसेणो अइकुसलो चित्तकम्मम्मि ॥ १४९ ॥ युग्मम् ।

रन्ना भणियं सिग्घं वाहरह तयंति तक्खणेण अहं ।
वाहरिओ संपत्तो भणिओ रन्ना सबहुमाणं ॥ १५० ॥

कमलावईए रूवं सिग्धं आलिहसु चित्तफलहीए ।
जं [1]आणवेसि भणिउं, सोहणवन्नेहि तं लिहियं ॥ १५१ ॥

[2]देक्खालियं च रन्नो साइसयं पेक्खिऊण तो तुट्ठो ।
भणिओ अहं रन्ना एत्थत्थे [3]तं सि[4]उचिउत्ति ॥ १५२ ॥

चित्तगरवेसधारी एयं घेत्तूण सव्वराईणं ।
दंसेणु जस्स मुच्छा जायइ एयं [5]पुलोएउं ॥ १५३ ॥

---

भणितं राज्ञा क इह सातिशयं लिखति चित्रकर्मेति ।
मतिसागरेण भणितं सुप्रसिद्धस्तावदिह नगरे ॥ १४८ ॥

एकैव कमलावत्युपाध्यायसुमित्रसेननाम्नः ।
तनयस्तु चित्रसेनोऽतिकुशलश्चित्रकर्मणि ॥ १४९ ॥ युग्मम् ॥

राज्ञा भणितं शीघ्रं व्याहरत तकमिति तत्क्षणेनाऽहम् ।
व्याहृतः संप्राप्तो भणितो राज्ञा सबहुमानम् ॥ १५० ॥

कमलावत्या रूपं शीघ्रमालिख चित्रफलके ।
यदाज्ञापयसि भणित्वा शोभनवर्णैस्तल्लिखितम् ॥ १५१ ॥

दर्शितश्च राज्ञा सातिशयं प्रेक्ष्य स तुष्टः ।
भणितश्चाहं राज्ञाऽत्रार्थे त्वमसि उचितमिति ॥ १५२ ॥

चित्रकारवेषधारी एतद्गृहीत्वा सर्वराज्ञाम् ।
दर्शय, यस्य मूर्च्छा जायतैतद् दृष्ट्वा ॥ १५३ ॥

---

१. आज्ञापयसि । २. दर्शितं । ३. त्वम् । ४. असि । ५. दृष्ट्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो मह साहेअव्वो सिग्धं आगम्म, जेण तस्सेव ।
महया उवयारेण दिज्जइ कमलावई एसा ॥ १५४ ॥ युग्मम् ॥

एवं रण्णा भणिओ तत्तो पणमित्तु तस्स पयकमलं ।
कइवयपरियणसहिओ कुसग्गनयराउ नीहरिओ[1] ॥ १५५ ॥

सुग्गीवकित्तिवद्धणपमुहाणं नरवईण मे एसा ।
संदंसियाउ न पुणो जाया इह अत्थसंसिद्धी ॥ १५६ ॥

अज्ज पुणो इह नयरे समागओ देव ! तुम्ह पासम्मि ।
एयं निय[2]च्छिऊणं मुच्छा जाया य तुम्हाणं ॥ १५७ ॥

जायं मह सामिसमीहियं ति चिंतित्तु तेण नरनाह ! ।
जाओ हरिसो मज्झ सुमरि[3]य नेमित्तियं वयणं ॥ १५८ ॥

एएण कारणेणं मुच्छाए तुम्ह हरिसिओ अहयं ।
ता मा नरिंद ! अन्नहभावेण वियप्पसु ममंति ॥ १५९ ॥

---

स मम कथयितव्यः शीघ्रमागत्य येन तस्यैव ।
महतोपचारेण दीयते कमलावत्येषा ॥ १५४ ॥ युग्मम् ॥

एवं राज्ञा भणितस्ततः प्रणम्य तस्य पदकमलम् ।
कतिपयपरिजनसहितः कुशाग्रनगरान्निःसृतः ॥ १५५ ॥

सुग्रीवकीर्तिवर्धनप्रमुखानां नरपतीनां मया एषा ।
सन्दर्शिता तु न पुनर्जातेहऽर्थसंसिद्धिः ॥ १५६ ॥

अद्य पुनरिह नगरे समागतो देव ! तव पार्श्वे ।
एतद् दृष्टवा मूर्च्छा जाता च युष्माकम् ॥ १५७ ॥

जातं मम स्वामीसमीहितमिति चिन्तयित्वा तेन नरनाथ ! ।
जातो हर्षो मम स्मृत्वा नैमित्तिकं वचनम् ॥ १५८ ॥

एतेन कारणेन मूर्च्छया तव हृष्टोऽहम् ।
तस्मान्मा नरेन्द्र ! अन्यथाभावेन विकल्पय मामिति ॥ १५९ ॥

---

१. निःसृतः । २. दृष्ट्वा । ३. स्मृत्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इइ चित्तसेणवयणं सोऊणं विगयअन्नआसंको ।
वज्जरइ अमरकेऊ [1]विम्हइओ चित्तरूवेण ॥ १६० ॥

किं तीए कन्नाए एरिसयं अत्थि रूवसोहग्गं ? ।
ता भणई चित्तसेणो निमेसमेत्तं इमं लिहियं ॥ १६१ ॥

को सक्कइ कुसलोवि हु [2]जेहट्ठियं तीए रायकन्नाए ।
निज्जियतियसविलासिणीरूवं रूवं समालिहिउं? ॥ १६२ ॥

तव्वयणं सोऊणं हरिसियहियएण राइणा तस्स ।
अंगविलग्गमसेसं पसाइयं कडयवत्थाइं ॥ १६३ ॥

तो भणइ चित्तसेणो आएसं देह देव! अम्हाणं ।
नरवाहणस्स रण्णो जहट्ठियं जेण [3]सोहेमो ॥ १६४ ॥

रण्णण्णुन्नाओ सो कमेण पत्तो कुसग्गनयरम्मि ।
नरवाहणस्स रन्नो सिट्ठो सव्वोवि वुत्तंतो ॥ १६५ ॥

---

**इति चित्रसेनवचनं श्रुत्वा विगतान्याऽऽशङ्कः ।**
**कथयति अमरकेतु-र्विस्मितश्चित्ररूपेण ॥ १६० ॥**

**किं तस्याः कन्यायाः एतादृशमस्ति रूपसौभाग्यम् ? ।**
**तस्मात् भणति चित्रसेनो निमेषमात्रमिदं लिखितम् ॥ १६१ ॥**

**को शक्नोति कुशलोऽपि खलु यथास्थितं तस्या राजकन्यायाः ।**
**निर्जितत्रिदशविलासिनीरूपं रूपं समालेखितुम् ? ॥ १६२ ॥**

**तद्वचनं श्रुत्वा हर्षितहृदयेन राज्ञा तस्य ।**
**अङ्गविलग्नमशेषं प्रसादितं कटकवस्त्राणि ॥ १६३ ॥**

**ततो भणति चित्रसेन आदेशं देहि देव ! अस्माकम् ।**
**नरवाहनस्य राज्ञः यथास्थितं येन कथयामः ॥ १६४ ॥**

**राज्ञाऽनुज्ञातः स क्रमेण प्राप्तः कुशाग्रनगरे ।**
**नरवाहनस्य राज्ञः कथितस्सर्वोऽपि वृतान्तः ॥ १६५ ॥**

---

१. विस्मितः। २. यथास्थितम् । ३. कथयामः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह तेणवि नियभगिणी पभूयधणपरियणेण परियरिया ।
पट्ठविया हिट्ठेणं सयंवरा अमरकेउस्स ॥ १६६ ॥

सिरिकंताइसहिजणं आभासित्ता य सयलपरिवारं ।
कमलावईवि चलिया हरिसविसायाउरा हियए ॥ १६७ ॥

इच्छियवरलाभेणं साणंदा तहय बंधुविरहेणं ।
किंचि ससोगा पत्ता कमेण सा हत्थिणपुरम्मि ॥ १६८ ॥

महया विच्छड्डेणं सोहणलग्गम्मि गुरुपमोएणं ।
कमलावई उ रन्ना परिणीया खत्तकुलविहिणा ॥ १६९ ॥

पाणाणवि अब्भहिया पवरा अंतेउरस्स सयलस्स ।
इंदस्सव इंदाणी जाया अह सा महादेवी ॥ १७० ॥

तीए सह विसयसोक्खं अणुहवमाणस्स राइणो तस्स ।
नीईए सयलभूमिं निययं परिवालयंतस्स ॥ १७१ ॥

---

अथ तेनाऽपि निजभगिनी प्रभूतधनपरिजनेन परिवृता ।
प्रस्थापिता हृष्टेन स्वयंवरा अमरकेतोः ॥ १६६ ॥

श्रीकान्तादिसखीजनमाभाष्य च सकलपरिवारम् ।
कमलावत्यपि चलिता हर्षविषादाऽऽतुरा हृदये ॥ १६७ ॥

इच्छितवरलाभेन सानन्दा तथा च बन्धुविरहेण ।
किञ्चित् सशोका प्राप्ता क्रमेण सा हस्तिनापुरे ॥ १६८ ॥

महता विच्छर्देन शोभनलग्ने गुरुप्रमोदेन ।
कमलावती तु राज्ञा परिणीता क्षात्रकुलविधिना ॥ १६९ ॥

प्राणेभ्योऽप्यभ्यधिका प्रवराऽन्तःपुरस्य सकलस्य ।
इन्द्रस्येव इन्द्राणी जाताऽथ सा महादेवी ॥ १७० ॥

तया सह विषयसौख्यमनुभवतो राज्ञस्तस्य ।
नीत्या सकलभूमिं निजकं परिपालयतः ॥ १७१ ॥

---

१. विच्छड्डो=विच्छर्दो विस्तारः विच्छड्डो समूहः विच्छड्डा=ऋद्धिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वच्चंति वासराइं सुहसमुदयमसममणुहवंतस्स ।
विबुहपहुस्सव तियसालयम्मि अद्दिट्ठदुक्खस्स ॥ १७२ ॥

तम्मि य पुरे पसिद्धो पवरो पउराण आसि धणधम्मो।
सेट्ठी निवस्स इट्ठो पत्तट्ठो सव्वसत्थेसु ॥ १७३ ॥

नीसेसअत्थिवित्थरपत्थियअब्भहियदिन्नवरदाणो ।
अज्जय[1]पज्जय[2]जणयज्जियाए लच्छीएऽलंकरिओ ॥ १७४ ॥

जिणसमयसत्थवित्थरवियक्खणो मोक्खमग्गतल्लिच्छो ।
जिणसाहुपूयणरओ गाहम्मियवच्छलो धणियं ॥ १७५ ॥

अवहसियतियससुंदरिरूवाइसया पईवया दक्खा ।
भज्जा मणोरमनामा तस्स य पाणप्पिया धणियं[3] ॥ १७६ ॥

ताणं तिवग्गसारं विसयसुहं सम्ममणुहवंताणं ।
नियकुलमंडणभूओ जाओ अह दारओ एक्को ॥ १७७ ॥

---

**व्रजन्ति वासराणि सुखसमुदायमसममनुभवतः ।
विबुधप्रभोरिव त्रिदशालयेऽदृष्टदुःखस्य ॥ १७२ ॥**

**तस्मिंश्च पुरे प्रसिद्धः प्रवरः पौराणामासीत् धनधर्मा ।
श्रेष्ठी नृपस्येष्टः प्राप्तार्थस्सर्वशास्त्रेषु ॥ १७३ ॥**

**निःशेषार्थिविस्तरप्रार्थिताभ्यधिकदत्तवरदानः ।
आर्यकप्रार्यकजनकार्जितया लक्ष्म्याऽलङ्कृतः ॥ १७४ ॥**

**जिनसमयशास्त्रविस्तारविचक्षणो मोक्षमार्गतल्लिप्सः ।
जिनसाधुपूजनरतः साधर्मिकवत्सलो गाढम् ॥ १७५ ॥**

**अपहसितत्रिदशसुन्दरीरूपातिशया पतिव्रता दक्षा ।
भार्या मनोरमानाम्नी तस्य च प्राणप्रिया गाढम् ॥ १७६ ॥**

**तयोस्त्रिवर्गसारं विषयसुखमनुभवत्योः ।
निजकुलमण्डनभूतो जातोऽथ दारक एकः ॥ १७७ ॥**

---

१. अज्जओ=आर्यकः=पितामहः । २. पज्जओ=प्रार्यकः प्रपितामहः । ३. धणियं गाढं ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्ते[1] य बारसाहे अम्मापीईहिं[2] निययकुलविहिणा ।
धणदेवोत्ति य सम्मं नामं निव्वत्तियं तस्स ॥ १७८ ॥

अह पंचधाइकयविविहलालणो दारओ स वड्ढंतो ।
पत्तो कुमारभावं माउपिउणं कयाणंदो ॥ १७९ ॥

अब्भहियअट्ठवरिसो सम्मं अब्भसियसयलविज्जस्स ।
उज्झायस्सुवणीओ[3] विन्नायकलाकलावस्स ॥ १८० ॥

थेवेणं[4] वि कालेणं अहिगमियाओ समत्थविज्जाओ[5] ।
सयले कलाकलावे अह जाओ सोवि पत्तट्ठो ॥ १८१ ॥

तत्तो गहियकलावो समाणिओ नियघरम्मि धणदेवो ।
पिउणा से उज्झाओ स पूइओ वत्थमाईहिं ॥ १८२ ॥

कमसो पवड्ढमाणो धणदेवो जोव्वणं समणुपत्तो ।
निज्जियअणंगरुवो जाओ वरकामिणीदइओ ॥ १८३ ॥

---

वृत्ते च द्वादशाह्निऽम्बापितृभ्यां निजकुलविधिना ।
धनदेव इति च सम्यग् नामनिवर्त्तितं तस्य ॥ १७८ ॥

अथ पञ्चधात्रीकृतविविधलालनो दारकःस वर्धमानः ।
प्राप्त कुमारभावं मातापित्र्योः कृताऽनन्दः ॥ १७९ ॥

अभ्यधिकाष्टवर्षः सम्यगभ्यस्तसकलविद्यस्य ।
उपाध्यायस्योपनीतो विज्ञानकलाकलापस्य ॥ १८० ॥

स्तोकेनाऽपि कालेनाऽधिगताः समस्तविद्याः ।
सकले कलाकलापेऽथ जातः सोऽपि प्राप्तार्थः ॥ १८१ ॥

ततो गृहीतकलापः समानीतो निजगृहे धनदेवः ।
पित्रा तस्योपाध्यायस्स पूजितो वस्त्रादिभिः ॥ १८२ ॥

क्रमशः प्रवर्धमानो धनदेवो यौवनं समनुप्राप्तः ।
निर्जितानङ्गरूपो जातो वरकामिनीदयितः ॥ १८३ ॥

---

१. वृत्तं जातं। २. अम्बापितृभ्याम् ३. उपनीतः=समर्पितः। ४. स्तोकेन। ५. समस्तविद्याः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सो समाणजोव्वणरूवाइसएहिं वरवयंसेहिं।
परियरिओ ओहिंडइ[1] ईसरलीलं विडंबंतो ॥ १८४ ॥

अह अन्नया कयाइवि वंयंसविसरेण[2] परिगओ एसो ।
नयराओ नीहरिओ पत्तो य मणोरमुज्जाणे ॥ १८५ ॥

दिट्ठो य तत्थ एगो पुरिसो गुरुसोयपरिगओ तेण ।
वावीतडोवविट्ठो[3] अंसुजलोहलियगंडयलो ॥ १८६ ॥

धणदेवो तं दट्ठुं पुरिसं उप्पन्नगरुयकारुण्णो ।
आसन्ने गंतूणं महुरगिराए इमं भणति ॥ १८७ ॥

को सि तुमं कत्तो वा किं वा ते सोयकारणं भद्द ! ? ।
एवं च तेण भणिओ सो पुरिसो एवमुल्लवइ ॥ १८८ ॥

कह तम्मि वज्जरिज्जइ दुक्खं गुरुदुक्खपीडियमणेहिं ।
न कुणइ जो पडियारं[4] न य दुहिओ अहव जो होइ ? ॥ १८९ ॥

---

**अथ स समानयौवनरूपातिशयै -र्वरवयस्यैः ।**
**परिवृत आभ्राम्यति ईश्वरलीलां विडम्बयन् ॥ १८४ ॥**

**अथान्यदा कदापि वयस्यविसरेण परिगत एषः ।**
**नगरान्निसृतः प्राप्तश्च मनोरमोद्याने ॥ १८५ ॥**

**दृष्टश्च तत्रैकः पुरुषो गुरुशोकपरिगतस्तेन ।**
**वापीतटोपविष्टोऽश्रुजलौघलिप्तगण्डस्थलः ॥ १८६ ॥**

**धनदेवस्तं दृष्ट्वा पुरुषमुत्पन्नगुरुककारुण्यः ।**
**आसन्नं गत्वा मधुरगिरेदं भणति ॥ १८७ ॥**

**कोऽसि त्वं कुतो वा किंवा ते शोककारणं भद्र ! ।**
**एवञ्च तेन भणितः स पुरुष एवमुल्लपति ॥ १८८ ॥**

**कथं तस्मिन् कथ्यते दुःखं गुरुदुःखपीडितमनोभिः ।**
**न करोति यः प्रतिकारं न च दुःखितोऽथवा यो भवति ॥ १८९ ॥**

---

१. स्वेच्छया परिभ्रमति । २. वयस्यविसरेण = मित्रसमूहेन । ३. वापीतटोपविष्टः ।
४. प्रतिकारम् = उपायम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहवि हु कहेमि सुंदर! मा वयणं तुज्झ निप्फलं जाउ[1] ।
सीहगुहानामेणं अइविसमा अत्थि पल्लित्ति ॥ १९० ॥

तीए य सुपइट्ठो पल्लिवई तस्स भारिया लच्छी ।
तीए पुत्तो जाओ जयसेणो जणमणाणंदो ॥ १९१ ॥

तस्स य [2]बालग्गहो अहयं नामेण देवसम्मोत्ति ।
[3]कीलामि य जयसेणं तत्थ अहं विविहकीलाहिं ॥ १९२ ॥

अह अन्नया य [4]बाहिं विणिग्गओ गेण्हिऊण जयसेणं ।
पुरिसेहिं दोहि दिट्ठो तत्थ अहं जोगिरूवेहिं ॥ १९३ ॥

संभासिऊण पुव्विं दिन्नो मह तेहिं पवरतंबोलो ।
तम्मि समाणियमित्ते मइसंमोहो महं जाओ ॥ १९४ ॥

तत्तो कुमरसमेओ तेसिमणुमग्गमेव लग्गो हं ।
जाणामि नेव किंचिवि विमोहिओ तेहिं पावेहिं ॥ १९५ ॥

---

तथापि खलु कथयामि सुन्दर ! मा वचनं तव निष्फलं यातु ।
सिंहगुफानाम्नाऽतिविषमाऽस्ति पल्लीति ॥ १९० ॥

तस्याश्च सुप्रतिष्ठः पल्लिपतिस्तस्य भार्या लक्ष्मीः ।
तस्याः पुत्रो जातो जयसेनो जनमन-आनन्दः ॥ १९१ ॥

तस्य च बालपालकोऽहं नाम्ना देवशर्मेति ।
क्रीडयामि च जयसेनं तत्राऽहं विविधक्रीडाभिः ॥ १९२ ॥

अथान्यदा च बहि-र्विर्निगतो गृहीत्वा जयसेनम् ।
पुरुषाभ्यां द्वाभ्यां दृष्टस्तत्राऽहं योगिरुपाभ्याम् ॥ १९३ ॥

संभाष्य पूर्वं दत्तो मम ताभ्यां प्रवरतम्बोलः ।
तस्मिन् समानीतमात्रे मतिसंमोहो मम जातः ॥ १९४ ॥

ततः कुमारसमेतस्तयोरनुमार्गमेव लग्नोऽहम् ।
जानामि नैव किञ्चिदपि विमोहितस्ताभ्यां पापाभ्याम् ॥ १९५ ॥

---

१. यातु । २. बालपालकः । ३. क्रीडयामि खेलयामि । ४. बहिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेहि समेतो अहयं वयामि जा कित्तियंपि भूभागं ।
ताव य तिंसिएण[1] मए एगम्मि उववणनिगुंजे ॥ १९६ ॥

बहुविहतरुफलकलुसं पीयं नीरं तु तप्पभावेण ।
जाओ सत्थसरीरो विचिंतियं ताहि मे एयं ॥ १९७ ॥

रयणीइ गहिय कुमरं नासिस्सम्मिमाणं[2] पावपुरिसाणं ।
इय चिंतिय चलिओ हं अलक्खिओ चेव सह तेहिं ॥ १९८ ॥

पत्ताए रयणीए निसुया[3] अन्नोन्नमुल्लवेमाणा ।
एएण बालएणं सिज्झिस्सइ जक्खिणी अम्हं ॥ १९९ ॥

तुंगीयपव्वयम्मी[4] पत्ता [5]हुंणिऊण बालयं एयं ।
सिद्धाए जक्खिणीए पाविस्सामो निहिं तं तु ॥ २०० ॥

इय तेसिं सोऊणं भणियं, भयवेविरो[6] दढं जाओ ।
सुत्तेसु तेसु घेत्तुं जयसेणं ताहि नट्ठो हं ॥ २०१ ॥

---

**ताभ्यां समेतोऽहकं व्रजामि यावत्कियदपि भूभागम् ।**
**तावच्च तृषितेन मयैकस्मिन्नुपवननिकुञ्जे ॥ १९६ ॥**

**बहुविधतरुफलकलुषं पीतं नीरं तु तत्प्रभावेन ।**
**जातः स्वस्थशरीरो विचिन्तितं तदा मयैतद् ॥ १९७ ॥**

**रजन्यां गृहीत्वा कुमारं नङ्क्ष्यामि आभ्यां पापपुरुषाभ्याम् ।**
**इति चिन्तयित्वा चलितोऽहमलक्षितश्चैव सह ताभ्याम् ॥ १९८ ॥**

**प्राप्तायां रजन्यां निश्रुतावन्योन्यमुल्लपन्तौ ।**
**एतेन बालकेन सेत्स्यति यक्षिणी आवयोः ॥ १९९ ॥**

**तुङ्गीकपर्वते प्राप्तौ हुत्वा बालकमेतम् ।**
**सिद्धायां यक्षिण्यां प्राप्स्यावो निधिं तन्तु ॥ २०० ॥**

**इति तयोः श्रुत्वा भणितं भयवेपनशीलो दृढं जातः ।**
**सुप्तयोस्तयोर्गृहीत्वा जयसेनं तस्मान्नष्टोऽहं ॥ २०१ ॥**

---

१. तृषितेन । २. पञ्चम्याः स्थानेऽत्र षष्ठी । ३. श्रुतौ । ४. एतन्नाम्नि पर्वते । ५. हुत्वा । ६. वेपनशीलः कम्प्रः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहकहवि हु नासंतो गवेसमाणेहिं तेहिं हं पत्तो ।
बंधित्तु तओ वसभे समारुहेत्ता इहाणीओ ॥ २०२ ॥

अज्ज पुणो इह नयरे संपत्तो सत्तमाउ दिवसाउ ।
[1]तन्हाछुहाभिभूओ मुक्को हं एत्थ उज्जाणे ॥ २०३ ॥

ता भद्द ! इमं गुरुसोयकारणं साहियं मए तुम्ह ।
जइ अत्थि कावि सत्ती ता रक्खह बालयं [2]तं तु ॥ २०४ ॥

भणियं धणदेवेणं संपइ चिट्ठंति कत्थ ते पुरिसा ? ।
सो भणइ गहियकुमरो एगो नग्गोहहेट्ठम्मि[3] ॥ २०५ ॥

[4]बीओ पुरे पविट्ठो सुराइकज्जेण संपयं चेव ।
इय भणिए धणदेवो जोगियपासे गओ तुरियं ॥ २०६ ॥

भणिओ य तेण एसो एयं मह देसु बालयं भद्द ! ।
अहयं सुवन्नलक्खं तुह देमि, न एत्थ संदेहो ॥ २०७ ॥

---

**कथंकथमपि खलु नश्यन् गवेषयमाणाभ्यां ताभ्यामहं प्राप्तः ।**
**बद्धवा ततो वृषभं समारुह्येहानीतः ॥ २०२ ॥**

**अद्य पुनरिह नगरे संप्राप्तः सप्तमात् दिवसात् ।**
**तृष्णाक्षुधाभिभूतो मुक्तोऽहं अत्रोद्याने ॥ २०३ ॥**

**तस्माद् भद्र ! एतद्गुरुशोककारणं कथितं मया तव ।**
**यद्यस्ति काऽपि शक्तिस्तर्हि रक्षत बालकं तन्तु ॥ २०४ ॥**

**भणितं धनदेवेन संप्रति तिष्ठतःकुत्र तौ पुरुषौ ।**
**स भणति गृहीतकुमार एको न्यग्रोधस्याधः ॥ २०५ ॥**

**द्वितीयः पुरे प्रविष्टः सुरादिकार्येण साम्प्रतं चैव ।**
**इति भणिते धनदेवो योगीपार्श्वे गतस्त्वरितम् ॥ २०६ ॥**

**भणितश्च तेनैष एतं मह्यं देहि बालकं भद्र ! ।**
**अहकं सुवर्णलक्षं ते ददामि, नात्र सन्देहः ॥ २०७ ॥**

---

१. तृष्णा=पिपासा. छुहा=क्षुत् ताभ्यामभिभूतः पीडितः । २. त्वम् । ३. न्यग्रोधस्याधः ।
४. द्वितीयः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो जोगिएण भणियं जाव न सो एइ दुइयओ[1] जोगी ।
ताव मह देसु लक्खं जेण इमं देमि तुह बालं ॥ २०८ ॥

तत्तो धणदेवेणं समप्पियं अंगुलीययं तस्स ।
दीणारलक्खमुल्लं मुक्को य इमेण जयसेणो ॥ २०९ ॥

घेत्तूण अंगुलीयं सिग्घयरं जोगिओ तओ नट्ठो ।
घेत्तूण य जयसेणं धणदेवो देवसम्मस्स ॥ २१० ॥

पासम्मि समल्लीणो भणिओ एसो य गिन्ह कुमरत्ति ।
तत्तो य देवसम्मो पहसियवयणो इमं भणइ ॥ २११ ॥

तं सामी तं बंधू तं चिय मह जीयदायगो सुयणु ! ।
किं किं न कयं तुमए जीयं कुमरस्स दिन्तेण ? ॥ २१२ ॥

मह सामियस्स दिन्नं, जीयं जं पाणवल्लहो पुत्तो ।
पाविट्ठदुट्ठजोगियकयंतवयणाउ नीहरिओ ॥ २१३ ॥

---

ततो योगिना भणितं यावन्न स एति द्वितीयो योगी ।
तावन्मह्यं देहि लक्षं येनेमं ददामि ते बालम् ॥ २०८ ॥

ततो धनदेवेन समर्पितमङ्गुलीयकं तस्य ।
दीनारलक्षमूल्यं मुक्तश्चाऽनेन जयसेनः ॥ २०९ ॥

गृहीत्वाऽङ्गुलीयं शीघ्रतरं योगीस्ततो नष्टः ।
गृहीत्वा च जयसेनं धनदेवो देवशर्मणः ॥ २१० ॥

पार्श्वे समालीनो भणित एषश्च गृहाण कुमार इति ।
ततश्च देवशर्मा प्रहसितवदन इदं भणति ॥ २११ ॥

त्वं स्वामी त्वं बन्धुः त्वं चैव मम जीवितदायकः सुतनो! ।
किं किं न कृतं त्वया जीवितं कुमारस्य ददता ? ॥ २१२ ॥

मम स्वामिनो दत्तं जीवितं यत्प्राणवल्लभः पुत्रः ।
पापिष्ठदुष्टयोगिकृतान्तवदनान्निःसृतः ॥ २१३ ॥

---

१. द्वितीयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो धवदेवेणं नीओ गेहम्मि भोइओ सम्मं ।
सत्थस्स मेलिऊणं पट्ठविओ निययठाणम्मि ॥ २१४ ॥

एसो पुण वुत्तंतो वित्थरिओ तत्थ पुरवरे सहसा ।
[1]अइचाई धणदेवो देइ धणं [2]लक्खगन्नेहिं ॥ २१५ ॥

ता जत्थ जत्थ दीसइ धणदेवो नियवयंसपरियरिओ ।
अन्नोन्नं पुरलोओ तत्थ इमं विविहमुल्लवइ ॥ २१६ ॥

एसो सो धणदेवो चाई भोगी य तह कलाकुसलो ।
अत्थिजणपत्थिओ जो वरिसइ लक्खेहिं धन्नोत्ति ॥ २१७ ॥

अन्ने पुण मच्छरिणो भणंति नियचायगव्विया तत्थ ।
किं [3]सलहिज्जइ एसो नियपिउलच्छीए खयकालो ?॥ २१८ ॥

तं दाणमिह पसस्सं तं चेव य पोरुसस्स वुड्ढिकरं ।
जं नियपरक्कमेणं [4]विढविय विलसिज्जइ जहिच्छं ॥ २१९ ॥

---

**ततो धनदेवेन नीतो गेहे भोजितः सम्यक् ।**
**सार्थस्य मेलयित्वा प्रस्थापितो निजस्थाने ॥ २१४ ॥**

**एषः पुनर्वृत्तान्तो विस्तृतस्तत्र पुरवरे सहसा ।**
**अतित्यागी धनदेवो ददाति धनं लक्षगण्यैः ॥ २१५ ॥**

**तस्मात् यत्र यत्र दृश्यते धनदेवो निजवयस्यपरिवृत्तः ।**
**अन्योन्यं पुरलोकस्तत्रेदं विविधमुल्लपति ॥ २१६ ॥**

**एष स धनदेवस्त्यागी भोगी च तथा कलाकुशलः ।**
**अर्थिजनप्रार्थितो यो वर्षति लक्षै-र्धन्य इति ॥ २१७ ॥**

**अन्ये पुन-र्मत्सरिणो भणन्ति निजत्यागगर्वितास्तत्र ।**
**किं श्लाघ्यते एष निजपितृलक्ष्म्या क्षयकालः ? ॥ २१८ ॥**

**तद् दानमिह प्रशस्यं तच्चैव पौरुषस्य वृद्धिकरम् ।**
**यद्निजपराक्रमेणाऽर्जयित्वा विलस्यते यथेच्छम् ॥ २१९ ॥**

---

१. अतित्यागी=दातृप्रवरः । २. लक्षगण्यैः लक्षसंख्याभिः । ३. श्लाघ्यते । ४. विढविय=अर्जित्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं पुण अज्जयपज्जयजणयज्जियअत्थमज्झओ दाणं ।
परमत्थओ कलंकं तयं तु पुरिसाभिमाणीणं ॥ २२० ॥

भणियं च बप्प[1]विढविय दव्वेणं को न विड्डिरं[2] कुणइ ।
सइ[3]विढवणविलासणयं जणयइ विरलं सुयं नारी ॥ २२१ ॥

एयं जणप्पवायं निसुणित्ता चिंतई उ धणदेवो ।
सच्चं भणंति एए न हु जुत्तं मज्झ एरिसयं ॥ २२२ ॥

ता परदेसं गंतु विढवित्ता भूरिभूइपब्भारं ।
विलसामि जहिच्छाए दीणाऽणाहाण अविसंको ॥ २२३ ॥

इय चिंतिय धणदेवो माउपिऊणं सगा[4]समागम्म ।
विणयपणउत्तमंगो कयंजली भणिउमाढत्तो[5] ॥ २२४ ॥

तुब्भेहिं अणुन्नाओ गंतूणं ताय! अन्नदेसम्मि ।
विढवामि भूरिदव्वं इय इच्छा संपयं मज्झ ॥ २२५ ॥

---

यत्पुन आर्यकप्रार्यकजनकार्जितार्थमध्यतो दानम् ।
परमार्थतः कलङ्कं तत्तु पुरषाभिमानीनाम् ॥ २२० ॥

भणितं च जनकार्जितं द्रव्येण को नाऽऽभोगं करोति ।
स्वयमर्जितविलसनं जनयति विरलं सुतं नारी ॥ २२१ ॥

एतज्जनप्रवादं निश्रुत्य चिन्तयति तु धनदेवः ।
सत्यं भणन्त्येते न खलु युक्तं मम एतादृशम् ॥ २२२ ॥

तस्मात्परदेशं गत्वाऽर्जयित्वा भूरिभूतिप्राग्भारम् ।
विलसामि यथेच्छया दीनाऽनाथानामविशङ्कः ॥ २२३ ।

इति चिन्तयित्वा धनदेवो मातापित्रोः समीपमागम्य ।
विनयप्रणतोत्तमाङ्गः कृताञ्जलि-र्भणितुमारब्धः ॥ २२४ ॥

युवाभ्यामनुज्ञातो गत्वा तात ! अन्यदेशे ।
अर्जयामि भूरिद्रव्यमितीच्छा सांप्रतं मम ॥ २२५ ॥

---

१. बप्पो पिता तेनार्जितद्रव्येण । २. विड्डिरं= आभोगम्। ३. सइ=स्वयं। ४. सकाशं= समीपमागम्य । ५. आरब्धः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता अणुजाणउ[1] ताओ पुज्जंतु[2] मणोरहा इमे मज्झ ।
गच्छामि अन्नदेसं वणिज्जबुद्धीए सयमेव ॥ २२६ ॥

भणियं जणणीए तओ गमणवयणंपि दुस्सहं पुत्त! ।
अच्छउ ता दूरे च्चिय पुण गमणं अन्नदेसम्मि ॥ २२७ ॥

अन्नं च अत्थि लच्छी तुह जणएणावि अज्जिया पुत्त !।
जीए विलसंतोवि हु अंतं काउं न सत्तो[3] सि ॥ २२८ ॥

अविय । जणएण य तुह पुत्तय ! अत्थुप्पत्तीए कारणं जं जं ।
तं सव्वं कारवियं किं कज्जं तुह वणिज्जेण ? ॥ २२९ ॥

भणियं धणदेवेणं जावज्जवि अम्मि[4]! बालओ पुत्तो ।
ताव नियजणणिसिहिणे फरिसंतो लहइ सोहंपि ॥ २३० ॥

वोलीणबालभावो छिप्पइ[5] पावेण तं करेमाणो ।
तह पिउलच्छी जणणिव्व होइ सुसमत्थपुत्ताणं ॥ २३१ ॥

---

तर्हि अनुजानातु तातः पूर्यन्तां मनोरथा इमे मम ।
गच्छाम्यिन्यदेशं वणिग्बुद्ध्या स्वयमेव ॥ २२६ ॥

भणितं जनन्या तव गमनवचनमपि दुस्सहं पुत्र ! ।
आस्तां तस्मात् दूरैव पुन-र्गमनमन्यदेशे ॥ २२७ ॥

अन्यच्चाऽस्ति लक्ष्मीस्तव जनकेनाऽपि अर्जिता पुत्र ! ।
यया विलसन्नपि खल्वन्तःकर्तुं न शक्तोऽसि ॥ २२८ ॥

अपि च । जनकेन च तव पुत्रक ! अर्थोत्पत्याः कारणं यद्यत् ।
तत् सर्वं कारितं किं कार्यं तव वाणिज्येन ? ॥ २२९ ॥

भणितं धनदेवेन यावद्यपि अम्बे ! बालकः पुत्रः ।
तावन्निजजननीस्तनौ कृषन् लभते शोभामपि ॥ २३० ॥

अतिक्रान्तबालभावः स्पृश्यते पापेण तत् कुर्वन् ।
तथा पितृलक्ष्मीर्जननीव भवति सुसमर्थपुत्राणाम् ॥ २३१ ॥

---

१. अनुजानातु=आज्ञपयतु । २. पूर्यन्ताम् । ३. शक्तः । ४. अम्ब ! । ५. स्पृश्यते ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सुसमत्थो वि हु जो जणयअज्जियं संपयं निसेवेइ ।
सो अम्मि! ताव लोए [1]मंमंव उवहासं लहइ ॥ २३२ ॥

इय भणिउं धणदेवो अंसुजल[2]उप्फुण्णलोयणो सहसा ।
[3]मुंक्कलह इह भणंतो पडिओ जणणीए चलसेणु ॥ २३३ ॥

तो धणधम्मो सेट्ठी नाउं अवसाण- (य) कारणं तस्स।
वज्जरइ पुत्तं ! को तुज्झ वंछिए कुणइ विग्घंति ? ॥ २३४ ॥

जणएणं से जणणी पुत्तविओगं अणिच्छमाणीवि ।
कहकहवि हु संठविया विन्नायसुयावमाणेण ॥ २३५ ॥

एवं सो धणदेवो [4]मायावित्तेहिं अब्भणुन्नाओ ।
परदेसगमणजोगं गहिऊण [5]चउव्विहं भण्डं ॥ २३६ ॥

अट्ठाहियमहिमाओ कारावेत्ता जिणिंदभवणेसु ।
संपूइय साहुजणं संमाणिय माणणिज्जजणं ॥ २३७ ॥

---

**सुसमर्थोऽपि खलु यो जनकार्जितं संपद् निषेवते ।**
**स अम्बे ! तावल्लोके ममेवोपहास्यतां लभते ॥ २३२ ॥**

**इति भणित्वा धनदेवोऽश्रुजलापूर्णलोचनस्सहसा ।**
**मुत्कलत इह भणन् पतितो जनन्याः चरणयोः ॥ २३३ ॥**

**ततो धनधर्म्मा श्रेष्ठी ज्ञात्वाऽवसानं कारणं तस्य ।**
**कथयति पुत्र ! कस्तव वाञ्छिते करोति विघ्नमिति ॥ २३४ ॥**

**जनकेन तस्य जननी पुत्रवियोगमनिच्छन्त्यपि ।**
**कथंकथमपि खलु संस्थापिता विज्ञातसुताऽपमानेन ॥ २३५ ॥**

**एवं स धनदेवो मातापितृभ्यामभ्यनुज्ञातः ।**
**परदेशगमनयोग्यं गृहीत्वा चतुर्विधं भाण्डम् ॥ २३६ ॥**

**अष्टाह्निकामहिमानं कारयित्वा जिनेन्द्रभवनेषु ।**
**संपूज्य साधुजनं सन्मान्य माननीयजनम् ॥ २३७ ॥**

१. ममेवोपहास्यताम् । २. उप्फुण्णं=आपूर्णम् । ३. मुक्कलं=उचितं, स्वैरं वा मां कुरुत।
४. मातापितृभ्याम् । ५. चतुर्विधम्, गणिमधरिममेयपारिच्छेद्यभेदात् ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयलम्मि तम्मि नयरे कारिय आघोसणं जणे मिलिए ।
नेमित्तियआइट्ठे सुहदिवसे विहियमंगल्ले ॥ २३८ ॥

गहिऊण पवरसउणं अंगीकाउं कुसग्गवरनयरं ।
हियबंधुवणियसहिओ नीहरिओ नियनयराओ ॥ २३९ ॥ चतुर्भिः कलापकम् ॥

एवं सो धणदेवो संवाहियसहपयट्ट[1]जणनियरो ।
लहुलहुपयाणएहिं वच्चइ सह गरुयसत्थेण ॥ २४० ॥

तत्तोऽणुवासरं सो सत्थो वसिमं[2] अइक्कमेऊण ।
अह कमसो संपत्तो एक्कं अइभीसणं अडविं ॥ २४१ ॥

जत्थ अदीसंताणवि घणपत्तलपउरपायवत्तणओ ।
कूइयसरसंसवणा गम्मइ विहगाण अत्थित्तं ॥ २४२ ॥

अन्नं तु जीए[3] लोया नीइपहाणस्स पुहइपालस्स ।
नयरीए इव न कुणंति कहवि उम्मगसंचरणं ॥ २४३ ॥

---

**सकले तस्मिन्नगरे कारयित्वाऽऽघोषणं जने मिलिते ।**
**नैमित्तिकादिष्टे शुभदिने विहितमाङ्गल्ये ॥ २३८ ॥**

**गृहीत्वा प्रवरशकुनमङ्गीकृत्य कुशाग्रवरनगरम् ।**
**हितबन्धुवणिक्सहितो निःसृतो निजकनगरात् ॥२३९॥चतसृभिः कलापकम्॥**

**एवं स धनदेवः संवाहितसहप्रवृत्तजननिकरः ।**
**लघुलघुप्रयाणकैः व्रजति सह गुरुकसार्थेन ॥ २४० ॥**

**ततोऽनुवासरं स सार्थो वसतिमतिक्रम्य ।**
**अथ क्रमशः संप्राप्त एकामतिभीषणामटवीम् ॥ २४१ ॥**

**यत्राऽपश्यतामपि घनपत्रलप्रचुरपादपत्वात् ।**
**कूञ्जितस्वरसंशब्दाद्गम्यते विहङ्गानामस्तित्वम् ॥ २४२ ॥**

**अन्यच्च यस्यां लोका नीतिप्रधानस्य पृथिवीपालस्य ।**
**नगर्यामिव न कुर्वन्ति कथमप्युन्मार्गसञ्चरणम् ॥ २४३ ॥**

---

१. पयट्टो=प्रवृत्तः । २. वसिमं=वसतिम् । ३. यस्याम् ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

वियडाडवीए तीए मज्झंमज्झेण वयइ सो सत्थो ।
नियकोलाहलपडिरवपडिपूरियजुन्नतरुविवरो ॥ २४४ ॥

तुंगतरुनियरसाहप्पसाहसंछन्नअंबरत्तणओ ।
सव्वंपि वहइ दियहं अलग्गरविकिरणसंतावो ॥ २४५ ॥

कविकगुयुगरुतरवोक्कारसवणसहसुत्तसंतबहुवसहो ।
उत्तसियवसहवालणनिमित्तपमुक्कहक्कारो ॥ २४६ ॥

हक्कारसद्दपडिरवसंसवणुत्तासियाण सयराहं ।
आयन्नंतो दिसि दिसि घूयाणं भूरिहुंकारे॥ २४७ ॥

वसहकंठपलंबिरघंटिया-रणियपूरियभूरितरंबरो।
विसखुरुक्खयरेणुनिरंतरो, वयइ तत्थ स वाणियसत्थओ ॥ २४८ ॥

---

**विकटाटव्यां तस्यां मध्यंमध्येन व्रजति स सार्थः ।**
**निजकोलाहलप्रतिरवप्रतिपूरितजीर्णतरुविवरः ॥ २४४ ॥**

**तुङ्गतरुनिकरशाखाप्रशाखासञ्छन्नाऽम्बरतः ( त्वात् ) ।**
**सर्वमपि वहति दिवसमलग्नरविकिरणसंतापः ॥ २४५ ॥**

**कपिकृतगुरुतरबूत्कारश्रवणसहसोत्त्रसद्बहुवृषभः ।**
**उत्त्रसितवृषभवारणनिमित्तप्रमुक्तहक्कारः ॥ २४६ ॥**

**हक्कारशब्दप्रतिरवसंश्रवणोत्त्रसितानां शीघ्रम् ।**
**आकर्णयन् दिशि दिशि घूकानां भूरिहूङ्कारान् ॥ २४७ ॥**

**वृषभकण्ठप्रलम्बितघटिकारणितपूरितभूरितरऽम्बरः ।**
**वृषखुरोत्खातरेणुनिरन्तरः, व्रजति तत्र स वणिक्सार्थः ॥ २४८ ॥**

---

१. जुन्नं=जीर्णम् । २. कपि- । ३. सहसोत्त्रसत् । ४. वारण- । ५. सयराहं= शीघ्रम्।
६. आकर्णयन् । ७. वृषखुरोत्खातरेणुभिर्निरन्तरो=व्याप्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
[1]रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसो एत्थ [2]समप्पइ अडविपवेसस्स वन्नणो नाम ।
सुरसुन्दरिनामाए कहाए पढमो परिच्छेओ ॥ २५० ॥

---

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽत्र समाप्यते अटवीप्रवेशस्य वर्णनो नामा ।**
**सुरसुन्दरिनाम्न्याः कथायाः प्रथमः परिच्छेदः ॥ २५० ॥**

**॥ प्रथमः परिच्छेदः समाप्तः ॥**

---

१. रागग्गी= रागाग्निः । २. समाप्यते ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

## ॥ द्वितीयः परिच्छेदः ॥

अह अन्नवासरम्मी कमेण बहु[1]वोलियाए अडवीए ।
गहिय जलासयमेगं अह सो आवासिओ सत्थो ॥ १ ॥

अह तम्मि सत्थलोए उ[2]ल्लद्दियसयलवसहनियरम्मि।
जलइंधणाइअट्ठा इओ तओ प[3]रियडंतम्मि ॥ २ ॥

पमुक्केसु दिसि दिसि चरणत्थं सव्ववसहमहिसेसु ।
पारद्धेसु य तक्कालमुचियकिच्चेसु लोएण ॥ ३ ॥

नाऊण प[4]णिहिवसओ भोयणकज्जम्मि आउलं सत्थं ।
सत्थम्मि तम्मि पडिया झडित्ति भिल्लाण धाडित्ति ॥ ४ ॥ तिसृभिः कलापकम् ॥

---

**अथान्यवासरे क्रमेण बह्वतिकान्तायामटव्याम् ।**
**गृहीतं जलाशयमेकमथ स आवासितः सार्थः ॥ १ ॥**

**अथ तस्मिन् सार्थलोके भाराक्रान्तसकलवृषभनिकरे ।**
**जलेन्धनाद्यर्थेतस्ततः पर्यटति ॥ २ ॥**

**प्रमुक्तेषु दिशि दिशि चरणार्थं सर्ववृषभमहिषेषु ।**
**प्रारब्धेषु च तत्कालोचितकृत्येषु लोकेन ॥ ३ ॥**

**ज्ञात्वा प्रणिधिवशतो भोजनकार्ये आकुलं सार्थम् ।**
**सार्थे तस्मिन् पतिता झटिति भिल्लानां धाटीति ॥४॥ तिसृभिः कलापकम् ॥**

---

१. बह्वतिक्रान्तायाम् । २. उल्लद्दियं=भाराक्रान्तम् । ३. पर्यटति । ४. प्रणिधयश्चरपूरुषाः, तद्वशात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविय ।

नवमुग्गवन्नअड्डुणढक्किय[1]आजाणुभीसणसरीरा ।
मसिरासी इव काला कुवियकयंतोव्व दुप्पिच्छा[2] ॥ ५ ॥

खरबीभच्छसरीरा पलासपत्तेहिं विहियसेहरया ।
गुंजाफलरत्तच्छा[3] उब्भं[4]खरकेसमपब्भारा[5] ॥ ६ ॥

सनद्धबद्धकवया पट्ठिपएसाऽवणद्धतोणीरा ।
कन्नायड्ढिय[6]धणुहपद्ददीसंतभल्लोडा* ॥ ७ ॥

केवि असिवग्गहत्था केवि हु करगहियलउडया[7] अवरे।
गुंफण[8]फेरणसुंकारएहिं जीयं व अवणेंता ॥ ८ ॥

धिट्ठानिट्ठुरहियया दिसो दिसिं 'मारि मारि' भणमाणा।
अंन्नाया[9] एव कुओवि ज्झत्ति भिल्ला समावडिया ॥ ९ ॥ पञ्चभिः कुलकम् ॥

---

**अपि च ।**

**नवमुद्गवर्णाऽड्डुनाऽऽच्छादिताऽऽजानुभीषणशरीरा ।**
**मसिराशीव कालाः कुपितकृतान्त इव दुष्प्रेक्ष्याः ॥ ५ ॥**

**खरबीभत्सशरीराःपलाशपत्रैर्विहितशेखरकाः ।**
**गुञ्जाफलरक्ताक्षा उर्ध्वखरकेशप्राग्भाराः ॥ ६ ॥**

**सन्नद्धबद्धकवचाः पृष्ठप्रदेशाऽवनद्धतोणीराः ।**
**कर्णाकृष्टधनुःपृष्ठपश्यत्भल्लोडाः * ॥ ७ ॥**

**केऽपि असिव्यग्र ( वर्ग ) हस्ताः केऽपि खलु करगृहीतलकुटका परे ।**
**गुम्फणस्फुरणसुंत्कारैर्जीवितं वापनयन्तः ॥ ८ ॥**

**धृष्टा निष्ठुरहृदया दिशोदिशि मार्यताम् मार्यतां भणन्तः ।**
**अज्ञाता एव कुतोऽपि झटिति भिल्लाः समापतिताः ॥ ९ ॥ पञ्चभिः कुलकम् ॥**

---

१. ढक्कियं = आच्छादितं । २. दुष्प्रेक्षाः। ३. रक्ताक्षाः । ४. उब्भं = ऊर्ध्वम् । ५. पब्भारो = प्राग्भारः =समूहः । ६. कर्णाकृष्ट। * [-''भीलाडु'' इति भाषायां । ] ७. लगुडकः=यष्टिः । ८. चर्मादिमयं प्रहरणं, 'गोफण' इति भाषायां तस्य 'फेरणं' भ्रमणं तेन जाता ये 'सुंकारया' शब्दास्तैः। ९. अज्ञाताः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिएसु तओ तेसुं सत्थो सव्वो वि आउलीभूओ ।
भिल्लाण पउरभावा[1] वक्खेवा सत्थपुरिसाण ॥ १० ॥

अह तम्मि सरणरहिए ल्हसिज्जंते[2] समत्थसत्थम्मि ।
दप्पपरिपूरियंगा हक्किय जंपंति केवि नरा ॥ ११ ॥

रे! रे! पिसायरूवा ! कत्थिण्हिं जाह[3] दिट्ठिपहपडिया ।
पयडह सव्वं जइ अत्थि तुम्हमिह पोरिसं किंपि ॥ १२ ॥

केवि पुण भीरुहियया वरया[4] दसणउडगहियअंगुलिणो ।
हा! हा! रक्खह रक्खह एवं कलुणाइं जंपंति ॥ १३ ॥

केवि हु लुंटिज्जंता इओ तओ तह पहम्ममाणा[5] य ।
कीवा[6] पलायणट्ठा तत्थ गवेसंति छिद्दाणि ॥ १४ ॥

केवि कहकहवि पावियछिद्दा गाढं च खसफसेमाणा ।
सणियं सणियं[7] ओसक्किऊण लीयंति गहणेसु[8] ॥ १५ ॥

---

**पतितेषु ततस्तेषु सार्थस्सर्वोऽपि आकुलीभूतः ।**
**भिल्लानां प्रचुरभावादवक्षेपात्सार्थपुरुषाणाम् ॥ १० ॥**

**अथ तस्मिन् शरणरहिते स्त्रस्यमाने समस्तसार्थे ।**
**दर्पपरिपूर्णाङ्गा आकार्य जल्पन्ति केऽपि नराः ॥ ११ ॥**

**रे ! रे ! पिशाचरूपा ! कुत्रेदानीं यास्यतो दृष्टिपथपतिताः ।**
**प्रकटयथ सर्वं यद्यस्ति युष्माकमिह पौरुषं किमपि ॥ १२ ॥**

**केऽपि पुन-र्भीरुहृदया वराका दशनपूटगृहीताऽङ्गुलयः ।**
**हा ! हा ! रक्षत रक्षत एवं करुणानि जल्पन्ति ॥ १३ ॥**

**केऽपि खलु लुट्यमाना इतस्ततस्तथा प्रहन्यमानाश्च ।**
**क्लीबाः पलायनार्थास्तत्र गवेषयन्ति छिद्राणि ॥ १४ ॥**

**केऽपि कथंकथमपि प्राप्तछिद्रा गाढं च सरत्सरमाणाः ।**
**शनैःशनैरपसृत्य लियन्ते गहनेषु ॥ १५ ॥**

---

१. प्रचुरभावात् । २. स्त्रस्यमाने । ३. यास्यत । ४. वराकाः । ५. प्रहन्यमानाः । ६. क्लीबाः । ७. शनैः शनैः । ८. वनेषु ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवि हु वेविरदेहा सिढिलीकयकच्छबंधणा धणियं ।
पमुक्कपुरिसयारा अंगीकयदीणजणचेट्ठा ॥ १६ ॥

परिचत्तसयललज्जा कहकहमवि मोक्खणं विमग्गंता ।
तेसिं चिय पावाणं, कुणंति बहुचाडुकम्माणि ॥ १७ ॥

केवि हु मयं[1]मिव भूपट्ठिसंठियं अप्पयं[2] पयंसंति[3] ।
केवि हु छुहंति गंठिं महीए पक्खाणि जोएत्ता ॥ १८ ॥

जेवि हु इओ तओ इंधणाइअट्ठा गयासि सत्थाओ ।
तेवि हु कलयलसद्दं सोउं वच्चंति दूरयरं ॥ १९ ॥

रे ! लेह[4] हणह बंधह मारह वयणाइं भरह धूलीए ।
[5]सुम्मंति तत्थ सत्थे दिसि दिसि एवंविहा सद्दा ॥ २० ॥

एयावसरम्मि तओ पासित्तु इओ तओ विलुम्पंतं ।
भिल्लेहिं सत्थलोयं कइवयनियपुरिसपरियरिओ ॥ २१ ॥

---

केऽपि खलु वेपमानदेहाः शिथिलीकृतकक्षबन्धनाः गाढम् ।
प्रमुक्तपुरुषकाराऽङ्गीकृतदीनजनचेष्टाः ॥ १६ ॥

परित्यक्तसकललज्जा कथंकथमपि मोक्षणं विमार्गयन्तः ।
तेषाञ्चैव पापानां कुर्वन्ति बहुचाटुकर्माणि ॥ १७ ॥

केऽपि खलु मृतमिव भूपृष्ठस्थितात्मानं प्रदर्शयन्ति ।
केऽपि खलु क्षिपन्ति ग्रन्थिं मह्यां पक्षयोर्दृष्ट्वा ॥ १८ ॥

येऽपि खलु इतस्तत इन्धनार्थं गता ऽऽसीत् सार्थतः ।
तेऽपि खलु कलकलशब्दं श्रुत्वा व्रजन्ति दूरतरम् ॥ १९ ॥

रे ! लात हत बध्नीत म्रियध्वम् वचनानि -बिभृत धूलीः ।
श्रूयन्ते तत्र सार्थे दिशि दिशि एवंविधाः शब्दाः ॥ २० ॥

एतदवसरे ततो दृष्ट्वा इतस्ततो विलुम्पंतं ।
भिल्लैस्सार्थलोकं कतिपयनिजपुरुषपरिवृत्तः ॥ २१ ॥

---

१. मृतम्=मृतकम् । २. आत्मानम् । ३. प्रदर्शयन्ति । ४. लात=गृह्णीत । ५. श्रूयन्ते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उप्पाएंतो तेसिं [१]ओगिईए चेव चित्तसंखोहं ।
व[२]सुनंदयखग्गकरो धणदेवो एवमुल्लवइ ॥ २२ ॥

रे! रे! पावा! जइ अत्थि तुम्ह इह कावि दप्पकंडूई[३]।
ता हवह मज्झ पुरओ सहसा तं जेण [४]अवणेमि ॥ २३ ॥

मा भणह जं न भणियं एस [५]कसवट्टओ सुपुरिसाण ।
न हि नियजुवइसल[६]हिया पुरिसा पुरिसत्तणमुवेंति ॥ २४ ॥

हा! धी! धी! एयस्स उ रे! दुट्ठा! तुम्ह पुरिसगारस्स ।
नासंतलोयपट्ठीधावणउवलद्धपसरस्स ॥ २५ ॥

एवं च निसामित्ता दो[७]च्चं त[८]च्चं समुल्लवंतस्स ।
धणदेवस्सुल्लावे सुहडाणवि भूरिभयजणगे ॥ २६ ॥

रे! रे! लेह इमस्सवि फे[९]डेमो धीरि[१०]यं किराडस्स ।
एवं समुल्लवंता वलिया ते झत्ति तयभिमुहं ॥ २७ ॥

---

**उत्पादयंस्तेषामाकृत्या चित्तसंक्षोभम् ।**
**वसुनन्दकखड्गकरो धनदेव एवमुल्लपति ॥ २२ ॥**

**रे ! रे ! पापाः ! यद्यस्ति युष्माकमिह काऽपि दर्पकण्डूतिः ।**
**तर्हि भवत मम पुरतः सहसा तां येनाऽपनयामि ॥ २३ ॥**

**मा भणत यन्न भणितमेष कषपट्टकः सुपुरुषाणाम् ।**
**न हि निजयुवतिश्लाघिताः पुरुषाः पुरुषत्वमुपयन्ति ॥ २४ ॥**

**हा ! धिग् ! धिग् ! एतस्य तु रे ! दुष्टाः ! यूयं पुरुषकारस्य ।**
**नश्यल्लोकपृष्ठधावनोपलब्धप्रसरस्य ॥ २५ ॥**

**एवञ्च निशम्य द्विः त्रिः समुल्लपन्तः ।**
**धनदेवस्योल्लापे सुभटानामपि भूरिभयजनके ॥ २६ ॥**

**रे ! रे ! लात अस्याऽपि भ्रंशयामो धीरतां किरातस्य ।**
**एवं समुल्लपन्तो वलितास्ते झटिति तदभिमुखम् ॥ २७ ॥**

---

१. आकृत्या । २. वसुनन्दक एतदाख्यो यः खड्ग स करे यस्य सः। ३. कण्डूतिः पामा। ४. अपनयामि । ५. कषपट्टकः । ६. सलहिया=श्लाधिताः । ७. द्विः । ८. त्रिः। ९. भ्रंशयामः । १०. धीरताम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्ता य [1]आहसंता धणदेवस्संतियं समंता ते ।
तिक्खासिकोंततोमरभल्लीहि य पहरिउं लग्गा ॥ २८ ॥

धणदेवोवि असंको तहा [2]पयट्टेसु तेसु भिल्लेसु ।
ताणमु[3]रमोडिऊणं कुणइ नियपोरिसं पयडं ॥ २९ ॥

जह जह ते भिल्लनरा देंति पहारे दढं दयाहीणा ।
धणदेवो उण तह तह अब्भसियकलो पवंचेइ ॥ ३० ॥

अविय [4]फरएण केवि हु इओ तओ केवि कायकरणेणं ।
केवि हु दूराउच्चिय एंते खग्गाभिधाएण ॥ ३१ ॥

कहकहवि हु भिल्लेहिं गहिओ फरएहिं उट्ठहेऊण ।
भणियं च तेहिं रे! रे! एसो सत्था[5]हिवो वणिओ ॥ ३२ ॥

ता बंधिऊण एयं [6]अक्खयदेहं तु पल्लिनाहस्स ।
[7]अप्पेमो जेणेसो देइ वणिओ धणं बहुयं ॥ ३३ ॥

---

**प्राप्ताश्चाऽऽहसन्तो धनदेवसत्कं समन्तात्ते ।**
**तीक्ष्णासिकुन्ततोमरभल्लीभिश्च प्रहर्तुं लग्नाः ॥ २८ ॥**

**धनदेवोऽप्यशङ्कस्तथा प्रवृत्तेषु तेषु भिल्लेषु ।**
**तेषामुर ओड्डुयित्वा करोति निजपौरुषं प्रकटम् ॥ २९ ॥**

**यथा यथा ते भिल्लनरा ददति प्रहारान्दृढं दयाहीनाः ।**
**धनदेवः पुनस्तथा तथाऽभ्यसितकलः प्रवञ्चयति ॥ ३० ॥**

**अपि च फलकेन केऽपि खल्वितस्ततः केऽपि कायकरणेन ।**
**केऽपि खलु दूरादेव आयन्तं खड्गाभिधातेन ॥ ३१ ॥**

**कथंकथमपि खलु भिल्लैर्गृहीतो फलकैरुत्थाय ।**
**भणितं च तैः रे ! रे ! एष सार्थाधिपो वणिग् ॥ ३२ ॥**

**तर्हि बद्ध्वा एतमक्षयदेहन्तु पल्लिनाथस्य ।**
**अर्पयामो येनैष ददाति वणिग् धनं बहुकम् ॥ ३३ ॥**

---

१. ईषद्धसन्तः। २. प्रवृत्तेषु । ३. तेषां पुरः स्व वक्ष ओड्डुयित्वा संस्थाप्य, संमुखीभूयेत्यर्थः। ४. फलकेन । ५. सार्थाधिपः । ६. अक्षतदेहम् । ७. अर्पयामः ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तत्तो य तेहिं गंतुं पल्लीवइणो समप्पिओ एसो ।
एत्थंतरम्मि दिट्ठो धणदेवो देवसम्मेण ॥ ३४ ॥

तत्तो य तेण भणिओ सदुक्खमेवं तु पल्लिनाहस्स ।
हा! हा! सामिय! एसो महाणुभावो स धणदेवो ॥ ३५ ॥

जेण तया तुह तणओ जोगियगहिओवि मोइओ आसि ।
दाउं सुवन्नलक्खं निक्कारणवच्छलेणं तु ॥ ३६ ॥

जयसेणकुमरजीवियदाया धणधम्मसेट्ठिपुत्तो सो ।
परमुवयारी सामिय! कहणु अहन्नेहिं[1] विहिउत्ति? ॥ ३७ ॥

इय देवसम्मभणियं सोउं संभंतलोयणो[2] सहसा ।
अह भणइ सुप्पइट्ठो मुंचह मुंचह महाभागं ॥ ३८ ॥

पासट्ठियपुरिसेहिं तक्खणमुच्छोडिया य से बंधा ।
पल्लीवइणा ताहे अवगूढो सायरं एसो ॥ ३९ ॥

---

**ततश्च तै-र्गत्वा पल्लीपतेः समर्पित एषः ।**
**अत्रान्तरे दृष्टो धनदेवो देवशर्मणा ॥ ३४ ॥**

**ततश्च तेन भणितः सदुःखमेवं तु पल्लिनाथस्य ।**
**हा ! हा ! स्वामिन् ! एष महानुभावः स धनदेवः ॥ ३५ ॥**

**येन तदा तव तनयो योगीगृहीतोऽपि मोचितोऽऽसीत् ।**
**दत्त्वा सुवर्णलक्षं निष्कारणवत्सलेन तु ॥ ३६ ॥**

**जयसेनकुमारजीवितदाता धनधर्मश्रेष्ठीपुत्रः सः ।**
**परमोपकारी स्वामिन् ! कथन्नु अधन्यैर्विहित इति? ॥ ३७ ॥**

**इति देवशर्माभणितं श्रुत्वा संभ्रान्तलोचनः सहसा ।**
**अथ भणति सुप्रतिष्ठो मुञ्चत मुञ्चत महाभागम् ॥ ३८ ॥**

**पार्श्वस्थितपुरुषैस्तत्क्षणमुच्छोटिताश्च तस्य बन्धाः ।**
**पल्लीपतिना तदाऽवगूढः सादरमेषः ॥ ३९ ॥**

---

१. अधन्यैः 'अस्माभिः' इति शेषः । २. संभ्रान्तलोचनः संभ्रमयुक्तनयनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो विहियपणामो तक्कालमुचियम्मि आसणे दिन्ने ।
पासट्ठियपुरिसेहिं, उवविट्ठो तत्थ धणदेवो ॥ ४० ॥

तत्तो य दीहदीहं नीससिय विसायगब्भिणं एवं ।
लज्जावणमियवयणो पल्लिवई भणिउमाढत्तो ॥ ४१ ॥

परमुवगारित्ति तुमं उवेच्च किलहोसि अम्ह दट्ठवो ।
नवरं गिहागयस्सवि सागयमेवंविहं विहियं! ॥ ४२ ॥

जायइ अवगारफलो विहिओ पावाणं अहव उवयारो ।
सप्पस्स जहा दिन्नं दुद्धंपि विसत्तणमुवेइ ॥ ४३ ॥

पावो अहं कयग्धो[2] सुयजीवियदायगस्स जेणज्ज[3]।
गिहमागयस्स एयं अहम्मकम्मं[4] समायरियं ॥ ४४ ॥

भणियं धणदेवेणं कीस इमं वहह गुरुविसायंति ।
अन्नाणं अवरज्झइ[5], को दोसो एत्थ तुम्हाणं? ॥ ४५ ॥

---

**ततो विहितप्रणामस्तत्कालोचितेऽऽसने दत्ते ।**
**पार्श्वस्थितपुरुषैः, उपविष्टस्तत्र धनदेवः ॥ ४० ॥**

**ततश्च दीर्घदीर्घं निश्वस्य विषादगर्भितमेवम् ।**
**लज्जाऽवनतवदनः पल्लिपति-र्भणितुमारब्धः ॥ ४१ ॥**

**परमोपकारीति त्वमुपेत्य किल भवसि अस्माकं द्रष्टव्यः ।**
**नवरं गृहागतस्याऽपि स्वागतमेवंविधं विहितम् ॥ ४२ ॥**

**जायतेऽपकारफलो विहितः पापानामथवोपकारः ।**
**सर्पस्य यथा दत्तम् दुग्धमपि विषत्वमुपैति ॥ ४३ ॥**

**पापोऽहं कृतघ्नः सुतजीवितदायकस्य येनाऽद्य ।**
**गृहमागतस्य एतदधर्मकर्म समाचरितम् ॥ ४४ ॥**

**भणितं धनदेवेन किमिदं वहथ गुरुविषादमिति ।**
**अज्ञानमपराध्यति को दोषोऽत्र युष्माकम् ॥ ४५ ॥**

---

१. गर्भितम्। २. कृतघ्नः। ३. येनाद्य । ४. धर्मादनपेतं धर्म्यं तद्विरुद्धमधर्म्यं तच्च तत् कर्म चेत्यर्थः। ५. अपराध्यति ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

दट्ठुं अणन्नसरिसं भिल्लवई तस्स वयणविन्नाणं।
रूवं तह सुयणत्तं[1] पुणोवि अइरंजिओ भणइ ॥ ४६ ॥

पेच्छह एगम्मि नरे केत्तियगुणसमुदओ समं वसइ? ।
बहुरयणा हु वसुमई सच्चो लोयप्पवाओऽयं ॥ ४७ ॥

धी! धी! मह पुरिसत्तं धी! धी! मह एरिसाए वित्तीए[2] ।
नियकुलकलंकभूयस्स मज्झ धी! पुरिसजम्मेण ॥ ४८ ॥

धी! मज्झ जीविएण कुकम्मनिरयस्स धम्मरहियस्स।
एयारिसपुरिसाणं लुंटणकम्मम्मि निरयस्स ॥ ४९ ॥

एत्तियमेत्तेणं चिय धन्नोऽहं जं महाणुभावस्स ।
अक्खयदेहस्स इमस्स दंसणं झत्ति संजायं ॥ ५० ॥

जइ पुण होज्ज विवत्ती[3] समयं भिल्लेहिं जुज्झमाणस्स ।
ता कह मज्झ अउन्नस्स होज्ज पावस्स निंत्थारो[4] ? ॥ ५१ ॥

---

**दृष्ट्वाऽनन्यसदृशं भिल्लपतिस्तस्य वचनविज्ञानम् ।**
**रूपं तथा सुजनत्वं पुनरप्यतिरञ्जितो भणति ॥ ४६ ॥**

**प्रेक्षध्वमेकस्मिन्नरे कियान्गुणसमुदयस्समं वसति ? ।**
**बहुरत्ना खलु वसुमती सत्यो लोकप्रवादोऽयम् ॥ ४७ ॥**

**धिग् ! धिग् ! मम पुरुषत्वं धिक् ! धिक् ! ममैतादृशया वृत्या ।**
**निजकुलकलङ्कभूतस्य मम धिक् ! पुरुषजन्मना ॥ ४८ ॥**

**धिग् मम जीवितेन कुकर्मनिरतस्य धर्मरहितस्य ।**
**एतादृशपुरुषानां लुण्टनकर्मणि निरतस्य ॥ ४९ ॥**

**एतावन्मात्रेण चैव धन्योऽहं यद् महानुभावस्य ।**
**अक्षयदेहस्याऽस्य दर्शनं झटिति सञ्जातम् ॥ ५० ॥**

**यदि पुन-र्भवेत् विपत्तिः समकं भिल्लै-र्युध्यमानस्य ।**
**तर्हि कथं ममाऽपुन्यस्य भवेत् पापस्य निस्तारः ? ॥ ५१ ॥**

१. सुजनत्वम् । २. वृत्तिः=आजीविका । ३. विपत्तिः=विनाशः । ४. निस्तारो मुक्तिः पापात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एमाइ बहुविगप्पं अप्पाणं निंदिऊण तो भणइ ।
भो ! भो ! भिल्ला सत्थे जं गहियं एत्थ तुम्हेहिं ॥ ५२ ॥

तं सव्वंपि समप्पह इमस्स धणदेवनामवणियस्स ।
तेहिं तणमज्जायं[1] समप्पियं तस्स तं सव्वं ॥ ५३ ॥ युग्मम् ॥

तत्तो सबालवुड्ढे मिलिए लोगम्मि भयविमुक्कम्मि।
वज्जरइ सुप्पइट्ठो धणदेवं नेहगब्भमिणं ॥ ५४ ॥

एत्तो गाउयमेत्ते सीहगुहा नाम अत्थि मे पल्ली ।
तीए लहुं[2]मागच्छह अज्ज मह पाहुणा होह ॥ ५५ ॥

भणियं धणदेवेणं एवं होउत्ति ताहे सो सत्थो ।
धणदेवमग्ग[3]लग्गो सीहगुहं झत्ति संपत्तो ॥ ५६ ॥

आवासियस्स तत्तो वसिमा[4]सन्नम्मि सत्थलोयस्स ।
पल्लीवइणा नीओ धणदेवो निययगेहम्मि ॥ ५७ ॥

---

एवमादिबहुविकल्पमात्मानं निन्दित्वा ततो भणति ।
भो ! भो ! भिल्लाः ! सार्थे यद्गृहीतमत्र युष्माभिः ॥ ५२ ॥

तत्सर्वमपि समर्पयताऽस्य धनदेवनामवणिजः ।
तैस्तृणमर्यादं [ पर्यन्तं ] समर्पितं तस्य तत्सर्वम् ॥ ५३ ॥

ततस्सबालवृद्धे मिलिते लोके भयविमुक्ते ।
कथयति सुप्रतिष्ठो धनदेवं स्नेहगर्भमिदम् ॥ ५४ ॥

एतस्माद् गव्यूतमात्रे सिंहगुफा नाम्न्यस्ति मे पल्ली ।
तस्यां लघु आगच्छताऽद्य मम प्राघूर्णा भवत ॥ ५५ ॥

भणितं धनदेवेन एवं भवतु इति तदा स सार्थः ।
धनदेवमार्गलग्नः सिंहगुफां झटिति संप्राप्तः ॥ ५६ ॥

आवासितस्य ततो वासस्थानाऽऽसन्ने सार्थलोकस्य ।
पल्लीपतिना नीतो धनदेवो निजकगेहे ॥ ५७ ॥

---

१. तृणमर्यादं यथा स्यात्तथा तृणपर्यन्तमित्यर्थः । २. लघु =शीघ्रम् । ३. मग्गो=पश्चात् ।
४. वासस्थानसमीपे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भंगिऊण विहिणा सुगंधतेल्लेहिं पवरजुवईहिं ।
अद्धाणपरिस्समनासगेण वरवारिणा न्हविओ[1] ॥ ५८ ॥

घणसारसारसिरिखंडचच्चिओ ताहे पल्लिनाहेण ।
सहिओ पवराहारं भोत्तूण समुट्ठिओ कमसो ॥ ५९ ॥

कप्पूरपूरसहिए तंबोले आयरेण से दिन्ने ।
वज्जरइ धणदेवो सुहासणत्थो इमं वयणं ॥ ६० ॥

एसा हु ताव पल्ली आवासो निग्घिणस्स[2] लोयस्स ।
तुब्भेवि तस्स पहुणो अणन्न[3]सोजन्न[4]दयकलिया ॥ ६१ ॥

एसो न सम्मजोगो अहिवइ[5]भिच्चाण मह ठियं चित्ते ।
जं सोय[6]सच्चदक्खिन्नवज्जियाणं इमं ठाणं ॥ ६२ ॥

भिल्लाणं नाहावि हु जं एरिसगुणगणेण संजुत्ता ।
एयं मणम्मि भावइ[7] महंतमच्छेरयं[8] मज्झ ॥ ६३ ॥

---

अभ्यङ्ग्य विधिना सुगन्धतेलैः प्रवरयुवतीभिः ।
अध्वानपरिश्रमनाशकेन वरवारिणा स्नपितः ॥ ५८ ॥

घनसारसारश्रीखण्डचर्चितस्तदा पल्लिनाथेन ।
सहितः प्रवराहारं भुक्त्वा समुत्थितः क्रमशः ॥ ५९ ॥

कर्पूरपूरसहिते ताम्बूलेऽऽदरेण तस्मै दत्ते ।
कथयति धनदेवः सुखासनस्थ इदम् वचनम् ॥ ६० ॥

एषा खलु तावत् पल्ली आवासो निर्घृणस्य लोकस्य ।
भवानपि तस्य प्रभोरनन्यसौजन्यदयाकलिता ॥ ६१ ॥

एष न सम्यग्योगोऽधिपतिभृत्यानां मम स्थितं चित्ते ।
यच्छौचसत्यदाक्षिण्यवर्जितानामिदं स्थानम् ॥ ६२ ॥

भिल्लानां नाथाऽपि खलु यदेतादृशगुणगणेन संयुक्ताः ।
एतद् मनसि प्रतिभाति महदाश्चर्यं मम ॥ ६३ ॥

---

१. स्नपितः । २. निर्घृणः=निष्कृपः । ३. अनन्यत्=अद्वितीयम् । ४. सौजन्यं दया च ताभ्यां कलिताः सहिताः । ५. अधिपतिः=स्वामी । ६. शौचसत्यदाक्षिण्य-वर्जितानाम् । ७. प्रतिभाति । ८. अच्छेरयं=आश्चर्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

असरिससोजन्नजुया तुम्हे एयाए वसह पल्लीए ।
उत्तमनरावि होउं साहेह[1] मह केण कज्जेण ? ॥ ६४॥

तो भणइ सुपइट्ठो किं कहिएणं इमेण धणदेव ! ।
वंचणमवमाणं चिय मइजुत्तो नो पगासेज्जा ॥ ६५॥

तहवि हु भणामि मा होउ तुज्झ अब्भत्थणा इमा विहला ।
एगग्गमणो होउं सोहिज्जंतं[2] निसामेहि ॥ ६६॥

निच्चं पमुइयनरनारिपुन्नगामावलीए रमणीओ ।
बहुदिवसवन्नणिज्जो अंगो नामेण देसोऽत्थि ॥ ६७॥

तम्मि य पुरं पुराणं पवरं सुरनयरसरिसरिद्धिल्लं[3] ।
भयडमर[4]करविमुक्कं सिद्धत्थपुरंति विक्खायं ॥ ६८॥

तम्मि य मयंधरिउ[5]करडिकरड[6]निब्भेयणम्मि पत्तट्ठो ।
कंबु[7]न्नयसुग्गीवो सुग्गीवो नाम नरनाहो ॥ ६९॥

---

असदृशसौजन्ययुक्ता यूयमस्यां वसथ पल्ल्यां ।
उत्तमनरा अपि भूत्वा कथयत मम केन कार्येण ? ॥ ६४ ॥

ततो भणति सुप्रतिष्ठः किं कथितेनाऽनेन धनदेव ! ।
वञ्चनमपमानमेव मतियुक्तो न प्रकाशते ॥ ६५ ॥

तथापि खलु भणामि मा भवतु तवाऽभ्यर्थनेयं विफला ।
एकाग्रमना भूत्वा कथ्यमानं निश्रृणु ॥ ६६ ॥

नित्यं प्रमुदितनरनारीपूर्णग्रामावल्या रमणीयः ।
बहुदिवसवर्णनीयोऽङ्गो नाम्ना देशोऽस्ति ॥ ६७ ॥

तस्मिंश्च पुरं पुराणाम् प्रवरं सुरनगरसदृशर्द्धिमन्तम् ।
भयडमरकरविमुक्तं सिद्धार्थपुरमिति विख्यातम् ॥ ६८ ॥

तस्मिंश्च मदान्धरिपुकरटीकरटनिर्भेदने प्राप्तार्थः ।
कम्बून्नतसुग्रीवा सुग्रीवो नामा नरनाथः ॥ ६९ ॥

---

१. कथयत । २. कथ्यमानम् । ३. रिद्धिल्लं ऋद्धिमत् । ४. डमरं=परचक्रादिभयम्, भीत्या पलायनं च । ५. करटी=करी । ६. करटः=करिगण्डः। ७. कम्बुः शङ्खः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयलोरोहपहाणा सुंदरसरदिंदुबिंबसमवयणा ।
बुद्धीए अणन्नसमा कमला नामेण से देवी ॥ ७० ॥

तीए सह विसयसोक्खं अणुहवमाणस्स तह य रज्जधुरं ।
पुव्वभवपुन्नपायवसमप्पियं[1] पालयंतस्स ॥ ७१ ॥

वच्चंतेसु दिणेसुं तीए देवीए अह अहं पुत्तो ।
जाओ कयं च नामं विहिणा मह सुप्पइट्ठोत्ति ॥ ७२ ॥

लालिज्जंतो पंचहिं धाईहिं कमेण वड्ढमाणोऽहं ।
संजाओ पंचवरिसो माउपिऊणं कयाणंदो ॥ ७३ ॥

एत्थंतरम्मि गिम्हे संतावियमहियले वइक्कंते ।
निव्वविय[2]महीवीढो रसंत[3]सालूरसंघाओ ॥ ७४ ॥

पवहंतबहलवाहिणिखलहलसंसद्दबहिरियदिगंतो ।
गज्जंतगहिरजलहरदंसणनच्चंतसिहिनिवहो ॥ ७५ ॥

---

**सकलाऽवरोधप्रधाना सुन्दरशरदिन्दुबिम्बसमवदना ।**
**बुद्ध्याऽनन्यसमा कमला नाम्ना तस्य देवी ॥ ७० ॥**

**तया सह विषयसुखमनुभवतस्तथा च राज्यधुरं ।**
**पूर्वभवपुन्यपादपसमर्पितं पालयतः ॥ ७१ ॥**

**व्रजत्सु दिनेषु तस्या देव्योऽथाऽहं पुत्रः ।**
**जातः कृतश्च नाम विधिना मम सुप्रतिष्ठ इति ॥ ७२ ॥**

**लाल्यमानः पञ्चभिर्धात्रीभिः क्रमेण वर्धमानोऽहम् ।**
**सञ्जातः पञ्चवर्षो मातापित्रोः कृतानन्दः ॥ ७३ ॥**

**अत्रान्तरे ग्रीष्मे संतप्तमहीतले व्युत्क्रान्ते ।**
**निर्वापितमहीपीठो रसत्सालूरसङ्घातः ॥ ७४ ॥**

**प्रवहद्बहलवाहिनिखलखलशब्दबधिरयद्दिगन्तः ।**
**गर्जत्गभीरजलधरदर्शननृत्यत्शिखीनिवहः ॥ ७५ ॥**

---

१. पायवो=पादपो=वृक्षः। २. निर्वापितं प्रशमितं महीपीठं येन वर्षारात्रेणेत्युत्तरस्यां पञ्चमगाथायां संबंधः। ३. रसन् शब्दायमानः सालूराणां दर्दुराणां संघातो यत्रेति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पप्फुल्लफुल्लसोहिय[1]नीवोहविरायमाणवणनियरो ।
मुचकुंदकुडय[2]संदियरयगब्भिणवाइयसमीरो ॥ ७६ ॥

पुलिणपइट्ठियबालयकयवा[3]लुयदेउलेहिं रमणीओ ।
क[4]रिसयजणपारंभियह[5]लउत्तयचच्चियबइल्लो ॥ ७७ ॥

हरिसवसहसिरपामर[6] दिसि दिसि चब्भत्तभूरिकेयारो ।
पत्तो वासा[7]रत्तो कद्दमदुल्लंघमग्गिल्लो ॥ ७८ ॥ पञ्चभिः कुलकम् ।

एयारिसम्मि नवपाउसम्मि पत्तम्मि अन्नदिवसम्मि।
नरनाहो सुग्गीवो विहिणा कयभोयणो संतो ॥ ७९ ॥

चंदणचच्चियदेहो [8]परिहियमिउसण्हनिम्मलदुगूलो ।
तंबोलवग्गहत्थो समागतो देविभवणम्मि ॥ ८० ॥ युग्मम् ।

[9]सत्ततले पासाए आरूढो उवरिमाए भूमीए ।
देवीए कयविणओ महरिहसेज्जाए आसीणो ॥ ८१ ॥

---

प्रफुल्लफुलशोभितनीवौघविराजमानवननिकरः ।
मञ्चकुन्दकुटजस्यन्दितरजोगर्भितवात्समीरः ॥ ७६ ॥

पुलिनप्रतिष्ठितबालककृतवालुकादेवकुलै-र्रमणीयः ।
कर्षकजनाप्रारंभितहलयोत्रकचर्चित-बलीवर्दः ॥ ७७ ॥

हर्षवशहर्षवन्तपामरः दिशि-दिशि चाभ्यक्त भूरिकेदारः ।
प्राप्तः वर्षारात्रः कर्दमदुर्लङ्घमार्गवान् ॥ ७८ ॥ पञ्चभिः कुलकम् ।

एतादृशे नवपावृषि प्राप्तेऽन्यदिवसे ।
नरनाथः सुग्रीवो विधिना कृतभोजनः सन् ॥ ७९ ॥

चन्दनचर्चितदेहः परिहितमृदुश्लक्ष्णनिर्मलदुकुलः ।
तम्बोलवर्गहस्तस्समागतो देवीभवने ॥ ८० ॥ युग्मम् ॥

सप्ततले प्रासादेऽऽरूढ उपरितने भूमौ ।
देव्या कृतविनयो महार्घशप्यायामासीनः ॥ ८१ ॥

---

१. नीवो=वृक्ष-विशेषः। २. स्यन्दितं क्षरितम् । ३. वालुकादेवकुलैः। ४. करिसओ=कर्षकः। ५. हलउत्तयं=हलयोत्रकम् । ६. लुप्तप्रथमान्तं पदम् । ७. वर्षारात्रः=वर्षासमयः । ८. परिहितमृदुश्लक्ष्णनिर्मलदुकूलः । ९. सप्ततले=सप्तभूमिके ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

खणमेगमच्छिऊणं परिहासकहाहिंपिययमाए सह ।
सियवसणच्छाइयाए कोमलतूलीए पासुत्तो ॥ ८२ ॥

ततो य सजलजलहरगज्जियसद्देण नट्ठनिद्दो सो ।
उट्ठित्तुं संनिविट्ठो निज्जूहगसंठियमसूरे ॥ ८३ ॥

अद्धासणे निविट्ठा कमलदेवीवि ताहे नरपहुणो ।
वज्जरइ तओ राया हरिसवसुल्लसियरोमंचो ॥ ८४ ॥

मह (नह) संगमगरुयसमुल्लसंतमणहरपओहरा झत्ति ।
पेच्छ पिए ! संजाया तुज्झ सरिच्छा कुबेरदिसा ॥ ८५ ॥

तरलत्तं नयणाणं कुडिलत्तं सुतणु! तुज्झ केसाणं ।
अणुकरइ पेच्छ विज्जू घणमज्झे चिंगिचिगायन्ती[1] ॥ ८६ ॥

अन्नं च पिय! पेच्छसु परिब्भमंतेहिं इंदगोवेहिं ।
नेज्जइ[2] पाउसलच्छी[3] पंचुन्निया[4] महीयले पडिया ॥ ८७ ॥

---

**क्षणमेकमासित्वा परिहासकथाभिः प्रियतमया सह ।**
**श्वेतवसनाच्छादितायां कोमलतूलिकायां प्रसुप्तः ॥ ८२ ॥**

**ततश्च सजलजलधरगर्जितशब्देन नष्टनिद्रः सः ।**
**उत्थाय संनिविष्टो निर्युहकसंस्थितमसूरे ॥ ८३ ॥**

**अर्द्धासने निविष्टा कमलदेव्यपि तदा नरप्रभोः ।**
**कथयति ततो राजा हर्षवशोल्लसितरोमाञ्चः ॥ ८४ ॥**

**मम [ नभः ] सङ्गमगुरुकसमुल्लसद्मनोहरपयोधरा झटिति ।**
**प्रेक्षस्व प्रिये ! सञ्जाता तव सदृशा कुबेरदिक् ॥ ८५ ॥**

**तरलत्वं नयनयोः कुटिलत्वं सुतनो ! तव केशानाम् ।**
**अनुकरोति प्रेक्षस्व विद्युत् घनमध्ये प्रकाशयन्ती ॥ ८६ ॥**

**अन्यच्च प्रिये ! प्रेक्षस्व परिभ्राम्यभिरिन्द्रगोपैः ।**
**ज्ञायते प्रावृड्लक्ष्मी प्रचूर्णिता महितले पतिता ॥ ८७ ॥**

---

१. प्रकाशयन्ती । २. ज्ञायते । ३. पाउसो=प्रावृट् । ४. प्रचूर्णिता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]पाउसनरिंदनवसंगमम्मि जायम्मि भूमिमहिलाए ।
हरियंकुरच्छलेणं पेच्छसु रोमंचओ जाओ ॥ ८८ ॥

निट्ठुर करपसरेणं इमेण संताविआ इमा पुहई ।
इय रोसेणव रुद्धो घणेहिं सूरस्स करपसरो ॥ ८९ ॥

मह आगमेवि पियविरहियाण महिलाण किं न फुट्टाइं ।
हिययाइं सामरिसं वि[2]ज्जुज्जोएण जोएइ ॥ ९० ॥

नाउं मह आगमणं तहवि हु किं चल्लिया पिया मोत्तुं ।
गज्जंतो रोसेणव पहियाणं दलइ हिययाइं ॥ ९१ ॥

धवलबलायादाढो विज्जुलयाचवलदीह[3]जीहालो ।
कसणशरीरो धावइ पहियाणं पाउसपिसाओ ॥ ९२ ॥

पेच्छ सुरचावनिग्गयधाराबाणेहिं विरहिहिययाइं ।
विंधंतो उवहसइव पंचसरं पंचसरसहियं ॥ ९३ ॥

---

**प्रावृड्नरेन्द्रनवसङ्गमे जाते भूमिमहिलायाः ।**
**हरिताङ्कुरच्छलेन प्रेक्षस्व रोमाञ्चो जातः ॥ ८८ ॥**

**निष्ठुरकरप्रसरेणऽनेन संतप्तेयं पृथ्वी ।**
**इति रोषेणेव रुद्धो घनैस्सूर्यस्य करप्रसरः ॥ ८९ ॥**

**ममाऽऽगमेऽपि प्रियविरहितानां महिलानां किं न स्फुटितानि ।**
**हृदयानि सामर्षं विद्युदुद्द्योतेन द्योतयति ॥ ९० ॥**

**ज्ञात्वा ममाऽऽगमनं तथाऽपि खलु किं चलिताःप्रिया मुक्त्वा ।**
**गर्जन् रोषेणेव पथिकानां दलयति हृदयानि ॥ ९१ ॥**

**धवलबलाकादंष्ट्रो विद्युल्लताचपलदीर्घजिह्वावान् ।**
**कृष्णशरीरो धावति पथिकानां प्रावृट्पिशाचः ॥ ९२ ॥**

**प्रेक्षस्व सुरचापनिर्गतधाराबाणै-र्विरहीहृदयानि ।**
**विंधन्नुपहसन्तीव पञ्चशरं पञ्चशरसहितम् ॥ ९३. ॥**

---

१. प्रावृट् । २. विद्युदुद्द्योतेन, द्योतयति । ३. जीहालो =जिह्वावान् ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एत्थंतरम्मि देवी नरनाहं भणइ हरिसिता संती ।
सेसउऊण नरवर! अब्भहिओ पाउसो एसो ॥ ९४ ॥

मोत्तूण विरहिणिजणं सुहओ[1] जं एस कामुयजणस्स।
पामरवच्छ[2]तणोसहिपमुहाणं तहय जीवाणं ॥ ९५ ॥

अह भणइ पुहइनाहो ईसिं हसेऊण, देवि! तं सच्चं ।
आहीणं[3] संजायं जं सुम्मइ एत्थ लोगम्मि ॥ ९६ ॥

धाया[4] पुरिसा पेच्छंति आयारा[5] धाययं दिसावलयं ।
तह देवि! तुमं सुहिया सव्वं सुहियंति मन्नेसि ॥ ९७ ॥

सव्वेवि देवि! उउणो सउन्न[6]लोयस्स होंति सुहहेऊ ।
पुन्नविहूणाण पुणो पाउससमओवि दुहहेऊ ॥ ९८ ॥

ओ! पेच्छ पेच्छ सुंदरि! अद्धसमार[7]म्मि जरकुडीर[8]म्मि ।
ओघसरसय[9]विराइयडिंभसमूहे रुयंतम्मि ॥ ९९ ॥

---

अत्रान्तरे देवी नरनाथं भणति हर्षिता सती ।
शेषर्तुनां नरवर ! अभ्यधिकः पावृडेषः ॥ ९४ ॥

मुक्त्वा विरहीजनं सुखदो यदेष कामुकजनस्य ।
पामरवत्सतृणौषधिप्रमुखानां तथा च जीवानाम् ॥ ९५ ॥

अथ भणति पृथ्वीनाथ इषद्धसित्वा देवि ! तत्सत्यम् ।
आधिनं सञ्जातं यच्छ्रूयतेऽत्र लोके ॥ ९६ ॥

ध्राताः पुरुषाः प्रेक्षन्ते आदराद्धातकं दिग्वलयम् ।
तथा देवि ! त्वं सुखिता सर्वं सुखितमिति मन्यसे ॥ ९७ ॥

सर्वेऽपि देवि ! ऋतवः सुपुन्यलोकस्य भवन्ति सुखहेतुः ।
पुन्यविहूणानां पुनः प्रावृट्समयोऽपि दुःखहेतुः ॥ ९८ ॥

उत ! प्रेक्षस्व प्रेक्षस्व सुन्दरि ! अर्धसमारचिते जरत्कुटीरे ।
ओघसरशतविराजितडिम्भसमूहे रुदिति ॥ ९९ ॥

---

१. सुखदः । २. वत्साः=गोऽर्भकाः, तृणानि, ओषधयश्च तत्प्रमुखाणाम् । ३. आहीणं= किं वदन्ती। ४. 'धै तृप्तौ' धातास्तृप्ताः। ५. आदरात्। ६. सपुण्यलोकस्य। ७. अर्धसमार-चिते। ८. जरत्कुटीरे=जीर्णक्षुद्रगृहे। ९. 'ओघसरणां'अनर्थानां गृहवारि प्रवाहाणां शतानि।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निययघरिणीए बाढं चोईज्जंतो[१] पुणो पुणो वरओ[२] ।
आवरणरहियदेहो हम्मंतो वारिधाराहिं ॥ १०० ॥

उद्धुसियरोमकूवो[३] सीयलअनिलेण संकुइयगत्तो ।
एसो दरिद्दपुरिसो कहकहवि समारइ[४] कुडीरं ॥ १०१ ॥ तिसृभिः कुलकम् ॥

ओलंबियकन्नजुयं हम्मंतं गुरुयवारिधाराहिं ।
ओलुग्ग[५]भग्गदेउलकोणगयं रासभं नियसु[६] ॥ १०२ ॥

तह पेच्छ इमं सुंदरि! सुणहं[७] चुल्लीए सुन्नगेहम्मि।
सीएण कुणुकुणंतं खरखरखड्डुं खणेमाणं ॥ १०३ ॥

तह पेच्छ जरबइल्ला[८] जलहरधारावलीहि हम्मंता ।
ईरियासमिउव्व मुणी वच्चंति महिं पलोएंता ॥ १०४ ॥

सेवालियभूमितले फिल्लुसमाणा[९] य थामथामम्मि[१०] ।
हत्थगयलट्ठिखंडा भिक्खं परियडइ जररोरो[११]॥ १०५ ॥

---

**निजकगृहिन्या बाढं चोद्यमानः पुनः पुनः वराकः ।**
**आवरणरहितदेहो हन्यमानो वारिधाराभिः ॥ १०० ॥**

**उद्धुसितरोमाकूपश्शीतलाऽनिलेन सङ्कुचितगात्रः ।**
**एष दरिद्रपुरुषः कथंकथमपि समारचयति कुटीरम् ॥१०१॥ तिसृभिः कुलकम्॥**

**अवलम्बितकर्णयुगं हन्यमानं गुरुकवारिधाराभिः ।**
**अवरुग्णभग्नदेवकुलकोणगतं रासभं पश्य॥ १०२॥**

**तथा प्रेक्षस्व इमं सुंदरि ! श्वानं चूल्ल्यां शून्यगेहे ।**
**शीतेन कुणुकुणायन्तं खरखरखड्डुं खनन्तम् ॥ १०३ ॥**

**तथा प्रेक्षस्व जरद्बलीवर्दान् जलधरधारावलिभि-र्हन्यमानान् ।**
**ईर्यासमितिवन्त इव मुनयो व्रजन्ति महीं प्रलोकयन्तः ॥ १०४ ॥**

**शैवलिकभूमितले पतन्तश्च स्थाने स्थाने ।**
**हस्तगतयष्टिखण्डा भिक्षां पर्यटति जरद्रोरः ॥ १०५॥**

---

१. चोद्यमानः = प्रेर्यमाणः । २. वरओ = वराकः । ३. उद्धुसियं = पुलकितम् । ४. समारचयति । ५. ओलुग्गं = छायारहितम् । ६. पश्य । ७. श्वानम् । ८. जरद्बलीवर्दान्। ९. पतन्तः। १०. स्थाने स्थाने । ११. रोरः = रङ्कः।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं च जाव साहइ देवीए ताव कंचुई[1] झत्ति ।
पायवडणुट्ठिओ अह वसुदत्तो भणिउमाढत्तो ॥ १०६ ॥

देवेण जो उ पुव्विं पट्ठविओ आसि चंपनयरीए ।
सिरिकित्तिवम्मरन्नो दूओ दामोदरो नाम ॥ १०७ ॥

सो देवपायदंसणसुहकंखी आगओ दुवारम्मि ।
चिट्ठइ, एवं च ठिए देवो पमाणंति तं सोच्चा ॥ १०८ ॥

दिट्ठीए आपुच्छिय देविं सहसत्ति उट्ठिओ राया ।
अत्थाणमंडवस्स उ आसन्नो जाव संपत्तो ॥ १०९ ॥

ताव य विज्जुचमुक्कारणंतरं[2] चंडचडडसंसद्दो ।
आसन्नो संजाओ भेसियनरनारिसंघाओ[3] ॥ ११० ॥ तिसृभिः कुलकम् ॥

तयणंतरं च महाहारवसंमीसं समुट्ठियं सद्दं ।
देवीगिहम्मि सोउं सहसा वलिओ महीनाहो ॥ १११ ॥

---

**एवञ्चयावत्कथयति देव्यास्तावत्कञ्चुकी झटिति ।**
**पादपतनानुस्थितोऽथवसुदत्तो भणितुमारब्ध : ॥ १०६ ॥**

**देवेन यस्तु पूर्वं प्रस्थापितोऽऽसीत् चम्पानगर्याम् ।**
**श्रीकीर्तिवर्मराज्ञो दूतो, दामोदरो नामा ॥ १०७ ॥**

**स देवपाददर्शनसुखाकाङक्ष्यागतो द्वारे ।**
**तिष्ठत्येवं च स्थिते देवः प्रमाणमिति तच्छ्रुत्वा ॥ १०८ ॥**

**दृष्ट्याऽऽपृछ्र्य देवीं सहसेति उत्थितो राजा ।**
**आस्थानमण्ऽपस्य त्वासन्नो यावत् संप्राप्तः ॥ १०९ ॥**

**तावच्च विद्युच्चमत्काराऽनन्तरं चण्डचटटसंशब्दः ।**
**आसन्नःसञ्जातो भेषितनरनारीसङ्धातः ॥ ११० ॥ तिसृभिः कुलकम् ॥**

**तदनन्तरश्च महाहाहारवसंमिश्रं समुपस्थितं शब्दम् ।**
**देवीगृहे श्रुत्वा सहसा वलितो महीनाथः॥ १११॥**

---

१. कञ्चुकी=प्रतिहारः । २. विद्युच्चमत्कारानन्तरम् । ३. भेषितः=भापितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वज्जरइ देविधावी रुयमाणी धग्घरेण सद्देण ।
नरवर! मुट्ठा[1] मुट्ठा देवी विज्जूए दड्ढत्ति ॥ ११२ ॥

दट्ठूण भूमिपडियं देवीदेहं जिएंण[2] परिचत्तं ।
हा! हा! हत्ति भणंतो राया मुच्छावसं पत्तो ॥ ११३ ॥

दट्ठूण भूमिपडियं नरनाहं मुच्छियं विगयचेट्ठं ।
भूरितरो संजातो परियणअक्कंदसद्दोवि ॥ ११४ ॥

पासट्ठियपुरिसेहिं सीयलपवणाइयम्मि विहियम्मि ।
रायावि विगयमुच्छो विलविउमेवं समाढत्तो ॥ ११५ ॥

हा वल्लहि! हा सामिणि! हा जीवियदायगे! विसालच्छि! ।
हा मह हिययनिवासिणि! हा! कत्थ गया ममं मोत्तुं ? ॥ ११६ ॥

हा गोरदेहि! हा पिहुपओहरे! हा सुकोमलसरीरे! ।
हा कह निग्घिणविहिणा तुह उवरिं पाडिया विज्जू ?॥ ११७ ॥

---

**कथयति देवीधात्री रुदिती धर्धरेण शब्देन ।**
**नरवर ! मुष्टा मुष्टा देवी विद्युता दग्धेति ॥ ११२ ॥**

**दृष्ट्वा भूमिपतितं देवीदेहं जीवेन परित्यक्तम् ।**
**हा! हा! हतेति भणन् राजा मूर्च्छावशं प्राप्तः ॥ ११३ ॥**

**दृष्ट्वा भूमिपतितं नरनाथं मूर्च्छितं विगतचेष्टम् ।**
**भूरितरःसञ्जातः परिजनाऽऽक्रन्दनशब्दोऽपि ॥ ११४ ॥**

**पार्श्वस्थितपुरुषैः शीतलपवनादिके विहिते।**
**राजाऽपि विगतमूर्च्छो विलपितुमेवं समारब्धः ॥ ११५ ॥**

**हा ! वल्लभे ! हा स्वामिनि! हा जीवितदायके ! विशालाक्षि ! ।**
**हा मम हृदयनिवासिनि ! हा ! कुत्र गता माम् मुक्त्वा ? ॥ ११६ ॥**

**हा गौरदेहे ! हा पृथुपयोधरे! हा सुकोमलशरीरे ! ।**
**हा कथं निर्घृणविधिना तवोपरि पातिता विद्युत् ? ॥ ११७ ॥**

१. मुष्टा । २. जीवेन परित्यक्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

घणसारघुसिणचच्चणउचियसरीरम्मि कह णु हयविहिणा ।
विज्जूनिवाओ विहिओ मज्झ अउन्नेहिं[1] पावेण? ॥ ११८ ॥

हा देवि तुज्झ विरहे नारनारीसंकुलं इमं नयरं ।
उव्वसियनयरसरिसं अडविसमाणं च पडिहाइ ॥ ११९ ॥

किल देवि! तं भणंती तुह विरहे अच्छिउं न सक्केमि ।
तं कह अहं अहन्नो[2] तुमए सहसा परिच्चत्तो ॥ १२० ॥

हा! किं न किंपि जंपसि किंवा तं सुयणु! मज्झ रुट्ठा सि ।
किंव मए अवरद्धं[3] सुंदरि! तं मज्झ साहेसु ? ॥ १२१ ॥

तं चिय मह वल्लहिया नेहो मह नत्थि अन्नइत्थीसु ।
तुज्झ कए परिचत्तो सयलो ओरोहनारिजणो ॥ १२२ ॥

तहवि तुमं किं सुंदरी! निब्भररत्तस्स देसि नालावं ? ।
ता पसिय[4] पसिय सामिणि! उट्ठिय मह देसु पडिवयणं ॥ १२३ ॥

---

**घनसारघुसृणचर्चनोचितशरीरे कथन्नु हतविधिना ।**
**विद्युन्निपातो विहितो ममापुन्यैः पापेन? ॥ ११८ ॥**

**हा ! देवि ! तव विरहे नरनारीसङ्कुलमिदं नगरम् ।**
**उद्वसितनगरसदृशमटवीसमानं च प्रतिभाति ॥ ११९ ॥**

**किल देवि ! त्वं भणन्ती तव विरहे आसितुं न शक्नोमि।**
**तत्कथमहमधन्यस्त्वया सहसा परित्यक्तः ? ॥ १२० ॥**

**हा ! किं न किमपि जल्पसि किंवा त्वं सुतनु ! मम रुष्टाऽसि ।**
**किं वा मयाऽपराद्धं सुन्दरि ! त्वं मम कथय ॥ १२१ ॥**

**त्वमेव मम वल्लभिका स्नेहो मम नास्त्यन्यस्त्रीषु ।**
**तव कृते परित्यक्तस्सकलोऽवरोधनारीजनः ॥ १२२ ॥**

**तथाऽपि त्वं किं सुन्दरि ! निर्भररक्तस्य ददासि नालापम् ? ।**
**तस्मात्प्रसीद प्रसीद स्वामिनि ! उत्थाय मम देहि प्रतिवचनम् ॥ १२३ ॥**

---

१. अपुण्यैः । २. अधन्यः । ३. अपराद्धम्=आगो विहितम् । ४. प्रसीद ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एमाइ जाव विलवइ विविहं राया सकलुणसद्देण ।
ताव अहं संपत्तो रोवंतो तत्थ धणदेव! ॥ १२४ ॥

उच्छंगे विणिवेसिय ममं तओ गाढकलुणसद्देण ।
तं चेव पलवमाणो सुदीहरं[1] रुवइ बालोव्व ॥ १२५ ॥

एत्थंतरम्मि मंती सुमईनामो भणइ नरनाहं ।
देव! अलं रुन्नेण[2] मयकिच्चं[3] कुणह देवीए ॥ १२६ ॥

भणइ तओ नरनाहो चंदणदारूणि बाहिं[4] नीणेह[5] ।
देवीए जेण समयं अहंपि अग्गीए विस्सामि ॥ १२७ ॥

तो भणइ सुमइमंती कायरजणचेट्ठिएण किं इमिणा ।
मरणऽज्झवसाएणं, अवलंबसु धीर! धीरत्तं ॥ १२८ ॥

मरणेण तुज्झ नरवर! देसो सव्वोवि होइ जं गम्मो[6] ।
पडिवक्खनरवराणं बालो तह सुपइट्ठोत्ति ॥ १२९ ॥

---

एवमादि यावत् विलपति विविधं राजा सकरुणशब्देन ।
तावदहं संप्राप्तो रुदंस्तत्र धनदेव ! ॥ १२४ ॥

उत्सङ्गे विनिवेश्य माम् तातो गाढकरुणस्वरेण ।
तच्चैव प्रलपन् सुदीर्घं रोदिति बाल इव॥ १२५ ॥

अत्रान्तरे मन्त्री सुमतिनामा भणति नरनाथम् ।
देव ! अलं रुदितेन मृतकृत्यं कुरुत देव्याः ॥ १२६ ॥

भणति ततो नरनाथः चन्दनदारुणि बहिर्नाययत ।
देव्या येन समकमहमप्यग्निं विशामि ॥ १२७ ॥

ततो भणति सुमतिमंत्री कायरजनचेष्टितेन किमनेन ।
मरणाऽध्यवसायेन अवलम्ब धीर ! धीरत्वम् ॥ १२८ ॥

मरणेन तव नरवर ! देशस्सर्वोऽपि भवति यद्गम्यः ।
प्रतिपक्षनरवराणां बालस्तथा सुप्रतिष्ठ इति ॥ १२९ ॥

---

१. सुदीर्धम् । २. रुदितेन । ३. मृतकृत्यम्। ४. बहिः। ५. नाययत । ६. गम्यः= आक्रमणीयः प्रतिपक्षनरवराणाम्=शत्रुनृपाणाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवाणं बंभणाण य लिंगीणं[1] तह पागयजणस्स ।
धम्मकिरियाओ सव्वा वहंति[2] देवे धरंतम्मि[3] ॥ १३० ॥

महिलामेत्तस्स कए न हु जुत्तं तुम्ह उत्तमनराण ।
असमंजसमायरिउं विन्नायजगस्सभावाणं ॥ १३१ ॥

अविय। निरुवक्कमकायस्सवि उसभजिणिंदस्स आइदेवस्स ।
मरणं जायं जइया का गणणा अन्नमणुएसु ? ॥ १३२ ॥

निज्जियपडिवक्खस्सवि छक्खंडमहीसरस्स भरहस्स ।
जइया जायं मरणं का गणणा अन्नमणुएसु ॥ १३३ ॥

गरुयपरक्कमनिज्जियरिउबलपाइक्कच्चक्ककयरक्खा[4] ।
सोंडीरा[5] नरवइणो सोमजसाऽऽइच्चजसपमुहा ॥ १३४ ॥

जइ ताव ते य निहया पावकयंतेण[6] निग्घिणमणेण ।
अनिवारियपसरेणं का गणणा अन्नलोयम्मि ? ॥ १३५ ॥ युग्मम् ॥

---

**देवानां ब्राह्मणानाम् च लिङ्गीनां तथा प्राकृतजनस्य ।**
**धर्मक्रियाः सर्वा वहन्ति देवे धरीयति ॥ १३० ॥**

**महिलामात्रस्य कृते न तु युक्तं तवोत्तमनराणाम् ।**
**असमञ्जससमाचरितुं विज्ञातजगत्स्वभावानाम् ॥ १३१ ॥**

**अपि च । निरुपक्रमकायस्याऽपि ऋषभजिनेन्द्रस्य आदिदेवस्य ।**
**मरणं जातं यदा का गणनाऽन्यमनुजेषु ? ॥ १३२ ॥**

**निर्जितप्रतिपक्षस्याऽपि षट्खण्डमहीश्वरस्य भरतस्य।**
**यदा जातं मरणं का गणनाऽन्यमनुजेषु ? ॥ १३३ ॥**

**गुरुपराक्रमनिर्जितरिपुबलपदातीचक्रकृतरक्षाः।**
**शौण्डीरा नरपतयः सोमयशाऽदित्ययशप्रमुखाः ॥ १३४ ॥**

**यदि तावत्ते च निहताः पापकृतान्तेन निर्घृणमनसा ।**
**अनिवारितप्रसरेण का गणनाऽन्यलोके ? ॥ १३५ ॥ युग्मम् ॥**

---

१. लिङ्गीनां=तपस्विनाम् । २. निर्वहन्ति । ३. धरां पालयति सति । ४. गुरुणा पराक्रमेण निर्जितं रिपूणां बलं यैस्ते च पाइक्काणं = पदातीनां चक्रेण = समूहेन कृतरक्षाश्च । ५. शौण्डीराः = गर्विणः। ६. कृतान्तः=यमः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेसिंपि य तित्तीसं आउयमुदहीण पवरदेवाणं ।
तेसिंपि होइ चवणं[1] का गणणा अन्नसत्तेसु? ॥ १३६ ॥

भवणवइवाणमंतरजोइसियाणं विमणवासीणं ।
जइ नाम होइ चवणं[1] का गणणा मणुयलोयम्मि? ॥ १३७ ॥

सो कोवि नत्थि जीवो तिलोयमज्झम्मि जो वसं न गओ ।
मच्चुस्स[2] पावमइणो मोत्तुं सिद्धे[3] सुहसमिद्धे[4] ॥ १३८ ॥

इय कालकवलियं पेच्छिऊण सयलंपि तिहुअणं देव! ।
जायम्मि देविमरणे किं सोगं कुणह विहलं तु ? ॥ १३९ ॥

जुज्जइ काउं सोगो मरणं जइ होज्ज तीए एक्काए ।
साहारणम्मि मरणे को सोगो किंव रुन्नेण[5] ? ॥ १४० ॥

अइतणुतणग्ग[6]संगयजललवतुल्लम्मि जीवियव्वम्मि ।
निद्दासंगे जं पुण उट्ठिज्जइ तं महच्छरियं[7] ॥ १४१ ॥

---

**येषामपि च त्रयस्त्रिंशदायुरुदधिनां प्रवरदेवानाम् ।**
**तेषामपि भवति च्यवनं का गणनाऽन्यसत्त्वेषु ? ॥ १३६ ॥**

**भवनपतिवाणव्यंतरज्योतिषां विमानवासीनाम् ।**
**यदि नाम भवति च्यवनं का गणना मनुजलोके ? ॥ १३७ ॥**

**स कोऽपि नास्ति जीवस्त्रिलोकमध्ये यो वशं न गतः ।**
**मृत्योः पापमते-र्मुक्त्वा सिद्धान् सुखसमृद्धान् ॥ १३८ ॥**

**इति कालकवलितं प्रेक्ष्य सकलमपि त्रिभुवनं देव ! ।**
**जाते देवीमरणे किं शोकं कुरुथ विफलन्तु ? ॥ १३९ ॥**

**युज्यते कर्तुं शोको मरणं यदि भवेत्तस्या एकस्याः ।**
**साधारणे मरणे क शोकः किं वा रुदितेन ? ॥ १४० ॥**

**अतितनुतृणाग्रसङ्गतजललवतुल्ये जीवितव्ये ।**
**निद्रासङ्गे यत्पुनरुत्थीयते तद् महाश्चर्यम् ॥ १४१ ॥**

---

१. च्यवनं = मरणम् । २. मृत्योः । ३. सिद्धान् = मुक्तजीवान् । ४. सुखसमृद्धान् ।
५. रुदितेन । ६. तणग्गं=तृणाग्रम् । ७. महाश्चर्यम् ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

इय लोयस्स सरूवं कुवियकयंतस्स एरिसं दट्ठुं ।
देविमरणम्मि नरवर! न हु जुत्तं सोगकरणंति ॥ १४२ ॥

एवं च बहुविगप्पं भणिओ सो सुमइणा नरवरिंदो ।
तक्कालुचियं सव्वं मइकिच्चं[1] कुणइ देवीए ॥ १४३ ॥

कइवयदिणाइं परिचत्त[2]लोयसंभावणाइवावारो ।
गहगहिओ[3] इव चिट्ठइ राया देवीए सोगेण ॥ १४४ ॥

सुमइमुहेहिं तावय नाणाविहसोयमोयणपडूहिं[4] ।
बोहिज्जंतो[5] गिराहिं जाओ कालेण गयसोगो ॥ १४५ ॥

नाऊण अट्ठवरिसं ममं तओ गरुयपुत्तनेहेण ।
संगहिय उवज्झायं गाहेइ कलाणसंदोहं[6] ॥ १४६ ॥

गहिए कलाकलावे गामसहस्सं तया महं दिन्नं[7] ।
मह दंसणेण राया साहारइ देविविरहंपि ॥ १४७ ॥

---

इति लोकस्य स्वरुपं कुपितकृतान्तस्येदृशं दृष्ट्वा ।
देवीमरणे नरवर ! न खलु युक्तं शोककरणमिति ॥ १४२ ॥

एवञ्च बहुविकल्पं भणितः स सुमतिना नरवरेन्द्रः ।
तत्कालोचितं सर्वं मृतिकृत्यं करोति देव्याः ॥ १४३ ॥

कतिपयदिनानि परित्यक्तलोकसंभावनादिव्यापारः ।
ग्रहगृहीत इव तिष्ठति राजा देव्याः शोकेन ॥ १४४ ॥

सुमतिमुखैस्तावन्नानाविधशोकमोचनपटुभिः ।
बोध्यमानो गीर्भि-र्जातः कालेण गतशोकः ॥ १४५ ॥

ज्ञात्वाऽष्टवर्षं माम् ततो गुरुकपुत्रस्नेहेन ।
संगृह्य उपाध्यायं ग्राहयति कलानां सन्दोहम् ॥ १४६ ॥

गृहीते कलाकलापे ग्रामसहस्त्रं तदा मह्यं दत्तम् ।
मम दर्शनेन राजा संधारयति देवीविरहमपि ॥ १४७ ॥

---

१. मृतिकृत्यम् । २. परिचत्तो=परित्यक्तः । ३. ग्रहगृहीतः । ४. पडू=पटुः । ५. बोध्यमानः । ६. संदोहः = समूहः । ७. दिन्नं=दत्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाइवि अत्थाणगयस्स राइणो झत्ति ।
पणमिय दुवारवालो वज्जरइ सूहवो एवं ॥ १४८ ॥

चंपापुरीओ सामिय! महंतओ कित्तिधम्मनरवइणो ।
देवस्स दंसणत्थं चिट्ठइ पडिहारभूमीए ॥ १४९ ॥

सिग्घं पवेससुत्ति य भणिए सो राइणा अणुन्नाओ ।
आगम्म विहियविणओ उवविट्ठो उचियठाणम्मि ॥ १५० ॥

तंबोलाइपयच्छणपुव्वं[1] सो राइणा समुल्लविओ ।
आगमकारणं भो! साहसु तो भणिउमाढत्तो ॥ १५१ ॥

चंपाए पुरवरीए सुपसिद्धो चेव देवपायाणं ।
वित्थारियविमलकित्ती राया सिरिकित्तिधम्मोऽत्थि ॥ १५२ ॥

निज्जियसुरिंदसुंदरिरूवातिसया समत्थमहिलाण ।
अब्भहिया से देवी कित्तिमई लोयविक्खाया ॥ १५३ ॥

---

अथान्यदा कदाचिदपि आस्थानगतस्य राज्ञो झटिति ।
प्रणम्य द्वारपालो कथयति सुभग एवम् ॥ १४८ ॥

चम्पापुरीतः स्वामिन् ! महन्तःकीर्तिधर्मनरपतेः ।
देवस्य दर्शनार्थं तिष्ठति प्रतिहारभूमौ ॥ १४९ ॥

शीघ्रं प्रवेशयेति भणिते स राज्ञाऽनुज्ञातः ।
आगत्य विहितविनय उपविष्ट उचितस्थाने ॥ १५० ॥

तम्बोलादिप्रदानपूर्वं स राज्ञा समुल्लपितः ।
आगमनकारणं भोः! कथय ततो भणितुमारब्ध : ॥ १५१ ॥

चम्पायां पुरवर्यां सुप्रसिद्धश्चैव देवपादानाम् ।
विस्तारितविमलकीर्त्ती राजा श्री कीर्त्तिधर्म्माऽस्ति ॥ १५२ ॥

निर्जितसुरेन्द्रसुंदरीरूपातिशया समस्तमहिलानाम् ।
अभ्यधिका तस्य देवी कीर्त्तिमती लोकविख्याता ॥ १५३ ॥

---

१. पयच्छणं = प्रदानम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीय धूया सोहग्गरूवविण्णाणगारवग्घविया[1] ।
पायालकन्नयसमा कणयवई नाम वरकन्ना ॥ १५४ ॥

संपत्तजोव्वणा सा आभरणविभूसिया पिउसयासे ।
पट्ठविया माऊए तदुचियवरदाणअट्ठाए ॥ १५५ ॥

आगम्म पायपडिया पिउणा सा सहरिसं निउच्छंगे ।
विणिवेसिय अवगूढा भणिया य इमं तु सा कन्ना ॥ १५६ ॥

पुत्ति ! नियहिययइट्ठं सामंतमहंतयाण मज्झम्मि ।
साहसु जेण तुहं सो किज्जइ भत्ता, किमन्नेणं ? ॥ १५७ ॥

एवं पिउणा भणिया लज्जाए अहोमुही ठिया बाला ।
पुणरुत्तं[2] पुट्ठावि हु न किंचि पडिउत्तरं देइ ॥ १५८ ॥

तो चिंतिउं पयत्तो एया लज्जालुया इमा वैरई[3] ।
न हु सक्कइ वज्जरिउं एसो मह ताय! इट्ठोत्ति । १५९ ॥

---

**तस्या दुहिता सौभाग्यरूपविज्ञानगौरवपूर्णा ।**
**पातालकन्यकासमा कनकवती नाम्नी वरकन्या ॥ १५४ ॥**

**संप्राप्तयौवना साऽऽभरणविभूषिता पितृसकाशे ।**
**प्रस्थापिता मात्रा तदुचितवरदानार्थे ॥ १५५ ॥**

**आगम्य पादपतिता पित्रा सा सहर्षं निजोत्सङ्गे ।**
**विनिवेश्य अवगूढा भणिता चेदं तु सा कन्या ॥ १५६ ॥**

**पुत्रि ! निजहृदयेष्टं सामन्तमहन्तकानां मध्ये ।**
**कथय येन तव स क्रियते भर्त्ता किमन्येन? ॥ १५७ ॥**

**एवं पित्रा भणिता लज्जयाऽधोमुखी स्थिता बाला ।**
**पुनरुक्तं पृष्टाऽपि खलु न किञ्चित्प्रत्युत्तरं ददाति ॥ १५८ ॥**

**ततश्चिन्तितुम् प्रवृत्त एषा लज्जालुकेयं वराकी ।**
**न खलु शक्यते कथयितुमेष मम तात ! इष्ट इति ॥ १५९ ॥**

---

१. गारवं=गौरवं, तेन अग्घविया=पूर्णा । २. पुनरुत्तं=भूयः । ३. वराकी ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता चिंतेमि सयं चिय अणुरूवमिमीए पवरभत्तारं ।
विन्नाणरूवसंपयकलियं वरवंसउप्पन्नं ॥ १६० ॥

खणमेगम[1]च्छिऊणं राया चिंताउरो भणइ तत्तो ।
पुत्ति! तुह रूवसरिसो भत्ता लद्धो मए इण्हिं ॥ १६१ ॥

सिद्धत्थपुरे राया सुग्गीवो नाम मह परं मित्तं ।
तस्स तुमं गच्छ ल[2]हुं सयंवरा, एत्थ किं बहुणा ? ॥ १६२ ॥

एवं च भणियमेत्ते सा कन्ना देव! तुम्ह नामेण ।
निसु[3]एणं चिय जाया हरिसवसुल्लसियरोमंचा ॥ १६३ ॥

नाऊण तीए भावं राया संपेक्खिऊण मह वयणं ।
वज्जरइ, तं महाबल! वच्चसु सिद्धत्थनयरम्मि ॥ १६४ ॥

घेत्तुं सयंवरमिमं कणगवइं भूरिभूइसंजुत्तं ।
कइवयबलसंजुत्तो सोहणतिहिकर[4]णनक्खत्तो ॥ १६५ ॥ युग्मम् ॥

---

**तस्मात् चिन्तयामि स्वयं चैवाऽनुरुपमस्याः प्रवरभर्त्तारम् ।**
**विज्ञानरूपसंपत्कलितं वरवंशोत्पन्नम् ॥ १६० ॥**

**क्षणमेकमासित्वा राजा चिन्तातुरो भणति ततः ।**
**पुत्रि ! तव रूपसदृशो भर्त्ता लब्धो मयेदानीम् ॥ १६१ ॥**

**सिद्धार्थपुरे राजा सुग्रीवो नामा मम परं मित्रम् ।**
**तस्य त्वं गच्छ लघु स्वयंवरा अत्र किं बहुना ? ॥ १६२ ॥**

**एवञ्च भणितमात्रे सा कन्या देव ! तव नाम्ना ।**
**निश्रुतेन चैव जाता हर्षवशोल्लसितरोमाञ्चा ॥ १६३ ॥**

**ज्ञात्वा तस्याः भावं राजा संप्रेक्ष्य मम वदनम् ।**
**कथयति, त्वं महाबल ! व्रज सिद्धार्थनगरे ॥ १६४ ॥**

**गृहीत्वा स्वयवरामिमां कनकवतीं भूरिभूतिसंयुक्ताम् ।**
**कतिपयबलसंयुक्तः शोभनतिथिकरणनक्षत्रः ॥ १६५ ॥ युग्मम् ॥**

---

१.अच्छिऊणं=आसित्वा । २. लघु यथा स्यात्तथा, शीघ्रमिति यावत् । ३. निसुयं = श्रुतम् । ४. करणं = बव-बालवादि ज्योतिः शास्त्रप्रसिद्धम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं आणवेसि भणिउं तत्तो हं तं गहीय संचलिओ ।
जाव य कमेण एत्तो[1] जोयणमेत्तम्मि संपत्तो ॥ १६६ ॥

अज्ज रयणीविरामे कइवयतुरएहिं वेगवंतेहिं ।
उग्गिलिय[2] आगओ हुं तुम्हाण पियं निवेएमि ॥ १६७ ॥

देव! महमेयमागमणकारणं पुच्छियं हि जं तुमए ।
एवं चेवत्थियम्मि[3] संपइ देवो पमाणंति ॥ १६८ ॥

हरिसाऊरियहियओ अह राया भणइ परियणं निययं ।
महया विच्छड्डेणं नयरे कन्नं पवेसेह ॥ १६९ ॥

तो परियणेण सम्मं तहत्ति संपाडियम्मि[4] वयणम्मि ।
सोहणलग्गे रन्ना परिणीया तत्थ कणगवई ॥ १७० ॥

सा रन्नो कणगवई कालेण अईव वल्लहा जाया ।
मह माऊए ठाणे विहिया अह पट्टबद्धा सा ॥ १७१ ॥

---

**यदाज्ञापयसि भणित्वा ततोऽहं तां गृहीत्वा सञ्चलितः ।**
**यावत् क्रमेणेतो योजनमात्रे संप्राप्त : ॥ १६६ ॥**

**अद्य रजनीविरामे कतिपयतुरङ्गै-र्वेगवद्भिः ।**
**अग्रे भूत्वा आगतोऽहं युष्माकं प्रियं निवेदयामि ॥ १६७ ॥**

**देव ! ममैतदागमनकारणं पृष्टं हि यत्त्वया ।**
**एवञ्चावस्थिते संप्रति देवप्रमाणमिति ॥ १६८ ॥**

**हर्षातुरितहृदयोऽथ राजा भणति परिजनं निजकम् ।**
**महता विच्छर्देन नगरे कन्यां प्रवेशयत ॥ १६९ ॥**

**ततः परिजनेन सम्यक् तथेति संपादिते वचने ।**
**शोभनलग्ने राज्ञा परिणीता तत्र कनकवती ॥ १७० ॥**

**सा राज्ञः कनकवती कालेणाऽतीव वल्लभा जाता ।**
**मम मातुः स्थाने विहिताऽथ पट्टबद्धा सा ॥ १७१ ॥**

---

१. इतो नगरात् । २. अग्रे भूत्वा । ३. यावस्थिते । ४. संपादिते निर्व्यूढे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अइवल्लहंपि वीसरइ माणूसं देसकाल[1]अंतरियं ।
वल्लीसमं हि पि[2]म्मं जं आसन्नं तहिं चडइ ॥ १७२ ॥

वच्चंति वासराइं मह पिउणो तीए गाढरत्तस्स ।
सिढिलीकयसेसोरोह[3]रमणिगमणाइचेट्ठस्स ॥ १७३ ॥

अह अन्नया कयाइवि कणगवईए सुओ समुप्पन्नो ।
सुरहोत्ति विहियनामो पत्तो सो कुमरभावम्मि ॥ १७४ ॥

अन्नदियहम्मि एयं एगंते भणइ कणगवई देवी ।
जुवरायपए किं नवि [4]अहिसिच्चइ देव! मे पुत्तो ॥ १७५ ॥

तो भणइ नरवरिंदो जेट्ठे पुत्तम्मि सुप्पइट्ठम्मि ।
वि[5]ज्जंते न हु जुत्तं जुवरायं ठाविउं सुरहं ॥ १७६ ॥

भणियं देवीए तओ जेट्ठट्ठवणे नि[6]होडउ को णु? ।
जइ तुज्झ अहं दइया ता सुरहं कुणसु जुयरायं ॥ १७७ ॥

---

**अतिवल्लभमपि विस्मरति मनुष्यं देशकालान्तरितम् ।**
**वल्लीसमं हि प्रेम यदासन्नं तस्मिंश्चटति ॥ १७२ ॥**

**व्रजन्ति वासराणि मम पितुस्तस्यां गाढरतस्य ।**
**शिथिलीकृतशेषाऽवरोधरमणीगमनादिचेष्टस्य ॥ १७३ ॥**

**अथान्यदा कदाचिदपि कनकवत्याः सुतः समुत्पन्नः ।**
**सुरथ इति विहितनामा प्राप्तस्स कुमारभावे ॥ १७४ ॥**

**अन्यदिवसे एतदेकान्ते भणति कनकवती देवी ।**
**युवराजपदे किं नाऽपि अभिषिच्यते देव ! मम पुत्रः ? ॥ १७५ ॥**

**ततो भणति नरवरेन्द्रो ज्येष्ठे पुत्रे सुप्रतिष्ठे ।**
**विद्यमाने न खलु युक्तं स्थापयितुं सुरथम् ॥ १७६ ॥**

**भणितं देव्या ततो ज्येष्ठस्थापने निवारयतु को नु ? ।**
**यदि तवाऽहं दयिता तर्हि सुरथं कुरु युवराजम् ॥ १७७ ॥**

---

१. अन्तरितं =व्यवहितम् । २. प्रेम । ३. अवरोधः=अन्तःपुरम् । ४. अभिषिच्यते ।
५. विद्यमाने । ६. निवारयतु ।



Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

ताहे रन्ना भणियं सुट्ठु पिया तं सुलोयणे! मज्झ।
किंतु इमस्सऽणुरत्ता सामंतमहंतया सव्वे ॥ १७८ ॥

तह एसो सुसमत्थो एवं विहिए विहेज्ज तं किंपि।
अवमाणिओ हु जेणं ममावि रज्जं अवहरेज्जा ॥ १७९ ॥

तो भणइ हसिय देवी एरिससत्तेण कह तुमं विहिणा।
पिययम! राया विहिओ नवरि[1] किराडो[2] कओ[3] होन्तो ? ॥ १८० ॥

जेणेव सुप्पइट्ठो एरिसओ उक्कडो[4] पयावेण।
तेणेव इमं सिग्घं कट्ठहरे[5] खिवसु जत्तेण[6] ॥ १८१ ॥

तत्तो य मज्झ पुत्तं जुवरायं ठाविउं पयत्तेण।
अच्छसु विगयासंको रज्जं च ममं च माणंतो ॥ १८२ ॥

एवं देवीवयणं सोउं पडिउत्तरं अदाऊणं।
राया समुट्ठिऊणं अत्थाणे गंतुमुवविट्ठो ॥ १८३ ॥

---

**तदा राज्ञा भणितं सुष्ठु प्रिया त्वं सुलोचने ! मम ।**
**किन्तु अस्याऽऽनुरक्ता सामन्तमहन्तकाः सर्वे ॥ १७८ ॥**

**तथैष सुसमर्थ एवं विहिते विदध्यात् तं किमपि ।**
**अपमानितः खलु येन ममाऽपि राज्यमवहरेत् ॥ १७९ ॥**

**तस्माद् भणति हसित्वा देवी एतादृशसत्त्वेन कथं त्वं विधिना ।**
**प्रियतम ! राजा विहितो नवरं किरातः कृतो अभविष्यत् ? ॥ १८० ॥**

**येनैव सुप्रतिष्ठ एतादृश उत्कटः प्रतापेन ।**
**तेनैव इमं शीघ्रं काष्ठगृहे क्षिप यत्नेन ॥ १८१ ॥**

**ततश्च मम पुत्रं युवराजं स्थापयित्वा प्रयत्नेन ।**
**आस्स्व विगताशङ्को राज्यं च माम् च मन्वानः ॥ १८२ ॥**

**एवं देवीवचनं श्रुत्वा प्रत्युत्तरमदत्त्वा ।**
**राजा समुत्थायऽऽस्थाने गत्वोपविष्टः ॥ १८३ ॥**

---

१. अन्यथा । २. किरातः । ३. कृतः । ४. उत्कटः । ५. कष्टगृहे. काष्टगृहे वा=कारागृहे इत्यर्थः । ६. यत्नेन ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयं च देविवयणं सूहवियानामियाए चेडीएँ[1] ।
पच्छन्ने सोऊणं सव्वं धणदेव! मह सिट्ठं ॥ १८४ ॥

तं सोउं मह विगप्पो चित्ते एयारिसो समुप्पन्नो ।
किं कणगवईए वुत्तो[2] करेज्ज एवं पिया[3] मज्झ? ॥ १८५ ॥

अहवा । न गणंति पुव्वनेहं न य नीइं नेय लोयअववायं ।
न य भावि[4]आवयाओ पुरिसा महिलाण आयत्ता[5] ॥ १८६ ॥

ता जा न किंपि अन्नं देवीवयणाओ मह पिया कुणइ ।
ताव [6]अहिट्ठेमि सयं रज्जं, पियरं विणासेत्ता ॥ १८७ ॥

अहव न एयं जुत्तं विवेयजुत्तस्स मज्झ काउं जे ।
ता बंधिऊण पियरं कट्ठहरगयं अणुचरामि[7] ॥ १८८ ॥

किंवा कणगवइं चिय सह सुरहेणं नयामि जमवयणे ।
किंवा कट्ठहरम्मि दोन्निवि घँत्तेमि बंधउं?[8] ॥ १८९ ॥

---

**एतच्च देवीवचनं सूभविकानाम्न्या चेट्या ।
प्रच्छन्ने श्रुत्वा सर्वं धनदेव ! मम शिष्टम् ॥ १८४ ॥**

**तं श्रुत्वा मम विकल्पश्चिते एतादृशः समुत्पन्नः ।
किं कनकवत्योक्त :कूर्यादेवं पिता मम ? ॥ १८५ ॥**

**अथवा । न गणयन्ति पूर्वस्नेहं न च नीतिं नैव लोकापवादम् ।
न च भाव्यापदः पुरुषा महिलानामायताः ॥ १८६ ॥**

**तस्माद्यावन्न किंम्प्यन्यं देवीवचनात् मम पिता करोति ।
तावदधितिष्ठामि स्वयं राज्यं, पितरं विनाश्य ॥ १८७ ॥**

**अथवा न एतद्युक्तं विवेकयुक्तस्य मम कर्त्तुम् ये ।
तर्हि बद्धवा पितरं काष्ठगृहगतमनुकरोमि ॥ १८८ ॥**

**किं वा कनकवती चैव सह सुरथेन नयामि यमवदने ।
किं वा काष्ठगृहे द्वयोरपि घातयामि बद्ध्वा ॥ १८९ ॥**

---

१. चेटी=दासी । २. उक्तः । ३. पिता । ४. आवया=आपत् । ५. आयत्ताः=आधीनाः ।
६. अधितिष्ठामि । ७. करोमि । ८. बद्ध्वा घातयामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा किं मह इमिणा पेक्खामो ताव जं पिया कुणइ ।
अदिट्ठपाणियम्मि[1] न हु जुत्तं पाणहुम्मुयणं[2] ॥ १९० ॥

अह राया मह उवरिं दिणे दिणे पिययमाए भन्नंतो।
जाओ सिढिलसिणेहो कन्नविसं[3] जं महंतविसं ॥ १९१ ॥

सहसत्ति अन्नदियहे किंपि मिसं दाविऊण मह रन्ना।
हरियं गामसहस्सं दिन्नं लहुखेडयं[4] एक्कं ॥ १९२ ॥

संजायअमरिसेणं ताहे मए चिंतियं दुरायारं ।
मारेऊण एयं रज्जमहिट्ठेमि, किं बहुणा ? ॥ १९३ ॥

अहवा न पुव्वपुरिसेहिं मज्झं वंसे कयं इमं पावं ।
तमहंपि कह करोमी असाररज्जस्स कज्जेण ? ॥ १९४ ॥

महिलावयणेण इमो रागंधो कुणइ, कुणउ अन्नायं[5] ।
मह पुण विवेयजुत्तस्स हंदि! न हु एरिसं जुत्तं ॥ १९५ ॥

---

**अथवा किं ममाऽनेन प्रेक्षामहे तावद्यत् पिता करोति ।**
**अदृष्टपानीये न खलु युक्तं उपानहोन्मोचनम् ॥ १९० ॥**

**अथ राजा ममोपरि दिने दिने प्रियतमया भण्यमानः ।**
**जातः शिथिलस्नेहः कर्णविषं यद् महत्विषम् ॥ १९१ ॥**

**सहसेति अन्यदिवसे किमपि मिषं दत्त्वा मम राज्ञा ।**
**हृतं ग्रामसहस्त्रं दत्तं लघुखेटकमेकम् ॥ १९२ ॥**

**सञ्जाताऽमर्षेण तदा मया चिन्तितं दुराचारम् ।**
**मारयित्वा एनं राज्यमधितिष्ठामि किम्बहुना ? ॥ १९३ ॥**

**अथवा न पूर्वपुरुषैर्मम वंशे कृतमिदं पापम् ।**
**तमहमपि कथं करोमि असारराज्यस्य कार्येण ? ॥ १९४ ॥**

**महिला वचनेनाऽयं रागान्धः करोति, करोतु, अन्यायम् ।**
**मम विवेकयुक्तस्य हन्दि ! न खल्वीदशं युक्तम् ॥ १९५ ॥**

---

१. अदृष्टपानीये प्रदेशे । २. उपानहोः पादरक्षकयोरुन्मोचनम् । ३. कर्णविषम्। ४. खेटकं =ग्रामः । ५. अन्यायम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता किं करेमि इण्हिं अवमाणं ताव दूसहं पिउणो ।
अप्पवहोवि[1] न जुत्तो देसच्चाओ[2] परं जुत्तो ॥ १९६ ॥

गंतूणमन्नदेसं तम्हा सेवामि अन्ननरनाहं ।
हुं तंपि हु नहु जुत्तं अवमाणपयं हि सेवत्ति ॥ १९७ ॥

सुग्गीवनरिंदसुओ जुयराया आसि एस रिद्धिजुओ ।
संपइ पुण वंठोइव[3] कह सेवं कुणइ भिच्चाण[4] ?॥ १९८ ॥

एमाइवयणवित्थरवज्जरणसमुज्जएण लोएणं ।
दंसिज्जंतो[5] रिऊण कहं गेहेसुं परिभमिस्सं ? ॥ १९९ ॥

तम्हा कइवयनियपुरिसपरिगओ अकयअन्नजणसेवो ।
गंतुं चिट्ठामि अहं कम्मिवि पच्चंतदेसम्मि[6] ॥ २०० ॥

जा जीवइ एस पिया एयम्मि मयम्मि पुण जहा जुत्तं ।
तइय च्चिय काहामो किं इण्हिं तीए चिंताए ? ॥ २०१ ॥

---

**तर्हि किं करोमि इदानीमपमानं तावत् दुस्सहं पितुः ।**
**आत्मवधोऽपि न युक्तं देशत्यागः परं युक्तम् ॥ १९६ ॥**

**गत्वाऽन्यदेशं तस्मात् सेवेऽन्यनरनाथम् ।**
**हुं तमपि खलु नहि युक्तं अपमानपदं हि सेवेति ॥ १९७ ॥**

**सुग्रीवनरेन्द्रसुतो युवराजोऽऽसीदेष ऋद्धियुक्तः ।**
**संप्रति पुनर्वण्ठ इव कथं सेवां करोति भृत्यानाम् ॥ १९८ ॥**

**एवमादिवचनविस्तारकथनसमुद्यतेन लोकेन ।**
**दर्श्यमानो रिपूणां कथं गेहेषु परिभ्रमिष्यामि ? ॥ १९९ ॥**

**तस्मात् कतिपयनिजपुरुषपरिगतोऽकृतान्यजनसेवः ।**
**गत्वा तिष्ठाम्यहं कस्मिन्नपि प्रत्यन्तदेशे ॥ २०० ॥**

**यावज्जीवति एष पिता एतस्मिन्मृते पुनर्यथा युक्तम् ।**
**तदा चैव करिष्यामः किमिदानीं तया चिन्तया ? ॥ २०१ ॥**

---

१. आत्मवधः । २. चाओ=त्यागः । ३. दासः। ४. भृत्यो दासः, अन्यराजानां स्वराज्यापेक्षया लघुत्वेन स्वाज्ञावशवर्तितया वा दासप्रायत्वात् । ५. दर्श्यमानः । ६. प्रत्यन्तदेशे=समीपदेशे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं विणिच्छियमई कइवयपियपरियणेण परियरिओ ।
सामंतमंतिपुरनायगेहिं रन्ना य अन्नाओ[1] ॥ २०२ ॥

नीहरिओ तत्तो हं कमेण अह पाविउं इमं पल्लिं ।
सीहगुहं नामेण अच्छिउमेईए[2] पारद्धं ॥ २०३ ॥

मिलिया मज्झ अणेगे भिल्ला चोरा कुकम्मनिरया य ।
तेहिं परिवारिओ हं संपइ पल्लीवई जाओ ॥ २०४ ॥

तं जं तुमए पुट्ठं तुम्हाणं कह णु एत्थ आवासो ।
उत्तमनराण पाविट्ठलोयजोगाए पल्लीए ? ॥ २०५ ॥

एयं संखेवेणं कहियमवत्थाणकारणं एत्थ ।
तं तुह धणदेव! मए गरुयसिणेहेण सव्वंपि ॥ २०६ ॥

भणियं धणदेवेणं अव्वो! जणओपि एरिसं कुणइ ।
अवमाणं पुत्ताणं धी ! धी[3]! संसारवासस्स ॥ २०७॥

---

एवं विनिश्चितमतिः कतिपयप्रियपरिजनेन परिवृतः ।
सामन्तमंत्रीपुरनायकै राज्ञा चाज्ञातः ॥ २०२ ॥

निस्सृतस्ततोऽहं क्रमेणाऽथ प्राप्य इमां पल्लीम् ।
सिंहगुफानाम्नाऽऽसितुमेतस्यां प्रारब्धम् ॥ २०३ ॥

मिलिता ममाऽनेके भिल्लाश्चौराः कुकर्मनिरताश्च।
तैः परिवृत्तोऽहं संप्रति पल्लीपति - र्जातः ॥ २०४ ॥

तद्यत्त्वया पृष्टं युष्माकं कथन्नु अत्राऽऽवासः।
उत्तमनराणां पापिष्ठलोकयोग्यायां पल्ल्याम् ॥ २०५ ॥

एतत् संक्षेपेण कथितमवस्थानकारणमत्र ।
तत्तव धनदेव ! मया गुरुस्नेहेन सर्वमपि ॥ २०६ ॥

भणितं धनदेवेन अहो ! जनकोऽपीदृशं करोति ।
अपमानं पुत्राणाम् धिक् ! धिक् ! संसारवासस्य ॥ २०७ ॥

---

१. अज्ञातः । २. आसितुमेतस्याम् । ३. धिक् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो च्चिय कज्जवसेणं वल्लहओ होइ एत्थ संसारे ।
कारणवसेण सोवि हु रिउव्व [1]वेसो जणो होइ ॥ २०८ ॥

परमत्थओ न कोवि हु पिओ व सत्तू व अत्थि लोगम्मि ।
नइ माया नेय पिया सकज्जवसओ जणो सव्वो ॥ २०९ ॥

पुत्तोवि सत्तुसरिसो दीसइ नियकारणे [2]अपुज्जंते ।
पिउणा सुविणीओवि हु धिरत्थु संसारवासस्स ॥ २१० ॥

तं चिय कुमार ! [3]महप्पा तं चिय पसमस्स लद्धपरमत्थो ।
तं चिय विवेयजुत्तो तुमए च्चिय मंडिया वसुहा ॥ २११ ॥

पिउणाऽवमाणिओवि हु अन्नं असमंजसं अकाऊणं ।
संतम्मि बले तहवि हु देसच्चाओ कओ जेण ॥ २१२ ॥

एमाइवयणवित्थरअवरोप्परवड्ढमाणनेहाणं ।
ताणं पंच व सत्त व वोली[4]णा वासरा जाव ॥ २१३ ॥

---

स चैव कार्यवशेन वल्लभो भवति अत्र संसारे ।
कारणवशेन सोऽपि खलु रिपुरिव द्वेष्यो जनो भवति ॥ २०८ ॥

परमार्थतो न कोऽपि खलु प्रियो वा शत्रुर्वाऽस्ति लोके ।
नहि माता नैवं पिता स्वकार्यवशतो जनस्सर्वः ॥ २०९ ॥

पुत्रोऽपि शत्रुसदृशो दृश्यते निजकारणेऽपूर्यमाणे ।
पित्रा सुविनीतोऽपि खलु धिगस्तु संसारवासस्य ॥ २१० ॥

त्वमेव कुमार ! महात्मा त्वमेव प्रशमस्य लब्धपरमार्थः ।
त्वमेव विवेकयुक्तस्त्वया चैव मण्डिता वसुधा ॥ २११ ॥

पित्राऽपमानितोऽपि खल्वन्यमसमंजसमकृत्वा ।
सति बले तथापि हु देशत्यागः कृतो येन ॥ २१२ ॥

एवमादिवचनविस्तारपरस्परवर्धमानस्नेहयोः ।
तयोः पञ्च वा सप्तवाऽतिक्रान्ता वासरा यावत् ॥ २१३ ॥

---

१. द्वेष्यः । २. अपूर्यमाणे । ३. महात्मा । ४. अतिक्रान्ताः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावय समत्थसत्थं दट्ठूणं गमणउच्छुगीभूयं ।
धणदेवो आपुच्छइ गमणत्थं सुप्पइट्ठं तं ॥ २१४॥

तुम्ह विओगो दूसहो एसो सत्थो समुच्छुगीभूओ ।
तं कुमारो ! अम्ह जायं एत्थ तडी एत्थ वग्घोत्ति ॥ २१५॥

एएणं चिय नेच्छंति साहवो सज्जणेहिं संसग्गिं ।
जम्हा विओगविहुरियहिययस्स न ओसहं अन्नं ॥ २१६॥ युग्मम् ॥

जइवि हु वहइ न जीहा एरिसवयणे समुल्लविज्जंते ।
तहवि हु भणामि मुंचसु गच्छामो संपयं अम्हे ॥ २१७॥

ता किंपि चिंतिऊणं खणंतरं दीहर च नीससिउं ।
वज्जरइ सुप्पइट्ठो सविसायं एरिसं वयणं ॥ २१८॥

अम्हारिसेहिं गिहमागयाण तुम्हारिसाणं सुयणाणं ।
को उवयारो कीरउ एरिसठाणे वसंतेहिं ? ॥ २१९॥

---

तावत् समस्तसार्थं दृष्ट्वा गमनोत्सुकीभूतम् ।
धनदेव आपृच्छ्यगमनार्थं सुप्रतिष्ठं तम् ॥ २१४ ॥

तव वियोगो दुस्सह एष सार्थः समुत्सुकीभूतः ।
तत् कुमार ! अस्माकं जातमितस्तटी इतो व्याघ्र इति ॥ २१५ ॥

एतेन चैव नेच्छन्ति साधवः सज्जनैःसङ्गतिम् ।
यस्माद् वियोगविधुरितहृदयस्य नौषधमन्यम् ॥ २१६ ॥ युग्मम् ।

यद्यपि खलु वहति न जिह्वा ईदशवचने समुल्लप्यमाने ।
तथापि खलु भणामि मुञ्च गच्छामः साम्प्रतं वयम् ॥ २१७ ॥

तदा किमपि चिन्तयित्वा क्षणान्तरं दीर्घं निश्वस्य ।
कथयति सुप्रतिष्ठः सविषादमीदृशं वचनम् ॥ २१८ ॥

अस्मादृशैर्गृहागतानां युष्मादृशानां सुजनानाम् ।
को उपचारो क्रियतां ईदशस्थाने वसद्भिः ॥ २१९ ॥

---

१. समस्तसार्थम् । २. उत्सुकीभूतम्=उत्कण्ठितम् । ३. संसक्तिम्= सङ्गतिम् । ४. दीर्घम् । ५. सुजनानाम् । ६. उपचारः=समादरः । ७. क्रियताम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहवि हु भणामि किंचिवि कायव्वो नेव पत्थणाभंगो ।
जेण परकज्जसाहणनिरया खलु सज्जणा होंति ॥ २२० ॥

तत्तो फुरंतनिम्मलम[1]ऊहविच्छु[2]रियदसदिसाऽऽभोगो[3] ।
एक्कोवि अणेगगुणो पवरमणी तस्स उवणीओ ॥ २२१ ॥

दट्ठुं दिव्वमणिं तं दीसंताणेयलक्खणं विमलं ।
वियसियलोयणजुअलो अह धणदेवो इमं भणइ ॥ २२२ ॥

एरिसपवरमणीणं मणुस्सखेत्तम्मि संभवो नत्थि ।
नवरं जइ सुरलोगे हवेज्ज न हु अन्नखेत्तम्मि ॥ २२३ ॥

एवं विणिच्छि[4]यम्मिवि तहवि हु कोऊ[5]हलं महं हियए ।
तो भणसु कह णु जाया संप[6]त्ती तुम्ह एयस्स ? ॥२२४ ॥

तो भणइ सुप्पइट्ठो सम्मं हि विणिच्छियं तुमे भद्द! ।
माणुसखेत्तसमुत्थो न होइ एसो मणी ताव ॥ २२५ ॥

---

**तथापि खलु भणामि किञ्चिदपि कर्तव्यो नैव प्रार्थनाभङ्गः ।**
**येन परकार्यसाधननिरक्ताः खलु सज्जना भवन्ति ॥ २२० ॥**

**ततो स्फुरन्निर्मलमयूखविच्छुरितदसदिशाऽऽभोगः ।**
**एकोऽप्यनेकगुणः प्रवरमणिस्तस्योपनीतः ॥ २२१ ॥**

**दृष्ट्वा दिव्यमणिं तं पश्यदनेकलक्षणं विमलम् ।**
**विकसितलोचनयुगलोऽथ धनदेव इदम् भणाति ॥ २२२ ॥**

**ईदशप्रवरमणीनां मनुष्यक्षेत्रे संभवो नास्ति ।**
**नवरं यदि सुरलोके भवेन्न खल्वन्यक्षेत्रे ॥ २२३ ॥**

**एवं विनिश्चयेऽपि तथाऽपि खलु कुतुहलं मम हृदये ।**
**तर्हि भण कथं नु जाता संप्राप्तिस्तवैतस्य ? ॥ २२४ ॥**

**ततो भणति सुप्रतिष्ठः सम्यग्धि विनिश्चयं त्वया भद्र ! ।**
**मनुष्यक्षेत्रसमुत्थः न भवति एष मणिस्तावत् ॥ २२५ ॥**

१. मयूखाः=किरणाः । २. विच्छुरितः=व्याप्तः । ३. आभोगः=प्रदेशः । ४. विनिश्चिते ।
५. कुतूहलम् । ६. संप्राप्तिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंतु सुरलोगजाओ एसो संपाविओ जहम्हेहिं ।
तं एगमणो होउ जइ कोउगमत्थि[1] तो सुणसु ॥ २२६ ॥

पुव्वं एगम्मि दिणे पभायसमयम्मि गहियकोदंडा[2] ।
चलिओ कइवयनियपुरिसपरिगओ मिगवहट्ठाए ॥ २२७ ॥

उत्तरदिसामुहो हं गाउमेत्तम्मि भूमिभागम्मि ।
घणपत्तलतरुवरसंकुलमि वियरामि जाव वणे ॥ २२८ ॥

ताव य निसुओ सद्दो दूसहगुरुदुक्खसूयओ कलुणो[3] ।
आगासे महिलाए सघग्घरं रोयमाणीए ॥ २२९ ॥ युग्मम् ॥

हा ! कह मज्झ निमित्ते पिययम! अतिगरुयआवयं[4] पत्तो ? ।
हा! अज्जउत्त! इण्हिं तुह विरहे नत्थि मह जीयं[5] ॥ २३० ॥

तदणंतरं च केणवि हक्किय अइनिट्ठुरं समुल्लवियं ।
कत्तो मह वसगाए साहारो तुज्झ एएण? ॥ २३१ ॥

---

किन्तु सुरलोकजात एष संप्राप्तो यथाऽस्माभिः ।
त्वमेकाग्रमना भूत्वा यदि कौतुकमस्ति तर्हि शृणु ॥ २२६ ॥

पूर्वमेकस्मिन् दिने प्रभातसमये गृहीतकोदण्डाः ।
चलितः कतिपयनिजपुरुषपरिगतो मृगवधनार्थे ॥ २२७ ॥

उत्तरदिग्मुखोऽहं गव्यूतमात्रे भूमिभागे ।
घनपत्रलतरुवरसङ्कुले विचरामि यावत् वने ॥ २२८ ॥

तावच्च निश्रुतः शब्दो दुस्सहगुरुदुःखसूचकः करुणः ।
आकाशे महिलायाः सघर्घरं रुदित्याः ॥ २२९ ॥ युग्मम् ।

हा ! कथं मम निमित्ते प्रियतम ! अतिगुरुकाऽऽपदं प्राप्तः ? ।
हा ! आर्यपुत्र ! इदानीं तव विरहे नास्ति मम जीवितम् ॥ २३० ॥

तदनन्तरञ्च केनाऽपि हक्कितमतिनिष्ठुरं समुल्लपितम् ।
कुत्र मम वशकायां साधारस्तवैतेन ? ॥ २३१ ॥

---

१. कौतुकम् । २. कोदण्डं=धनुः । ३. करुण=करुणोत्पादकः । ४. आपदम् । ५. जीवितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं सोऊणं मज्झं मणम्मि कोऊहलं[1] समुप्पन्नं ।
जाव य दोण्णि व तिण्णि व वच्चामि पयाइं ता निसुओ ॥ २३२ ॥

एगम्मि वणनिगुंजे अदिस्समाणस्स कस्सवि नरस्स ।
गुरुदुक्खसूयणपरो मंदो नित्थणणसंसद्दो ॥ २३३ ॥ युग्मम् ॥

तत्तो महंतकोऊहलेण[1] तत्तोमुहो अहं चलिओ ।
पेच्छामि संबलितरुं[2] सरलं उत्तुंगमइगरुयं ॥ २३४ ॥

दंसणमेत्तुप्पाइयअइगरुयभएहिं रत्तनेत्तेहिं ।
कसिणसरीरसमुब्भूयभूरिपहा[3]भरियगयणेहिं ॥ २३५ ॥

निम्मलमणिवलयसमुच्छलंतकंतीए पयडवयणेहिं ।
गुरुरोसवसवियंभियफारफणाघोरभुयगेहिं ॥ २३६ ॥

दीहरललंतजीहासहस्सविप्फुरणभीइजणगेहिं ।
असरिसअमरिसवसविप्पमुक्कफुंकारसद्देहिं ॥ २३७ ॥

---

तच्छ्रुत्वा मम मनसि कुतूहलं समुत्पन्नम् ।
यावच्च द्वे वा त्रिणि वा व्रजामि पदानि तावन्निश्रुतः ॥ २३२ ॥

एकस्मिन्निकुञ्जेऽदृश्यमानस्य कस्याऽपि नरस्य ।
गुरुदुःखसूचनपरो मन्दो निःस्तननसंशब्दः ॥ २३३ ॥ युग्मम् ॥

ततो महत्कुतूहलेन तन्मुखोऽहं चलितः ।
प्रेक्षे शाल्मलीतरुं सरलमुत्तुङ्गमतिगुरुकम् ॥ २३४ ॥

दर्शनमात्रोत्पादिताऽतिगुरुभयै रक्तनेत्रैः ।
कृष्णशरीरसमुद्भूतभूरिप्रभाभृतगगनैः ॥ २३५ ॥

निर्मलमणिवलयसमुच्छलत्कान्त्या प्रकटवदनैः ।
गुरुरोषवशविजृम्भितस्फारफणाघोरभुजङ्गैः ॥ २३६ ॥

दीर्घललज्जिह्वासहस्त्रविस्फुरणभीतिजनकैः ।
असदृशाऽमर्षवशविप्रमुक्तफुत्कारशब्दैः ॥ २३७ ॥

---

१. कुतूहलम् । २. शाल्मलीतरूम् । ३. पहा=प्रभा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अइगरुयपन्नगेहिं समंतओ वेढियो अणेगेहिं ।
एगो दिव्वागारो पुरिसो दिट्ठो अहे[1] तस्स ॥ २३८ ॥ चतसृभिः कलापकम्

अइदूसहवियणा[2]वसविमुक्कपुणरुत्तमंदहुंकारं ।
आकंठवेढियं तं दट्ठुं पुरिसं मए भणियं ॥ २३९ ॥

धी! धी! हयविहिणो विलसियस्स असमिक्खियस्स[3] एयस्स ।
एयारिसेवि पुरिसे एरिसदुक्खं करंतस्स ॥ २४० ॥

एमाइ मए परिदेवियम्मि[4] भणियं इमं तओ तेणं ।
अलमिमिणा ते परिदेविएण सुण ताव मह वयणं ॥ २४१ ॥

चिट्ठइ चूडाए महं मज्झे बद्धो फुरंतकिरणिल्लो ।
दिव्वो मणीण पवरो मणी भुयंगोहविद्दवणो[5] ॥ २४२ ॥

जस्स पभावेण इमे डसिउमणावि हु चयंति नो डसिउं ।
घोरविसावि हु सप्पा सप्पन्ति न बद्धवयणव्व[6] ॥ २४३ ॥

---

अतिगुरुकपन्नगैस्समन्ततो वेष्टिताऽनेकैः ।
एकोः दिव्याऽऽकारः पुरुषो दृष्टोऽधस्तस्य ॥ चतसृभिः कलापकम् ॥ २३८ ॥

अतिदुःसहवेदनावशविमुक्तपुनरुक्तमन्दहुंकारम् ।
आकण्ठवेष्टितं तं दृष्ट्वा पुरुषं मया भणितम् ॥ २३९ ॥

धिक् ! धिक् ! हतविधेः विलसितस्याऽसमीक्षितस्यैतस्य ।
एतादृशेऽपि पुरुष ईदृशदुःक्खं कुर्वतः ॥ २४० ॥

एवमादि मयि परिदेविते भणितमिदं ततस्तेन ।
अलमनेन तव परिदेवेन शृणु तावन्मम वचनम् ॥ २४१ ॥

तिष्ठति चूडायाः मम मध्ये बद्धस्फुरत्किरणवान् ।
दिव्यो मणीनां प्रवरो मणिर्भुजङ्गौघविद्रावणः ॥ २४२ ॥

यस्य प्रभावेन इमे दंष्टुमनसोऽपि खलु न शक्नुवन्ति दंष्टुम् ।
घोरविषाऽपि खलु सर्पाः सर्पन्ति न बद्धवदनवत् ॥ २४३ ॥

---

१. अधः । २. वियणा=वेदना । ३. असमीक्षितस्स । ४. परिदेविते=विलपिते=विलापे कृते सतीत्यर्थः । ५. विद्रावणः=निवारकः । ६. बद्धवदनाः=बद्धमुखाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं घेत्तूणं वरमणिं सिंचसु सलिलेण तेण तो पच्छा ।
अच्छोडेसु[1] भुयंगे अंगविलग्गे महमणेगे ॥ २४४ ॥

आमंति भणंतेणं तव्वयणं सायरं[2] कयं सव्वं ।
अच्छोडिया जलेणं झत्ति विलीणा अह भुयंगा ॥ २४५ ॥

अविय। मणिसलिलेणं सित्ता खणेण सव्वेवि पाविया विलयं ।
खरजालावलिजलणोवताविया मयणपिंडव्व ॥ २४६ ॥

अह सो पणट्ठवियणो सीयलतरुछाहियाए[3] उवविट्ठो ।
महपुरिसकयसुकोमलकिसलयसंछण्णसंथरए[4] ॥ २४७ ॥

आभट्ठो[5] पढमं च तेण अहयं कत्तो तुमं आगतो,
किंवा नाम कहिं कुलम्मि विमले जाओ सि, को ते पिया ?

एवं भो धणदेव! तेण तइया पुट्ठे मए साहिया[6],
पुव्वुत्ता सयलावि तुज्झ कहिया जा सा पउत्ती[7] तहिं ॥ २४८ ॥

---

तं गृहीत्वा वरमणिं सिञ्च सलिलेन तेन ततः पश्चात् ।
आच्छोट्य भुजङ्गान्नङ्गलग्नान् ममाऽनेके ॥ २४४ ॥

ओमिति भणता तद्वचनं सादरं कृतं सर्वम् ।
आच्छोटिता जलेन झटिति विलीनाऽथ भुजङ्गाः ॥ २४५ ॥

अपि च । मणिसलिलेन सिक्ताः क्षणेन सर्वेऽपि प्राप्ता विलयम् ।
खरज्वालावलिज्वलनोपतप्ता मदनपिण्ड इव ॥ २४६ ॥

अथ स प्रणष्टवेदनः शीतलतरुच्छायायामुपविष्टः ।
मत्पुरुषकृतसुकोमलकिशलयसच्छन्नसंस्तारके ॥ २४७ ॥

आभाषितः प्रथमं च तेनाऽहं कुतस्त्वमागतः,
किं वा नाम कस्मिन् कुले विमले जातोऽसि कस्ते पिता? ।
एवं भो धनदेव ! । तेन तदा पृष्टे मया कथिता
पूर्वोक्ता सकलाऽपि तव कथिता या सा प्रवृतिस्तत्र ॥ २४८ ॥

---

१. आच्छोटय । २. सादरं यथा स्यात्तथा । ३. छाहिया=छाया । ४. मत्पुरुषेण कृते सुकोमले किसलयैः संछन्ने संस्तारके। ५. आभाषितः । ६. कथिता । ७. प्रवृत्तिः=वृत्तान्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसो एत्थ समप्पइ विज्जाहरमोयणोत्ति नामेण ।
सुरसुंदरिनामाए कहाए बीओ परिच्छेओ ॥ २५० ॥ ॥ ५०० ॥

---

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निदोषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽत्र समाप्यते विद्याधरमोचन इति नाम्ना ।**
**सुरसुन्दरिनाम्न्याः कथाया द्वितीयः परिच्छेदः ॥ २५० ॥**

॥ द्वितीयः परिच्छेदः पूर्णः ॥

卐 卐 卐



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ।। तृतीयः परिच्छेदः ।।

अह सोवि मए पुट्ठो केण तुमं एरिसाए घोराए ।
खित्तो सि [1]आवयाए केण व कज्जेण भद्द ! मुहा ॥ १ ॥

एवं च पुच्छिओ सो सदुक्खमइदीहरं च नीससिउं ।
चित्तब्भंतरगुरुदुक्खसूयगं मोत्तुं अंसुजलं ॥ २ ॥

अह सो भणइ सुभणिओ संसारे रागमोहियमणाणं ।
सुलहाओ आवयाओ जीवाण [2]अदीहदंसीणं ॥ ३ ॥

संसारसागरम्मी परिब्भमंताण भद्द! जीवाणं ।
न हु चोज्ज[3]मावयाहिं[4] [5]अनिजंतियकरणवग्गाणं ॥ ४ ॥

---

**अथ सोऽपि मया पृष्टः केन त्वमीदृशायां घोरायां ।**
**क्षिप्तोऽसि आपदि केन वा कार्येण भद्र ! मुधा ? ॥ १ ॥**

**एवञ्च पृष्टः सः सदुःखमतिदीर्घञ्च निश्वस्य ।**
**चित्ताभ्यन्तरगुरुदुःखसूचकं मुक्त्वाऽश्रुजलम् ॥ २ ॥**

**अथ स भणति सुभणितः संसारे रागमोहितमनसाम् ।**
**सुलभाः आपदः जीवानामदीर्घदर्शिनाम्॥ ३ ॥**

**संसारसागरे परिभ्राम्यतां भद्र ! जीवानाम् ।**
**न खलु चोद्यमापत्भिरनियंत्रितकरणवर्गाणाम् ॥ ४ ॥**

---

१. आपदि । २. अदीर्घदर्शिनाम्=अविमृश्यकारिणाम् । ३. चोद्यम् । ४. आपद्विषयो नच प्रष्टव्यः, सुगमत्वादित्यर्थः । ५. अनियन्त्रितः=अवशीकृतः करणानामिन्द्रियाणां वर्गः समूहो यैस्तेषाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वकयकम्मदोसा दुक्खं सव्वंपि जायइ जियाणं[1] ।
अवराहेसु गुणेसु य निमित्तमेत्तं परो होइ ॥ ५ ॥

परमत्थओ न केणइ सुहं व दुक्खं व कीरइ नरस्स ।
पुव्वकयमेव कम्मं सुहदुहजणणम्मि तल्लिच्छं ॥ ६ ॥

तत्तो य मए भणियं एवं एयंति नत्थि संदेहो ।
तहवि हु विसेसकारणवियाणणे[2] अम्हइच्छत्ति॥ ७ ॥

अह भणइ भो सुंदर! जइ एवं सुट्ठु तुम्ह निब्बंधो[3] ।
ता एगमणो होउं साहिज्जंतं[4] निसामेहि ॥ ८ ॥

अत्थेथ भरहखेत्ते विक्खाओ खेयरावलीगम्मो।
तुंगोव्व रुप्पपुंजो दसदिसिपसरंतकंतिल्लो ॥ ९ ॥

झरझरझरंतनिज्झरहुंकाररवेहिं बहिरियदियंतो ।
मयरंदपाणलंपडअलिवलयविरायमाणवणो ॥ १० ॥

---

**पूर्वकृतकर्मदोषात् दुःक्खं सर्वमपि जायते जीवानाम् ।**
**अपराधेषु गुणेषु च निमित्तमात्रं परो भवति ॥ ५ ॥**

**परमार्थतः न केनचित् सुखं वा दुःखं वा क्रियते नरस्य ।**
**पूर्वकृतमेव कर्म सुखदुःखजनने तल्लिप्सम् ॥ ६ ॥**

**ततश्च मया भणितमेवमेतदिति नास्ति सन्देहः ।**
**तथापि खलु विशेषकारणविज्ञानेऽस्माकमिच्छेति ॥ ७॥**

**अथ भणति भोः सुन्दर ! यद्येवं सुष्ठु तव निर्बन्धः ।**
**तस्मादेकाग्रमना भूत्वा कथ्यमानं निशृणु ॥ ८ ॥**

**अस्त्यत्र भरतक्षेत्रे विख्यातः खेचरावलीगम्यः ।**
**तुङ्ग इव रुपपुञ्जो दशदिशिप्रसरत्कान्तिवान् ॥ ९ ॥**

**क्षरन्झरझरन्निर्झरहुंकाररवैः बधिरितदिगन्तः ।**
**मकरन्दपानलम्पटालिवलयविराजमानवनः ॥ १० ॥**

---

१. जीवानाम् । २. विज्ञाने। ३. निर्बन्धः=आग्रहः। ४. कथ्यमानम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वहमाणवा[1]हिणीणं दिसिदिसिसु[2]व्वंतखलहरासद्दो ।
ठाणे ठाणे विज्जाहरोरुपुरपंतिसोहि[3]ल्लो ॥ ११ ॥

विज्जापसाहणु[4]ज्जयविज्जाहरसंनिरुद्धएगंतो ।
वरसिद्धाययणेहिं परिमंडिय चूलियासिहरो ॥ १२ ॥

सिद्धाययणपरिट्ठियजिणबिंबच्च[5]णनिमित्तमिंतीहिं[6] ।
विविहविबुहावलीहिं विणायमाणंबराऽऽभोगो ॥ १३ ॥

कयलीहरट्ठिएहिं पइमज्झण्हं वणे वणे बहुसो ।
कंता[7]बिइज्जविज्जाहरेहिं किज्जंतसंगीओ ॥ १४ ॥

अइमहुरभा[8]रईए ठाणे ठाणम्मि चारणमुणीहिं ।
पारद्धदेसणेहि पडिबोहिज्जंतजंतुगणो ॥ १५ ॥

पुव्वावरसागरपाविएण होऊण मज्झदेसम्मि ।
पिसुणेणव जेण कओ दु[9]ब्भावो भरहवासस्स ॥ १६ ॥

---

**वहद्वाहिनीनां दिशिदिशिश्रूयमाणखलखलशब्दः ।**
**स्थाने स्थाने विद्याधरोरुपुरपङ्क्तिशोभावान् ॥ ११ ॥**

**विद्याप्रसाधनोद्यतविद्याधरसंनिरुद्धैकान्तः ।**
**वरसिद्धायतनैः परिमण्डितचूलिकाशिखरः ॥ १२ ॥**

**सिद्धायतनपरिस्थितजिनबिम्बार्चननिमित्तमायतीभिः ।**
**विविधविबुधावलीभिः विज्ञायमानाम्बराऽऽभोगः ॥ १३ ॥**

**कदलीगृहस्थितैः प्रतिमध्याण्हं वने वने बहुशः ।**
**कान्ताद्वितीयविद्याधरैः क्रियमाणसङ्गीतः ॥ १४ ॥**

**अतिमधुरभारत्या स्थाने स्थाने चारणमुनिभिः ।**
**प्रारब्धदेशनाभिः प्रतिबोध्यमानजन्तुगणः ॥ १५ ॥**

**पूर्वापरसागरप्राप्तेन भूत्वा मध्यदेशे ।**
**पिशुनेनैव येन कृतो दुर्भावो ( द्विर्भावो ) भरतवर्षस्य ॥ १६ ॥**

---

१. वाहिनी=नदी । २. सुव्वंतो= श्रूयमाणः । ३. सोहिल्लो=शोभावान् । ४. उज्जया=उद्यताः । ५. अर्चनम्=पूजनम् । ६. आयतीभिः=आगच्छन्तीभिः । ७. कान्ता द्वितीया येषां तैः स्वस्त्रीसहितैर्विद्याधरैरित्यर्थः । ८. भारत्या । ९. दुर्भावः, द्वयोर्भावो द्विर्भाव इति विग्रहेण द्वित्वं च ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

सुविसालदक्खिणुत्तरविभत्त[1]सेढीदुगेण सोहिल्लो ।
आसिय[2]सव्विड्ढीओ वेयड्ढो नाम सेलोत्ति ॥ १७ ॥ नवभिः कुलकम् ।

तत्थत्थि दक्खिणाए सेढीए खयरलोयपडिपुन्नं ।
भमिरखे[3]यरंगणागणनेउरझंकाररवमुहलं ॥ १८ ॥

उत्तुंगमगरतोरणअसमाणदुवारदेससोहेहिं ।
निच्चं विरायमाणं विज्जाहरभवण[4]वंदेहिं ॥ १९ ॥

सयलतइलोक्कलच्छीनियनिलयं रयणसंचयं नाम।
नगरं नयरगुणड्ढं पमुदियनरनारीसंघायं ॥ २० ॥ तिसृभिः कुलकम्।

तम्मि य पुरम्मि बहुविहविज्जाहरसयसहस्ससंकिन्ने ।
परिवसइ गुणनिहाणो पवणगई नाम वरखयरो ॥ २१ ॥

विन्नाणविणयजुत्ता पई[5]णो अच्चंतवच्छलसहावा ।
नियपरिमलजियबउला बउलवई नाम से भज्जा ॥ २२ ॥

---

**सुविशालदक्षिणोत्तरविभक्तश्रेणीद्विकेन शोभावान् ।**
**आश्रितसर्वाद्धर्यः वैताढ्यो नामा शैल इति ॥ १७ ॥ नवभिःकुलकम्॥**

**तत्रास्तिदक्षिणायां श्रेण्यां खेचरलोकप्रतिपूर्णम् ।**
**भ्रमत्खेचराङ्गनागणनेपुरझंकाररवमुखरम् ॥ १८ ॥**

**उत्तुङ्गमकरतोरणासमानद्वारदेशशोभाभिः ।**
**नित्यं विराजमानं विद्याधरभवनवृन्दैः ॥ १९ ॥**

**सकलत्रैलोक्यलक्ष्मीनिजनिलयं रत्नसञ्चयं नाम ।**
**नगरं नगरगुणाढ्यं प्रमुदितनरनारीसंघातम् ॥ २० ॥ तिसृभिः कुलकम् ॥**

**तस्मिंश्च पुरे बहुविधविद्याधरशतसहस्त्रसंकीर्णे ।**
**परिवसति गुणनिधानः पवनगति - र्नामा वरखेचरः ॥ २१ ॥**

**विज्ञानविनययुक्ताः पत्युरत्यन्तवत्सलस्वभावाः ।**
**निजपरिमलजितबकुला बकुलवती नाम्नी तस्य भार्या ॥ २२ ॥**

---

१. सेढी=श्रेणी । २. आश्रिताः सर्वा ऋद्धयो यं वैताढ्यं स :। ३. खेचरा विद्याधरास्तेषा-मङ्गनानां स्त्रीणां गणस्य नूपुराणां झङ्काररवैर्झङ्कारशब्दैर्मुखरम्। ४. वृन्दैः । ५. पत्युः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीए सह विसयसोक्खं अणुहवमाणस्स तस्स कालेण ।
अहमेगएव पुत्तो उप्पन्नो कयमणाणंदो ॥ २३ ॥

जम्मदिणे च्चिय पुरनरचित्तचमुक्कारकारयं मज्झ ।
वद्धावणयं पिउणा कारवियमसमहरिसेणं ॥ २४ ॥

कमसो य बारसाहे वोलीणे मज्झ जणणिजणएहिं ।
गुरतुट्ठीए पइट्ठियमहिहाणं[1] चित्तवेगोत्ति ॥ २५ ॥

वोलीणेसु य कइवयवरिसेसु अहं महंतबुद्धिस्स ।
अज्झावयस्स[2] सुहतिहिरिक्खम्मि[3] समप्पिओ पिउणा ॥ २६ ॥

तत्तो अकालहीणं[4] तहविहअज्झावयप्पभावेण ।
नियमइसामत्थेण य गहियाओ कलाओ सयलाओ ॥ २७॥

नियकुलकमागयाओ पिउणा विज्जाओ मज्झ दिन्नाओ ।
नहगामिणिपमुहाओ जहविहिणा[5] साहियव्वाओ[6] ॥ २८॥

---

**तया सह विषयसुखमनुभवतस्तस्य कालेन ।
अहमेकैव पुत्र उत्पन्नः कृतमनानन्दः ॥ २३ ॥**

**जन्मदिनैव पुरनरचित्तचमत्कारकारकं मम ।
वर्द्धापनकं पितॄणा कारितासमहर्षेण ॥ २४ ॥**

**क्रमशश्च द्वादशाह्नि व्युत्क्रान्ते मम जननीजनकाभ्यां ।
गुरुतुष्ट्या प्रतिष्ठितमभिधानं चित्रवेग इति ॥ २५ ॥**

**व्युत्क्रान्तेषु च कतिपयवर्षेष्वहं महत्बुध्धेः ।
अध्यापकस्य शुभतिथिऋक्षे समर्पितः पित्रा ॥ २६ ॥**

**ततोऽकालहीनं तथाविधाध्यापकप्रभावेण।
निजमतिसामर्थ्येन च गृहीताः कलाः सकलाः ॥ २७ ॥**

**निजकुलक्रमागताः पित्रा विद्याः मम दत्ताः ।
नभोगामीनीप्रमुखाः यथाविधिना साधयितव्या ॥ २८ ॥**

१. अभिधानम् । २. अज्झावओ=अध्यापकः। ३. शुभे - तिथिऋक्षे; ऋक्षं-नक्षत्रम् ।
४. अकालेन हीनं यथा स्यात्=कालप्राप्त्येत्यर्थः । ५. यथाविधि । ६. साधयितव्याः=
साधयितुं योग्याः शक्याश्चेत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंसियमयणवियारं महिलाजणहिययमोहणमुदारं ।
अह कमसो संपत्तो अहयं[1] नवजोव्वणारंभं ॥ २९ ॥

अन्नम्मि दिणम्मि अहं समाणजोव्वणवयंसपरियरिओ ।
पत्तो अणेयतरुसंडमंडियं मणहरुज्जाणं ॥ ३० ॥

पारद्धविविहकीला[2] चिट्ठामो जा खणंतरं तत्थ ।
ताव य गयणे दिट्ठा दिव्वविमाणाण रिंछोली ॥ ३१ ॥

पसरंतपवररयणोरुदित्तिविच्छुरियनहयलाऽऽभोया ।
उत्तरदिसा पयट्टा[3] सुरसुंदरी गेयसोहिल्ला ॥ ३२ ॥ युग्मम् ॥

तं दट्ठु मए भणियं कत्थ इमो हंदि ! देवसंदोहो ।
चलिओ चलंतकुंडलमुत्ताहलधवलगंडयलो ? ॥ ३३ ॥

ईसि[4] हसिऊण भणियं मज्झ वयंसेण[5] बंधुदत्तेण ।
सुपसिद्धमेव एयं वेयड्ढनगे वसंताणं ॥ ३४ ॥

---

**दर्शितमदनविकारं महिलाजनहृदयमोहनमुदारं ।**
**अथ क्रमशः संप्राप्तोऽहकं नवयौवनारम्भम् ॥ २९ ॥**

**अन्ये दिनेऽहं समानयौवनवयस्यपरिवृतः ।**
**प्राप्तोऽनेकतरुखण्डमण्डितं मनोहरोद्यानम् ॥ ३० ॥**

**प्रारब्धविविधक्रीडा तिष्ठामो यावत् क्षणान्तरं तत्र ।**
**तावच्च गगने दृष्टा दिव्यविमानानां पङ्क्तयः ॥ ३१ ॥**

**प्रसरत्प्रवररत्नोरुदिप्तिविच्छुरितनभस्तलाऽऽभोगा ।**
**उत्तरदिग् प्रवृत्ता सुरसुन्दरी गेयशोभावती ॥ ३२ ॥ युग्मम् ॥**

**तां दृष्ट्वा मया भणितं कुत्रायं हन्दि ! देवसन्दोहः ।**
**चलितश्चलत्कुण्डलमुक्ताफलधवलगंडस्थलः ? ॥ ३३ ॥**

**ईषद्धसित्वा भणितं मम वयस्येन बन्धुदत्तेन ।**
**सुप्रसिद्धमेव एतद्वैताढयनगे वसताम् ॥ ३४ ॥**

---

१. अहकम् , स्वार्थे कः । २. कीला=क्रीडा । ३. प्रवृत्ता । ४. ईषत् । ५. वयस्येन=मित्रेण ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिणवंदणत्थमेत्थं सिद्धाययणेसु एइ सुरनिवहो ।
निच्चंपि वयंस ! अओ पसिद्धवत्थुम्मि का पुच्छा ? ॥ ३५ ॥

तत्तो य मए भणियं एवं एयंति किंतु निसुणेसु ।
महया विच्छड्डेणं न एंति निच्चं सुरा एत्थ ॥ ३६ ॥

अज्ज पुणो सविमाणा सव्विड्ढीए महंतहरिसेणं ।
दीसंति जं वयंता[1] तेण मए पुच्छियं मित्त ! ॥ ३७ ॥

अह भणइ बंधुदत्तो खणंतरं चिंतिऊण सवितक्कं ।
हुं नायं पारद्धा सिद्धाययणेसु जत्ताओ ॥ ३८ ॥

पसरंतसुरहिमलयानिलुद्धुरो जेण वट्टइ वसंतो ।
किसलइय[2]सयलतरुवरविरायमाणोरुवणनियरो ॥ ३९ ॥

अविय। वायंतमलयमारुयचलंतपत्तलविसालसाहाहिं ।
नच्चंतिव तरुणो पहरिसेण महुमासआगमणे ॥ ४० ॥

---

**जिनवंदनार्थमत्र सिद्धायतनेषु एति सुरनिवहः ।**
**नित्यमपि वयस्य ! अतः प्रसिद्धवस्तुनि का पृच्छा ? ॥ ३५ ॥**

**ततश्च मया भणितमेव एतदिति किन्तु निश्रृणु ।**
**महताडम्बरेण न यन्ति नित्यं सुराऽत्र ॥ ३६ ॥**

**अद्य पुनः सविमानाः सर्वर्द्धया महाहर्षेण ।**
**दृश्यन्ते यद्व्रजन्तस्तेन मया पृष्टं मित्रं ! ॥ ३७ ॥**

**अथ भणति बन्धुदत्तः क्षणान्तरं चिन्तयित्वा सवितर्कम् ।**
**हुं ज्ञातं प्रारब्धाः सिद्धायतनेषु यात्राः ॥ ३८ ॥**

**प्रसरत्सुरभिमलयानिलोद्धुरो येन वर्तते वसन्तः ।**
**किसलयितसकलतरुवरविराजमानोरुवननिकरः ॥ ३९ ॥**

**अपि च। वाद्यन्तमलयमरुच्चलत्पत्रलविशालशाखाभिः ।**
**नृत्यन्निव तरुणः प्रहृष्टेन मधुमासाऽऽगमने ॥ ४० ॥**

---

१. व्रजन्तः । २. किसलइयं=नवपल्लवितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुसुमाऽऽमोया[1]ऽऽयड्डियअलिउलझंकारगहिरसद्देण ।
गायंतिव तरुनियरा वसन्तमासागमे तुट्ठा ॥ ४१ ॥

मयरंदपिंजराओ विसट्टसुगंधकुसुमवयणाओ ।
वणराईओ हसंतिव वसंतमासागमं दट्ठुं ॥ ४२ ॥

दट्ठूणव तरुनियरं महुसमए बहलपत्तलच्छायं ।
अवमाणिओ पलासो कसिणमुहो झत्ति संजाओ ॥ ४३ ॥

अच्छउ ता फलकाले फुल्लिमंसमएवि कालिमा वयणे ।
इय कलिउंव पलासो चत्तो[2] पत्तेहिं किविणोव्व[3] ॥ ४४ ॥

दट्ठूण वणसमिद्धिं पलासविडवेहिं मउलियं वयणं ।
अन्नेवि हु अप्पत्ता[4] पररिद्धिं नेय विसहंति ॥ ४५ ॥

अविय । पावियवसंतमासो वणम्मि निस्सेसपीयलोहियओ ।
पियविरहियपहियाणं भयजणओ किंसुयपिसाओ ॥ ४६ ॥

---

कुसुमाऽऽमोदाऽऽकृष्टाऽलिकुलझंकारगभीरशब्देन ।
गायन्त इव तरुनिकरा वसन्तमासागमे तुष्टाः ॥ ४१ ॥

मकरन्दपिञ्जरात् विसृतसुगन्धकुसुमवदनात् ।
वनराज्यो हसन्त्य इव वसन्तमासागमं दृष्ट्वा ॥ ४२ ॥

दृष्ट्वेव तरुनिकरं मधुसमये बहलपत्रलच्छायम् ।
अपमानितः पलाशः कृष्णमुखो झटिति सञ्जातः ॥ ४३ ॥

आस्तां तस्मात् फलकाले फुल्लतासमयेऽपि कालिमा वदने ।
इति कलयित्वेव पलाशस्त्यक्तः पत्रैः कृपण इव ॥ ४४ ॥

दृष्ट्वा वनसमृद्धिं पलाशविटपै-र्मुकुलितं वदनम् ।
अन्येऽपि खलु अपात्रा ( अपत्रा ) परर्द्धिं नैव विसहन्ते ॥ ४५ ॥

अपि च । प्राप्तवसन्तमासो वने निःशेषपीतलोहिताः ।
प्रियविरहितपथिकानां भयजनकः किंशुकपिशाचः ॥ ४६ ॥

---

१. आयड्ढिया-आकृष्टाः । २. त्यक्तः । ३. कृपणः । ४. अपात्राणि=तुच्छाः, अपत्राश्च-पत्ररहिताः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नं च। पंचसरलोद्धएणं[1] महुमासबिइज्जएण[2] दयरहियं ।
हम्मंतीओ गाढं दट्ठूणव पहियमहिलाओ ॥ ४७ ॥

हसियंव मज्झसंठियकलयंठिकएण कूइयरवेण ।
पयडियमंजरिगुरुदंतपंतियं[3] चूयविडवेहिं[4] ॥ ४८ ॥

दट्ठूण पहियनिवहं निहयं महुमासलोद्धयनरेण[1] ।
ओणयमुहीओ[5] कुसुमंसुएहिं[6] रोयंतिव लयाओ ॥ ४९ ॥

मयपहियाण जलंतिव ठाणे ठाणे महंतचीयाओ[7] ।
घणकिंसुयच्छलेणं अलिरवमिसिमिमिसियसद्दाओ ॥ ५० ॥

निज्झरतडेसु तरुणो पवणपहल्लंतजलनिबुड्डेहिं[8] ।
साहाकरेहिं देंतिव जलंजलिं जत्थ पहियाणं ॥ ५१ ॥

किंच। घणकिंसुयनवरंगयविराइया बद्धपवरमयणहला ।
पाडलकुसुमा सोहई वसंतलच्छी नववहुव्व ॥ ५२ ॥

---

**अन्यच्च । पञ्चशरलुब्धकेन मधुमासद्वितीयेन दयारहितम् ।**
**ध्नन्त्यो गाढं दृष्ट्वेव पथिकमहिलाः ॥ ४७ ॥**

**हसन्त्य इव मध्यसंस्थितकलकण्ठीकृतेन कूजितरवेण ।**
**प्रकटितमञ्जरिगुरुदन्तपङ्क्तिकं चूतविटपैः ॥ ४८ ॥**

**दृष्ट्वा पथिकनिवहं निहतं मधुमासलुब्धकनरेण ।**
**अवनतमुखाः कुसुमाश्रुकै-रुदन्त्य इव लताः ॥ ४९ ॥**

**मृतपथिकानां ज्वलन्त्य इव स्थाने स्थाने महच्चिताः ।**
**घनकिंशुकच्छलेन अलिरवमिसिमिसिशब्दतः ॥ ५० ॥**

**निर्झरतटेषु तरोः पवनप्रहल्लन्जलनिमग्नैः ।**
**शाखाकरै-र्ददत्य इव जलाञ्जलिं यत्र पथिकानाम् ॥ ५१ ॥**

**किञ्च । घनकिंशुकनवरंगकविराजिता बद्धप्रवरमदनफला ।**
**पाटलकुसुमा शोभते वसन्तलक्ष्मी-र्नववधूरिव ॥ ५२ ॥**

---

१. लुब्धकः= व्याधः । २. मधुमासद्वितीयेन=वसन्तसहितेनेत्यर्थः । ३. प्रकटिता मञ्जर्य एव ये गुरवो=महान्तो दन्तास्तेषां पङ्क्तिर्यत्र हसने तदिति । ४. चूतविटपैः=आम्रशाखाभिः । ५. अवनत-मुखाः । ६. कुसुमान्येवाश्रुकाणि तैः । ७. चिताः । ८.निबुड्डा=निक्कुडिताः=मग्नाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नं च । बुहसहिओवि[1] हु सूरो कव्वसत्तो[2] वसंतमाहप्पा ।
उवभुंजिऊण मीणं[3] संपइ मेसस्स[4] उक्कोत्ति[5] ॥ ५३ ॥

ता एरिसे वसंते दिसिदिसिपसरंतपरहुयासद्दे[6] ।
वित्थरियचच्चरीरवमुहरियउज्जाणभूभागे[7] ॥ ५४ ॥

विलसंति कामुयजणा अंदोलिज्जंति तरुणजुवईओ ।
वित्थरइ पडहयरवो पियंति वरवारुणिं तरुणा ॥ ५५ ॥

साहीणपिययमाणं[8] तरुणीणं वल्लहम्मि महुमासे ।
धम्मपरायणलोएण एत्थ कीरंति जत्ताओ[9] ॥ ५६ ॥

जिणबिंबाणं भत्तीए तेण एए समागया देवा ।
सव्वायरेण वेयड्ढसिद्धकूडेसु जत्तत्थं ॥ ५७ ॥

तत्तो य मए भणियं जइ एवं तो वयंस! अम्हेवि ।
गंतूण सिद्धकूडे सासयसव्वन्नुपडिमाओ[10] ॥ ५८ ॥

---

**अन्यच्च। बुधसहितोऽपि खलु सूरः काव्या ( क्रव्या )ऽऽसक्तो वसन्त-माहात्म्यात्।**
**उपभुज्य मीनं संप्रति मेषस्योत्सुकः इति ॥ ५३ ॥**

**तस्मादीदृशे वसन्ते दिशिदिशि प्रसरन्परभृताशब्दे ।**
**विस्तरितचर्चरीरवमुखरितोद्यानभूभागे ॥ ५४ ॥**

**विलसन्ति कामुकजना अन्दोल्यन्ते तरुणयुवतयः ।**
**विस्तरति पटहकरवः पिबन्ति वरवारुणिं तरुणाः ॥ ५५ ॥**

**स्वाधीनप्रियतमानां तरुणीनां वल्लभे मधुमासे ।**
**धर्मपरायणलोकेनऽत्र क्रियन्ते यात्राः ॥ ५६ ॥**

**जिनबिम्बानां भक्त्या तेनैते समागता देवाः ।**
**सर्वादरेण वैताढ्यसिद्धकूटेषु यात्रार्थम् ॥ ५७ ॥**

**ततश्च मया भणितं यद्येवं ततो वयस्य ! वयमपि ।**
**गत्वा सिद्धकूटे शाश्वतसर्वज्ञप्रतिमाः ॥ ५८ ॥**

---

१. बुधः=पण्डितो ग्रहविशेषश्च । २. कव्वो= काव्यः=शुक्रः, कव्वं=क्रव्यं=मासं च । ३. मीनराशिं मत्स्यं च । ४. मेषराशेः उरणस्य च । ५. उत्कः=उत्सुकः । ६. परभृता=कोकिला । ७. गीतभेदः । ८. साहीणा=स्वाधीनाः । ९. जत्ता=यात्रा । १०. शाश्वतसर्वज्ञप्रतिमाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भत्तीए पणमिऊणं करेमु नियमाणुसत्तणं सहलं[1] ।
पेच्छामो जिणजत्तं[2] सुयखयरोहेणं[3] किज्जंतं ॥ ५९ ॥ युग्मम् ।

अह सव्वेहिवि भणियं एवं होउत्ति सुट्ठु ते भणियं ।
एत्थंतरम्मि पत्तो मह धाइसुओ[4] बलो नाम ॥ ६० ॥

आगम्म तेम भणियं पिउणा ते चित्तवेग! संलत्तं[5] ।
एसो हु रयणसंचयवत्थव्वो[6] सयलखयरजणो ॥ ६१ ॥

न्हाओ विलित्तदेहो सुहनेवत्थो[7] महाविभूईए ।
चलिओ जिणजत्ताए आसन्ने सिद्धकूडम्मि ॥ ६२ ॥

तेण समं अम्हेवि हु चलिया ता सिग्घमेव आगच्छ ।
कयण्हाणाइविहाणा जेण समं चेव गच्छामो॥ ६३ ॥

तव्वयणं सोऊणं नियगेहे आगओ पिउसमीवे ।
तेवि य मज्झ वयंसा नियनियगेहेसु संपत्ता ॥ ६४ ॥

---

**भक्त्या प्रणम्य कुर्मो निजमनुष्यत्वं सफलम् ।**
**प्रेक्षामहे जिनयात्रां शुभखेचरौघेन क्रियमाणाम् ॥ ५९ ॥ युग्मम् ॥**

**अथ सर्वैरपि भणितमेवं भवत्विति सुष्ठु तव भणितम् ।**
**अत्रान्तरे प्राप्तो मम धात्रीसुतो बलो नामा ॥ ६० ॥**

**आगम्य तेन भणितं पित्रा तव चित्रवेग ! संलप्तम् ।**
**एष खलु रत्नसञ्चयवास्तव्यः सकलखेचरजनः ॥ ६१ ॥**

**स्नातो विलिप्तदेहः शुभनेपथ्यो महाविभूत्या ।**
**चलितो जिनयात्रायैऽऽसन्ने सिद्धकूटे ॥ ६२ ॥**

**तेन समं वयमपि खलु चलितास्तस्माच्छीघ्रमेव आगच्छ ।**
**कृतस्नानादिविधाना येन सममेव गच्छामः ॥ ६३ ॥**

**तद्वचनं श्रुत्वा निजगेहेऽऽगतः पितृसमीपे ।**
**तेऽपि च मम वयस्या निजनिजगेहेषु संप्राप्ताः ॥ ६४ ॥**

१. सफलम् । २. जत्ता=यात्रा । ३. ओघः=समूह । ४. धात्रीसुतः । ५. संलप्तम्=उक्तम् । ६. वास्तव्यः । ७. नेपथ्यं=वस्त्रम् ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

कयण्हाणाइविहाणो सह पिउणा ताहे पवणगइणा हं ।
तक्कालुचियं सव्वं गहिऊणं धूवपुप्फाइं ॥ ६५ ॥
नागरजणेण सहिओ उप्पइओ खग्गसामलं[1] गयणं ।
गच्छंतेण कमेणं दिट्ठं भवणं जिणिंदस्स ॥ ६६ ॥
[2]वायंतमउयमारुयमंदंदोलंतधयवडग्गेहिं ।
स[3]न्नंव करेमाणं आगमणत्थं जणोहस्स ॥ ६७ ॥
दुंदुहि[4]मउंदमद्दलतिलिमापमुहेण तूरसद्देण ।
हक्कारंतेव जणं जत्तासमए जिणिंदस्स ॥ ६८ ॥
तत्तो कमेण पत्ता दिसि दिसि नच्चंतअच्छरानियरं ।
मणहरगेय[5]झुणीए आणंदियभवियसंदोहं ॥ ६९ ॥
नाणाविहवत्थेहिं कयउ[6]ल्लोयं मणोहरायारं ।
विच्छि[7]त्तीए लंबियनिम्मलवरहारओ[8]चूलं ॥ ७० ॥

---

कृतस्नानादिविधानः सह पित्रा तदा पवनगतिनाऽहम् ।
तत्कालोचितं सर्वं गृहीत्वा धूपपुष्पाणि ॥ ६५ ॥
नागरजनेन सहित उत्पतितः खड्गश्यामलं गगनम् ।
गच्छता क्रमेण दृष्टं भवनं जिनेन्द्रस्य ॥ ६६ ॥
वात्मृदुमरुत्मन्दंन्दोलायमानध्वजपटाग्रैः ।
संज्ञामिव कुर्वन्नागमनार्थं जनौघस्य ॥ ६७ ॥
दुन्दुभिमुकुन्दमर्दलतिलिमाप्रमुखेन तूर्यशब्देन ।
आकारयन्तमिव जनं यात्रासमये जिनेन्द्रस्य ॥ ६८ ॥
ततः क्रमेण प्राप्ता दिशि दिशि नृत्यन्नप्सरोनिकरम् ।
मनोहरगेयध्वन्याऽऽनंदितभविकसन्दोहम् ॥ ६९ ॥
नानाविधवस्त्रैः कृतोल्लोचं मनोहराकारम् ।
विच्छित्यां लम्बितनिर्मलवरहारवचूलम् (उच्चूलम्) ॥ ७० ॥

---

१. खड्गवत् श्यामम् । २. वात् (चलत्) मृदुकमारुतमन्दान्दोल्यमानध्वजपटाग्रैः । ३. संज्ञाम् । ४. मुकुन्दो वाद्यविशेषः । ५. झुणी=ध्वनिः । ६. उल्लोचः=चन्द्रातपः= ''चंद-चरबो'' इति भाषायाम् । ७. विच्छित्तिः=प्रान्तभागः । ८. अवचूलः=ध्वजस्याधोमुखः कूर्चकोऽवचूलः, उच्चूलं ध्वजस्योर्ध्वस्थितःकूर्चलः उच्चूलः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरइयघणफुल्लहरं विचित्तलंबंततारियाइन्नं ।
पवरपडिमंडवेणं उच्छाइयअंगणाभोयं ॥ ७१ ॥

नी[१]सलत[२]ड्डियचंदायएहिं मंडियचउक्कियादेसं ।
फुल्लमयपवरतोरणसोहियमज्झं जिणिंदगिहं ॥ ७२ ॥ चतसृभिः कलापकम् ॥

तस्स य दुवारदेसे निम्मलजलपूरियाए वावीए ।
काउण पाय[३]सोयं निययवयंसेहिं परिवरिओ ॥ ७३ ॥

जिणभवणदुवारट्ठिय[४]उच्चल्लियफु[५]ल्लमालियोहस्स ।
पुप्फाइं गेण्हंतो अंतो विहिणा पविट्ठो हं ॥ ७४ ॥ युग्गम् ॥

पूइय जिणिंदबिंबे काउं [६]चीइवंदणं जहाविहिणा ।
बा[७]हिं नीहरिओ हं उवविट्ठो खयरमज्झम्मि ॥ ७५ ॥

वत्ते जिणमज्जणए इओ तओ तत्थ संचरंतो हं ।
अवरोप्परदंसियकोउगेहिं सहिओ वयंसेहिं ॥ ७६ ॥

---

**विरचितघनफुल्लगृहं विचित्रलम्बमानतारिकाऽऽकीर्णम् ।**
**प्रवरप्रतिमण्डपेनाऽवच्छादितांऽगणाऽऽभोगम् ॥ ७१ ॥**

**निस्तलततचन्द्रातपैर्मण्डितचतुष्किकादेशम् ।**
**फुल्लमयप्रवरतोरणशोभितमध्यं जिनेन्द्रगृहम् ॥ ७२ ॥ चतसृभिः कलापकम् ॥**

**तस्य च द्वारदेशे निर्मलजलपूरितायां वाप्यां ।**
**कृत्वा पादशौचं निजकवयस्यैः परिवृत्तः ॥ ७३ ॥**

**जिनभवनद्वारस्थितोच्चलितःफुल्लमालिकौघस्य ।**
**पुष्पाणि गृह्णानोऽन्तोविधिना प्रविष्टोऽहम् ॥ ७४ ॥ युग्मम् ॥**

**पूजितो जिनबिम्बान् कृत्वा चैत्यवन्दनं यथविधिना**
**बर्हिर्निःसृतोऽहमुपविष्टः खेचरमध्ये ॥ ७५ ॥**

**वृत्ते जिनमज्जन इतस्ततस्तत्र सञ्चरन्नहम् ।**
**परस्परदर्शितकौतुकैः सहितो वयस्यैः ॥ ७६ ॥**

---

१. निस्तलं=तलम् । २. तड्डियं=ततम्=विस्तृतम्। ३. पादशौचम् । ४. उच्चलितः=समीपागतः । ५. फुल्लमालिया=पुष्पविक्रेत्री । ६. चैत्यवन्दनम् । ७. बहिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कत्थइ विलासिणिजणं पेच्छंतो नच्चमाणयं विविहं ।
कत्थइ कविवरनिवहं जिणचरियं अहिणवेमाणं ॥ ७७॥

वीणारवसंवलियं कत्थवि गीयज्झुणिं निसामेंतो[1] ।
विरइयविविहायारं कत्थवि य बलिं पलोएंतो[2] ॥ ७८ ॥

कत्थइ तरुणनरेहिं दिज्जंतं रासयं सुणेमाणो ।
सुरसुंदरीहिं कत्थइ गिज्जंतं[3] धवलसंघायं ॥ ७९ ॥

एवं च जाव कोऊहलेण अवरावरेसु ठाणेसु ।
हिंडामि तत्थ भवणे लीलाए समं वयंसेहिं ॥ ८० ॥

ताव मह माउलसुओ सहरिसमागम्म साइयं दाउं ।
वज्जरइ भाणुवेगो पभूयकालाओ दिट्ठो सि ॥ ८१ ॥ युग्मम् ॥

कुसलं च पवणगइणो पिउभगिणीए य बउलवइयाए ? ।
तत्तो य मए भणियं कुसलं सव्वेसि, अन्नं च ॥ ८२ ॥

---

कुत्रचित् विलासिनीजनं प्रेक्षमाणो नृत्यत् विविधम् ।
कुत्रचित् कविवरनिवहं जिनचरित्रमभिनयन् ॥ ७७ ॥

वीणारवसंवलितं कुत्राऽपि गीतध्वनिं शृण्वन् ।
विरचितविविधाकारं कुत्रापि च बलिं प्रलोकमानः ॥ ७८ ॥

कुत्रचित्तरुणनरैर्दीयमानं रासकं श्रृण्वन् ।
सुरसुन्दरीभिः कुत्राऽपि गीयमानं धवलसङ्घातम् ॥ ७९ ॥

एवं च यावत्कुतुहलेनऽपरापरेषु स्थानेषु ।
हिण्डामि तत्र भवने लीलया समं वयस्यैः ॥ ८० ॥

तावत्मम मातुलसुतःसहर्षमागम्य स्वागतादिकं दत्वा ।
कथयति भानुवेगः प्रभूतकालतो दृष्टोऽसि ॥ ८१ ॥ युग्मम् ॥

कुशलं च पवनगतेः पितृभगिन्याश्च बकुलवत्याः ? ।
ततश्चमया भणितं कुशलं सर्वेषामन्यं च ॥ ८२ ॥

---

१. निशमयन्=श्रृण्वन् । २. प्रलोकमानः । ३. गीयमानम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थेव आगयाइ इमाइं चिट्ठंति भद्द! जिणभवणे ।
अम्मापिऊण मूलं समागओ तेणं[1] सहिओ हं ॥ ८३ ॥

सायरमवगूढो सो तेहिं पउत्तिं च पुच्छिओ भणइ ।
कुसलं मह जणगाणं नागमणं कारणावेक्खं ॥ ८४ ॥

अह सो मए पभणिओ वित्तंप्पाया[2] इमा हु जिणजत्ता ।
संपइ पुण अम्हाणं आगच्छसु पाहुणो ताव ॥ ८५ ॥

तो भणइ भाणुवेगो एवं एयंति किंतु निसुणेसु ।
मह चित्तभाणुपिउणा लहुमागच्छेज्ज इति भणियं ॥ ८६ ॥

ता चित्तवेग! संपइ तं चिय नगरम्मि एहि मंहतणए[3] ।
उक्कंठिओ पंगामं[4] जं अच्छइ तुम्ह माउलओ ॥ ८७ ॥

एवं च तेण भणिओ अम्मापीईहिं अब्भणुन्नाओ[5] ।
भाउसमेओ पत्तो नगरमहं कुंजरावत्तं ॥ ८८ ॥

---

**अत्रैवाऽऽगताविमौ तिष्ठतः भद्र ! जिनभवने ।**
**अम्बापित्रोः मूलं समागतस्तेनसहितोऽहम् ॥ ८३ ॥**

**सादरमवगूढः स ताभ्यां प्रवृत्तिं च पृष्टो भणति ।**
**कुशलं मम जनकयोर्नागमनं कारणापेक्षम् ॥ ८४ ॥**

**अथ स मया प्रभणितो वृत्तप्रायेयम् खलु जिनयात्रा ।**
**संप्रति पुन अस्माकमागच्छ प्राघूर्णस्तावत् ॥ ८५ ॥**

**ततो भणति भानुवेग एवमेतत्तु किन्तु निश्रृणु ।**
**मम चित्रभानुपित्रा लघु आगच्छेदिति भणितम् ॥ ८६ ॥**

**तस्मात् चित्रवेग ! संप्रति चैव नगरं एहि मदीये ।**
**उत्कण्ठितः प्रकामं यदास्ते तव मातुलः ॥ ८७ ॥**

**एवञ्च तेन भणितोऽम्बापितृभ्यामभ्यनुज्ञातः ।**
**भ्रातृसमेतः प्राप्तो नगरमहं कुञ्जरावर्त्तम् ॥ ८८ ॥**

---

१. मातुलसुतेन। २. वृत्तप्राया=पूर्णप्राया । ३. मदीये । ४. प्रकामम् । ५. अभ्यनुज्ञातः= आदिष्टः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहिंय च चित्तभाणू मं दट्ठुं सुट्ठु हरिसिओ भणइ ।
सुंदरमायरियं ते जमागओ अम्ह पाहुणओ[1] ॥ ८९ ॥

नियपउत्तिं सव्वं कहिउं कयभोयणाइवावारो ।
पत्ताए रयणीए पसुत्तो[2] पवरसयणीए[3] ॥ ९० ॥

तत्थ य पभायसमए लवमाणे[4] तंबचूलनिउरंबे[5] ।
दिट्ठो अदिट्ठपुव्वो एसो सुमिणो[6] मए तइया ॥ ९१ ॥

किल धवलफुल्लमालं मणोहरं दट्ठु तग्गहट्ठाए ।
चलिओ हं न य सक्केमि गेण्हिउं तं जया कहवि ॥ ९२ ॥

केणवि मित्तेण तओ समप्पिया आयरेण मे गहिया ।
ओलंबिस्सं[7] गलए किल नियए ताव सा झत्ति ॥ ९३ ॥

पडिया मह हत्थाओ कत्थवि य गयत्ति नेय जाणामि ।
ताहे महंतदुक्खं तव्विरहे मज्झ संजायं ॥ ९४ ॥ तिसृभिः कुलकम् ।

---

**तत्र च चित्रभानुर्माम् दृष्ट्वा सुट्ठु हृष्टो भणति ।**
**सुन्दरमाचरितं ते यदागतोऽस्माकं प्राधूर्णकः ॥ ८९ ॥**

**निजकप्रवृतिं सर्वां कथयित्वा कृतभोजनादिव्यापारः ।**
**प्राप्तायां रजन्यां प्रसुप्तः प्रवरशयनीये ॥ ९० ॥**

**तत्र च प्रभातसमये लपति ताम्रचूडनिकुरम्बे।**
**दृष्टोऽदृष्टपूव एष स्वप्नो मया तदा ॥ ९१ ॥**

**किल धवलफुल्लमालां मनोहरां दृष्ट्वा तद्ग्रहणार्थे ।**
**चलितोऽहं न च शक्नोमि ग्रहीतुम् तां यदा कथमपि ॥ ९२ ॥**

**केनाऽपि मित्रेण ततः समर्पिताऽऽदरेण मया गृहीता ।**
**अवलम्बिष्ये गलके किल निजके तावत्सा झटिति ॥ ९३ ॥**

**पतिता मम हस्तात्कुत्राऽपि च गतेति नैवं जानामि ।**
**तदा महत्दुःखं तद्विरहे मम सञ्जातम् ॥ ९४ ॥ तिसृभिः कुलकम् ॥**

१. प्राधूर्णकः = अतिथिः। २. प्रसुप्तः । ३. शयने । ४. लपति = शब्दायमाने । ५. ताम्रचुडनिकुरम्बे = कुक्कुटसमूहे । ६. स्वप्नः । ७. अवलम्बिष्ये = निवेशयिष्यामि।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुक्कावि मए एसा पुणोवि अमिलाणकुसुमिया विहिया ।
इय भणिऊणं केणवि कंठे विणिवेसिया मज्झ ॥ ९५ ॥

ताव पडुपटहझल्लरिकाहलभंभामउंदसद्दालं ।
सोउं तूरस्स रवं झत्ति पणट्ठा महं निद्दा ॥ ९६ ॥

तो हरिसविसायइड्ढं दट्ठुं सुमिणं विचिंतियं हियए ।
किं नाम मज्झ सूयइ अदिट्ठपुव्वं इमं सुमिणं ? ॥ ९७ ॥

का हंदि ! इमा माला विज्जा व संपया व मह होज्जा ।
दिन्ना केणवि नट्ठा पुणरवि लद्धा, न याणामि ॥ ९८ ॥

एवं अणिच्छियत्थो[1] सुविणसरूवस्स उट्ठिओ अहयं ।
काउं पभायकिच्चं अह सहिओ भाणुवेगेण ॥ ९९ ॥

आरूढो पासाए उवरिमभूमीए चित्तसालाए ।
मणिरयणकोट्टिमम्मी उवविट्ठो मत्तवारणए[2] ॥ १०० ॥ युग्मम् ॥

---

शुष्काऽपि मयैषा पुनरप्यम्लानकुसुमिका विहिता ।
इति भणित्वा केनाऽपि कण्ठे विनिवेशिता मम ॥ ९५ ॥

तावत् पटुपटहझल्लरिकाहलभम्भामुकुन्दशष्दवत् ।
श्रुत्वा तुर्यस्य रवं झटिति प्रणष्टा मम निद्रा ॥ ९६ ॥

ततो हर्षविषादाढ्यं दृष्ट्वा स्वप्नं विचिन्तितं हृदये ।
किं नाम मम सूचयत्यदृष्टपूर्वमिदम् स्वप्नम् ॥ ९७ ॥

का हन्दि ! इयं माला विद्या वा संपद्वा मम भवेत् ।
दत्ता केनाऽपि नष्टा पुनरपि लब्धा न जानामि ॥ ९८ ॥

एवमनिश्चितार्थः स्वप्नस्वरूपस्योत्थितोऽहकम् ।
कृत्वा प्रभातकृत्यमथ सहितो भानुवेगेन ॥ ९९ ॥

आरूढः प्रासाद उपरितनभूम्यां चित्रशालायाम् ।
मणिरत्नकुट्टिम उपविष्टो मत्तवारणाके ॥ १०० ॥ युग्मम् ॥

---

१. अनिश्चितार्थः । २. मत्तवारणं=मत्तालम्बः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह तं पभायदिट्ठं [1]सिट्ठं सुविणं तु भाणुवेगस्स ।
[2]निच्छइउं नो सक्कइ सोवि हु सुविणस्स [3]संब्भावं ॥ १०१ ॥

चिंतित्ता सुविणफलं विगप्पसंकप्पखित्तनियचित्ता ।
जा चिट्ठामो अम्हे खणंतरं तत्थ ठाणम्मि ॥ १०२ ॥

ताव य वरनेवत्थो [4]महग्घआभरणभूसियसरीरो ।
सव्वो वि नयरलोओ गंतुं कत्थवि [5]पयट्टोत्ति ॥ १०३ ॥ युग्मम् ॥

तं दट्ठुं मए भणियं सबालवुड्ढो इमो जणो कत्थ ।
कय[6]उवसोहो वच्चइ साहसु भो भाणुवेगम्ह? ॥ १०४ ॥

भणियं च तेण निसुणसु अज्जं जं [7]मयणतेरसी भद्द ! ।
मयरंदुज्जाणठियस्स तेण जत्ताए मयणस्स ॥ १०५ ॥

एसो नरनारिगणो पूयत्थं तस्स [8]वच्चइ [9]पमोया ।
अम्हेवि हु गच्छामो पेच्छामो [10]कुसुमसरजत्तं ॥ १०६ ॥ युग्मम् ॥

---

**अथ तं प्रभातदृष्टं शिष्टं स्वप्नं तु भानुवेगस्य ।**
**निश्चेतुं न शक्यते सोऽपि खलु स्वप्नस्य सद्भावम् ॥ १०१ ॥**

**चिन्तयित्वा स्वप्नफलं विकल्पसंकल्पक्षिप्तनिजचितौ ।**
**यावत् तिष्ठाव आवाम् क्षणान्तरं तत्र स्थाने ॥ १०२ ॥**

**तावच्च वरनेपथ्यो महार्घाऽऽभरणभूषितशरीरः ।**
**सर्वेऽपि नगरलोको गन्तुं कुत्राऽपि प्रवृत्त इति ॥ १०३ ॥ युग्मम् ॥**

**तं दृष्ट्वा मया भणितं सबालवृद्धोऽयं जनः कुत्र ।**
**कृतोपशोभा व्रजति कथय भो भानुवेग माम् ? ॥ १०४ ॥**

**भणितं च तेन निश्रृणु अद्य यन्मदनत्रयोदशी भद्र ! ।**
**मकरन्दोद्यानस्थितस्य तेन यात्रायै मदनस्य ॥ १०५ ॥**

**एष नरनारीगणः पूजार्थं तस्य व्रजति प्रमोदात् ।**
**आवामपि खलु गच्छावः प्रेक्षावहे कुसुमशरयात्राम् ॥ १०६ ॥ युग्मम् ॥**

---

१. शिष्टम्=उक्तम् । २. निश्चेतुम् । ३. सद्भावं=परमार्थम्। ४. महार्घ=बहुमूल्यकम् । ५. प्रवृत्तः । ६. उपशोभा=विभूषा । ७. मदनत्रयोदशी । ८. व्रजति । ९. प्रमोदात् । १०. कुसुमशरः=कामः ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य मए भणियं एवं होउत्ति दोवि संचलिया ।
कयसिंगारा [1]पयओ पत्ता य कमेण उज्जाणं ॥ १०७ ॥

कोलंतकामिणीयणरणंतनेउररवेण तरुनियरो।
मयणमहूसवतुट्ठो गायइ इव चच्चरिं जत्थ ॥ १०८ ॥

मलयानिल[2]हल्लावियसाहाहिं वि[3]घुंम्ममाणया [4]धणियं ।
कोइलकयकलकोलाहलेहिं अ[5]फुंडक्खरालावा ॥ १०९ ॥

[6]आयंबिरनवकिसिलय[7]आयंबमुहा महीरुहा जत्थ ।
आसाइयमहुमासा मत्ता इव [8]सच्चविज्जंति ॥ ११० ॥ युग्मम् ॥

सुविसट्टकुसुमसोहंतमंजरीपुंजरइयसेहरया ।
[9]जोहारेन्ततिव पवणोणयाहिं साहाहिं पउरजणं ॥ १११ ॥

तम्मि य पवरुज्जाणे घणतरुवरमंडिए सुरमणीए ।
दंसणमेत्तुपाइयमयणे मयरंदनामम्मि ॥ ११२ ॥

---

ततश्च मया भणितमेवं भवत्विति द्वावपि सञ्चलितौ ।
कृतशृङ्गारौ पदतः प्राप्तौ च क्रमेणाद्योनम् ॥ १०७ ॥

क्रीडन्कामिनीजनरणत्नेपुररवेणतरुनिकरः ।
मदनमहोत्सवतुष्टो गायतीव चर्चरिं यत्र ॥ १०८ ॥

मलयानिलचलितशाखाभिर्विघूर्णयमानका गाढम् ।
कोकिलकृतकलकोलाहलैरस्पष्टाऽक्षराऽऽलापा ॥ १०९ ॥

आताम्रनवकिसलयाऽऽताम्रा महीरुहा यत्र ।
आसादितमधुमासा मत्तेव दृश्यन्ते ॥ ११० ॥ युग्मम् ॥

सुविस्तृतकुसुमशोभमानमञ्जरीपुञ्जरचितशेखरकाः ।
प्रणमन्ति इव पवनोन्नताभिः शाखाभिः प्रचुरजनम् ॥ १११ ॥

तस्मिंश्च प्रवरोद्याने घनतरुवरमण्डिते सुरमणीये ।
दर्शनमात्रोत्पादितमदनान् मकरन्दनाम्नि ॥ ११२ ॥

---

१. पयओ=पदतः=पदाभ्याम् । २. हल्लाविया=चलिता । ३. विघूर्णयमानका । ४. गाढम्। ५. अस्पष्टं=अव्यक्तम् । ६. आयंबिरा=आताम्राः । ७. आयंबं=आताम्रम् । ८. सच्चविज्जंति= दृश्यन्ते। ९. प्रणमन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाणानेवत्थेणं नायरलोएण परिगया जाव ।
पविसामो ता दिट्ठं दूराओ मयणदेवहरं ॥ ११३ ॥ युग्मम् ॥

रइजुत्तमयणपूयणनिमित्तमित्तेण पउरलोएण ।
पडिपुन्नं सुविलासं उत्तुंगं तुंगपागारं ॥ ११४ ॥

उद्दामवज्जंतअच्चंतवरमद्दलं मत्तवरकामिणीसंघकयगुंदलं ।
चच्चरीसद्दअक्खित्तकामुयजणं पडहियासद्दनच्चंतबहुवामणं ॥ ११५ ॥

पियमासत्तनररुद्धकयलीहरं दोलियारूढपुरबालियासुंदरं ।
सविडवेसाजणारद्धजलकीडयं सलिलसंपायकयकद्दमुप्पीलयं ॥११६ ॥

तं मज्झे पविसित्ता दट्ठूण रईए संजुयं मयणं ।
निग्गंतूणं दोण्णिवि उवविट्ठा बारवेईए ॥ ११७ ॥

नाणविहकीलाहिं कीलंतं पुरजणं पुलोएंतो।
जाव खणंतरमेगं कुमर! अहं तत्थ अच्छामि ॥ ११८ ॥

---

नानानेपथ्येन नागरलोकेन परिगता यावत् ।
प्रविशावस्तस्माद्दृष्टं दूरात् मदनदेवगृहम् ॥ ११३ ॥ युग्मम् ॥

रतियुक्तमदनपूजननिमित्तेन प्रचुरलोकेन ।
प्रतिपूर्णं सुविलासमुत्तुङ्गं तुङ्गप्राकारम् ॥ ११४ ॥

उद्दामवाद्यमानात्यन्तवरमर्दलं मत्तवरकामिनीसंघकृतगुन्दलम् ।
चर्चरीशब्दाक्षिप्तकामुकजनं पटहिकशब्दनृत्यन्बहुवामनम् ॥ ११५ ॥

प्रियतमाऽऽसक्तनररूद्धकदलीगृहं दोलाऽऽरूढपुरबालिकासुन्दरम् ।
सविटवेश्याजनाऽऽरब्धजलक्रीडकम् सलिलसम्पातकृतकर्दमसङ्घातकम् ॥११६॥

तन्मध्ये प्रवेश्य दृष्ट्वा रत्या संयुक्तं मदनम् ।
निर्गत्य द्वावप्युपविष्टौ द्वारवेदिकायाम् ॥ ११७ ॥

नानाविधक्रीडाभिः क्रीडन्तं पुरजनं पश्यन् ।
यावत्क्षणान्तरमेकं कुमार ! अहं तत्राऽऽसे ॥ ११८ ॥

---

१. वज्जंतं=वाद्यमानम्। * गुंदलं=आनन्दध्वनिः। २. उप्पीलो=संघातः। ३. द्वारवेदिकायाम्। ४. पश्यन् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावासन्नम्मि दुमे अंदोलिंती सहीण मज्झगया ।
दिट्ठा अउव्वरूवा जुवई नवजोव्वणारंभा ॥ ११९ ॥

पीणुन्नयघणसिहिणुच्छलंतहारावलीए कयसोहा ।
[1]उत्तत्तकणयवन्ना मणिकुंडलमंडियकवोला ॥ १२० ॥

[2]अमयमइयव्व विहिणा विहिया कयलोयलोयणाणंदा ।
दंसणमेत्तेणं चिय [3]पल्हायंती जणमणाइं ॥ १२१ ॥ चतसृभिः कलापकम् ॥

तं दट्ठुं चिंतियं मे का एसा हंदि! मणहरसरुवा ।
किं नागकन्नगेसा [4]अवइन्ना, अहव वणलच्छी ? ॥ १२२ ॥

किंवा सुरलोगाओ पब्भट्ठा तियससुंदरी एसा ।
किंवा मयणविउत्त होज्ज रई गहियदेहत्ति ? ॥ १२३ ॥

एवं विगप्पमाणो अणमिसनयणेहिं तं पुलोएंतो ।
तीएवि पुलोइओ हं [5]ससिणिद्धअवंगदिट्ठीए ॥ १२४ ॥

---

**तावदासन्ने द्रुमे अन्दोलयन्ती सखीनां मध्येगता ।**
**दृष्टाऽपूर्वरुपा युवती नवयौवनारम्भा ॥ ११९ ॥**

**पीनोन्नतघनस्तनोच्छलत्हारावल्ल्या कृतशोभा ।**
**उत्तप्तकनकवर्णा मणिकुण्डलमण्डितकपोला ॥ १२० ॥**

**अमृतमयेव विधिना विहिता कृतलोकलोचनानन्दा ।**
**दर्शनमात्रेणैव प्रह्लादयन्ती जनमनांसि ॥ १२१ ॥ चतसृभिः कलापकम् ॥**

**तां दृष्ट्वा चिन्तितं मया कैषा सा हन्दि ! मनोहरस्वरुपा।**
**किं नागकन्यैषाऽवतीर्णा अथवा वनलक्ष्मीः ? ॥ १२२ ॥**

**किं वा सुरलोकात् प्रभ्रष्टा त्रिदशसुन्दर्येषा ।**
**किं वा मदनवियुक्ता भवेद्रति-गृहीतदेहेति ? ॥ १२३ ॥**

**एवं विकल्पयन्ननिमेषनयनाभ्यां तां पश्यन् ।**
**तयाऽपि दृष्टोऽहं सस्निग्धापाङ्गदृष्टया ॥ १२४ ॥**

---

१. उत्तत्तं=उत्तप्तम् । २. अमृतमया । ३. प्रह्लादयन्ती=आनन्दयन्ती। ४. अवतीर्णा । ५. सस्निग्धापाङ्गदृष्टया ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुट्ठो य भाणुवेगो का एसा कस्स वावि महिलत्ति ? ।
ईसीसिं[१] विहसिउणं अह भणियं भाणुवेगेणं ॥ १२५ ॥

एईए संकहाए न हु कज्जं किंचि उट्ठिमो ताव ।
एसा हुं वंकवंकं जोयइ तुह संमुहं जेण ॥ १२६ ॥

अंगेसु निवडमाणा दिट्ठी एवंविहाण महिलाण ।
देहं कुणइ असत्थं[२] अवस्स हिययं अवहरेज्जा ॥ १२७ ॥

तत्तो य मए भणियं परिहासपरो सि अम्हे एमेव ।
पुच्छामो कोउगेणं तं पुण अन्नं विअप्पेसिं[३] ॥ १२८ ॥

तो भणइ भाणुवेगो इमम्मि नयरम्मि अत्थि पयडजसो[४] ।
खयरो अमियगई तस्स भारिया चित्तमालत्ति ॥ १२९ ॥

एसा एगा धूया[५] ताणं जाया अणोवमगुणड्ढा[६] ।
नामेण कणगमाला विन्नाणसमन्निया[७] कन्ना ॥ १३० ॥

---

**पृष्टश्च भानुवेगः कैषा कस्य वाऽपि महिलेति ? ।**
**ईषदीषत् विहस्याऽथ भणितं भानुवेगेन ॥ १२५ ॥**

**एतस्याः सङ्कथया न खलु कार्यं किञ्चिदुत्तिष्ठावस्तावत् ।**
**एसा हुं वक्रवक्रं पश्यति तव सन्मुखं येन ॥ १२६ ॥**

**अङ्गेषु निपतंती दृष्टिरेवंविधानां महिलानाम् ।**
**देहं करोति अस्वस्थमवश्यं हृदयमपहरेत् ॥ १२७ ॥**

**ततश्च मया भणितं परिहासपरोऽसि अस्मान्नेवेव ।**
**पृच्छामः कौतुकेन त्वं पुनरन्यं विकल्पसे ॥ १२८ ॥**

**ततो भणति भानुवेगोऽस्मिन् नगरेऽस्ति प्रकटयशाः ।**
**खेचरोऽमितगतिस्तस्य भार्या चित्रमालेति ॥ १२९ ॥**

**एषैका दुहिता तयोर्जाताऽनुपमगुणाढ्या ।**
**नाम्ना कनकमाला विज्ञानसमन्विता कन्या ॥ १३० ॥**

---

१. ईषदीषत् । २. अस्वस्थम् । ३. विकल्पसे । ४. प्रकटयशाः । ५. दुहिता=पुत्री । ६. अनुपमगुणाढ्या । ७. समन्निया=समन्विता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य मए भणियं का एसा मयणपूयणं कुणइ ? ।
एसावि का सहीए पुरओ [१]वत्तं कहेमाणी ? ॥ १३१ ॥

को व इमो अवलंबइ गलए वेसाए तरुणओ पुरिसो ? ।
एमाइ मए पुट्ठो हसिऊण तओ इमं भणइ ॥ १३२ ॥

एवंविहपुच्छाहिं कीस तुम सुयणु ! मं [२]पयारेसि ?।
को जुन्नम[३]ज्जरिं [४]कंजिएण पवियारिउं [५]तरइ ? ॥ १३३ ॥

न हु सुयणु ! पढमपुच्छं एरिसपुच्छाहिं छाइउं तरसि ।
[६]किडएहिं पयत्तेणवि छाइज्जइ कह णु [७]पच्चूसो ? ॥ १३४ ॥

एवं च तेण भणिओ लज्जाए अहोमुहो ठिओ अहयं ।
तं दट्ठु भाणुवेगो ठिओ [८]अलक्खोव्व होऊणं ॥ १३५ ॥

लज्जाए तस्समए [९]वालिज्जंतीवि अन्नओहुत्तं ।
[१०]मड्डाए तहवि निवडइ मह दिट्ठी तीए मुहकमले ॥ १३६ ॥

---

**ततश्च मया भणितं कैषा मदनपूजनं करोति ? ।**
**एषाऽपि का सख्युः पुरत वार्ता कथयन्ती ? ॥ १३१ ॥**

**कोवाऽयमवलम्बते गलके वेश्याया स्तरुणाकः पुरुषः ? ।**
**एवमादि मया पृष्ट हसित्वा तत इदं भणति ॥ १३२ ॥**

**एवंविधपृच्छाभिः कस्मात्त्वं सुतनो ! माम् प्रतारयसि ? ।**
**को जीर्णमार्जारीं काञ्जिकेन प्रवितारयितुं शक्नोति ? ॥ १३३ ॥**

**न खलु सुतनो ! प्रथमपृच्छामीदृशपृच्छाभिः शक्नोषि ।**
**कटैः प्रयत्नेन छाद्यते कथं नु प्रत्यूषः ? ॥ १३४ ॥**

**एवं च तेन भणितो लज्जयाऽधोमुखस्स्थितोऽहकम् ।**
**तं दृष्ट्वा भानुवेगः स्थितोऽलक्ष्य इव भूत्वा ॥ १३५ ॥**

**लज्जया तत्समये वार्यमाणाप्यन्यथाभूतं ।**
**बलात्कारेण तथापि निपतति मम दृष्टिस्तस्या मुखकमले ॥ १३६ ॥**

---

१. वार्ताम् । २. प्रतारयसि । ३. जीर्णमार्जारीम् । ४. काञ्जिक 'कांजी' इति भाषायाम् । ५. शक्नोति । ६. कटैः । ७. प्रत्युषः=सूर्यः । ८. अलक्ष्यः । ९. वार्यमाणापि । १०. बलात्कारेण ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणुरायतंतिबद्धा दिट्ठी जणसंकुलेवि मग्गम्मि ।
सरिऊण सणिय-सणियं जत्थ पियं तत्थ अल्लियइ[1] ॥ १३७॥

सहिजणपच्छन्नेहिं पुणो पुणो तरलदिट्ठिपाएहिं ।
भद्दवय[2]मेहविज्जूए विलसियं तीए विजियंति ॥ १३८ ॥

तो तीए तरलपम्हल[3]दिट्ठीबाणेहिं जज्जरे हियए ।
मज्झ पविट्ठा पंचवि कुसुमसरा मयणपविमुक्का ॥ १३९ ॥

एत्थंतरम्मितीए सहिनिवहो नियगिहेसु संचलिओ ।
सावि हु बाला चलिया पुणो पुणो मं पुलोएंती ॥ १४० ॥

वलियग्गीवं तीए ससिणिद्धअवंगदिट्ठिदोरेणं[4] ।
आयड्ढिय पच्छन्नं मह हियय झत्ति अवहरियं ॥ १४१ ॥

नाउंवहरिज्जंतं[5] मह हियय तीए पयविलग्गाइं ।
कूयंति नेउराइं पुणो पुणो कुढियपुरिसोव्व[6] ॥ १४२ ॥

---

अनुरागतन्त्रीबद्धा दृष्टिर्जनसङ्कुलेऽपि मार्गे ।
सृत्वा शनैः शनै-र्यत्र प्रियं तत्राऽऽलीयते ॥ १३७ ॥

सखीजनप्रच्छन्नैः पुनः पुनस्तरलदृष्टिपातैः ।
भाद्रपदमेघविद्युतविलसितं तस्या विजयन्ते ॥ १३८ ॥

ततस्तस्यास्तरलपक्ष्मलदृष्टिबाणै -र्जर्जरे हृदये ।
मम प्रविष्टा पञ्चापि कुसुमशरा मदनविमुक्ताः ॥ १३९ ॥

अत्रान्तरे तस्याः सखीनिवहो निजगृहे सञ्चलितः ।
साऽपि खलु बाला चलिता पुनः पुन-र्मां पश्यन्ती ॥ १४० ॥

वलितग्रीवां तस्याः सस्निग्धकटाक्षदृष्टिगुणेन ।
आकृष्य प्रच्छन्नं मम हृदयं झटित्यपहृतम् ॥ १४१ ॥

ज्ञात्वाऽपह्रियमाणं मम हृदयं तस्याः पदविलग्नानि ।
कूजन्ति नेपुराणि पुनः पुनः हृतानुगमनपुरुषा इव ॥ १४२ ॥

---

१. आलीयते=श्लिष्यति । २. भद्दवओ=भाद्रपदः । ३. पम्हलं=पक्ष्मलम् । ४. दोरो=गुणः । ५. अपह्रियमाणम् । ६. कुढो=हृतानुगमनम्, तद्वान् कुढिओ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]मयणत्ता सा जंती अणमिसनयणेहिं [2]पुलइया ताव ।
जावुज्जाणतरूहिं अंतरिया दिट्ठिमग्गाओ ॥ १४३ ॥

वोलीणदंसणाए तीए मह माणसम्मि संतावो ।
दुव्विसहो संजाओ [3]समयं अइदीहसासेहिं ॥ १४४ ॥

अह भणइ भाणुवेगो गच्छामो नियगिहम्मि अम्हेवि ।
एवंति मए भणिए समागया दोवि गेहम्मि ॥ १४५ ॥

तत्तो अहमारूढो उवरिमभूमीए तत्थ सयणीए ।
पासुत्तो उवविट्ठो मह पासे भाणुवेगोवि ॥ १४६ ॥

तो भणइ भाणुवेगो कीस तुमं दुम्मणोव्व संजाओ ? ।
मुंचसि विसायगब्भे सुदीहरे कीस नीसासे ? ॥ १४७ ॥

किं कुणसि अंगभंगं दीहं नीससिय मुक्कहुंकारो ।
[4]भट्ठट्ठियचणगो विव सयणीए कीस [5]तडफडसि ? ॥ १४८ ॥

---

मदनार्त्ता सा यात्यनिमेषनयनाभ्यां दृष्टा तावत् ।
यावदुद्यानतरुभिरन्तरिता दृष्टिमार्गतः ॥ १४३ ॥

अतिक्रान्तदर्शनायां तस्यां मम मानसे सन्तापः ।
दुर्विसहः सञ्जातः समकमतिदीर्घश्वासैः ॥ १४४ ॥

अथ भणति भानुवेगो गच्छावो निजगेहेऽऽवामपि ।
एवमिति मयि भणिते समागतौ द्वावपि गेहे ॥ १४५ ॥

ततोऽहमारुढो उपरितनभूमौ तत्र शयनीये ।
प्रसुप्त उपविष्टो मम पार्श्वे भानुवेगोऽपि ॥ १४६ ॥

ततो भणति भानुवेगः कस्मात्त्वं दुर्मना इव सञ्जातः ? ।
मुञ्चसि विषादगर्भास्सुदीर्घान् कस्माद् निश्वासान् ? ॥ १४७ ॥

किं करोष्यङ्गभङ्गं दीर्घं निश्वस्य मुक्तहुंकारः ।
भाष्ट्रास्थितचणक इव शयनीये कस्मात् परितश्चलति ॥ १४८ ॥

---

१. मदनार्ता । २. दृष्टा । ३. समयं=सह । ४. भ्राष्ट्रास्थितचणक इव । ५. तडफडसि=परितश्चलसि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंकिंपि चिंतिऊणं अणिमित्तं चेव कीस तं हससि ? ।
नियर्यविगप्पवसेणं कीस पुणो दुम्मणो होसि ? ॥ १४९ ॥

नाणारससंकिन्नं नाडयकव्वं[1] अहिणवेमाणो[2] ।
किं चिट्ठसि न य साहसि सब्भावं किंचि अम्हाणं ? ॥ १५० ॥

एवं च तेण बहुसो पुच्छिज्जंतेण कुमर ! मे भणियं ।
जाणामि नेव किं पुण मह देहं गाढमस्सत्थं[3] ? ॥ १५१ ॥

हसिऊण तेण भणियं पुव्वं चिय साहियं मए तुज्झ ।
एवंविहमहिलाणं न सुंदरं दंसणं होइ ॥ १५२ ॥

ता तीए चक्खुदोसा एसो सव्वोवि तुज्झ संतावो ।
[4]दाविज्जइ सा हत्थं पट्ठीए जेण होइ सुहं ॥ १५३ ॥

नीससिय मए भणियं संदेहो जीवियस्सवि य अम्हं ।
तं पुण सुहिओ भाओ य परिहासं कीस नो कुणसि ? ॥ १५४ ॥

---

किंकिमपि चिन्तयित्वाऽनिमित्तञ्चैव कस्मात्त्वं हससि? ।
निजकविकल्पवशेन कस्मात् पुन-र्दुर्मना भवसि ? ॥ १४९ ॥

नानारससंकीर्णनाटककाव्यमभिनयन् ।
किं तिष्ठसि न च कथयसि सद्भावं किञ्चिदस्माकम् ॥ १५० ॥

एवञ्च तेन बहुशः पृच्छ्यमानेन कुमार ! मया भणितम् ।
जानामि नैवं किंपुनर्ममदेहं गाढमस्वस्थम् ॥ १५१ ॥

हसित्वा तेन भणितं पूर्वमेवं कथितं मया तव ।
एवंविधमहिलानां न सुन्दरं दर्शनं भवति ॥ १५२ ॥

तस्मात्तस्याः चक्षुर्दोषादेषः सर्वोऽपि तव सन्तापः ।
दाप्यते सा हस्तं पृष्ठे येन भवति सुखम् ॥ १५३ ॥

निःश्वस्य मया भणितं सन्देहो जीवितस्यापि चास्माकम् ।
त्वम् पुनः सुहितो भ्राता च परिहासं कस्मान्नः करोषि ? ॥ १५४ ॥

---

१. नाटककाव्यम्। २. अभिनयन् । ३. अस्वस्थम् । ४. तस्मात् सा तव पृष्ठे हस्तं दाप्यते येन सुखं भवेत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो भणइ भाणुवेगो सब्भावविवज्जियस्स पुरिसस्स ।
अन्नायम्मि सरूवे किं काउं सक्किमो अम्हे ? ॥ १५५ ॥

ताहि मए वज्जरियं साहिज्जइ तस्स जो न याणाइ ।
तं पुण जाणंतोवि हु अलियं[1] चिय पुच्छिसि ममंति ॥ १५६ ॥

एमाइवयणवित्थरवज्जरणपरायणाण अम्हाणं ।
चूयलया गिहदासी आगंतूणं इमं भणइ ॥ १५७ ॥

अच्छइ दुवारदेसे समागया तुम्ह दंसणनिमित्तं ।
सोमलया नामेणं वरधाई कणगमालाए ॥ १५८ ॥

तो भणइ भाणुवेगो लहुं पवेसेह एव भणियम्मि ।
अह सच्चिय सोमलया समागया अम्ह पासम्मि ॥ १५९ ॥

कयउवयारा[2] ताहे उवविट्ठा भणइ सायरं वयणं ।
एगंतं कुणह तओ चूयलया पेसिया तत्तो ॥ १६० ॥

---

**ततो भणति भानुवेगः सद्भावविवर्जितस्य पुरुषस्य ।**
**अज्ञाते स्वरुपे कि कर्तुं शक्नुमो वयम् ? ॥ १५५ ॥**

**तदा मया कथितं कथ्यते तस्य यो न जानाति ।**
**तं पुन-र्जानन्नपि खल्वलिकं चैवं पृच्छसि मामिति ॥ १५६ ॥**

**एवमादिवचनविस्तारकथनपरायणयोरावयोः ।**
**चूतलता गृहदास्यागत्येदं भणति ॥ १५७ ॥**

**आस्ते द्वारदेशे समागता तव दर्शननिमित्तम् ।**
**सोमलता नाम्ना वरधात्री कनकमालायाः ॥ १५८ ॥**

**ततो भणति भानुवेगो लघु प्रवेशयैवं भणिते ।**
**अथ सा चैव सोमलता आवयोः पार्श्वे ॥ १५९ ॥**

**कृतोपचारा तदोपविष्टा भणति सादरं वचनम् ।**
**एकान्तं कुरुत ततश्चूतलता प्रेषिता ततः ॥ १६० ॥**

१. अलीकम्। २. उपचार=सत्कारः ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

भणियं सोमलयाए सरणागयवच्छला जओ सुयणा ।
परितायह परितायह ममं तओ भीमवसणाओ ॥ १६१ ॥

हरिसाऊरियहियएण ताहे एवंविहं मए भणियं ।
कत्तो भद्दे ! वसणं[1], सा भणई कुसुमबाणाओ ॥ १६२ ॥

ईसीसि विहसिऊणं वज्जरियं ताहि भाणुवेगेण ।
कडकडियसव्वसंधिं गयलायन्नं[2] तुह शरीरं ॥ १६३ ॥

निन्नट्ठ[3]दंतपंतिं सियकेसहसंतसीससोहिल्लं ।
दूरपलंबिरवलिवलयसहियसिहिणेहिं बीभच्छं ॥ १६४ ॥

दट्ठूण भीयभीओ दूरं दूरेण वच्चइ अणंगो ।
तत्तो कह तुज्झ भयं जराए जज्जरियदेहाए ? ॥ १६५ ॥

सोमलयाए भणियं मा मं उवहससु सुणसु वत्तंतं ।
जह कुसुमबाणविहियं परंपराए मह भयंति ॥ १६६ ॥

---

**भणितं सोमलतया शरणागतवत्सला यतः सुजनाः ।**
**परित्रायस्व परित्रायस्व माम् ततो भीमव्यसनात् ॥ १६१ ॥**

**हर्षाऽऽतुरितहृदयेन तदा एवंविधं मया भणितम् ।**
**कस्माद्भद्रे ! व्यसनं, सा भणति कुसुमबाणात् ॥ १६२ ॥**

**ईषदीषद्विहस्य कथितं तदा भानुवेगेन ।**
**कडकडितसर्वसन्धिं गतलावण्यं तव शरीरम् ॥ १६३ ॥**

**निर्नष्टदन्तपङ्क्तिं श्वेतकेशहसत्शीर्षशोभावन्तम् ।**
**दूरे प्रलम्बितवलिवलयसहितस्तनाभ्यां बीभत्सम् ॥ १६४ ॥**

**दृष्ट्वा भीतभीतो दूरं दूरेण व्रजत्यनङ्गः ।**
**ततः कथं तव भयं जराया जर्जरितदेहायाः ? ॥ १६५ ॥**

**सोमलतया भणितं मा मामुपहस श्रृणु वृतान्तम् ।**
**यथा कुसुमबाणविहितं परंपरया मम भयमिति ॥ १६६ ॥**

---

१. व्यसनं=कष्टम् । २. गतलावण्यम् । ३. निर्नष्टदन्तपङ्क्तिकम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उज्जाणाउ कीलियं[1] समागया नियगिहे कणगमाला ।
विच्छायवयणसोहा विडंप्पगहिया[2] ससिकलव्व॥ १६७ ॥

तत्तो य मए पुट्ठा कीस तुमं पुत्ति ! विमणदुम्मणिया ? ।
न य तीए किंचि सिट्ठं सुदीहरं नवरि नीससिउं ॥ १६८ ॥

अंसुजलपूरियाइं नयणाइं कयाइं दीणवयणाए ।
तत्तो य मए पुट्ठा तीए सही हंसिया नाम ॥ १६९ ॥

तीए भणियं अंबे! उज्जाण अज्ज पाविया अम्हे ।
पूइय मयणं बाहिं नीसरिया जाव ता दिट्ठो ॥ १७० ॥

कोउगवक्खित्तमणो उवविट्ठो भाणुवेगपासम्मि ।
पच्चक्खोव्व अणंगो एगो तरुणो महाभागो ॥ १७१ ॥ युग्मम् ॥

तं दट्ठूणं एसा जाया निप्फंदलोयणा सहसा ।
आसत्ता तव्वयणे आलेक्खगयव्व निच्चेट्ठा ॥ १७२ ॥

---

उद्यानात् क्रीडित्वा समागता निजगृहे कनकमाला।
विच्छायवदनशोभा राहुगृहीता शशीकलेव ॥ १६७ ॥

ततश्च मया पृष्टा कस्मात्त्वं पुत्रि ! विमनदौर्मनस्या? ।
नच तया किञ्चिद् शिष्टं सुदीर्घं नवरं निश्वस्य ॥ १६८ ॥

अश्रुजलपूरिते नयने कृते दीनवदनया ।
ततश्च मया पृष्टा तस्याः सखी हंसिका नामा ॥ १६९ ॥

तया भणितं अम्बे ! उद्यानमद्य प्राप्ता वयम् ।
पूजितं मदनं बहिं निःसृता यावत्तस्माद्दृष्टः ॥ १७० ॥

कौतुकावक्षिप्तमना उपविष्टो भानुवेगपार्श्वे ।
प्रत्यक्ष इव अनङ्ग एकस्तरुणो महाभाग् ॥ १७१ ॥ युग्मम् ॥

तं दृष्ट्वा एषा जाता निष्पन्दलोचना सहसा ।
आसक्ता तद्वदनेऽऽलेख्यगता इव निश्चेष्टा ॥ १७२ ॥

---

१. क्रीडित्वा । २. राहुगृहीता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स[1]व्वंगिओ इमीए अणिमिसदिट्ठीए [2]जोइओ स युवा ।
न य तेण इमा दिट्ठा कोउगवक्खित्तचित्तेण॥ १७३ ॥

तो तस्स नयणगोयरमपावमाणा सलज्जमुहकमला ।
दो[3]हग्गदूसियं पिव अत्ताणं मन्नमाणव्व ॥ १७४ ॥

किंकिंपि चिंतिऊणं भणइ सहीओ! इमम्मि चूयदुमे ।
कीलामो ताव खणं बंधिय अंदोलयं अम्हे॥ १७५ ॥ युग्मम्॥

एवं ताहिं भणिए तहेव संपाडियम्मि एसावि।
गुरुसद्देण [4]सहीओ आसन्नाओवि वाहरइ ॥ १७६ ॥

जइ एसो मह सद्दं सोऊणं संमुहं पलोएज्जा ।
होज्जामि ता कयत्था [5]इइ आसाए तडिज्जंती॥ १७७ ॥

तं पेक्खिऊण य मए परिहासवसेण जंपियं एयं ।
आसन्नंपि सहिजणं उच्चुच्चं कीस वाहरसि ? ॥ १७८ ॥

---

**सर्वाङ्गीण अनयाऽनिमेषदृष्ट्या दृष्टः स युवा ।**
**न च तेनेयम् दृष्टा कौतुकावक्षिप्तचित्तेन ॥ १७३ ॥**

**ततस्तस्य नयनगोचरमप्राप्नुवन्ती सलज्जमुखकमला ।**
**दुर्भाग्यदूषितमिवाऽऽत्मानं मन्यमानेव ॥ १७४ ॥**

**किंकिमपि चिन्तयित्वा भणति सखायः ! अस्मिंश्चूतद्रुमे ।**
**क्रीडामस्तावत्क्षणं बद्धवांऽऽदोलकं वयम् ॥ १७५ ॥ युग्मम् ॥**

**एवं तस्यां भणितायां तथैव संपादिते एषाऽपि ।**
**गुरुशब्देन सखीरासन्नाऽपि व्याहरति ॥ १७६ ॥**

**यद्येषो मम शब्दं श्रुत्वा सन्मुखं प्रलोकयेत् ।**
**भवामि तस्मात्कृतार्थ इत्याशया तडियमाना ॥ १७७ ॥**

**तं प्रेक्ष्य च मया परिहासवशेन जल्पितमेतद् ।**
**आसन्नमपि सखीजनं उच्चुच्चैः कस्माद्व्याहरसि ? ॥ १७८ ॥**

---

१. सर्वाङ्गीणः । २. दृष्टः । ३. दोहग्गं=दुर्भाग्यम् । ४. सखीः । ५. इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोउगवक्खित्तमणो एसो तुह देइ नेय पडिवयणं ।
तं वयणं सोऊणं [1]सविलक्खा किंचि संजाया ॥ १७९ ॥

एत्थंतरम्मि दिट्ठा तेण जुवाणेणऽणंगरूवेण ।
[2]सज्झसहरिसेहिं इमा ताहि अउव्वं रसं पत्ता ॥ १८० ॥

तेणालोइयमेत्ता सोहग्गसमन्नियं च अप्पाणं ।
जीवियमवि सकयत्थं मन्नंत्ता पुलइयसरीरा ॥ १८१ ॥

[3]अवरुंडइ सहिनिवहं उच्चं संलवइ हसइ अनिमित्तं ।
पायंगुट्ठेण महिं विलिहइ केसे य सं[4]जमइ ॥ १८२ ॥

एमाइं [5]सवियारं चेट्ठंता कीलिऊण खणमेगं ।
मयणसरविहुरियंगी इहागया एरिसा जाया ॥ १८३ ॥

एवं च हंसियाए भणियम्मि पुणोवि सा मए पुट्ठा ।
को सो पुरिसो हंसिणि !, कहियं सव्वंपि मह तीए ॥ १८४ ॥

---

**कौतुकावक्षिप्तमना एष तव ददाति नैव प्रतिवचनम् ।**
**तं वचनं श्रुत्वा सवैलक्ष्या किञ्चित् सञ्जाता ॥ १७९ ॥**

**अत्रान्तरे दृष्टा तेन यूनाऽनङ्गरुपेण ।**
**साध्वसहर्षाभ्यामियम् तत्रऽपूर्वं रसं प्राप्ता ॥ १८० ॥**

**तेनाऽऽलोकितमात्रात् सौभाग्यसमन्वितं चात्मानं ।**
**जीवितमपि सकृतार्थं मन्यमाना पुलकितशरीरा ॥ १८१ ॥**

**परिरभते सखीनिवहमुच्चं संलपति हसत्यनिमित्तम् ।**
**पादाङ्गुष्टेन महिं लिखति केशांश्च संयमयति ॥ १८२ ॥**

**एवमादि सविकारं चेष्टमाणा क्रीडित्वा क्षणमेकम् ।**
**मदनशरविधुरिताङ्गी इहाऽऽगतेदृशा जाता ॥ १८३ ॥**

**एवञ्च हंसिकायां भणितायां पुनरपि सा मया पृष्टा ।**
**कः स पुरुषो हंसिके ! कथितं सर्वमपि मम तया ॥ १८४ ॥**

---

१. सवैलक्ष्या । २. साध्वसहर्षाभ्याम् । ३. अवरुंडइ=परिरभते=आलिङ्गति । ४. संयमयति । ५. सविकारम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोहणठाणे रागो पुत्तीए, चिंतिउं गया पासे ।
तीए दिट्ठा य मए सयणीयगया कणगमाला ॥ १८५ ॥

आ[1]पंडुरमुहकमला सुदीहसासेहिं सोसियसरीरा ।
कहकहवि हु नियजीयं महया किच्छेण धारंती ॥ १८६ ॥

पियविरहजलणजालावलीहिं संतावियाए व[2]रईए ।
हारो चंदणपंको मु[3]म्मुरसरिसोव्व पडिहाइ ॥ १८७ ॥

चीय[*]व्व मुणालाइं नलिणीदलाइंपि [4]जालतुल्लाइं ।
अंगाररासिसरिसा [5]पडिहासइ हंसतूलीवि ॥ १८८ ॥

पुट्ठा न देइ वयणं आलवइ न सहिजणं सिणिद्धंपि ।
झाणोवगया वरजोगिणिव्व जाया विगयचेट्ठा ॥ १८९ ॥

पियविरहपिसाएणं गहिय गयचेयणावि हु सहीहिं ।
आसासिज्जउ वरई सुंदर! तुह नाममंतेहिं ॥ १९० ॥

---

**शोभनस्थाने राग पुत्र्याः चिन्तयित्वा गता पार्श्वे ।**
**तदा दृष्टा च मया शयनीगयता कनकमाला ॥ १८५ ॥**

**आपाण्डुरमुखकमला सुदीर्घश्वासैः शोषितशरीरा ।**
**कथकथमपि हु निजजीवितं महता कृच्छ्रेण धरन्ती ॥ १८६ ॥**

**प्रियविरहज्वलनजालावलीभिः संतप्ताया वराक्याः ।**
**हारश्चन्दनपङ्को मुर्मुरसदृश इव प्रतिभाति ॥ १८७ ॥**

**चित्तेव मुणालानि नलिनीदलान्यपि ज्वालातुल्यानि ।**
**अङ्गारराशीसदृशा प्रतिभासते हंसतूल्यपि ॥ १८८ ॥**

**पृष्टा न ददाति वचनमालपति न सखीजनं स्निग्धमपि ।**
**ध्यानोपगता वरयोगीनी इव जाता विगतचेष्टा ॥ १८९ ॥**

**प्रियविरहपिशाचेन गृहीता गतचेतनाऽपि खलु सखीभिः ॥**
**आश्वास्यतां वराकी सुन्दर ! तव नाममन्त्रैः ॥ १९० ॥**

---

१. आपाण्डुरम्=ईषत्पाण्डु । २. वराक्याः । ३. मुर्मुरः=तुषाग्निः । *चिता इव ४. ज्वालातुल्यानि । ५. प्रतिभासते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पियविरहपीडियं तं तुडिगयनियजीवियं मुणेऊणं[1] ।
तद्दुक्खदुक्खिया हं समागया तुम्ह पासम्मि ॥ १९१ ॥

एवं कुसुमसराओ अइगरुयं आगयं महं वसणं ।
जं तीए दुक्खियाए अहंपि अइदुक्खिया चेव ॥ १९२ ॥

ता सुयणु ! कणगमाला जा सा नीसाससोसियसरीरा ।
आसासिज्जउ[3] वराई जाव न सासा समप्पंति[4] ॥ १९३ ॥

लहु कुणसु किंचुवायं जाव न नीसरइ जीवियं तीए ।
गयजीवियाए पच्छा किंकाही लावयरसेण ? ॥ १९४ ॥

तव्वयणं सोऊणं तइया अह रायउत्त![5] मे भणियं ।
एयंपि न जाणामो का एसा कणगमालत्ति ॥ १९५ ॥

ता पुच्छ भाणुवेगं पत्थुयवत्थुम्मि गहियपरमत्थं ।
अम्हे पुण पाहुणया अयाणुया[6] एत्थ वत्थुमि ॥ १९६ ॥

---

प्रियविरहपीडितां तां त्रुटिगतनिजजीवितां ज्ञात्वा ।
तद्दुःखदुखिताऽहं समागता तव पार्श्वे ॥ १९१ ॥

एवं कुसुमशरादतिगुरुकमागतं मम व्यसनम् ।
यत्तस्यां दुःखितायां अहमप्यतिदुःखिता चैव ॥ १९२ ॥

तस्मात् सुतनो ! कनकमाला या सा निःश्वासशोषितशरीरा ।
आश्वास्यतां वराकी यावन्न श्वासान् समाप्यन्ते ॥ १९३ ॥

लघु कुरु किञ्चिदुपायं यावन्न निःसरति जीवितं तस्याः ।
गतजीवितायाः पश्चात्किं करिष्यति लावण्यरसेन ? ॥ १९४ ॥

तद्वचनं श्रुत्वा तदाऽथ राजपुत्र ! मया भणितं ।
एतदपि न जानीमः कैषा कनकमालेति ॥ १९५ ॥

तस्मात् पृच्छ भानुवेगं प्रस्तुतवस्तुनि गृहीतपरमार्थम् ।
वयं पुनः प्राधूर्णकाऽज्ञाताऽत्र वस्तुनि ॥ १९६ ॥

---

१. त्रुटिः=संशयः। २. ज्ञात्वा। ३. आश्वास्यताम् । ४. समाप्यन्ते। ५. राजपुत्र !। ६. अज्ञाताः।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

अह भणइ भाणुवेगो अम्हेवि हु नेव जाणिमो किंचि ।
तो भणइ सोमलया सा[1]सूयं एरिसं वयणं ॥ १९७॥

हरिऊण तीए हिययं दिट्ठिबाणेहिं पहरियं अंगे ।
तुडिगयजीयं काउं तं संपइ अयाणुओ जाओ ॥ १९८॥

कंठगयजीवियासा तुह विरहे मरइ नत्थि संदेहो ।
[2]अयणत्तं अवलंबियं तं चिट्ठसि नि[3]द्दओ भद्द ! ॥ १९९॥ अन्नं च ॥

जो जत्थ जणो निवसइ रक्खइ सो आयरेण तं गेहं ।
तीए मणम्मि वसंतो किं निद्दय ! तं मणं दहसि ? ॥ २००॥

हरिऊण तीए हिययं संपइ चोरोव्व नि[4]न्हवेमाणो ।
न हु [5]छुट्टसि सुयणु ! तुमं किंचि उवायं विचिंतेसु ॥ २०१॥

तत्तो य मए भणियं [6]अम्मे ! तं चेव साहसु उवायं ।
एवं चवत्थियम्मि जं जुत्तं अम्ह काउं जे ॥ २०२॥

---

**अथ भणति भानुवेगो वयमपि हु नैव जानीमः किञ्चित् ।**
**ततो भणति सोमलता सासूयमीदृशं वचनम् ॥ १९७ ॥**

**हृत्वा तस्या हृदयं दृष्टिबाणैः प्रहृतमङ्गान् ।**
**त्रुटिगतजीवितां कृत्वा तां संप्रत्यज्ञातो जातः ॥ १९८ ॥**

**कण्ठगतजीविताशा तव विरहे म्रियते नास्ति सन्देहः ।**
**अजनत्वमवलम्ब्यत्वस्तिष्ठसि निर्दयो भद्र ! ॥ १९९ ॥**

**अन्यच्च । यो यत्र जनो निवसति रक्षति स आदरेण तं गेहम् ।**
**तस्याः मनसि वसन् किं निर्दय ! तन्मनो दहसि ? ॥ २०० ॥**

**हृत्वा तस्या हृदयं संप्रति चौर इव निह्नुवानः ।**
**न खलु छूट्यसे सुतनो ! त्वं किञ्चिदुपायं विचिन्तय ॥ २०१ ॥**

**ततश्च मया भणितं अम्बे ! त्वमेव कथयोपायम् ।**
**एवं चावस्थिते यद्युक्तमस्मान् कर्तुं ये ॥ २०२ ॥**

---

१. असूयया सहितम् । २. अजनत्वम्=पशुत्वम् । ३. निर्दयः । ४. निह्नुवानः=अपलपन्।
५. छुट्यसे=मुच्यसे । ६. अम्मा=अम्बा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणियं सोमलयाए चित्तं पत्तं व पच्चयनिमित्तं[1] ।
पट्ठवसु जेण चित्तं संधीरेइ[2] सा तयं दट्ठुं ॥ २०३ ॥

तत्तो य मए लिहिया पत्ते नलिणीओ तीए पउमम्मि ।
मोत्तूण सेसकुसुमे निलीयमाणो अली लिहिओ ॥ २०४ ॥

हिट्ठे[3] य तस्स लिहिया एसा गाहा उब्वुन्नयरसेण[4] ।
नियभावसूयणपरा पच्छन्नत्था तया कुमर! ॥ २०५ ॥

तह कहवि परिट्ठवियं अलिणो नलिणीए परिमलं हियए ।
लोयणुप्पयणं[5] जह तस्स केवलं सेसकुसुमेसु ॥ २०६ ॥

तं च बहु पत्तमज्झे काउं तो पेसिओ सतंबोलो ।
चूयलयाए हत्थे दोवि गया तीए पासम्मि ॥ २०७ ॥

तत्तो खणंतराओ चूयलया आगया इमं भणइ ।
एत्तो विणिग्गया हं पत्ता य कमेण तग्गेहे ॥ २०८ ॥

---

**भणितं सोमलतया चित्रं पत्रं वा प्रत्ययनिमित्तम् ।**
**प्रस्थापय येन चित्तं संधारयति सा तद् दृष्ट्वा ॥ २०३ ॥**

**ततश्च मया लिखिता पत्रे नलिन्यस्तस्याः पद्मे ।**
**मुक्त्वा शेषकुसुमानि निलीयमानोऽलिर्लिखितः ॥ २०४ ॥**

**अधश्च तस्य लिखितैका गाथोद्भटरसेन ।**
**निजभावसूचनपरा प्रच्छन्नार्था तदा कुमार ! ॥ २०५ ॥**

**तथा कथमपि परिस्थापितमलेर्नलिन्याः परिमलं हृदये ।**
**लयनोत्पतनं यथा तस्य केवलं शेषकुसुमेषु ॥ २०६ ॥**

**तं च बहुपत्रमध्ये कृत्वा ततः प्रेषितः सतम्बोलः ।**
**चूतलतायाः हस्ते द्वेऽपि गते तस्याः पार्श्वे ॥ २०७ ॥**

**ततः क्षणान्तरतश्चूतलताऽऽगतेदं भणति ।**
**अस्मात् विनिर्गताऽहं प्राप्ता च क्रमेण तद्गेहे ॥ २०८ ॥**

---

१. प्रत्ययः=विश्वासः । २. संधीरइ=सम्यग् धैर्यमायाति । ३. हेट्ठे=अधः । ४. अव्वुन्नओ=उद्भटः । ५. लयनोत्पतनम्=अवस्थानोत्प्लवने ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मत्तव्व मुच्छिया इव गिलिया इव सुयणु ! गुरुपिसाएण ।
दिट्ठा उ कणगमाला विसममवत्थंतरं पत्ता ॥ २०९ ॥

तीए सहीहिं भणियं समागया चित्तवेगदूइत्ति ।
अह सा तुह नामक्खरआयन्नणलद्धबुद्धिया ॥ २१० ॥

झत्ति निविट्ठा तत्तो पासिय मं लज्जियाव मणयंति ।
ताहे समप्पिओ से तंबोलो सहरिसं गहिओ ॥ २११ ॥

गहियत्थाए भणियं केणेसो पेसिओ म्ह तंबोलो ? ।
मे भणियं तह सुंदरि! मणोहरेणं पिययमेणं ॥ २१२ ॥

तीए भणियं कन्ना अहंति कह मज्झ पिययमो भद्दे ! ? ।
मे भणियं नणु होही अह सा अफुडक्खरं भणइ ॥ २१३ ॥

कह मामि ! अउन्नाए एत्तियमेत्ताणि मज्झ पुन्नाणि ।
जं सो भत्ता होही दंसणमित्तंपि अइदुलहं ॥ २१४ ॥

---

**मत्तेव मूर्च्छितेव गिलितेव सुतनो ! गुरुपिशाचेन ।**
**दृष्टा तु कनकमाला विषमावस्थान्तरं प्राप्ता ॥ २०९ ॥**

**तस्याःसखीभि-र्भणितं समागता चित्रवेगदूतीति ।**
**अथ सा तव नामाक्षराऽऽकर्णनलब्धबुद्धिका ॥ २१० ॥**

**झटिति निविष्टा ततो दृष्ट्वा माम् लज्जितेव मनाग् इति ।**
**तदा समर्पितस्तस्यास्त सहर्षं गृहीतः ॥ २११ ॥**

**गृहीतार्थया भणितं केनैषः प्रेषितो माम् तम्बोलः ? ।**
**मया भणितं तव सुन्दरि ! मनोहरेण प्रियतमेन ॥ २१२ ॥**

**तया भणितं कन्याऽहमिति कथं मम प्रियतमो भद्रे ! ? ।**
**मया भणितं ननु भविष्यति अथ साऽस्फुटाक्षरं भणति ॥ २१३ ॥**

**कथं सखे ! अपुण्याया एतावन्मात्राणि मम पून्यानि ।**
**यत्स भर्त्ता भविष्यति दर्शनमात्रमप्यतिदुर्लभम् ॥ २१४ ॥**

---

१. आयन्नणं = आकर्णनम् = श्रवणम् । २. दृष्ट्वा । ३. मनाक् । ४. सख्या आमन्त्रणेऽव्ययम् । ५. अपुण्यायाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्तियमेत्तं भणिउं अंसुजलुप्फुण्णलोयणा झत्ति ।
नीसासमोत्तूणं गयचेट्ठा सा पुणो जाया ॥ २१५ ॥

तत्तो सहीहिं भणियं साहेज्जसु तस्स निग्घिणमणस्स ।
जहदिट्ठं हि सरूवं इमीए अइगरुयपेम्माए ॥ २१६ ॥

अन्नं च । जह कहवि ताव बोलेइ रयणी कुसलेण ता पभायम्मि ।
उज्जाणम्मि गयाए दायव्वं दंसणमिमीए ॥ २१७ ॥

तद्दंसणेण जीवइ न अन्नहा एस निच्छओ अम्ह ।
एवं बहुहा भणिया समागया तुम्ह पासम्मि ॥ २१८ ॥

एवं चूयलयाए भणियं सोऊण तीए वुत्तंतं ।
दुगुणतरो मे जाओ तव्विरहे गरुययसंतावो ॥ २१९ ॥

जइ मरिही[3] सा बाला कहवि हु गुरुविरहताविया हंदि! ।
एएण निमित्तेणं ता मज्झवि आगयं मरणं ॥ २२० ॥

---

एतावन्मात्रं भणित्वा अश्रुजलपूर्णलोचना झटिति ।
निश्वासं मुक्त्वा गतचेष्टा सा पुन - र्जाता ॥ २१५ ॥

ततः सखीभि-र्भणितं कथय तस्य निर्घृणमनसः ।
यथादिष्टं हि स्वरूपमस्या अतिगुरुकप्रेमायाः ॥ २१६ ॥

अन्यच्च । यदि कथमपि तावद् गच्छति रजनी कुशलेन तस्मात्प्रभाते।
उद्याने गतायाः दातव्यं दर्शनमस्याः ॥ २१७ ॥

तद्दर्शनेन जीवति नान्यथा एष निश्चयोऽस्माकम् ।
एवं बहुधा भणिता समागता तव पार्श्वे ॥ २१८ ॥

एवं चूतलतया भणितं श्रुत्वा तस्याः वृतान्तम् ।
द्विगुणतरो मम जातस्तद्विरहे गुरुकसंतापः ॥ २१९ ॥

यदि मरिष्यति सा बाला कथमपि खलु गुरुविरहतप्ता हन्दि ! ।
एतेन निमित्तेन तस्मान्ममाऽप्यागतं मरणम् ॥ २२० ॥

---

१. उप्फुण्णं=पूर्णम् । २. गच्छति । ३. मरिष्यति ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा सिणेहजुत्ता जइ सा ता कीस मज्झ पडिवयणं ।
नवि दिन्नं ता मन्ने मंदसिणेहा उ मह उवरिं ॥ २२१ ॥

जइवि हु सा [1]निन्नेहा तहवि मणं मज्झ तीए विरहम्मि ।
पजलियजलणसमुज्जलजाला[2]लिद्धंव पडिहाइ ॥ २२२ ॥

नयणेहिं [3]पुलइया सा ताइं चिय दहउ एस पियविरहो ।
हियएणं किमवरद्धं जेण तयं निद्दयं दहइ ? ॥ २२३ ॥

अन्नेण कयं अन्नो न भुंजए अलियमेरिसं वयणं ।
सा दिट्ठा नयणेहिं जाओ हिययस्स संतावो ॥ २२४ ॥

रोवंतु नाम तं जणमपेच्छमाणाणि दड्ढनयणाणि ।
तं हियय! किं [4]विमूरसि साहीणे चिंतियव्वम्मि? ॥ २२५ ॥

नयणेहिं जोइया सा हियएण कओ य गुरयपडिबंधो ।
सरिसेवि हु अवराहे विरहो हिययं दढं दहइ ॥ २२६ ॥

---

**अथवा स्नेहयुक्ता यदि सा तस्मात्कस्मात् मम प्रतिवचनम् ।
नाऽपि दत्तं तस्मान्मन्ये मन्दस्नेहा तु ममोपरि ॥ २१२ ॥**

**यद्यपि खलु सा निःस्नेहा तथापि मनो मम तस्या विरहे ।
प्रज्वलितज्वलनसमुज्जलजालाऽऽश्लिष्टमिव प्रतिभाति ॥ २२२ ॥**

**नयनाभ्यां दृष्टा सा ते चैव दहतामेष प्रियविरहः ।
हृदयेन किमपराद्धं येन तद् निर्दयं दहति ? ॥ २२३ ॥**

**अन्येन कृतमन्यो न भुङ्क्तेऽलिकमीदृशं वचनम् ।
सा दृष्टा नयनभ्यां जातो हृदयस्य संतापः ॥ २२४ ॥**

**रोदितु नाम तं जनमपेक्षमाणे दृढनयने ।
तद् हृदय ! किं विभज्यसे स्वाधीने चिन्तितव्ये ? ॥ २२५ ॥**

**नयनाभ्यां दृष्टा सा हृदयेन कृतश्च गुरुकप्रतिबन्धः ।
सदृशेऽपि खलु अपराधे विरहो हृदयं दृढं दहति ॥ २२६ ॥**

---

१. निःस्नेहा । २. आलिद्ध=अश्लिष्टम् । ३. दृष्टा । ४. विभज्यसे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि सूरो भमिऊणं भुवणमंडलमसेसं ।
अत्थगिरिमत्थयत्थो जाओ अद्धाणखिन्नोव्व ॥ २२७ ॥

निट्ठुरकरेहिं भुवणं इमेण संतावियंति रोसेण ।
नज्जइव अत्थगिरिणा [1]सीसाओ ढालिओ सूरो ॥ २२८ ॥

नाऊण सूरपडणं अणुलग्गा उवरि अत्थसेलस्स ।
रोसेण रत्तमुहा समागया झत्ति अह संझा ॥ २२९ ॥

तयणंतरमंधारियदिसिवलया नवरि आगया रयणी ।
पयडियतारयनिवहा [2]कोसियहुंकारभीसणया ॥ २३० ॥

ताव य खणंतराओ निन्नासियबहलतिमिरसंघाओ ।
[3]माणिणिमाणुम्महणो वित्थरिओ ससिकरनिहाओ[4] ॥ २३१ ॥

मयलंछणपवणेणं गाढं [5]संधुक्किओ [6]विओयग्गी ।
संताविउं पयत्तो मह हिययं ताहे सयगुणियं ॥ २३२ ॥

---

**अत्रान्तरे सूरो भ्रान्त्वा भुवनमण्डलमशेषम् ।**
**अस्तगिरिमस्तकस्थो जातोऽध्वानखिन्न इव ॥ २२७ ॥**

**निष्ठुरकरैर्भुवनमनेन सन्तप्तमिति रोषेण ।**
**ज्ञायतेवाऽस्तगिरिणा शीर्षात् पातितः सूरः ॥ २२८ ॥**

**ज्ञात्वा सूरपतनमनुलग्नोपर्यस्तशैलस्य ।**
**रोषेणेव रक्तमुखा समागता झटित्यथ सन्ध्या ॥ २२९ ॥**

**तदनन्तरमन्धकृतदिग्वलया नवरमागता रजनी ।**
**प्रकटिततारकनिवहा कौशिकहुंकारभीषणका ॥ २३० ॥**

**तावञ्च क्षणान्तरतो निर्नाशितबहलतिमिरसङ्घातः ।**
**मानिनीमानोन्मथनो विस्तरितः शशीकरसमूहः ॥ २३१ ॥**

**मृगलाञ्छनपवनेन गाढं प्रदीप्तो वियोगाग्निः ।**
**संतप्तुं प्रवृत्तो मम हृदयं तदा शतगुणितम् ॥ २३२ ॥**

---

१. सीसाओ ढालिओ=शीर्षात् पातितः । २. कोशिको घूकः । ३. मानिनीमानोन्मथनः ।
४. निहाओ=समूहः । ५. प्रदीप्तः । ६. वियोगाग्निः ।



Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

अह चिंतिउं पयत्तो अमयमओ सुम्मई इमो चंदो ।
नवरं तव्विरहे अज्ज विज्जुपुंजोवमो जाओ ॥ २३३ ॥

हे हियय! कीस उज्झसि उव्वेयं कीस कुणसि अच्चत्थं? ।
दुल्लहजणम्मि रागं पढमं चिय कीस तं कुणसि ? ॥ २३४ ॥

अन्नं च । जो किर करेइ नेहं तस्सेव य हियय! रंच्चिउं जुत्तं ।
दूरट्ठिओवि जो दहइ माणसं तम्मि को रागो ? ॥ २३५ ॥

सो च्चिय वुब्भइ हियए सो च्चिय अइनिट्ठुरो दहइ देहं ।
कस्स कहिज्जइ वत्ता सरणाओ भयम्मि उब्भूए ? ॥ २३६ ॥

किं मन्ने होज्ज दियहं जम्मी लग्गेज्ज मज्झ हत्थम्मि ।
मणनिव्ववणो तीए कमलोयरकोमलो हत्थो ॥ २३७ ॥

अच्छउ ता दूरे च्चिय पाणिग्गहणाइयं तु सह तीए ।
अम्हाण मणोदइयं दंसणमवि दुल्लहं मन्ने ॥ २३८ ॥

---

**अथचिन्तितुं प्रवृत्तोऽमृतमयः श्रूयतेऽयं चन्द्रः ।**
**नवरं तद्विरहेऽद्य विद्युत्पुञ्जोपमो जातः ॥ २३३ ॥**

**हे हृदय ! कस्माद्दह्यसे उद्वेगं कस्मात्करोषि अत्यर्थम् ।**
**दुर्लभजने रागं प्रथमं चैव कस्मात्त्वंकरोषि? ॥ २३४ ॥ अन्यच्च ॥**

**यः किल करोति स्नेहं तस्यैव च हृदय ! रङ्क्तुं युक्तम् ।**
**दूरस्थितोऽपि यो दहति मानसं तस्मिन् को रागः? ॥ २३५ ॥**

**स चैव उह्यते हृदये स एवऽतिनिष्ठुरो दहति देहम् ।**
**कस्य कथ्यते वार्ता शरणतो भयमुद्भूते? ॥ २३६ ॥**

**किं मन्ये भवेत् दिवसं यस्मिंल्लगेत् मम हस्ते ।**
**मनोनिर्वापनस्तस्याः कमलोदरकोमलो हस्तः ॥ २३७ ॥**

**आस्तां तस्मात् दूरे चैव पाणिग्रहणादिकं तु सह तया ।**
**अस्माकं मनोदयितं दर्शनमपि दुर्लभं मन्ये ॥ २३८ ॥**

१. श्रूयते । २. दह्यसे । ३. अत्यर्थम् । ४. रङ्क्तुं=रागं कर्तुम् । ५. उह्यते । ६. यस्मिन् ।
७. मनोनिर्वापनः=संतापापहारी । ८. दयितम्=अभीष्टम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं मज्झ जीविएणं किंवा मह हंदि ! मणुयजम्मेण ।
जो विरहदुक्खसमणं तीए वयणं न पेच्छामि ? ॥ २३९ ॥

अहवा चूयलयाए भणिएणं भविस्सई पभायम्मि ।
तीए सह दंसणयं अणुकूलो जइ विही होही ॥ २४० ॥

गुरुविरहजलणजालावलीहिं संतावियस्स हिययस्स ।
अन्नो नत्थि उवाओ पियदंसणओसहं मोत्तुं ॥ २४१ ॥

एमाइविगप्पेहिं पणट्ठणिद्दस्स मज्झ सा रयणी ।
चउजामावि हु तइया जामसहस्सोवमा जाया ॥ २४२ ॥

असरिसदूसहसंतावतावियं कहंवि माणसं मज्झ ।
फुडमाणंपि न फुट्टं मन्ने तद्दंसणासाए॥ २४३ ॥

सीयलकरनियरेणवि संतावं फेडिउं[1] मह असत्तो[2] ।
अह लज्जिउव्व चंदो अत्थगिरिं पाविओ तत्तो ॥ २४४ ॥

---

**किं मम जीवितेन किंवा मम हन्दि ! मनुजजन्मना ।**
**यो विरहदु:खशमनं तस्या वदनं न प्रेक्षे ? ॥ २३९ ॥**

**अथवा चूतलतया भणितेन भविष्यति प्रभाते ।**
**तया सह दर्शनकमनुकुलो यदि विधि-र्भविष्यति ॥ २४० ॥**

**गुरुविरहज्वलनजालावलीभिः संतप्तस्य हृदयस्य ।**
**अन्यो नास्ति उपायः प्रियादर्शनौषधं मुक्त्वा ॥ २४१ ॥**

**एवमादिविकल्पैः प्रनष्टनिद्रस्य मम सा रजनी ।**
**चतुर्यामाऽपि खलु तदा यामसहस्त्रोपमा जाता ॥ २४२ ॥**

**असदृशदु:सहसंतापतप्तं कथमपि मानसं मम ।**
**स्फुटन्नपि न स्फुटं मन्ये तद्दर्शनाशया ॥ २४३ ॥**

**शीतलकरनिकरेणाऽपि संतापं भ्रशयितुं ममाऽशक्तः ।**
**अथ लज्जित इव चन्द्रोऽस्तगिरिं प्राप्तस्ततः ॥ २४४ ॥**

---

१. भ्रशयितुम् । २. अशक्तः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पच्चूसगयवरुम्मूलियाए उड्डीणससिविहंगाए ।
रयणिलयाए गलंतिव कुसुमाइं तारयनिहेणं[1] ?॥ २४५ ॥

अह इंददिसा[2] सहसा केसुयसुयतुंडसच्छहा[3] जाया ।
आसन्नसूरमंडलवज्जरणत्थंव लोयस्स॥ २४६ ॥

पडिबोहियकमलवणो पसरियखरकिरणपूरियदियंतो ।
मेलियरहंगजुयलो[4] तदणंतरमुग्गओ सूरो॥ २४७ ॥

एत्थंतरम्मि अहयंपि समुट्ठिऊण किच्चं पभायतणयं[5] करिउं पयत्तो[6] ।
भो सुप्पइट्ठ! तडया दइयाइ[7] होही संदंसणम्ह इइ पहिट्ठमणो पगामं[8] ॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि परिसमप्पइ विरहे सूरुग्गमोत्ति सुपसिद्धो ।
सुरसुंदरिनामाए कहाए तइओ परिच्छेओ ॥ २५० ॥ ९५० ॥

---

**प्रत्यूषगजवरोन्मूलितायाः उड्डीनशशीविहंगायाः ।
रजनीलतायाः गलन्तीव कुसुमानि तारकनिभेन ॥ २४५ ॥**

**अथ इन्द्रदिक् सहसा किंशुकशुकतुण्डसदृशी जाता ।
आसन्नसूरमण्डलकथनार्थमिव लोकस्य ॥ २४६ ॥**

**प्रतिबोधितकमलवनः प्रसृतखरकिरणपूरितदिगन्तः ॥
मिलितरथाङ्गयुगलस्तदनन्तरमुद्गतः सूरः ॥ २४७ ॥**

**अत्रान्तरे अहकमपि समुत्थाय कृत्यं प्रभातसम्बन्धि कर्तुं प्रवृत्तः ।
भो सुप्रतिष्ठ! तदा दयितायाः भविष्यति संदर्शनं मम इति प्रहृष्टमनः प्रकामम् ॥२४८॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।
रागाग्निद्वेषविषधरप्रशमनजलमंत्रभूतायाः ॥ २४९ ॥**

**एषोऽपि परिसमाप्यते विरहे सूरुद्गमेति सुप्रसिद्धः ।
सुरसुन्दरीनाम्न्याः कथायाः तृतीयः परिच्छेदः ॥ २५० ॥ ॥ ७५० ॥**

**॥ तृतीयः परिच्छेदः पूर्णः ॥**

---

देवयवयणासाए नेव उवाओवि चिंतिओ कोवि ।
इण्हिं पुण नो सक्कं किंपि [8]उवायंतरं काउं ॥ २२७ ॥

---

**ततोऽपराह्णसमये मम विकल्पो मनस्युत्पन्नः ।**
**अहो ! किं तमलिकं भविष्यति इह देवतावचनम् ? ॥ २२२॥**

**अथवा न पश्यति किञ्चिदपि अनुरूपं तस्य तेन मन्ये ।**
**सोमलताकथितं सर्वमलीकं हि सञ्जातम् ॥ २२३ ॥**

**एवमादिबहुविकल्पं चिन्तयन् रणरणेन गृहीतोऽहम् ।**
**कुत्राऽपि धृतिमलभमानो निस्सृतस्ततो नगरात् ॥ २२४ ॥**

**प्राप्तश्चतमुद्यानं दृष्टा यत्र सा मया पूर्वम् ।**
**अंदोलनतरुऽधे गत्वाऽहं तदोपविष्टः ॥ २२५ ॥**

**अथ चिन्तितुं प्रवृत इदानीं किं मम कर्तुमुचितन्तु ।**
**परहस्तं संप्राप्ता तावत्प्रिया मम पश्यतः ॥ २२६ ॥**

**देवतावचनाशायां नैवोपायोऽपि चिन्तितः कोऽपि ।**
**इदानीं पुन-र्न शक्यं किमपि उपायान्तरं कर्तुम् ॥ २२७ ॥**

---

१. अवरण्हं=अपराह्णम्, २. रणरणः=उद्वेगः । ३. धिइं=धृतिम् । ४. निस्सृतः । ५. सच्चविया=दृष्टा । ६. प्रिया । ७. पश्यतः । ८. अन्य उपाय उपायान्तरम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एसोवि हु अणुरागो एवंपि गेए[1] न तुट्टए कहवि ।
पइसमयं च पवड्ढइ संतावो विरहसंजणिओ ॥ २२८ ॥

अविय । दुल्लहलंभम्मि जणे जस्सिह पुरिसस्स होइ अणुरागो ।
छिल्लरयपाणिएणव[2] अणुदियहं तेण सुसियव्वं ॥ २२९ ॥

गरुयपियसंगमासाभंससमुच्छलियरणरणाइन्नं[3] ।
न य जाणे कहव इमं नियहिययं संठवामित्ति ? ॥ २३० ॥

ता किं करेमिं इण्हिं अहवा किं एत्थ बहुविगप्पेहिं ।
गुरुविरहदुक्खसमणो पाणच्चाओ परं जुत्तो ॥ २३१ ॥

जइवि न जुज्जइ एसो विवेयजुत्ताण उत्तमनराण ।
तीए विरहे तहवि हु सक्केमि न जीवियं धरिउं ॥ २३२ ॥

ता एत्थेव तरुवरे तीए अंदोलणेण सुपवित्ते[4] ।
उब्बंधिय[5] अप्पाणं पाणच्चायं करेमित्ति ॥ २३३ ॥

---

**एषोऽपि खल्वनुराग एवमपि गते न त्रुट्यते कथमपि ।**
**प्रतिसमयं च प्रवर्धते सन्तापो विरहसञ्जनितः ॥ २२८ ॥**

**अपि च । दुर्लभलम्भे जने यस्येह पुरुषस्य भवत्यनुरागः ।**
**पल्वलपानीयेनेवानुदिवसं तेन शोष्टव्यम् ॥ २२९ ।**

**गुरुकप्रियसङ्गमाशाभ्रंशसमुच्छलितरणरणाकीर्णम् ।**
**न च जानामि कथं वा इदं निजहृदयं संस्थापयामीति ? ॥ २३० ॥**

**तस्मात्किं करोमि इदानीं अथवा किमत्र बहुविकल्पैः ।**
**गुरुविरहदुःखशमनः प्राणत्यागः परं युक्तः ॥ २३१ ॥**

**यद्यपि न युज्यते एषो विवेकयुक्तानामुत्तमनराणाम् ।**
**तस्या विरहे तथाऽपि खलु शक्नोमि न जीवितं धर्तुम् ॥ २३२ ॥**

**तस्मादत्रैव तरुवरे तस्याः अंदोलनेन सुपवित्रे ।**
**उद्बध्यात्मानं प्राणत्यागं करोमीति ॥ २३३ ॥**

१. गते=संजाते । २. छिल्लरयं=पल्वलं=लघु तटाकं तस्य पानीयेनेवानुदिवसं शोष्टव्यम्, अल्पत्वात् तच्छीघ्रं शुष्यतीत्यर्थः । ३. रणरणः=औत्सुक्यम् । ४. सुपवित्रे । ५. उद्बद्ध्य= गले पासं बद्ध्वा ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं विचिंतिऊणं आरुढो तम्मि तरुवरे अहयं ।
दाउं गलए पासं अह एवं भणिउमाढत्तो ॥ २३४ ॥

रे दिव्व[1]! अन्नजन्मे दुल्लहलंभम्मि माणसे नेहं ।
मा मह करिज्ज एसा हु पत्थणा तुह मए विहिया ॥ २३५॥

अन्नं च। केवलिणो तं वयणं, सा वाया देव्विया[2], तं सुविणं ।
आसानिबंधणं मज्झ दिव्व! सव्वं कयं अलियं ॥ २३६ ॥

एवं भणिऊण मए मुक्को अप्पा अहोमुहो झत्ति ।
ताहे गाढीभूए पासम्मि सरीरभारेण ॥ २३७ ॥

रूद्धं गलयं आकुंचियाओ धमणीओ पसरिया वियणा ।
भग्गं लोयणजुयलं रुद्धो पवणस्स संचारो ॥ २३८ ॥

उव्वेल्लियमंगेहिं जायं उदरं च पवणपडिहत्थं[3] ।
[4]करणाइं घाइयाइं जाया अह वेयणा मंदा ॥ २३९ ॥

---

**एवं विचिन्त्याऽऽरुढस्तस्मिन् तरुवरेऽहकम् ।
दत्त्वा गलके पाशमथैवं भणितुमारब्धः ॥ २३४ ॥**

**रे दैव ! अन्यजन्मनि दुर्लभलम्भे मानसे स्नेहम् ।
मा मम कुर्यात् एषा खलु प्रार्थना तव मया विहिता ॥ २३५॥**

**अन्यच्च । केवलिनस्तं वचनं सा वाग् दैविका तं स्वप्नम् ।
आशानिबन्धनं मम दैव ! सर्वं कृतमलिकम् ॥ २३६ ॥**

**एवं भणित्वा मया मुक्तोऽऽत्माऽधोमुखो झटिति ।
तदा गाढीभूते पाशे शरीरभारेण ॥ २३७ ॥**

**रुद्धं गलकं आकुञ्चिता धमनयःप्रसृता वेदना ।
भग्नं लोचनयुगलं रुद्धः पवनस्य सञ्चारः ॥ २३८ ॥**

**उद्वेलितमङ्गैः जातमुदरं च पवनपूर्णम् ।
करणानि घातितानि जाता अथ वेदना मन्दा ॥ २३९ ॥**

---

१. दैव! देव । २. देवसंबन्धिनी दैवी,स्वार्थिके के दैविका वाचा । ३. पडिहत्थं=पूर्णम्। ४. करणानि=इन्द्रियाणि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भो सुप्पइट्ठ! एवं वियणापरिमंदइंदिएण मए ।
एत्थंतरम्मि निसुओ सद्दो [1]अपणट्ठचित्तेण ॥ २४० ॥

मा साहस मा साहसमेयं [2]काउरिसजण[3]समाइण्णं।
[4]आयरिय देवदुल्लहनियरुवं भद्द! नासेसु ॥२४१॥

एत्थंतरम्मि केणवि लंबंतं उक्खिवित्तु मह देहं।
लहु च्छिंदिऊण पासं विहिओ मिउसीयलो पवणो ॥२४२॥

तत्तो तुसारसीयलसारणिनीरच्छडाहिं संसित्तो ।
[5]उल्हासिऊण हिययं अंगं [6]संवाहियं सव्वं ॥२४३॥

मुच्छानिमीलियच्छो सव्वं सुविणंव तं विमन्नंतो ।
कोमलकिसलयरइए सत्थरए सोविओ तेण ॥ २४४॥

पुणरुत्तपवणकरणाइयाहिं नाणाविहाहिं चिट्ठाहिं ।
गयवेयणेण तत्तो खणंतरा चेयणा लद्धा ॥ २४५ ॥

---

भोः सुप्रतिष्ठ ! एवं वेदनापरिमन्देन्द्रियेन मया ।
अत्रान्तरे निश्रुतः शब्दोऽप्रनष्टचितेन ॥ २४० ॥

मा साहस मा साहसमेतद् कापुरुषजनसमाचीर्णम् ।
आचर्य देवदुर्लभनिजरूपं भद्र ! नश्यसे ॥ २४१ ॥

अत्रान्तरे केनाऽपि लम्बन्तं उत्क्षिप्य मम देहं ।
लघु छिन्दित्वा पाशं विहितो मृदुशीतलः पवनः ॥ २४२ ॥

ततस्तुषारशीतलसारणिनीरच्छटाभिः संसिक्तः ।
अवस्त्रंस्य हृदयं अङ्गं संवाहितं सर्वम् ॥ २४३ ॥

मूर्च्छानिमिलीताक्षः सर्वं स्वप्नमिव तं विमन्यमानः ।
कोमलकिशलयरचिते स्त्रस्तरे शायितस्तेन ॥ २४४ ॥

पुनरुक्तपवनकरणादिकाभिर्नानाविधाभिश्चेष्टाभिः ।
गतवेदनेन ततः क्षणान्तरात् चेतना लब्धा ॥ २४५ ॥

---

१. अप्रनष्टचित्तेन। २. काउरिसो=कापुरुषः। ३. समाचीर्णम्=समाचरितम् । ४. आचर्य।
५. उल्हासिउण=अवस्त्रंस्य। ६. संवाहितं=मर्दितम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उम्मीलियलोयणजुयलएण दिट्ठो विसिट्ठसंठाणो ।
नवजोव्वणो जुंवाणो[1] पच्चक्खं पंचबाणोव्व ॥ २४६ ॥

भणियं च तेण किं भद्द! बाहए,[2] दंसियं[3] मए गलयं ।
अह संवाहणविहिणा तंपि हु सत्थं कयं तेण ॥ २४७ ॥

विगयसयलपीडो सत्थदेहो तया हं, किसलयरइयम्मी सत्थरे[4] संनिविट्ठो ।
विरहविहुरियंगो दीहनीसासखिन्नो अहिलसियपय-त्थाऽसाहणुव्विन्नचित्तो[5] ॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि परिसमप्पइ पासगपरिमोयणोत्ति नामेण।
सुरसुंदरिनामाए कहाए तुरिओ परिच्छेओ ॥ २५० ॥ १०००

---

**उन्मीलितलोचनयुगलकेन दृष्टो विशिष्टसंस्थानः ।**
**नवयौवनो युवा प्रत्यक्षं पञ्चबाण इव ॥ २४६ ॥**

**भणितञ्च तेन किं भद्र ! बाधते दर्शितं मया गलकम् ।**
**अथ संबाहनविधिना तमपि खलु स्वस्थं कृतं तेन ॥ २४७ ॥**

**विगतसकलपीडः स्वस्थदेहस्तदाऽहं,**
**किशलयरचितेस्त्रस्तरे संनिविष्टः ।**

**विरहविधुरिताङ्गो दीर्घनिश्वासखिन्नोऽ-**
**भिलषितपदार्थऽसाधनोद्विग्नचेतः ॥ २४८ ॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽपि परिसमाप्यते पाशकपरिमोचन इति नाम्ना ।**
**सुरसुन्दरिनाम्न्याः कथायाः तुर्यः परिच्छेदः ॥ २५० ॥ १०००॥**

**॥ चतुर्थः परिच्छेदः समाप्तः ॥**

---

१. युवा । २. बाधते । ३. 'ततः=तत्प्रश्नानन्तरं' इति शेषः । ४. स्त्रस्तरः=शय्या ।
५. उव्विन्नं=उद्विग्नम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चमः परिच्छेदः

अह सो दठ्ठूण ममं विद्दाणमुहं गलंतनयणिल्लं ।
करयलनिमियं[1]कवोलं एवं भणिउं समाढत्तो ॥ १ ॥

सुंदर ! तुह सरिसाणं उत्तमपुरिसाण जुज्जइ न काउं ।
अहमजणसमाइन्नो अप्पवहो[2] कुगइसंजणणो ॥ २ ॥

अन्नं च । को सि तुमं कस्स कओ केण व कज्जेण एयमायरियं ? ।
कीस ससोगो सुंदर ! अविरलथूलंसुऐ[3] मुयसि ?॥ ३ ॥

दीहं नीससिऊणं तत्तो य मए तया इमं भणियं ।
किं कहियाए इमाए विहलाए सुयणु ! वत्ताए ? ॥ ४ ॥

कहिएण जेण लब्भइ कोवि गुणो, तमिह साहिउं जुत्तं ।
अन्नह पुण तुसखंडणसरिसेणं किं नु कहिएणं ? ॥ ५ ॥

---

**अथ स दृष्ट्वा माम् विद्राणमुखं गलन्नयनवन्तम् ।**
**करतलन्यस्तकपोलमेवं भणितुं समारब्धः ॥ १ ॥**

**सुन्दर ! तव सदृशानामुत्तमपुरुषाणां युज्यते न कर्तुम् ।**
**अधमजनसमाचीर्ण आत्मवधः कुगतिसञ्जननः ॥ २ ॥**

**अन्यच्च । कोऽसि त्वं कस्य कुतः केन वा कार्येण एतदाचरितं ? ।**
**कस्मात् सशोकः सुन्दर ! अविरलस्थूलाश्रूणि मुञ्चसि ? ॥ ३ ॥**

**दीर्घनिश्वस्य ततश्च मया तदेदं भणितम् ।**
**किं कथितयाऽनया विफलया सुतनो ! वार्तया ॥ ४ ॥**

**कथितेन येन लभ्यते कोऽपि गुणः तमिह कथयितुं युक्तम् ।**
**अन्यथा पुनस्तुषखण्डनसदृशेन किन्नु कथितेन ? ॥ ५ ॥**

---

१. निमियं=न्यस्तम्। २. आत्मवधः=आत्महत्या। ३. अविरलानि बहूनि च तानि स्थूलाश्रूणि।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविय । [1]वोलीणपायकज्जे साहारो कोवि नत्थि कहिएण ।
गयपाणियम्मि पालीइ बंधणं कं गुणं लहउ ? ॥ ६ ॥

दुस्सहदुक्खसमुच्छेयणम्मि उज्जुत्तमाणसस्स तुमे ।
कीस कयं मह विग्धं पाणच्चायं करेंतस्स ? ॥ ७ ॥

ता मा काहिसि इण्हिंपि मज्झ विग्घंति, ताहि सो भणइ ।
मा भद्द ! कुणसु एवं साहसु मह कारण ताव ॥ ८ ॥

विन्नायम्मि सरूवे जेण उवाओवि लब्भए कोवि ।
तत्तो य मए कहिया नीसेसा पुव्ववत्ता से ॥ ९ ॥

[2]उल्लंबणअवसाणा तं सोउं सुप्पइट्ठ ! तेणाहं ।
भणिओ जुवईए कए न हु जुत्तं उत्तमनराण ॥ १० ॥

एरिसमायरिउं भो ! विसेसओ तुम्ह नीइकुसलाण ।
जीवंता जेण नरा कल्लाणपरं परमुविंति[3] ॥ ११ ॥

---

अपिच । अतिक्रान्तप्रायकार्ये साधारः कोऽपि नास्ति कथितेन ।
गतपानीये पाल्या बन्धनं कं गुणं लभताम् ? ॥ ६ ॥

दुस्सहदुःखसमुच्छेदन उद्युक्तमानसस्य त्वया ।
कस्मात् कृतं मम विघ्नं प्राणत्यागं कुर्वतः ? ॥ ७ ॥

तस्मात्मा करिष्यसि इदानीमपि मम विघ्नमिति तदा स भणति ।
मा भद्र ! कुरु एवं कथय मम कारणं तावत् ॥ ८ ॥

विज्ञाते स्वरूपे येनोपायोऽपि लभ्यते कोऽपि ।
ततश्च मया कथिता निशेषा पूर्ववार्ता तस्य ॥ ९ ॥

उल्लम्बनावसाना तच्छ्रुत्वा सुप्रतिष्ठ ! तेनाऽहं ! ।
भणितो युवत्याः कृते न खलु युक्तमुत्तमनराणाम् ॥ १० ॥

ईदृशमाचरितुं भोः ! विशेषतो युष्माकं नीतिकुशलानां ।
जीवन्तो येन नराःकल्याणपरंपरामुपयन्ति ॥ ११ ॥

---

१. अतिक्रान्तप्रायकार्ये । २. उल्लम्बनम्=उद्बन्धनम् । ३. उविंति=उपयन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च । धन्नो सि तुमं जस्सत्थि ताव अन्नोन्नवयणसंचारो ।
तह देवयाए वयणं आसाए निबंधणं अत्थि ॥ १२ ॥

तह एगनगरवासो अवरोप्परभावजणणसंगब्भो ।
ता कीस कुणसि सोयं, धन्नो तं पुन्नवंतो य ॥ १३ ॥

मह पुण पुन्नविहूणस्स[1] कहवि तद्दंसणम्मि जा आसा ।
[2]तीएवि हु दालिद्दं तहवि हु धारेमि नियपाणे ॥ १४ ॥

कित्तियमित्तं दुक्खं होंतं[3] वयणक्कमम्मि तुह भद्द !? ।
जं मह मणदइयाए ठाणाइं [4]अयाणमाणस्स ॥ १५ ॥

तत्तो य मए भणियं साहसु मह ताव नियवुत्तंतं ।
ठाणंपि नेय जाणसि कह णु तुमं नियदइयाए ? ॥ १६ ॥

कम्मि पुरे तुह वासो केणव कज्जेण आगओ एत्थ ? ।
तत्तो य तेण भणियं एगमणो भो ! निसामेहि ॥ १७ ॥

---

**किञ्च । धन्योऽसि त्वं यस्यास्ति तावदन्योन्यवचनसञ्चारः ।**
**तथा देवताया वचनमाशया निबन्धनमस्ति ॥ १२ ॥**

**तथा एकनगरवासो परस्परभावजननसङ्गर्भः ।**
**तस्मात् कस्मात् करोषि शोकं धन्यस्त्वं पुन्यवांश्च ॥ १३ ॥**

**मम पुनः पुन्यविहीनस्य कथमपि तद्दर्शने याऽऽशा ।**
**तस्या अपि खलु दारिद्यम् तथाऽपि हु धारयामि निजप्राणान् ॥१४॥**

**कियन्मात्रं दुःखं भवति वचनक्रमे तव भद्र ? ।**
**यत्मम मनोदयितायाः स्थानान्यजानतः ॥ १५ ॥**

**ततश्च मया भणितं कथय मम तावत् निजकवृतान्तम् ।**
**स्थानमपि नैवं जानासि कथन्नु त्वं निजदयितायाः ? ॥ १६ ॥**

**कस्मिन् पुरे तव वासः केन वा कार्येणऽऽगतोऽत्र ? ।**
**ततश्च तेन भणितं एकमना भो निशाम्य ॥ १७ ॥**

१. विहूणं=विहीनम् । २. तस्याः प्रियादर्शनस्याशाया अपि दारिद्यम्=अभाव इत्यर्थः ।
३. भवति =विद्यमाने । ४. अजानतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थेव अत्थि सेले बहुविज्जाहरपुरोहपरिकलिए ।
सुविभत्ततिय[1]चउक्कं नाणाउज्जाणरमणीयं ॥ १८ ॥

सुविसालसालकलियं सक्कंदणपुरवरस्स सारिच्छं ।
उत्तरसेढीए पुरं पवरं सुरनंदणं नाम ॥ १९ ॥ युग्मम् ॥

साहीणसयलविज्जो विज्जाहरनियरपणयपयकमलो ।
कमलदलतुल्लनयणो नयणमणाणंदणो सूरो[2] ॥ २० ॥

सूरोव्व निहयतेयस्सितेयनिवहो अखंडियपयावो ।
दप्पिट्ठवइरिवारणनिवारणे सीहपोय[3]समो ॥ २१ ॥

विज्जाहराण राया सुपसिद्धो चेव सव्वखयराण ।
पसरंतविमलकित्ती आसी हरिचंदनामोत्ति ॥ २२ ॥ तिसृभिः कुलकम् ॥

सरसिरुहसरिसवयणा नीलुप्पलदलविसालवरनयणा ।
कमलोयररुइ[4]देहा रयणवई नाम से महिला ॥ २३ ॥

---

**अत्रैवास्ति शैले बहुविद्याधरपुरौघपरिकलिते ।**
**सुविभक्तत्रिकचतुष्कं नानोद्यानरमणीयम् ॥ १८ ॥**

**सुविशालशालकलितं सक्रन्दनपुरवरस्य सदृशं ।**
**उत्तरश्रेण्यां पुरं प्रवरं सुरनन्दनं नाम ॥ १९ ॥ युग्मम् ॥**

**स्वाधीनसकलविद्यो विद्याधरनिकरप्रणतपदकमलः ।**
**कमलदलतुल्यनयनो नयनमनानन्दनः शूरः ॥ २० ॥**

**सूरवत् निहततेजस्वितेजनिवहोऽखण्डितप्रतापः ।**
**दर्पिष्टवैरिवारणनिवारणे सिंहपोतसमः ॥ २१ ॥**

**विद्याधराणां राजा सुप्रसिद्धश्चैव सर्वखेचराणाम् ।**
**प्रसरत्विमलकीर्तिरासीत् हरिचन्द्रनामेति ॥ २२ ॥ तिसृभिः कुलकम् ॥**

**सरसिरुहसदृशवदना नीलोत्पलदलविशालवरनयना ।**
**कमलोदररुचिदेहा रत्नवती नाम्नी तस्य महिला ॥ २३ ॥**

---

१. त्रिकम् =मार्गत्रयसंयोगः । २. शूरः । ३. पोतः=बालकः । ४. रुचिःकान्तिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयलोरोहपहाणाए तीए पाणप्पियाए देवीए ।
समयं तिवग्गसारं विसयसुहं अणुहवंतस्स ॥ २४ ॥

देवकुमारसरिच्छो अह तीए दारओ समुप्पन्नो ।
उचियसमए य तेहिं पहंजणो नाम से विहियं ॥ २५ ॥

धूया य बंधुसुंदरिनामा असमाणरुवलावन्ना।
दोन्निवि ताई कमसो पत्ताइं जोव्वणं पढमं ॥ २६ ॥

अह अन्नया कयाइवि अवरोप्परनेहगरुयभावाणं।
एगंतम्मि ठियाणं उल्लावो तेसिं संजाओ ॥ २७ ॥

भणियं पहंजणेणं पढमं तुह होइ किंचिजमवच्चं[1] ।
धूया वा तणओ वा तं मह तणयस्स दायव्वं ॥ २८ ॥

अविय। तुज्झ महं वा जं होज्ज किंपि इह पढमगं तु डिंभरुयं ।
अवरोप्परसंबंधो ताणं अम्हेहिं कायव्वो ॥ २९ ॥

---

सकलावरोधप्रधानया तया प्राणप्रियया देव्या ।
समकं त्रिवर्गसारं विषयसुख-मनुभवतः ॥ २४ ॥

देवकुमारसदृशोऽथ तयो-र्दारकः समुत्पन्नः ।
उचितसमये च ताभ्यां प्रभंजनो नाम तस्य विहितम् ॥ २५ ॥

दुहिता च बन्धुसुन्दरीनाम्न्यसमानरूपलावण्या ।
द्वावपि तौ क्रमशः प्राप्तौ यौवनं प्रथमम् ॥ २६ ॥

अथान्यदा कदाचिदपि परस्परस्नेहगुरुकभावयोः ।
एकान्ते स्थितयोः उल्लापस्तयोः सञ्जातः ॥ २७ ॥

भणितं प्रभञ्जनेन प्रथमं तव भवति किञ्चिद् यदपत्यम् ।
दुहिता वा तनयो वा तं मम तनयस्य दातव्यम् ॥ २८ ॥ अपि च ।

तव मम वा यद्भवेत् किमपि इह प्रथमकन्तु डिम्भरुकम् ।
परस्परसम्बन्धस्तयो-रावाभ्यां कर्तव्यः ॥ २९ ॥

---

१. अवच्चं=अपत्यम् ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

ता बंधुसुंदरीए तहत्ति बहु मन्निियं[1] तयं वयणं ।
गरुयसहोयरसब्भावनेहअक्खित्तचित्ताए ॥ ३० ॥

एत्तो य अत्थिनयरं वेयड्ढे उत्तराए सेढीए ।
सव्वोउय[2]तरुवणसंडमंडियं चमरचंचंति ॥ ३१ ॥

तत्थ य खयरनरीसो[3] भाणुगइ नाम अतुल्लसामत्थो।
निज्जियअणंगरुवो कामिणिजणमाणसाणंदो ॥ ३२ ॥

हरिचंदखयरपवरेण नियसुया बंधुसुंदरी तस्स ।
दिन्ना वरपीईए विवाहिआ सायरं तेण ॥ ३३ ॥

तीइ सुतणूइ समयं अणुहवमाणो उ गरुयपीईए ।
पंचपयारे विसए भाणुगई भुंजइ[4] रज्जं ॥ ३४॥

वच्चंतेसु दिणेसुं तीए देवीए दारिया जाया।
उज्जोइयदिसिवलया उ चित्तलेहत्ति नामेण ॥ ३५॥

---

तस्मात् बन्धुसुन्दर्या तथेति बहुमतम् तद् वचनम् ।
गुरुकसहोदरसद्भावस्नेहाक्षिप्तचित्तया ॥ ३० ॥

इतश्चास्ति नगरं वैताढ्ये उत्तरायां श्रेण्यां
सर्वर्तुकतरुवनखण्डमण्डितं चमरचञ्चमिति ॥ ३१ ॥

तत्र च खेचरनरेशो भानुगतिर्नामाऽतुलसामर्थ्यः ।
निर्जितानङ्गरूपः कामिनीजनमानसानन्दः ॥ ३२ ॥

हरिचन्द्रखेचरप्रवरेण निजसुता बन्धुसुन्दरी तस्य ।
दत्ता वरप्रीत्या विवाहिता सादरं तेन ॥ ३३ ॥

तया सुतन्वा सममनुभवन् तु गुरुकप्रीत्या ।
पञ्चप्रकारान् विषयान् भानुगति-र्भुनक्ति राज्यम् ॥ ३४ ॥

व्रजत्सु दिनेषु तस्या देव्या दारिका जाता ।
उद्योतितदिग्वलया तु चित्रलेखेति नाम्ना ॥ ३५ ॥

---

१. मतम् । २. सव्वोउया=सर्वर्तुकाः । ३. नरीसो=नरेशः । ४. भुनक्ति=पालयति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयणंतरं च देवी सुंदरसुविणेहिं सूइय तणयं ।
सूया[1] सुहतिहिरिक्खे[2] चित्तगइ नाम से विहियं ॥ ३६ ॥

हरिचंदोवि हु राया चारणसमणस्स सुमुहनामस्स ।
पयमूले सोऊणं जिणधम्मं सिद्धिसुहहेउं ॥ ३७ ॥

नियपए ठविऊणं पहंजणं नियसुयं विणिक्खंतो[3] ।
संसारवासभीओ निव्विन्नो[4] कामभोगाण[5] ॥ ३८ ॥ यूग्मम् ।

सामन्नं काऊणं पयमूले चारणस्स सुमुहस्स ।
निट्ठवियकम्मजालो[6], अंतगडो[7] केवली जाओ ॥ ३९ ॥

जो पहंजणोवि हु विज्जाहरनरवई पयाविल्लो[8] ।
भुंजइ जणयविइण्णं[9] रज्जं गयसयलआसंको[10] ॥ ४० ॥

तस्स य सयलंतेउरपवराओ दुन्नि अग्गमहिसीओ[11] ।
कलहंसी मंजूसा उत्तमवंसप्पसूयाओ ॥ ४१ ॥

---

**तदनन्तरं च देवी सुन्दरस्वप्नैः सूचितं तनयम् ।**
**सूता शुभतिथिऋक्षे चित्रगति-र्नाम तस्य विहितम् ॥ ३६ ॥**

**हरिचन्द्रोऽपि राजा चारणश्रमणस्य सुमुखनाम्नः ।**
**पादमूले श्रुत्वा जिनधर्मं सिद्धिसुखहेतुम् ॥ ३७ ॥**

**निजकपदे स्थापयित्वा प्रभञ्जनं निजसुतं विनिष्क्रान्तः ।**
**संसारवासभीतो निर्विण्णः कामभोगेभ्यः ॥ ३८ ॥ युग्मम् ॥**

**श्रामण्यं कृत्वा पादमूले चारणस्य सुमुखस्य ।**
**निष्ठापितकर्मजालोऽन्तकृत् केवली जातः ॥ ३९ ॥**

**जातः प्रभञ्जनोऽपि खलु विद्याधरनरपतिः प्रतापवान् ।**
**भुनक्ति जनकवितीर्णं राज्यं गतसकलऽऽशङ्कः ॥ ४० ॥**

**तस्य च सकलान्तःपुरप्रवरे द्वेऽग्रमहिष्यौ ।**
**कलहंसी मञ्जूषा उत्तमवंशप्रसूत्ते ॥ ४१ ॥**

---

१. सूता=जनितवती । २. रिक्खं=ऋक्षं=नक्षत्रम् । ३. विनिष्क्रान्तः=प्रव्रजितः । ४. निर्विण्णः=खिन्नः । ५. कामभोगेभ्यः । ६. निष्ठापितं=नाशितम् । ७. अन्तकृत् । ८. पयाविल्लो=प्रतापवान् । ९. जनकवितीर्णम् । १०. -सकलआशंकः । ११. अग्रमहिषी=पट्टराज्ञी ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलहंसीए जाओ पुत्तो जलणप्पहोत्ति नामेण ।
मंजूसाए लहुओ पुत्तो कणगप्पहो नामो ॥ ४२ ॥

नियसहोयरवयणं सुमरंती[1] बंधुसुंदरी देवी ।
नाऊण चित्तलेहं नियधूयं जोव्वणं पत्तं ॥ ४३ ॥

अह तं भाउयवयणं साहइ दइयस्स भाणुगइणो सा ।
तत्तो य भाणुगइणा नियधूया चित्तलेहा सा ॥ ४४ ॥

दिन्ना खयरपहंजणसुयस्स जेट्ठस्स रूवजुतस्स ।
जलणपहस्स, तेणवि परिणीया परमपीईए ॥ ४५ ॥ युग्मम् ॥

सुरनंदणम्मि नयरे नीया अह तीए नेहसहियाए ।
सह विसए भुंजंतो चिट्ठइ देवोव्व [2]दियलोए ॥ ४६ ॥

अह अन्नया कयाइवि खयराहिवई पहंजणो दट्ठुं ।
गयणे ससंकधवलं देवउलगोरयं गेहं ॥ ४७ ॥

---

**कलहंस्या जातः पुत्रो ज्वलनप्रभ इति नाम्ना ।**
**मञ्जूषाया लघुकः पुत्रः कनकप्रभो नामा ॥ ४२ ॥**

**निजकसहोदरवचनं स्मरन्ती बन्धुसुन्दरी देवी ।**
**ज्ञात्वा चित्रलेखां निजदुहितां यौवनं प्राप्तां ॥ ४३ ॥**

**अथ तं भातृकवचनं कथयति दयितस्य भानुगतेः सा ।**
**ततश्च भानुगतिना निजदुहिता चित्रलेखा सा ॥ ४४ ॥**

**दत्ता खेचरप्रभञ्जनसुतस्य ज्येष्ठस्य रूपयुक्तस्य ।**
**ज्वलनप्रभस्य तेनाऽपि परिणीता परमप्रीत्या ॥ ४५ ॥ युग्मम् ॥**

**सुरनंदने नगरे नीता अथ तया स्नेहसहितया ।**
**सह विषयान् भुञ्जानः तिष्ठति देववत् द्युलोके ॥ ४६ ॥**

**अथान्यदा कदाचिदपिखेचराधिपतिः प्रभञ्जनो दृष्ट्वा ।**
**गगने शशाङ्कधवलं देवकुलगौरकं गृहम् ॥ ४७ ॥**

१. स्मरन्ती । २. द्युलोके ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह चिंतिउं पयत्तो मणोहरो हंदि ! एस [1]आगारो ।
[2]एयागिईए ता हं कारेमि जिणालयं रम्मं ॥ ४८ ॥

मणिकुट्टिमम्मि तत्तो आलिहिउं [3]उज्जओ जया राया ।
ताव य झत्ति विलीणो पवणहओ जलहरो सव्वो ॥ ४९ ॥

दट्ठूण तं विलीणं खणेण राया विचिंतए एवं ।
एवंविहा नराणं लच्छीओ चवलरूवाओ ॥ ५० ॥

जह एसो अब्भलवो खणेण दिट्ठो पुणो पणट्ठोत्ति ।
तह सव्वेवि पयत्था खणमित्ताणंदसंजणणा ॥ ५१ ॥

रूवं च जीवियं जोव्वणं च सव्वेवि बंधुसंबंधा ।
एवमणिच्चा [4]अव्वो ! [5]धिरत्थु संसारवासस्स ॥ ५२ ॥

पच्चक्खं हि अणिच्चं नाऊणवि जं थिरंव मन्नंति ।
विसयाऽऽसत्ता [6]सत्ता, एयं अविवेयसामत्थं ॥ ५३ ॥

---

**अथ चिन्तितुं प्रवृत्तो मनोहरो हन्दि ! एष आगारम्: ।**
**एतदाकृत्या तस्मादहं कारयामि जिनालयं रम्यम् ॥ ४८ ॥**

**मणिकुट्टिमे तत आलेखितुमुद्यतो यदा राजा ।**
**तावच्च झटिति विलीनः पवनहतो जलधरस्सर्वः ॥ ४९ ॥**

**दृष्ट्वा तं विलीनं क्षणेण राजा विचिन्तयत्येवम् ।**
**एवंविधा नराणां लक्ष्म्यश्चपलरूपाः ॥ ५० ॥**

**यथैषोऽभ्रलवः क्षणेन दृष्टः पुनःप्रनष्ट इति ।**
**तथा सर्वेऽपि पदार्था क्षणमात्रानन्दसञ्जननाः ॥ ५१ ॥**

**रूपं च जीवितं यौवनं च सर्वेऽपि बन्धुसम्बन्धाः ।**
**एवमनित्या अहो ! धिगस्तु संसारवासस्य ॥ ५२ ॥**

**प्रत्यक्षं हि अनित्यं ज्ञात्वाऽपि यद् स्थिरमिव मन्यन्ते ।**
**विषयाऽऽसक्ताःसत्त्वा एतदविवेकसामर्थ्यम् ॥ ५३ ॥**

---

१. आगारं=गृहम्, प्राकृतत्वाल्लिङ्गव्यत्ययेन पुंस्त्वम् । २. एतदाकृत्या । ३. उद्यतः । ४. खेदार्थेऽत्राव्ययमिदम् । ५. धिगस्तु । ६. सत्त्वाः=प्राणिनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाऊणवि जिणवयणं आरंभपरिग्गहेसु वट्टंति ।
कामासत्ता जं पुण अहो ! महामोहमाहप्पं ॥ ५४ ॥

ताऽलं मम रज्जेणं संसारनिवासहेउभूएण ।
जाणिय[1]जिणिंदवयणस्स हंदि ! गुरुदुक्खमूलेण ॥ ५५ ॥

ता सावज्जं वज्जिय पव्वज्जा[2]उज्जमं करेमि लहुं ।
किं मह इमिणा दुग्गइनिबंधणासाररज्जेण ? ॥ ५६ ॥

अन्नं च मज्झ वंसे रज्जं दाऊण निययपुत्ताण ।
बहवे कयसामन्ना रायाणो पाविया सुगइं ॥ ५७ ॥

तव्वंसपसूएण मएवि कायव्वयं इमं तम्हा ।
इय चिंतिऊण राया संसइ[3] संनिहियखयराणं ॥ ५८ ॥

एत्थंतरे सुघोसो चउनाणी चारणो मुणी तत्थ ।
विरहंतो संपत्तो भवियाण विबोहणट्ठाए ॥ ५९ ॥

---

ज्ञात्वाऽपि जिनवचनमारम्भपरिग्रहेषु वर्तन्ते ।
कामासक्ता यत् पुनरहो ! महामोहमाहात्म्यम् ॥ ५४ ॥

तस्मादलं मम राज्येन संसारनिवासहेतुभूतेन ।
ज्ञातजिनेन्द्रवचनस्य हन्दि ! गुरुदुःखमूलेन ॥ ५५ ॥

तस्मात् सावद्यं वर्जयित्वा प्रव्रज्योद्यमं करोमि लघु ।
किं ममाऽनेन दुर्गतिनिबन्धनासारराज्येन ? ॥ ५६ ॥

अन्यच्च मम वंशे राज्यं दत्त्वा निजपुत्रेभ्यः ।
बहवः कृतश्रामण्या राजानः प्राप्ताः सुगतिम् ॥ ५७ ॥

तद्वंशप्रसूतेन मयाऽपि कर्तव्यमिमं तस्मात् ।
इति चिन्तयित्वा राजा शंसति संनिहितखेचराणाम् ॥ ५८ ॥

अत्रान्तरे सुघोषश्चतुर्ज्ञानी चारणो मुनिस्तत्र ।
विहरन् संप्राप्तो भविकानां विबोधनार्थे ॥ ५९ ॥

---

१. जाणियं=ज्ञातम् । २. प्रव्रज्या=दीक्षा । ३. शंसति=कथयति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

राया पहंजणो अह सुयस्स जलणप्पहस्स अह रज्जं ।
दाऊण तहा कणगप्पहस्स पन्नत्तिवरविज्जं ॥ ६० ॥

तत्तो य विणिक्खंतो सुघोससाहुस्स पायमूलम्मि ।
[1]अवहाय रायलच्छिं पहंजणो खयररायत्ति ॥ ६१ ॥

जलणप्पहोवि भुंजइ रायसिरिं खयरनियर[2]परिकिन्नो ।
सयलोरोहपहाणाइ चित्तलेहाइ समयंति ॥ ६२ ॥

कणगप्पहोवि [3]साहिय विज्जं पन्नत्तिनामियं विहिणा ।
विज्जापभावसंजायगरुयसामत्थवित्थारो ॥ ६३ ॥

उज्झिय नियवंसकमं [4]अणविक्खिय अयसपडहयं लोए ।
बहुमन्निय अविवेयं अवियारिय दोग्गइगमणं ॥ ६४ ॥

[5]अणवेक्खिय गुरुभावं अंगीकाऊण तह अदक्खिन्नं ।
रायसिरिलोलुएणं विज्जाबलदप्पभरिएण ॥ ६५ ॥

---

राजा प्रभञ्जनोऽथ सुतस्य ज्वलनप्रभस्याथ राज्यम् ।
दत्त्वा तथा कनकप्रभस्य प्रज्ञप्तिवरविद्याम् ॥ ६० ॥

ततश्चविनिष्क्रान्तः सुघोषसाधोः पादमूले ।
अपहाय राज्यलक्ष्मीं प्रभञ्जनः खेचरराजेति ॥ ६१ ॥

ज्वलनप्रभोऽपि भुनक्ति राज्यश्रियं खेचरनिकरपरिकीर्णः ।
सकलावरोधप्रधानया चित्रलेखया समकमिति ॥ ६२ ॥

कनकप्रभोऽपि साधयित्वा विद्यां प्रज्ञप्तिनाम्नीं विधिना ।
विद्याप्रभावसञ्जातगुरुकसामर्थ्यविस्तारः ॥ ६३ ॥

उज्झित्वा निजवंशक्रममनवेक्ष्य अयशःपटहकं लोके ।
बहुमतमविवेकमविचार्य दुर्गतिगमनम् ॥ ६४ ॥

अनवेक्ष्य गुरुभावमङ्गीकृत्य तथाऽदाक्षिण्यम् ।
राज्यश्रीलोलुपेन विद्याबलदर्पभृतेन ॥ ६५ ॥

१. अपहाय = त्यक्त्वा । २. नियरो = निकरः = समूहः । ३. साधयित्वा । ४. अनवेक्ष्य ।
५. अनवेक्ष्य ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जलणप्पहस्स जिट्ठस्स भाउणो पिउविदिन्नरज्जपयं ।
उद्दालियं तु कणगप्पहेण विज्जापभावाओ ॥ ६६ ॥ चतसृभिः कुलकम् ।

तत्तो अहिट्ठियं तं रज्जं सव्वंपि उग्गतेएण ।
[1]सामाइणा सव्वो वसीकओ खयरनि[2]उरंबो ॥ ६७ ॥

नीसारिओ स[3]भूमीओ ताहि जलणप्पहो कणिट्ठेण ।
नयरम्मि चमरचंचे समागओ ससुरपासम्मि ॥ ६८ ॥

बहुमाणपुव्वयं सो पवेसिओ नियपुरम्मि ससुरेण ।
भाणुगइराइणा अह समयं चिय चित्तलेहाए ॥ ६९ ॥

अह परमपमोएणं तहिं वसंतस्स सुरनयरम्मि ।
भो चित्तवेग ! तस्स उ वोलीणा वासरा कइवि ॥ ७० ॥

अह अन्नया कयाइवि जलणपहो सालएण संजुत्तो ।
चित्तगइनामएणं नीहरिओ ताओ नयराओ ॥ ७१ ॥

---

**ज्वलनप्रभस्य ज्येष्ठस्य भ्रातुः पितृविदत्तराज्यपदम् ।**
**उद्दाल्य तु कनकप्रभेन विद्याप्रभावात् ॥ ६६ ॥ चतसृभिः कुलकम् ॥**

**ततोऽधिष्ठितं तं राज्यं सर्वमपि उग्रतेजसा ।**
**सामादिना सर्वे वशीकृत खेचरनिकुरम्बः ॥ ६७ ॥**

**निःसार्य स्वभूमीतस्तदा ज्वलनप्रभः कनिष्ठेन ।**
**नगरे चमरचञ्चायां समागतः श्वसुरपार्श्वे ॥ ६८ ॥**

**बहुमानपूर्वकं सः प्रवेशितो निजपुरे श्वसुरेण ।**
**भानुगतिराज्ञाऽथ समकमेव चित्रलेखया ॥ ६९ ॥**

**अथ परमप्रमोदेन तत्र वसतः श्वसुरनगरे ।**
**भोः चित्रवेग ! तस्य तु अतिक्रान्तानि वासराणि कतिचिद् ॥ ७० ॥**

**अथान्यदा कदाचिदपि ज्वलनप्रभःशालकेन संयुक्तः ।**
**चित्रगतिनाम्ना निस्सृतस्तस्मान्नगरात् ॥ ७१ ॥**

---

१. सामादिना । २. निकुरम्बः=समूहः । ३. स्वभूमीतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेच्छंतो बहुविहउववणाइं रमणीयतरुसणाहाइं[1] ।
भारंडचक्कमंडियपसन्नजलदीहियानिवहं ॥ ७२ ॥

पसरियसियभासाइं[2] पेच्छंतो गिरिवरस्स सिहराइं ।
किन्नरमिहुणसुसंगकयलीहरविहियसोहम्मि ॥ ७३ ॥

अइकलकूइयकलयंठिलट्ठ[3]कोलाहलाभिरमणीए ।
परिभमिर[4]भमरनिउरंबगरुयझंकारमहुरम्मि ॥ ७४ ॥

एगम्मि वणनिगुंजे फलभरविणमंतदुमसयाइन्ने[5] ।
पत्तो सकोउगेणं समयं चिय चित्तगइणा उ ॥ ७५ ॥ चतुसृभिः कुलकम् ।

वायंतमउयमारुयहल्लंतसुपल्लवोहसोहिल्लं ।
पेच्छइ रत्तासोयं महुयरिगणविहियहलबोलं[6] ॥ ७६ ॥

तस्स य अहे निविट्ठो कंचणपउमम्मि मुणिवरो दिट्ठो ।
विज्जाहरनरकिन्नरसुरविसरेणं नमिज्जंतो ॥ ७७ ॥

---

**प्रेक्षमाणो बहुविधोपवनानि रमणीयतरुसनाथानि ।**
**भारण्डचक्रमण्डितप्रसन्नजलदीर्घिकानिवहं ॥ ७२ ॥**

**प्रसृतश्वेत ( सित )भासानि प्रेक्षमाणो गिरिवरस्य शिखराणि ।**
**किन्नरमिथुनसुसङ्गतकदलीगृहविहितशोभे ॥ ७३ ॥**

**अतिकलकूजितकलकण्ठिलष्टकोलाहलाभिरमणीये ।**
**परिभ्रमितृभ्रमरनिकुरम्बगुरुकझंकारमधुरे ॥ ७४ ॥**

**एकस्मिन् वननिकुञ्जे फलभरविनमद्रुमशताकीर्णे ।**
**प्राप्तः सकौतुकेन समकमेव चित्रगतिना तु ॥ ७५ ॥ चतसृभिः कुलकम् ॥**

**वाद्यन्तमृदुमरुत्धुन्वन् सुपल्लवौघशोभावन्तम् ।**
**प्रेक्षते रक्ताशोकं मधुकरिगणविहितकलकलम् ॥ ७६ ॥**

**तस्य चाधे निविष्टः कञ्चनपद्मे मुनिवरो दृष्टः ।**
**विद्याधरनरकिन्नरसुरविसरेण नम्यमानः ॥ ७७ ॥**

---

१. सनाथं=युक्तम् । २. प्रसृताः सिताः श्वेता भासो दीप्तयो येषां तानि । ३. लट्ठं=श्रेष्ठम् । ४. परिभ्रमन्ति तच्छीलाः=परिभमिरा । ५. आइन्नं=आकीर्णम्=व्याप्तम् । ६. हलबोलो=कलकलः ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

उप्पन्नविमलकेवलनाणो अह सुरवरेहिं थुव्वंतो[1] ।
आसन्ने उण जलणप्पहेण सो पच्चभिन्नाओ ॥ ७८ ॥

सो एसो मज्झ पिया पहंजणो नाम मुणिवरो एवं ।
सिट्ठम्मि चित्तगइणो तत्तो ते दोवि हरिसेण ॥ ७९ ॥

तिं[2] पइक्खिणिउं[3] सम्मं हरिसवसुट्ठंतबहलरोमंचा ।
पणमियकेवलिचलणा विणिविट्ठा धरणिवट्ठम्मि[4] ॥ ८० ॥ युग्मम् ॥

निज्जियसनीरजीमूयघोसगंभीरभारईए तओ ।
तीइ परिसाइ भयवं पारद्धो देसणं काउं ॥ ८१ ॥

अविय । गयकलहकन्नचवला लच्छी मणुयाणमाउमणिच्चं[5] ।
जोव्वणमवि मणुयाणं सहसत्ति जरा अभिद्दवइ ॥ ८२ ॥

रोगसयपीडियं तंपि जोव्वणं जाइ जीवलोगम्मि ।
इट्ठवियोगाऽणिट्ठप्पओगदुक्खेहिं[6] केसिंचि ॥ ८३ ॥

---

उत्पन्नविमलकेवलज्ञानाऽथ सुरवरैस्स्तूयमानः ।
आसन्ने पुनर्ज्वलनप्रभेन स प्रत्यभिज्ञातः ॥ ७८ ॥

स एष मम पिता प्रभञ्जनो नामा मुनिवर एवम् ।
शिष्टे चित्रगतेस्ततस्तौ द्वावपि हर्षेण ॥ ७९ ॥

त्रिः प्रदक्षिणीकृत्य सम्यक् हर्षवशोल्लसद्बहलरोमाञ्चौ ।
प्रणतकेवलीचरणौ विनिविष्टौ धरणिपृष्ठे ॥ ८० ॥ युग्मम् ॥

निर्जितसनीरजिमूतघोषगम्भीरभारत्या ततः ।
तस्यां पर्षदि भगवान् प्रारब्धो देशनां कर्तुम् ॥ ८१ ॥

अपि च । गजकलभकर्णचपला लक्ष्मी- मनुष्यानामायुरनित्यम् ।
यौवनमपि मनुष्यानां सहसेति जराऽभिद्रवति ॥ ८२ ॥

रोगशतपीडितं तमपि यौवनं याति जीवलोके ।
इष्टवियोगाऽनिष्टप्रयोगदुःखैः केषाञ्चित् ॥ ८३ ॥

---

१. स्तूयमानः । २. त्रिः । ३. प्रदक्षिणीकृत्य । ४. धरणिपृष्ठे । ५. आउयं=आयुष्कम् ।
६. प्रकर्षेण योगः प्रयोगः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अइपरिमियम्मि चवले रोगजरासोगवाहिपउरम्मि ।
जीवाण जोव्वणे एरिसम्मि को नाम पडिबंधो ? ॥ ८४ ॥

विसया कुगइनिमित्तं उवभुत्ता तुच्छगा तहा तेवि ।
विरसा सइ[1] अवसाणे तेसु तओ को व पडिबंधो ? ॥ ८५ ॥

इय संसारे सारं जं किर पडिहासए [2]विवज्जासा ।
तंपि हु दुहसयहेउत्ति जाणिउं कुणह जिणधम्मं ॥ ८६ ॥

जं दुलहा सामग्गी एसा तुब्भेहिं भवसमुद्दम्मि ।
पत्ता अपत्तपुव्वा ता मा तं निप्फलं नेह ॥ ८७ ॥

एसा हु पुणो दुलहा जाईलक्खोहसंकुलभवम्मि ।
हिंडंताणं [3]ताणं न य अन्नं जिणमयं[4] मोत्तुं ॥ ८८ ॥

तम्हा जिणेहिं भणियं दिक्खं घेत्तूण संजमं काउं ।
उज्झिय तो संसार [5]पावह सिद्धीए[6] पवरसुहं ॥ ८९ ॥

---

अतिपरिमिते चपले रोगजराशोकव्याधिप्रचुरे ।
जीवानां यौवने ईदृशे को नाम प्रतिबन्धः ? ॥ ८४ ॥

विषयाः कुगतिनिमित्तमुपभुक्ताः तुच्छकास्तथा तेऽपि ।
विरसाःसदाऽवसाने तेषु ततः कोवा प्रतिबन्धः ॥ ८५ ॥

इति संसारे सारं यत्किल प्रतिभासते विपर्यासात् ।
तमपि खलु दुःखशतहेतुरिति ज्ञात्वा कुरुत जिनधर्मम् ॥ ८६ ॥

यद्दुर्लभा सामग्री एषा युष्माभिर्भवसमुद्रे ।
प्राप्ताऽप्राप्तपूर्वा तस्मात्मा तां निष्फलं नयत ॥ ८७ ॥

एषा खलु पुनर्दुलभा जातिलक्षौघसङ्कुलभवे ।
भ्राम्यतां त्राणं न चान्यं जिनमतं मुक्त्वा ॥ ८८ ॥

तस्माज्जिनैर्भणितं दीक्षां गृहीत्वा संयमं कृत्वा ।
उज्झित्वा तस्मात् संसारं प्राप्नुत सिद्धेः प्रवरसुखम् ॥ ८९ ॥

---

१. सइ=सदा । २. विपर्यासात्=भ्रमात् । ३. त्राणं=शरणम् । ४. मतं=दर्शनम् । ५. प्राप्नुत। ६. सिद्धिः=मुक्तिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं मुणिणा धम्मम्मि [1]साहिए केवि तत्थ पव्वइया ।
जाया [2]उवासया तह अन्ने [3]सम्मं [4]पवन्नत्ति ॥ ९० ॥

एत्थंतरम्मि पणमिय जलणपहो [5]विन्नवेइ नियपियरं ।
भयवं ! पुणरवि रज्जं किं तं मह होज्ज नो अहवा ? ॥ ९१ ॥

अह केवलिणा भणियं होही, तं [6]कइय, पुच्छियमणेण ।
तो भणइ मुणिवरिंदो केवलविन्नायपरमत्थो ॥ ९२ ॥

भाणुगइदिन्नरोहिणिविज्जाए साहियाए ते भद्द ! ।
होही पुणरवि [7]खयराहिवत्तणं नत्थि संदेहो ॥ ९३ ॥

एवं मुणिणा भणिए पहसियवयणेहिं वंदिओ भयवं ।
एत्थंतरम्मि परिसा जहागयं पडिगया सव्वा ॥ ९४ ॥

तत्तो ते दोवि जणा समागया झत्ति नियनयरम्मि ।
चित्तगइणा य कहियं केवलिवयणं तु नियपिउणो ॥ ९५ ॥

---

**एवं मुनिना धर्मे कथिते केऽपि तत्र प्रव्रजिताः ।**
**जाता उपासकास्तथाऽन्ये सम्यक्त्वं प्रपन्ना इति ॥ ९० ॥**

**अत्रान्तरे प्रणम्य ज्वलनप्रभो विज्ञपयति निजपितरम् ।**
**भगवन् । पुनरपि राज्यं किं तं मम भवेत् नाथवा ? ॥ ९१ ॥**

**अथ केवलिना भणितं भविष्यति तं कदा पृष्टमनेन ।**
**ततो भणति मुनिवरेन्द्रः केवलविज्ञातपरमार्थः ॥ ९२ ॥**

**भानुगतिदत्तरोहिणिविद्यया साधितया तव भद्र ! ।**
**भविष्यति पुनरपि खेचराधिपत्यं नास्ति सन्देहः ॥ ९३ ॥**

**एवं मुनिना भणिते प्रहृष्टवदनैर्वन्दितो भगवान् ।**
**अत्रान्तरे पर्षत् यथागतं प्रतिगताः सर्वाः ॥ ९४ ॥**

**ततस्तौ द्वावपि जनौ समागतौ झटिति निजनगरे ।**
**चित्रगतिना च कथितं केवलिवचनं तु निजपितुः ॥ ९५ ॥**

---

१. साहिए=कथिते । २. उपासकाः । ३. सम्यक्त्वम् । ४. प्रपन्ना इति । ५. विज्ञपयति।
६. कदा । ७. खचराधिपत्वम् =विद्याधरस्वामित्वम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य भाणुगइणा सोहणरिक्खम्मि रोहिणी विज्जा।
जामाउयतणयाणं दोण्हवि समयं विदिन्नत्ति ॥ ९६ ॥

भणिया य पुव्वसेवं करजाववि्हाणओ कुणह सम्मं ।
वसिमेम्मि[1] ठिया समयं छम्मासं जाव तो पच्छा ॥ ९७ ॥

उत्तरसेवा उग्गा कायव्वा एगगेहिं अडवीए ।
बीएण पुणो उत्तरसाहगरूवेण होयव्वं ॥ ९८ ॥

अन्नं च भीसणासुवि विभीसियासु[2] मणं न दायव्वं ।
पुन्ने सत्तममासे देस्सइ[3] अह दंसणं विज्जा ॥ ९९ ॥

एवं रन्ना भणिया दोन्निवि पणमित्तु तस्स पयकमलं ।
पारद्धा तं काउं छम्मासा जाव पुन्नत्ति ॥ १०० ॥

अह सत्तम्मि मासे गंतुं अडवीए तव्विही[4] सव्वो ।
जलणप्पहेण पुव्विं पारद्धो जावहोमाई ॥ १०१ ॥

---

**ततश्च भानुगतिना शोभनर्क्षे रोहिणीविद्या ।**
**जामातृतनययो-र्द्वयोरपि समकं विदताविति ॥ ९६ ॥**

**भणितौ च पूर्वसेवां करजापविधानतः कुरुतं सम्यग् ।**
**वसतौ स्थितौ समकं षट्मासं यावत् ततः पश्चात् ॥ ९७ ॥**

**उत्तरसेवा उग्रा कर्तव्या एकैकैरटव्याम् ।**
**द्वितीयेन पुनरुत्तरसाधकरूपेण भवितव्यम् ॥ ९८ ॥**

**अन्यञ्च भीषणासु अपि बिभीषिकासु मनो न दातव्यम् ।**
**पूर्णे सप्तममासे दास्यत्यथ दर्शनं विद्या ॥ ९९ ॥**

**एवं राज्ञा भणितौ द्वावपि प्रणम्य तस्य पदकमलं ।**
**प्रारब्धौ तं कर्तुम् षड्मासं यावत् पूर्णमिति ॥ १०० ॥**

**अथ सप्तमे मासे गत्वाऽटव्यां तद्विधिः सर्वः ।**
**ज्वलनप्रभेण पूर्वं प्रारब्धो जापहोमादिः ॥ १०१ ॥**

---

१. वसतौ । २. विभीषीका=उपसर्गः। ३. दास्यति । ४. स च्चासौ विधिश्च तद्विधिः।



Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

वसुनंदयखग्गकरो चित्तगई तस्स रक्खओ जाओ ।
सोवि हु अणन्नचित्तो पारद्धो तं विहिं काउं ॥ १०२ ॥

अन्नदिवसम्मि तुरियं आगच्छंती पकंपमाणतणू ।
दिट्ठा उ चित्तलेहा भयभीया तम्मि ठाणम्मि ॥ १०३ ॥

तं दट्ठुं नियभगिणिं चित्तगई भणइ कत्थ तं भद्दे! ।
आया[1] सुभीसणाए एक्कल्ला एत्थ अडवीए ? ॥ १०४ ॥

कस्स व भएण गाढं कंपसि तं भगिणि! ताहि सा भणइ ।
नयराउ निग्गया हं परियरिया दासचेडीहिं ॥ १०५ ॥

पत्ता उज्जाणम्मी तत्थ मए पूइओ कुसुमबाणो ।
नियगिहमागच्छंती विमोहिया झत्ति केणावि ॥ १०६ ॥

मोत्तूणं परियणं तं पलायमाणी समागया एत्थ ।
अडवीए ताव मए दिट्ठो कणगप्पहो सहसा ॥ १०७ ॥

---

**वसुनंदकखड्गकरश्चित्रगतिस्तस्य रक्षको जातः ।**
**सोऽपि खल्वनन्यचित्तः प्रारब्धस्तं विधिं कर्तुम् ॥ १०२ ॥**

**अन्यदिवसे त्वरितमागच्छती प्रकम्पमानतनुः ।**
**दृष्टा खलु चित्रलेखा भयभीता तस्मिन् स्थाने ॥ १०३ ॥**

**तां दृष्ट्वा निजभगिनीं चित्रगति भणति कुत्र त्वं भद्रे !**
**आयाता सुभीषणायां एकाकीन्यत्राटव्यां ? ॥ १०४ ॥**

**कस्य वा भयेन गाढं कम्पसे त्वं भगिनि ! तदा सा भणति ।**
**नगरान्निगताऽहं परिवृत्ता दासचेटीभिः ॥ १०५ ॥**

**प्रामोद्याने तत्र मया पूजितः कुसुमबाणः ।**
**निजगृहमागच्छंती विमोहिता झटिति केनाऽपि ॥ १०६ ॥**

**मुक्त्वा परिजनं तं पलायमाना समागताऽत्र ।**
**अटव्यां तावन्मया दृष्टः कनकप्रभःसहसा ॥ १०७ ॥**

---

१. आयाता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पावेण तेण भणियं इच्छ ममं ताहि गाढकुद्धाए ।
अक्कोसिओ[1] स बहुहा निट्ठुरवयणेहिं मे ताहे ॥ १०८॥

उग्गीरिऊण[2] खग्गं भणिया हं तेण इच्छसु ममंति।
अह नवि,तो ते सीसं छिंदामि इमेण खग्गेण ॥ १०९ ॥

एवं च तेण भणिया पलायमाणी भएण कंपंती ।
पत्ता तुम्ह समीवे रक्ख ममं ताओ पावाओ ॥ ११०॥

एवं भणमाणिं तं सहसा आगम्म गिण्हिउं हत्थे ।
उप्पइओ[3] कणगपहो तमालदलसामलं गयणं ॥ १११॥

हा! रक्ख रक्ख भाउय! हा वल्लह! कुणसु मह परित्तत्तिं[4]।
एमाइ विलवमाणिं हीरंतिं[5] दट्ठु नियभगिणिं ॥ ११२॥

नियकुलकलंककारय! कत्थ ममं जासि दिट्ठिपहपडिओ? ।
पुरिसो भव एस तुहं सीसच्छेयं करेमित्ति ॥ ११३ ॥

---

**पापेन तेन भणितं इच्छ माम् तदा गाढक्रुधा ।**
**आक्रोशितः स बहुधा निष्ठुरवचनै- र्मया तदा ॥ १०८ ॥**

**उद्गीर्य खड्गं भणिताऽहं तेन इच्छसि मामिति ।**
**अथ नाऽपि तदा ते शीर्षं छिनद्मि अनेन खड्गेन ॥ १०९ ॥**

**एवञ्च तेन भणिता पलायमाना भयेन कम्पमाना ।**
**प्राप्ता तव समीपे रक्ष माम् तस्माद् पापात् ॥ ११० ॥**

**एवं भणन्तीं तां सहसा आगम्य गृहीत्वा हस्ते ।**
**उत्पतितः कनकप्रभस्तमालदलश्यामलं गगनम् ॥ १११ ॥**

**हा रक्ष रक्ष भ्रातः ! हा वल्लभ ! कुरु मम परित्रातिम् ।**
**एवमादि विलपन्तीं ह्रियमाणा दृष्ट्वा निजभगिनीम् ॥ ११२ ॥**

**निजकुलकलङ्ककारक ! कुत्र मम यासि दृष्टिपथपतितः ?।**
**पुरुषो भव एष तव शीर्षच्छेदं करोमीति ॥ ११३ ॥**

---

१. आक्रोशितः । २. उद्गीर्य=उत्पाट्य । ३. उत्पतितः । ४. परित्तत्ती=परित्रातिः=परित्राणम्।
५. हीरंती=ह्रियमाणा।



Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

एमाइ वाहरंतो चित्तगई गहियनिसियकरवालो ।
[1]अणुमग्गेणुप्पइओ भगिणिए विमोयणट्ठाए ॥ ११४ ॥ तिसृभिः कुलकम् ॥

अह तं विमोहयंतो कणगपहो आगओ नियनयरे ।
चित्तगईवि खयरो अणुमग्गं तस्स संपत्तो ॥ ११४ ॥

तत्तो विमोहणीए विज्जाए मोहिऊण चित्तगइं ।
सुरनंदणे पविट्ठो कणगपहो नियनयरम्मि ॥ ११६ ॥

अह सो मोहियचित्तो चित्तगई तत्थ वाहिरुज्जाणे ।
वीसरियभगिणिहरणो [2]अवयरिओ कोउहल्लेण ॥ ११७ ॥

दट्ठुं जणसंदोहं उसभजिणिंदस्स पवरभवणम्मि ।
जत्तासमए मिलियं विचित्तनेवत्थसच्छायं ॥ ११८ ॥

पविसिय जिणिंदभवणं वंदिय भत्तीइ पढमजिणनाहं ।
उवविट्ठो चित्तगई विज्जाहरनियरमज्झम्मि ॥ ११९ ॥

---

**एवमादि व्याहरन् चित्रगति-र्गृहीतनिशितकरवालः ।**
**अनुमार्गेणोत्पतितो भगिन्या विमोचनार्थे ॥ ११४ ॥ तिसृभिःकुलकम् ॥**

**अथ तां विमोहयन् कनकप्रभोऽऽगतो निजकनगरे ।**
**चित्रगतिरपि खेचरोऽनुमार्गं तस्य संप्राप्तः ॥ ११५ ॥**

**ततो विमोहण्या विद्यया मोहयित्वा चित्रगतिम् ।**
**सुरनन्दने प्रविष्टः कनकप्रभो निजकनगरे ॥ ११६ ॥**

**अथ स मोहितचित्तश्चित्रगतिस्तत्र बहिरुद्याने ।**
**विस्मृतभगिनीहरणोऽवतीर्णः कुतुहलेन ॥ ११७ ॥**

**दृष्ट्वा जनसन्दोहं ऋषभजिनेन्द्रस्य प्रवरभवने ।**
**यात्रासमये मिलितं विचित्रनेपथ्यसच्छायम् ॥ ११८ ॥**

**प्रवेश्य जिनेन्द्रभवनं वंदित्वा भक्त्या प्रथमजिननाथम् ।**
**उपविष्टश्चित्रगति-र्विद्याधरनिकरमध्ये ॥ ११९ ॥**

---

१. अनुमार्गेणोत्पतितः=अनुगत इत्यर्थः। २. अवतीर्णः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तो खणंतराओ जलणप्पहपेसिओ नरो एगो ।
पुच्छंतो चित्तगइं दमघोसो नाम जिणभवणे ॥ १२० ॥

दट्ठूण य चित्तगइं पणमिय नेऊण[1] ताहि एगंते ।
दमघोसो भणइ तओ भगिणीए विमोयणट्ठाए ॥ १२१ ॥

उप्पइओ ताव तुमं, जलणपहो पिच्छिउंपि तं सव्वं ।
अक्खुहियमणो[2] सम्मं नवि चलिओ निययकिरियाओ ॥ १२२ ॥ युग्मम्॥

निच्चलचित्तं दट्ठुं जलणपहं मंतजाववावारं[3] ।
अह सा रोहिणिविज्जा पच्चक्खा झत्ति संजाया ॥ १२३ ॥

भणियं तीए पुत्तय! अणन्नसरिसं[4] हि सुट्ठु धीरत्तं।
ता सिद्धा तुज्झ अहं भणसु य जं मज्झ कायव्वं? ॥ १२४॥

भणियं जलप्पहेणं अवहरिया मज्झ भारिया जा सा ।
कणगप्पहेणं, तं ताव सिग्घमाणेह मह पासं ॥ १२५ ॥

---

**प्राप्तःक्षणान्तरातः ज्वलनप्रभप्रेषितो नर एकः ।**
**पृच्छंश्चित्रगतिं दमघोषो नामा जिनभवने ॥ १२० ॥**

**दृष्ट्वा च चित्रगतिं प्रणम्य नीत्वा तदा एकान्ते ।**
**दमघोषो भणति ततो भगिन्या विमोचनार्थे ॥ १२१ ॥**

**उत्पतितस्तावत्त्वं ज्वलनप्रभः प्रेक्ष्यऽपि तं सर्वम् ।**
**अक्षुब्धमनाः सम्यक् नाऽपि चलितो निजक्रियातः ॥ १२२ ॥ युग्मम् ॥**

**निश्चलचित्तं दृष्ट्वा ज्वलनप्रभं मन्त्रजापव्यापारम् ।**
**अथ सा रोहिणिविद्या प्रत्यक्षा झटिति सञ्जाता ॥ १२३ ॥**

**भणितञ्च तया पुत्रक ! अनन्यसदृशं हि सुष्ठु धीरत्वं ।**
**तस्मात् सिद्धा तवाहं भण च यत्मम कर्तव्यम् ? ॥ १२४ ॥**

**भणितं ज्वलनप्रभेणाऽपहृता मम भार्या या सा ।**
**कनकप्रभेण, तां तावत्शीघ्रमानय मम पार्श्वम् ॥ १२५ ॥**

---

१. नीत्वा । २. अक्षुब्धमनाः । ३. मन्त्रजापे व्यापारो यस्य तम् । ४. अनन्यसदृशम् - अद्वितीयम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणियं विज्जाइ तओ सुणसु इमं ताव वइयरं[1] पुत्त! ।
केवलिवयणाईओ सव्वोवि हु वइयरो तस्स ॥ १२६ ॥

पन्नत्तीए कहिओ तत्तो सो आगओ तुह समीवे ।
खोहणहेउं[2] सव्वं मायाए कयं इमं तेण ॥ १२७ ॥ युग्मम् ॥

तुह महिला नियगेहे अच्छइ निरुवद्दवा सुहेणं तु ।
चित्तगई पुण तेणं विमोहिओ मोहणिपभावा ॥ १२८ ॥

सुरनंदणम्मि नयरे जिणिंदभवणम्मि अच्छइ निविट्ठो ।
ता मा काहिसि किंचिवि ऍत्थत्थे[3] पुत्त ! उव्वेवं ॥ १२९ ॥ युग्मम् ॥

एवं भणिउं विज्जा अदंसणं झत्ति उवगया ताहे।
अहयं जलणपहेणं पट्ठविओ तुम्ह पासम्मि ॥ १३० ॥

एवं च तेण भणिओ दमघोसेणं अमूढचित्तो सो ।
चित्तगई संजाओ चलिओ सह तेण नियठाणं ॥ १३१ ॥

---

**भणितं विद्यया ततश्शृणु इमं तावद्व्यतिकरं पुत्र !**
**केवलिवचनादितः सर्वोऽपि खलु व्यतिकरः तस्य॥ १२६ ॥**

**प्रज्ञप्तया कथितस्ततः स आगतस्तव समीपे ।**
**क्षोभणहेतुं सर्वं मायया कृतमिदं तेन ॥ १२७ ॥ युग्मम् ॥**

**तव महिला निजगेहे आस्ते निरूपद्रवा सुखेन तु ।**
**चित्रगतिः पुनस्तेन विमोहितो मोहनीप्रभावात् ॥ १२८ ॥**

**सुरनन्दने नगरे जिनेन्द्रभवने आस्ते निविष्टः ।**
**तस्मात्मा करिष्यसि किञ्चिदपि अत्रार्थे पुत्र ! उद्वेगम् ॥ १२९ ॥ युग्मम् ॥**

**एवं भणित्वा विद्याऽदर्शनं झटिति उपगता तदा ।**
**अहकं ज्वलनप्रभेण प्रस्थापितस्तव पार्श्वे ॥ १३० ॥**

**एवञ्च तेन भणितो दमघोषेनाऽमूढचित्तःसः ।**
**चित्रगतिः सञ्ज्ञातश्चलितः सह तेन निजस्थानम् ॥ १३१ ॥**

---

१. व्यतिकरः=प्रसङ्गः। २. क्षोभणहेतोः=क्षोभनिमित्तम् । ३. अत्रार्थे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि [१]ण्हवणे वित्तप्पायम्मि जिणवरिंदस्स ।
पविसइ नयरे लोगो नाणाविहवाहणारूढो ॥ १३२ ॥
अविय । कोवि हु सि[२]बिंयारूढो आरूढो रहवरेसु [३]चित्तेसु ।
हयगय[४]अस्सतरेसुं [५]डोलियजुगेसु विविहेसु ॥ १३३ ॥
एत्थंतरम्मि हत्थी [६]कणगप्पहसंतिओ महाकाओ ।
मयमत्तो [*]उम्मिट्ठो नीहरिओ ताओ नयराओ ॥ १३४ ॥
भंजंतो गिहदारे [७]उड्डोसेंतो [८]वरंडए बहुसो ।
मारिंतो जणनियरं अ[९]च्छोलिंतो रहे विविहे ॥ १३५ ॥
अह तं कयंतसरिसं उड्डीकयगुरुकरं सुघोरमुहं ।
दट्ठुं नट्ठो लोओ दि[१०]सो दिसिं मरणभयभीओ ॥ १३६ ॥
सोवि हु [११]पवहणनिवहं भंजंतो दंतपायघाएहिं ।
उ[९]च्छोलिंतो सुंडाइ हिंडए सव्वओ तत्थ ॥ १३७॥

---

**अत्रान्तरे स्नपने वृतप्राये जिनेन्द्रवरस्य ।**
**प्रविशति नगरे लोके नानाविधवाहनारूढः ॥ १३२ ॥**
**अपि च । कोऽपि शिबिकारूढ आरूढो रथवरेषु चित्रेषु ।**
**हयगजाश्वतरेषु डोलिय( शिबिका )युगलेषु विविधेषु ॥१३३॥**
**अत्रान्तरे हस्ती कनकप्रभसत्को महाकालः ।**
**मदमत्त उन्मृष्टो निस्सृतस्तस्मान्नगरात् ॥ १३४ ॥**
**भञ्जन् गृहद्वारं उद्भ्रमयन् वरण्डको बहुशः ।**
**मार्यमाणो जननिकरं उच्छिंदन् रथान् विविधान् ॥ १३५ ॥**
**अथ तं कृतान्तसदृशं उर्ध्वीकृतगुरुकरं सुघोरमुखम् ।**
**दृष्ट्वा नष्टो लोको दिशोदिशिं मरणभयभीतः ॥ १३६ ॥**
**सोऽपि खलु प्रवहणनिवहं भञ्जन् दन्तपादघातैः ।**
**उच्छिंदन् शूंढया भ्राम्यति सर्वतस्तत्र ॥ १३७ ॥**

---

१. स्नपने वृत्तप्राये=संपूर्णे सति । २. शिबिका=सुखासनम् । ३. चित्राः=नानविधाः । ४. अश्वतरो=वेसरः । ५. डोलिया=शिबिकाविशेषः । ६. कनकप्रभसत्कः= कनकप्रभ-स्वामिकः। ७. उद्भ्रमयन्=नाशयन् । ८. वरण्डको भित्तिः। ९. छिंदन्। १०. एकस्या दिशोऽन्यस्यां दिशि। ११. प्रवहणं= रथः। * निरंकुशः।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

कोऊहलेण गयणे परिट्ठिओ [१]पुलोइउं पयत्तो सो ।
चित्तगई मत्तकरिं [२]कयंतवयणंव [३]दुप्पिच्छं ॥ १३८ ॥
एत्थंतरम्मि एगम्मि रहवरे पढमजोव्वणारंभा ।
जुवई अणन्नरूवा बहुविहवरभूसणाइन्ना ॥ १३९ ॥
[४]उम्मग्गपयट्टेहिं [५]जच्चतुरंगेहिं [६]हत्थितट्ठेहिं।
भग्गम्मि रहे भूमीइ निवडिया विगयजीयव्व ॥ १४० ॥ युग्मम् ॥
नवनीलुप्पल[७]सच्छहविसाललोलंतलोयणा वरई ।
संभग्गकन्नकुंडलविलुलियवरकुंतलकलावा ॥ १४१ ॥
विच्छिन्नकणयखिंखिणि[८]नियरपलंबंत[९]मेहलादामा ।
ईसीसिहारपच्छन्नथणहरा गलियसिरकुसुमा ॥ १४२ ॥
[१०]विहडियअंगयजुयला निवडिय[११]कडया पणट्ठगेविज्जा[१२]।
[१३]तुट्टगुणहारवियलियमुत्ताहलसोहियसरीरा ॥ १४३ ॥

---

**कुतुहलेन गगने परिस्थितः द्रष्टुं प्रवृत्तःसः ।**
**चित्रगति-र्मत्तकरिंकृतान्तवदनमिव दुर्दर्शम् ॥ १३८ ॥**
**अत्रान्तरैकस्मिन् रथवरे प्रथमयौवनारम्भा ।**
**युवत्यनन्यरुपा बहुविधवरभूषणाकीर्णा ॥ १३९ ॥**
**उन्मार्गप्रवृत्तैर्जात्यतुरङ्गैर्हस्तित्रस्तैः ।**
**भग्ने रथे भूम्यां निपतिता विगतजीवेव ॥ १४० ॥ युग्मम् ॥**
**नवनीलोत्पलसदृशविशाललुलत्लोचना वराकी ।**
**संभग्नकर्णकुण्डलविलुलत्वरकुन्तलकलापा ॥ १४१ ॥**
**विच्छिन्नकनककिङ्किणीनिकरप्रलम्बत्मेखलादामा ।**
**ईषदीषद्धारप्रच्छन्नस्तनधरा गलितशिरःकुसुमा ॥ १४२ ॥**
**विघटिताङ्गदयुगला निपतितकटका प्रणष्टग्रैवेयका ।**
**त्रुटितगुणहारविगलितमुक्ताफलशोभितशरीरा ॥ १४३ ॥**

---

१. द्रष्टुं। २. कृतान्तो यमस्तस्य वदनमिव। ३. दुर्दर्शम् दुरालोकमित्यर्थः। ४. उन्मार्गप्रवृत्तैः= विमार्गपतितैः। ५. जच्चो=जात्यः। ६. तट्ठा=त्रस्ताः। ७. सच्छहो सदृशः। ८. खिंखिणी= किङ्किणी=क्षुद्रघण्टिका= 'घुघरि' इति भाषायाम्। ९. मेखला=कटीसूत्रम्। १०. विघटितं ध्वस्तं अङ्गदयोः केयूरयोर्युगलं यस्याः सा । ११. कटकं=करभूषणम् । १२. ग्रैवेयकम् - ग्रीवाया आभरणम् । १३. त्रुटितो गुणो यस्य स चासौ यो हारस्तस्माद् विगलितैर्मुक्ताफलैः शोभितशरीरा।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभग्गनेउरंजुया मुंसुमूरियरयणमालियानियरा ।
भूमितललुलियदेहा अंह दिट्ठा तेण सा करिणा ॥ १४४ ॥ चतसृभिः कलापकम्

तत्तो उज्झियहत्थो तीइ वहट्ठाइ करिवरो चलिओ ।
तं दट्ठु पंरियरेण गरुओ हाहारवो विहिओ ॥ १४५ ॥

सुसिलिट्ठअंगुवंगं अह तं पडिपुन्नचंदसमवयणं ।
करगिज्झमज्झभागं वियडनियंबत्थलिं जुवइं ॥ १४६ ॥

दट्ठुंपि समासन्नं नागं, गंतुं अंचायमाणिं तु ।
मरणभयाओ गाढं वेवंतसरीरयं खुद्धं ॥ १४७ ॥

ताँयारमपिक्खंतिं सतरलतारं दिसो निंयच्छंतिं ।
दट्ठूणं चितगई गयंणत्थो चिंतए एवं ॥ १४८ ॥ तिसृभिः कुलकम् ॥

हा! हा! कामनिहाणं महिलारयणं विणस्सइ लग्गं ।
ओंयंरिऊणं गयणाउ ताहि अंकंम्मि सा गहिआ ॥ १४९ ॥

---

**संभग्ननुपुरयुगा त्रुटितरत्नमालानिकरा ।**
**भूमितललुलत्देहाऽसौ दृष्टा तेन सा करिणा ॥१४४॥ चतसृभिः कलापकम् ॥**

**तत उज्झितहस्तः तस्या वधार्थे करिवरश्चलितः ।**
**तं दृष्ट्वा परिकरेण गुरुको हाहारवो विहितः ॥ १४५ ॥**

**सुश्लिष्टाङ्गोपाङ्गां अथ तां प्रतिपूर्णचन्द्रसमवदनां ।**
**करग्राह्यमध्यभागां विकटनितम्बस्थलिं युवतीम् ॥ १४६ ॥**

**दृष्ट्वाऽपि समासन्नं नागं गन्तुमशक्नुवन्तीन्तु ।**
**मरणभयात् गाढं वेपमानशरीरां क्षुब्धाम् ॥ १४७ ॥**

**त्रातारमप्रेक्ष्यमाणां सतरलतारं दिशः पश्यन्तीम् ।**
**दृष्ट्वा चित्रगति-र्गगनस्थश्चिंतयत्येवम् ॥ १४८ ॥ तिसृभिःकुलकम् ॥**

**हा! हा! कामनिधानं महिलारत्नं विनङ्क्ष्यति अघटमानम् ।**
**अवतीर्य गगनात्तदाऽङ्के सा गृहीता ॥ १४९ ॥**

---

१. जुयं=युगम्=युगलमित्यर्थः । २. मुसुमूरियं=भक्तम् त्रुटितम् । ३. अह=असौ । ४. परिकर=परिवारः । ५. नागः=हस्ती । ६. अशक्नुवतीम् । ७. क्षुब्धाम् । ८. त्रातारम्=रक्षितारम् । ९. पश्यन्तीम् । १०. गगनस्थः । ११. लग्गं=अघटमानम् । १२. अवतीर्य । १३. अङ्कः=उत्सङ्गः ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

घित्तूण सयं सहसा ठाणे निरुवद्दवम्मि नेऊण ।
सीयलतरुछायाए निवेसिया कुट्टिमुच्छंगे ॥ १५० ॥

तत्तो य उत्तरीयमिउपवणाऽऽसासियाए सो तीए ।
लज्जासज्झसमउलियनयणेहिं पुलोइओ तत्तो ॥ १५१ ॥

चियपरिचियंव दट्ठुं तं तरुणं गरुयनेहसब्भावा ।
[1]अमएणव संसित्ता जाया अह वियसियकवोला ॥ १५२ ॥

चित्तगईवि य तीए दट्ठूण अणोवमं तयं रूवं ।
तव्वयणनिसियनिप्फंदलोयणो चिट्ठई जाव ॥ १५३ ॥

ताव य तीए धाई कइवयजुवईहिं परिगया झत्ति ।
आगंतुं उवविट्ठा भणइ तयं महुरवाणीए ॥ १५४ ॥ युग्मम् ॥

परकज्जकरणनिरया हवंति किर सज्जणत्ति [2]सच्चवियं ।
कन्नगमेयं मोयंतएण[3] तुमए [4]गइंदाओ ॥ १५५ ॥

---

**गृहीत्वा स्वयं सहसा स्थाने निरुपद्रवे नीत्वा ।**
**शीतलतरुच्छायायां निवेशिता कुट्टिमोत्सङ्गे ॥ १५० ॥**

**ततश्च उत्तरीयमृदुपवनाऽऽश्वासितायां स तस्याम् ।**
**लज्जासाध्वसमुकुलितनयनाभ्याम् दृष्टस्ततः ॥ १५१ ॥**

**चिरपरिचितमिव दृष्ट्वा तं तरुणं गुरुकस्नेहसद्भावा ।**
**अमृतेनेव संसिक्ता जाता अथ विकसितकपोला ॥ १५२ ॥**

**चित्रगतिरपि च तस्या दृष्ट्वाऽनोपमं तद् रूपं ।**
**तद्वदननिश्रितनिष्पंदलोचनो तिष्ठति यावत् ॥ १५३ ॥**

**तावच्च तस्या धात्री कतिपययुवतिभिः परिगता झटिति ।**
**आगत्योपविष्टा भणति तकं मधुरवाण्या ॥ १५४ ॥ युग्मम् ॥**

**परकार्यकरणनिरता भवन्ति किल सज्जना इति सत्यापितम् ।**
**कन्यकामेतां मोचयता त्वया गजेन्द्रात् ॥ १५५ ॥**

---

१. अमृतेनेव । २. सच्चवियं=सत्यापितं=संवादितम् । ३. मोचयता । ४. गजेन्द्रात्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता निक्कारणवच्छल ! तुज्झ पभावाओ जीविया एसा ।
एमाइ बहुविगप्पं अभिनंदिय सा पुणो भणइ ॥ १५६ ॥

गच्छामि अम्ह गेहं उस्सूरं[1] वट्टए जओ इण्हिं ।
भणियं च चित्तगइणा एवं कुणहत्ति तत्तो य ॥ १५७ ॥

नियनयराभिमुहाणं ताणं चलियाण तीए कन्नाए ।
चित्तगइकरयलओ मुद्दारयणं लहुं गहियं ॥ १५८ ॥

निययकरसंठियं पुण समप्पियं तस्स ताण[2] पच्छन्नं ।
अह सा सज्झसवेविरदेहा गंतुं पयट्टत्ति ॥ १५९ ॥

वलियग्गीवं तीए अइगुरुअणुरायपिसुणदिट्ठीए[3] ।
निज्झाइओ[4] तहा सो जह जाओ कुसुमसरविसओ ॥ १६० ॥

अह सा सहियणसहिया कमेण नियपुरवरं पविट्ठत्ति ।
चित्तगईवि य तीए जोव्वणरूवेहिं हयहियओ ॥ १६१ ॥

---

**तस्मात् निष्कारणवत्सल ! तव प्रभावात् जीवितैषा ।**
**एवमादिबहुविकल्पमभिनंद्य सा पुनर्भणति ॥ १५६ ॥**

**गच्छाम्यस्माकं गेहमूत्सूरं वर्तते यत इदानीम् ।**
**भणितश्च चित्रगतिना एवं कुरुतेति ततश्च ॥ १५७ ॥**

**निजनगराभिमुखानां तासां चलितानां तया कन्यया ।**
**चित्रगतिकरतलतः मुद्रारत्नं लघु गृहीतम् ॥ १५८ ॥**

**निजककरसंस्थितं पुनः समर्पितं तस्य तेभ्यः प्रच्छन्नम् ।**
**अथ सा साध्वसवेपमानदेहा गन्तुम् प्रवृत्तेति ॥ १५९ ॥**

**वलितग्रीवां तया अतिगुर्वनुरागपिशूनदृष्ट्या ।**
**निध्यातस्तथा स यथा जातः कुसुमशरविषयः ॥ १६० ॥**

**अथ सा सखीजनसहिता क्रमेण निजपुरवरं प्रविष्टेति ।**
**चित्रगतिरपि च तस्याः यौवनरूपाभ्याम् हतहृदयः ॥ १६१ ॥**

---

१. ऊर्ध्व सूरो यत्र तदिति क्रियाविशेषणम् । २. तेभ्यः । ३. पिशुनं=सूचकम् । ४. निध्यातः=दृष्टः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्तलिहिउव्व जाओ खणंतरं विगयअन्नवावारो ।
तं दट्ठुं दमघोसो सविणयमेवं समुल्लवइ ॥ १६२ ॥ युग्मम् ॥

अत्थ गिरिसिहरमणुसरइ दिणयरो एस वियलियपयावो ।
ता गम्मउ नियठाणे कुमार ! किमिणा विलंबेण ? ॥ १६३ ॥

तव्वयणं सोऊणं काउं [1]आगारसंवरं भणइ ।
एवं करेमु नवरं कारणमेयं विलंबस्स ॥ १६४ ॥

मह हत्थाओ पडियं मुद्दारयणं तु एत्थ कत्थवि य ।
तं [2]गविसिउं पभाए झडत्ति अहमागमिस्सामि ॥ १६५ ॥

तं पुण गच्छसु सिग्धं कहेज्ज जलणप्पहस्स वुत्तंतं ।
ईसि हसिऊण तओ दमघोसो एवमुल्लवइ ॥ १६६ ॥

पच्चक्खम्मिवि दिट्ठे कुमार ! किं एत्थ वंकभणिएहिं ? ।
किं नवि दिट्ठा कन्ना तुह हत्था [3]तं पगिण्हंती ॥ १६७ ॥

---

**चित्रलिखित इव जातः क्षणान्तरं विगतान्यव्यापारः ।
तं दृष्ट्वा दमघोषः सविनयमेवं समुल्लपति ॥ १६२ ॥ युग्मम् ॥**

**अस्तगिरिशिखरमनुसरति दिनकर एष विगलितप्रतापः ।
तस्माद्गम्यते निजस्थाने कुमार! किमनेन विलम्बेन? ॥ १६३ ॥**

**तद्वचनं श्रुत्वा कृत्वा आकारसंवरं भणति ।
'एवं कुर्वः नवरं कारणमेतद् विलम्बस्य ॥ १६४ ॥**

**मम हस्तात् पतितं मुद्रारत्नं त्वत्र कुत्रापि च ।
तं गवेषयित्वा प्रभाते झटित्यहमागमिष्यामि ॥ १६५ ॥**

**त्वं पुन-र्गच्छ शीघ्रं कथयेत् ज्वलनप्रभस्य वृतान्तम् ।'
ईषद्धसित्वा ततो दमघोष एवमुल्लपति ॥ १६६ ॥**

**'प्रत्यक्षेऽपि दृष्टे कुमार ! किमत्र वक्रभणितैः ? ।
किं नाऽपि दृष्टा कन्या तव हस्तात्तां प्रगृह्णाती ॥ १६७ ॥**

---

१. आकारसंवरः=आकृतिगोपनम् । २. गवेषयित्वा=अन्विष्य । ३. तां=मुद्रिकाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता कवडं मोत्तूणं जहट्ठियं चेव साहिउं जुत्तं ।
कन्नाए मूलसुद्धिं[1] उवलभिउं आगमिस्सामि ॥ १६८ ॥

एवं च तेण भणिओ चित्तगई विहसिऊण वज्जरइ ।
सम्मं वियाणियं ते मणोगयं मज्झ दमघोस ! ॥ १६९ ॥

अह सो कयप्पणामो उप्पइओ पाविओ नियं ठाणं ।
चित्तगईवि पविट्ठो जुगाइजिणमंदिरे रम्मे ॥ १७० ॥

वंदियजिणिंदबिंबो जिणउग्गहवज्जियम्मि एगंते ।
गंतूणं उवविट्ठो समागया ताव रयणीवि ॥ १७१ ॥

अह चिंतिउं पयत्तो किं मन्ने तीइ मज्झ हत्थाओ ।
गहिउं मुद्दारयणं किंवा मह ढोइयं निययं ? ॥ १७२ ॥

कह णु मए नायव्वं तीए कुलं कहव सा वरेयव्वा ।
जइ सा हविज्ज महिला हविज्ज तो जीवियं सहलं ॥ १७३ ॥

---

**तस्मात् कपटं मुक्त्वा यथास्थितमेवं कथयितुं युक्तम् ।**
**कन्याया मूलशुद्धिमुपलभ्य आगमिष्यामि' ॥ १६८ ॥**

**एवञ्च तेन भणितश्चित्रगति-र्विहस्य कथयति ।**
**'सम्यग् विज्ञातं ते मनोगतं मम दमघोष ! ॥ १६९ ॥**

**अथ स कृतप्रणाम उत्पतितः प्राप्तो निजं स्थानम् ।**
**चित्रगतिरपि प्रविष्टो युगादिजिनमन्दिरे रम्ये ॥ १७० ॥**

**वन्दितजिनेन्द्रबिम्बो जिनावग्रहवर्जितैकान्ते ।**
**गत्वोपविष्टः समागता तावत् रजन्यपि ॥ १७१ ॥**

**अथ चिन्तितुं प्रवृत्तः किं मन्ये तया मम हस्तात् ।**
**गृहीत्वा मुद्रारत्नं किं वा मम ढौकितं निजकम् ? ॥ १७२ ॥**

**कथन्नु मया ज्ञातव्यं तस्याः कुलं कथं वा सा वरणीया ।**
**यदि सा भवेत् महिला भवेत् तस्माज्जीवितं सफलम् ॥ १७३ ॥**

---

१. उपलभ्य=विज्ञाय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तारिसरूवजुयाए समयं इह विसयसेवणं जुत्तं ।
तदभावे विसयासा विडंबणा मज्झ पडिहाइ ॥ १७४ ॥

सो य [1]कयत्थो पुरिसो लग्गिज्जा जस्स करयले बाला ।
रंभागब्भसुकोमलबाहुलया हंसगइगमणा ॥ १७५ ॥

धन्नो हमित्तिएणं गहिया अंकम्मि सा मए सुतणू ।
अवगूहिया य गाढं जं न मए वंचिओ तं तु ॥ १७६ ॥

पुणरवि हविज्ज [3]जत्ता हत्थिभए भूमिनिवडिया तह सा।
घित्तूण जेण सहसा [4]अवयासेज्जा तयं गाढं ॥ १७७ ॥

एमाइ बहुविगप्पं विचितयंतस्स तग्गयमणस्स ।
निद्दाए समं राई खयं गया, उग्गओ सूरो ॥ १७८ ॥

अह सो पहायसमए विहिणा वंदित्तु जिणवरं पढमं।
चलिओ कन्ना [5]कुलहरवियाणणत्थं पुराभिमुहो ॥ १७९ ॥

---

**तादृशरूपयुक्तया समकमिह विषयसेवनं युक्तम् ।**
**तदभावे विषयाशा विडम्बना मम प्रतिभाति ॥ १७४ ॥**

**स च कृतार्थः पुरुषो लगेत् यस्य करतले बाला ।**
**रम्भागर्भसुकोमलबाहुलता हंसगतिगमना ॥ १७५ ॥**

**धन्योऽहमेतावता गृहीताऽङ्के सा मया सुतनुः ।**
**अवगूढा च गाढं यन्न मया वञ्चितस्तन्तु ॥ १७६ ॥**

**पुनरपि भवेत् यात्रा हस्तिभये भूमिनिपतिता तथा सा ।**
**गृहीत्वा येन सहसा अवश्लिष्येत तकां गाढम् ॥ १७७ ॥**

**एवमादिबहुविकल्पं विचिन्तयस्तद्गतमनसः ।**
**निद्रया समं रात्री क्षयं गता उद्गतः सूरः ॥ १७८ ॥**

**अथ स प्रभातसमये विधिना वन्दित्वा जिनवरं प्रथमम् ।**
**चलितः कन्याकुलगृहविजानार्थं पुराभिमुखः ॥ १७९ ॥**

---

१. कृतार्थ=कृतकार्यः । २. इत्तिएणं=एतावता । ३. जत्ता=यात्रा । ४. अवयासेज्जा=श्लिष्येत । ५. कुलगृहम्=पितृगृहम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तो य पुरं पिच्छइ जणरहियं सुन्नसयलधवलहरं ।
पुरलच्छिविप्पमुक्कं उव्वसियं[1] अडविपडिरुवं[2] ॥ १८० ॥

अह पिच्छिऊण तं सो विम्हियहियओ मणेण चिंतेइ ।
कत्तो हंत! अकंडे[3] पुरमेयं उव्वसं जायं? ॥ १८१ ॥

किं होज्ज इंदयालं अहवा सच्चं हि उव्वसं[1] एयं।
किं कुविएण सुरेणं अवहरियमिमाओ ठाणाओ ॥ १८२ ॥

अहवा भयाओ कस्सवि नट्ठो लोगो इमाओ नयराओ ।
एवं विचिंतयंतो चित्तगई पविसई जाव ॥ १८३ ॥

तावय संमुह[4]मिंतो एगो पुरिसो पुलोइओ तेण ।
उवयारपुव्वयं सो महुरगिराए इमं भणिओ ॥ १८४ ॥ तिसृभिः[5] कुलकम् ॥

भद्दमुह! किंनिमित्तं उव्वसियं पुरवरं इमं सहसा ।
तत्तो य तेण भणियं साहिज्जंतं[6] निसामेहि ॥ १८५ ॥

---

प्राप्तश्च पुरं प्रेक्षते जनरहितं शून्यसकलधवलगृहम् ।
पुरलक्ष्मीविप्रमुक्तमुदुषितमटविप्रतिरूपम् ॥ १८० ॥

अथ प्रेक्ष्य तं स विस्मयहृदयो मनसा चिन्तयति ।
कस्मात् हन्त ! अकाण्डे पुरमेतदुद्वसं जातम् ? ॥ १८१ ॥

किं भवेत् इन्द्रजालमथवा सत्यं हि उद्वसमेतद् ।
किं कुपितेन सुरेणावहृतमस्मात् स्थानात् ॥ १८२ ॥

अथवा भयतः कस्याऽपि नष्टो लोकोऽस्मान्नगरात् ।
एवं विचिन्तयन् चित्रगतिः प्रविशति यावत् ॥ १८३ ॥

तावच्च संमुखमायन्नेकः पुरुषः प्रलोकितस्तेन ।
उपचारपूर्वकं स मधुरगिरेदं भणितः ॥ १८४ ॥ तिसृभिः कुलकम् ॥

भद्रमुख ! किंनिमित्तमुदुषितं पुरवरमिदं सहसा ।
ततश्च तेन भणितं कथ्यमानं निशृणु ॥ १८५ ॥

---

१. उव्वसियं=उदुषितम्, उव्वसं=उद्वसम्-नरनिवासरहितम् । २. प्रतिरूपं=सदृशम् । ३. अकाण्डे=अकाले । ४. संमुखमायन्=आगच्छन् । ५. तिसृभिः कुलकम्। ६. कथ्यमानम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताव सुपसिद्धमेयं विज्जापन्नत्तिगव्विओ सूरो ।
पालइ पुरवरमेयं कणगपहो खयररायत्ति ॥ १८६ ॥

जलणप्पहस्स जेट्ठस्स भाउणो पिउविदिन्नरज्जपयं ।
उद्दालिऊण जेणिह अहिट्ठियं अप्पणा चेव ॥ १८७ ॥

नीसारिओ य भाया जिट्ठो ससुरस्स सो गओ नयरे ।
एसोवि इमम्मि पुरे अच्छइ रज्जं अणुहवंतो ॥ १८८ ॥

ससुरेण भाणुगइणा किल विज्जा रोहिणी उ से दिन्ना ।
सो साहिउं पयत्तो सिट्ठं च इमस्स विज्जाए ॥ १९८ ॥

तत्तो तव्विग्घट्ठा राया कणगप्पहो गओ तत्थ ।
न य खोभिओ स तेणं मणेण भीओ तओ एसो ॥ १९० ॥

नियनयराभिमुहेणं आगच्छंतेण अन्नचित्तेण ।
कहवि हु पमायवसओ जिणभवणं लंघियमणेण ॥ १९१ ॥

---

**तावत् सुप्रसिद्धमेतद् विद्याप्रज्ञप्तिगर्वितःशूरः ।
पालयति पुरवरमेतद् कनकप्रभः खेचरराजेति ॥ १८६ ॥**

**ज्वलनप्रभस्य ज्येष्ठस्य भ्रातुः पितृविदत्तराज्यपदम् ।
उद्दाल्य येनेहाधिष्ठितमात्मना चैवम् ॥ १८७ ॥**

**निस्सारितश्च भ्राता ज्येष्ठः श्वसुरस्य स गतो नगरे ।
एषोऽपि अस्मिन् पुरे आस्ते राज्यमनुभवन् ॥ १८८ ॥**

**श्वसुरेण भानुगतिना किल विद्या रोहिणी तु तस्मै दत्ता ।
स साधयितुं प्रवृत्तःशिष्टं चास्य विद्यया ॥ १८९ ॥**

**ततस्तद्विघ्नार्थं राजा कनकप्रभो गतस्तत्र ।
न च क्षोभितः स तेन मनसा भीतस्तत एषः ॥ १९० ॥**

**निजनगराभिमुखेनागच्छताऽन्यचित्तेन ।
कथमपि खलु प्रमादवशतः जिनभवनं लङ्घितमनेन ॥ १९१ ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वं धरणिंदेणं एसो [1]समओ कओ [2]नहयराण ।
जिणभवणसाहुपडिमाणं लंघणं एत्थ जो काही ॥ १९२ ॥

तस्स [3]खयराहमस्स ओ विज्जाच्छेओ भविस्सई सहसा ।
एवं वेयड्ढनगे अइविदियं सयलखयराण ॥ १९३ ॥ युग्मम् ॥

तत्तो इमस्स रन्नो जिनभवणं लंघियंति रुट्ठेण ।
धरणेण [4]तक्खणिच्चिय विज्जाच्छेओ कओ भद्द ! ॥ १९४ ॥

जलणप्पहस्स विज्जा सिद्धत्ति वियाणिऊण कणगपहो ।
विज्जारहिओ इहयं [5]ठाउमसत्तोति अह नट्ठो ॥ १९५ ॥

गंगावत्तम्मि गओ भयभीओ दक्खिणाए सेढीए ।
सिरिगंधवाहणस्स ओ सरणं सह [6]नाइवग्गेणं ॥ १९६ ॥

नाऊण वइयरमिणं खुहिओ सव्वोवि नायरो लोगो ।
पहुरहिओ भयभीओ [7]अवरोप्परमेवमुल्लवइ ॥ १९७ ॥

---

**पूर्वं धरणेन्द्रेणैषः समयः कृतो नभश्चराणाम् ।**
**जिनभवनसाधुप्रतिमानां लङ्घनमत्र यः करिष्यति ॥ १९२ ॥**

**तस्य खचराधमस्य ओ विद्याच्छेदो भविष्यति सहसा ।**
**एवं वैताढ्यनगेऽतिविदितं सकलखेचराणाम् ॥ १९३ ॥ युग्मम् ।**

**ततोऽस्य राज्ञो जिनभवनं लङ्घितमिति रूष्टेन ।**
**धरणेन तत्क्षणे एव विद्याच्छेदः कृतो भद्र ! ॥ १९४ ॥**

**ज्वलनप्रभस्य विद्या सिद्धेति विज्ञाय कनकप्रभः ।**
**विद्यारहित इह स्थातुमशक्त इति अथ नष्टः ॥ १९५ ॥**

**गङ्गावर्त्ते गतो भयभीतो दक्षिणायां श्रेण्यां ।**
**श्रीगन्धवाहनस्य ओ शरणं सह ज्ञातिवर्गेण ॥ १९६ ॥**

**ज्ञात्वा व्यतिकरमिदं क्षुभितः सर्वोऽपि नागरो लोकः ।**
**प्रभुरहितो भयभीतः परस्परमेवमुल्लपति ॥ १९७ ॥**

---

१. समयः=संकेतः । २. नभश्चराणां=विद्याधराणाम् । ३. खचराधमस्य=विद्याधरापशदस्य। ४. तत्क्षणे एव । ५. स्थातुमशक्त इति । ६. ज्ञातिवर्गेण=स्वजनसमूहेन। ७. परस्परम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्हाण पहू नट्ठो न य सक्कइ वासिउं पुरं एयं ।
तेण विणा ता अम्हं न जुत्तमिह अच्छिउं इण्हिं ॥ १९८ ॥

को कुणइ अम्ह रक्खं एत्थ वसंताण नाहरहियाण ।
सव्वेसिं तेण उचियं पुरमेयं उज्झिउं सिग्घं ॥ १९९ ॥

एवं विणिच्छियम्मी नयरमहंतेहिं मंतकुसलेहिं ।
सव्वोवि जणो नट्ठो जायं अह सुन्नयं नयरं ॥ २०० ॥

आसज्ज कारणमिणं उव्वसियं तेण पुरवरं एयं ।
चित्तगई भणइ तओ कत्थ गओ सो जण भद्द !? ॥ २०१ ॥

तत्तो य तेण भणियं कोवि जणो गयणवल्लहे नयरे ।
कोवि गओ विजयपुरे कोवि हु इह वेजयंतम्मि ॥ २०२ ॥

सत्तुंजयम्मि कोवि हु अरिंजए कोवि तह गओ लोओ ।
अन्नो नंदणनयरे अवरो विमलम्मि नयरम्मि ॥ २०३ ॥

---

**अस्माकं प्रभु-र्नष्टो न च शक्यते वसितुं पुरमेतद् ।**
**तेन विना तस्मादस्माकं न युक्तमिहासितुमिदानीम् ॥ १९८ ॥**

**कः करोति अस्माकं रक्षामत्र वसतां नाथरहितानाम् ।**
**सर्वेषां तेनोचितं पुरमेतदुज्झितुं शीघ्रम् ॥ १९९ ॥**

**एवं विनिश्चये नगरमहन्तैः-र्मन्त्रकुशलैः ।**
**सर्वोऽपि जनो नष्टो जातमथ शून्यकं नगरम् ॥ २०० ॥**

**आसाद्य कारणमिदमुदुषितं तेन पुरवरमेतद् ।**
**चित्रगति-र्भणति ततःकुत्र गतःस जनो भद्र ! ॥ २०१ ॥**

**ततश्च तेन भणितं कोऽपि जनो गगनवल्लभे नगरे ।**
**कोऽपि गतो विजयपुरे कोऽपि खल्विह वैजयन्ते ॥ २०२ ॥**

**शत्रुञ्जये कोऽपि खल्वरिञ्जये कोऽपि तथा गतो लोकः ।**
**अन्यो नन्दननगरे अपरो विमले नगरे ॥ २०३ ॥**

---

१. आसितुम् । २. आसाद्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रहनेउरम्मि कोवि हु आणंदपुरम्मि अरिंजए कोवि ।
सगडामुहम्मि कोवि हु पुरीए तह वेजयंतीए ॥ २०४ ॥

कोवि हु रयणपुरम्मि सिरिनयरे रयणसंचेयं[1] कोवि ।
नयरम्मि जलावत्ते कोवि गओ संखनाभम्मि ॥ २०५ ॥

अवरावरनयरेसुं पडिवक्खसमासएण[2] पुरलोओ ।
सव्वोवि हु विक्खिरिओ[3] सत्तुयपुंजोव्व[4] वायहओ ॥ २०६ ॥

एवं भणिऊण नरो विहियपणामो स गंतुमारद्धो ।
चित्तगईवि य ताहे सोच्चा[5] तव्वयणं सहसा ॥ २०७ ॥

पहउव्व[6] मोग्गरेणं गिलिओ इव रक्खसेण खुहिएण[7] ।
वज्जेण ताडिओ इव दुक्खं अइदूसहं पत्तो ॥ २०८ ॥ युग्मम् ॥

अह चिंतिउं पयत्तो दट्ठव्वा कत्थ सा मए बाला ।
मह हिययकयाणंदा एवं विहियम्मि हयविहिणा ? ॥ २०९ ॥

---

रथनुपुरे कोऽपि खल्वानन्दपुरे अरिजये कोऽपि ।
शकटामुखे कोऽपि खलु पुर्यां वैजयन्त्याम् ॥ २०४ ॥

कोऽपि खलु रत्नपुरे श्रीनगरे रत्नसञ्चये कोऽपि ।
नगरे जलावर्त्ते कोऽपि गतः शंखनाभे ॥ २०५ ॥

अपरापरनगरेषु प्रतिपक्षसमाश्रयेण पुरलोकः ।
सर्वोऽपि खलु विकीर्णः सक्तुकपुञ्जमिव वातहतः ॥ २०६ ॥

एवं भणित्वा नरो विहितप्रणामः स गन्तुमारब्धः ।
चित्रगतिरपि च तदा श्रुत्वा तद्वचनकं सहसा ॥ २०७ ॥

प्रहत इव मुद्गरेण गलित इव रक्षसा क्षुधितेन ।
व्रजेण ताडित इव दुःखमतिदुस्सहं प्राप्तः ॥ २०८ ॥ युग्मम् ॥

अथ चिन्तितुं प्रवृत्त द्रष्टव्या कुत्र सा मया बाला ।
मम हृदयकृतानन्दा एवं विहिते हतविधिना ? ॥ २०९ ॥

---

१. चये । २. प्रतिपक्षसमाश्रयेण=शत्रुभयेन । ३. विक्खिरिओ=विकीर्णः । ४. सक्तकः= भृष्टयवादिचूर्णः । ५. श्रुत्वा । ६. प्रहत एव । ७. क्षुधितेन ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थवि नयरे तीए कुलकोडिसमाउलम्मि [1]विउलम्मि ।
दंसणमवि अइदुलहं अवियाणियकुलहराए उ ॥ २१० ॥

इण्हिं पुण नाणाविहनयरेसुं [2]पवसियम्मि लोयम्मि ।
दइयाए पउत्तीयवि वियाणणे संभवो नत्थि ॥ २११ ॥

ता किं करेमि इण्हिं हयविहिणा विहडियम्मि एयम्मि ।
लब्भिज्ज कह पउत्ती कहवा मह दंसणं होज्जा ? ॥ २१२ ॥

को पुच्छिज्जउ नामं को मह साहिज्ज कुलहरं तीए ? ।
जत्थ गया मम दइया [3]अक्खिज्जा पुरवरं को तं ? ॥ २१३ ॥

कहव [4]तुडिजोगओ सा दिट्ठा अम्हेहिं हयविहिनिओगा ।
इण्हिं पुण दट्ठव्वा को जाणइ कत्थव नवत्ति ? ॥ २१४ ॥

तीए नामक्खराइं विरहपिसायस्स मंतभूयाइं ।
सुइगोयरं गयाइं न मज्झ हा ! कत्थ वच्चामि ? ॥ २१५ ॥

---

**अत्राऽपि नगरे तस्याः कुलकोटिसमाकुले विपुले ।**
**दर्शनमप्यतिदुर्लभमविज्ञातकुलगृहायास्तु ॥ २१० ॥**

**इदानीं पुनर्नानाविधनगरेषु प्रवेशिते लोके ।**
**दयितायाः प्रवृत्तिमपि विजानने संभवो नास्ति ॥ २११ ॥**

**तस्मात् किं करोमि इदानीं हतविधिना विघटितेऽस्मिन् ।**
**लभेत कथं प्रवृत्तिं कथंवा मम दर्शनं भवेत् ? ॥ २१२ ॥**

**को पृच्छेत् नाम को मम कथयेत् कुलगृहं तस्याः ? ।**
**यत्र गता मम दयिता आख्यायात् पुरवरं को तम् ? ॥ २१३ ॥**

**कथं वा दैववशात् सा दृष्टाऽस्माभिर्हतविधिनियोगात् ।**
**इदानीं पुनर्द्रष्टव्या को जानाति कुत्र वा नवेति ? ॥ २१४ ॥**

**तस्या नामाक्षराणि विरहपिशाचस्य मंत्रभूतानि ।**
**श्रुतिगोचरं गतानि न मम हा ! कुत्र व्रजामि ? ॥ २१५ ॥**

१. विपुले । २. प्रोषिते । ३. आख्यायात् । ४. दैववशात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हा ! हियय ! कास झूरसि[1] निब्बंधं मुंच तम्मि लोयम्मि ।
अज्जवि का तुह आसा ठाणंपि अयाणमाणस्स ॥ २१६ ॥

अविय । जइ डज्झसि ता डज्झसु कुट्टसि हे हियय ! न हु निवारेमि ।
दइयाए जं पउत्तीवि दुल्लहा संपयं जाया ॥ २१७ ॥

अहवा किं इमिणा चिंतिएण अइगरुयविसायगब्भेण ।
अवलंबिय धीरत्तं किंचि उवायं विचिंतेमि ॥ २१८ ॥

जेण उवायपयट्टा पुरिसा पाविंति इच्छियं अत्थं ।
सुम्मइ लोयम्मि जओ लब्भइ सुविणं सुयंतेहिं[2] ॥ २१९ ॥

एसो य इह उवाओ भमामि सव्वेसु खयरनयरेसु ।
मा कहय कोवि कत्थवि तीए[3] पउत्तिंपि साहिज्जा ॥ २२० ॥

दासिज्ज अहव सक्खा परिब्भमंतेहिं कम्मिवि पुरम्मि ।
चंदमुही सा बाला, तहा य अइसुंदरं चेव ॥ २२१ ॥

---

हा ! हृदय! कस्मात् स्मरसि निर्बन्धं मुञ्च तस्मिन् लोके ।
अद्याऽपि का तवाशा स्थानमप्यिजानतः ? ॥ २१६ ॥

अपि च। यदि दहसि तस्मात् दहतु कुटयसि हे हृदय! न खलु निवारयामि।
दयिताया यत्प्रवृत्तिरपि दुर्लभा साम्प्रतं जाता ॥ २१७ ॥

अथवा किमनेन चिन्तनेनातिगुरुकविषादगर्भेण ।
अवलम्ब्य धीरत्वं किञ्चिदुपायं विचिन्तयामि ॥ २१८ ॥

येनोपायप्रवृत्ताः पुरुषाः प्राप्नुवन्ति इच्छितमर्थम् ।
श्रूयते लोके यतो लभ्यते स्वप्नं स्वपद्भिः ॥ २१९ ॥

एषश्चेहोपायो भ्राम्यामि सर्वेषु खचरनगरेषु ।
मा कथकः कोऽपि कुत्राऽपि तस्याः प्रवृतिमपि कथयेत् ॥ २२० ॥

पश्येत् अथवा साक्षाद् परिभ्राम्यद्भिः कस्मिन्नपि पुरे ।
चन्द्रमुखी सा बाला तथा चातिसुंदरमेवम् ॥ २२१ ॥

---

१. स्मरसि । २. स्वपद्भिः । ३. तीइ ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

एवं विणिच्छियत्थो सो हं भो चित्तवेग ! चित्तगई ।
दइयाविओयगुरुदुक्खवज्जनिद्दलियमणसेलो[1] ॥ २२२ ॥

परिचत्तबंधुवग्गो अह गुरुअणुरायपरवसो तत्तो ।
एगागी वेयड्ढे उत्तरसेढीए नयरेसु ॥ २२३ ॥

सव्वेसुवि परिभमिओ न य लद्धा तीए कत्थवि पउत्ती ।
तत्तो य दक्खिणाए सेणीए आगओ अहयं ॥ २२४ ॥

तत्थवि पुरेसु केसुवि आहिंडिय इच्छियं अपावितो ।
अज्ज पुणो इह पत्तो तुह नयरं कुंजरावत्ते ॥ २२५ ॥

एयम्मि य उज्जाणे मह पविस्संतस्स सोहणो सउणो[2] ।
संजाओ तह फुरिया दाहिणबाहू तहा नयणं ॥ २२६ ॥

तत्तो वियप्पियं मे अवस्समज्जेव होहिई तीए ।
दइयाए दंसणं, अहव किंचि अइसोहणं अन्नं ॥ २२७ ॥

---

**एवं विनिच्छितार्थः सोऽहं भोः चित्रवेग ! चित्रगतिः ।**
**दयितावियोगगुरुदुःखव्रजनिर्दलितमनःशैलः ॥ २२२ ॥**

**परित्यक्तबन्धुवर्गोऽथ गुर्वनुरागपरवशस्ततः ।**
**एकाकी वैताढ्ये उत्तरश्रेण्यां नगरेषु ॥ २२३ ॥**

**सर्वेष्वपि परिभ्रान्तो न च लब्धा तस्याः कुत्राऽपि प्रवृत्तिः ।**
**ततश्च दक्षिणायां श्रेण्यामागतोऽहकम् ॥ २२४ ॥**

**तत्राऽपि पुरेषु केष्वपि आभ्रम्य इच्छितमप्राप्नुवन् ।**
**अद्य पुनरिह प्राप्तस्तव नगरं कुञ्जरावर्त्तम् ॥ २२५ ॥**

**एतस्मिंश्चोद्याने मम प्रविशतः शोभनः शकुनः ।**
**सञ्जातस्तथा स्फुरितौ दक्षिणबाहू तथा नयनम् ॥ २२६ ॥**

**ततो विकल्पितं मयावश्यमद्यैव भविष्यति तस्याः ।**
**दयिताया दर्शनमथवा किञ्चिदतिशोभनमन्यम् ॥ २२७ ॥**

---

१. शैलः=पर्वतः । २. शकुनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं विचिंतयंतो पत्तो हं एत्थ कयलिगेहम्मि ।
काऊण पायसोयं उवविट्ठो कुट्टिमुच्छंगे ॥ २२८ ॥

ताव य खणंतराओ समागया सुयणु ! मज्झ निद्दत्ति ।
सोऊण तुज्झ सद्दं झत्ति पबुद्धो अहं तत्तो ॥ २२९ ॥

केण इमं उल्लवियंति चिंतिउं जा दिसाओ पुलएमि ।
ताव य तुमं हि दिट्ठो पलंबमाणो तरुलयाए ॥ २३० ॥

हा ! हा ! अणंगरूवो कह णु जुवाणो विणस्सए लग्गो ? ।
एवं विचिंतिऊणं हाहासद्दं करेमाणो ॥ २३१ ॥

पत्तो तुज्झ समीवे छिन्नो अह पासओ मए सहसा ।
भो चित्तवेग ! सेसं पच्चक्खं चेव तुह सव्वं ॥ २३२ ॥ युग्मम् ॥

तं जं तुमए पुट्ठं कह णु तुमं भद्द ! निययदइयाए ।
ठाणंपि नेय जाणसि तं सव्वं साहियं एयं ॥ २३३ ॥

---

**एवं विचिन्तयन् प्राप्तोऽहमत्र कदलीगृहे ।**
**कृत्वा पादशौचमुपविष्टः कुट्टिमोत्सङ्गे ॥ २२८ ॥**

**तावच्च क्षणान्तरतः समागता सुतनो ! मम निद्रेति ।**
**श्रुत्वा तव शब्दं झटिति प्रबुद्धोऽहं ततः ॥ २२९ ॥**

**केनेदमुल्लपितमिति चिन्तयितुम् यावद्दिशः पश्यामि ।**
**तावच्च त्वं हि दृष्टः प्रलम्बस्तरुलतायां ॥ २३० ॥**

**हा! हा! अनङ्गरूपः कथं नु युवा विनङक्ष्यत्यिघटमानम्? ।**
**एवं विचिन्त्य हा हा शब्दं कुर्वन् ॥ २३१ ॥**

**प्राप्तस्तव समीपे छिन्नोऽथ पाशको मया सहसा ।**
**भोः चित्रवेग ! शेषं प्रत्यक्षमेव तव सर्वम् ॥ २३२ ॥ युग्मम् ॥**

**तद्यत्त्वया पृष्टं कथन्नु त्वं भद्र ! निजकदयितायाः ।**
**स्थानमपि नैव जानासि तं सर्वं कथितमेतम् ॥ २३३ ॥**

---

१. पादशौचम् । २. पश्यामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो दुलहं मणुयत्तं दट्ठूणं रूवजोव्वणसमेयं ।
महिलामित्तस्स कए न हु मरणं होइ कायव्वं ॥ २३४ ॥

भो चित्तवेग ! जइवि हु पियविरहे दूसहं हवइ दुक्खं ।
उत्तमकुलप्पसूयाण तहवि एयं न जुत्तंति ॥ २३५ ॥

जाणामि अहंपि इमं मणवल्लहमाणुसस्स विरहम्मि ।
नरए नेरइयस्सव उप्पज्जइ दारुणं दुक्खं ॥ २३६ ॥

तहवि हु न होइ जुत्तो अप्पवहो किंतु कोवि हु उवाओ ।
चिंतेयव्वो जह सा पाविज्जइ हिययवल्लहिया ॥ २३७ ॥

भो सुप्पइट्ठ ! एवं वज्जरिए तेण चित्तगइणा ओ ।
दीहं नीससिऊणं एवं हि मए समुल्लवियं ॥ २३८ ॥

वोलीणा तीइ कहा न हु इण्हिं अत्थि कोवि उवाओ ।
अज्जेव य रयणीए जं होही तीइ विवाहो ॥ २३९ ॥

---

तस्मात् दुर्लभं मनुष्यत्वं दृष्ट्वा रूपयौवनसमेतम् ।
महिलामात्रस्य कृते न खलु मरणं भवति कर्तव्यम् ॥ २३४ ॥

भोश्चित्रवेग ! यद्यपि खलु प्रियविरहे दुःसहं भवति दुःखम् ।
उत्तमकुलप्रसूतानां तथापि एतन्न युक्तमिति ॥ २३५ ॥

जानाम्यिहमपीइदं मनोवल्लभमनुष्यस्य विरहे ।
नरके नैरयिकस्येवोत्पद्यते दारुणं दुःखम् ॥ २३६ ॥

तथाऽपि खलु न भवति युक्तोऽऽत्मवधः किन्तु कोऽपि खल्वोपायः ।
चिन्तितव्यो यथा सा प्राप्नुयात् हृदयवल्लभिका ॥ २३७ ॥

भोः सुप्रतिष्ठ ! एवं कथिते तेन चित्रगतिना ओ ।
दीर्घं निश्वस्य एवं हि मया समुल्लपितम् ॥ २३८ ॥

अतिक्रान्ता तस्याः कथा न खल्विदानीमस्ति कोऽप्युपायः ।
अद्यैव च रजन्यां यद्भविष्यति तस्या विवाहः ॥ २३९ ॥

---

१. नैरयिकः=नरकजीवः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्तगई भणइ तओ एक्कोवि य तीए पावणोवाओ ।
मह फुरइ माणसम्मी जइ तुह पडिहासए सुयणु ! ॥ २४० ॥

भणियं च मए को सो तत्तो सो भणइ भद्द ! निसुणेसु ।
किल एसो कुलायारो दक्खिणसेढीए खयराण ॥ २४१ ॥

कन्नाविवाहसमए एकल्ला पूयए कुसुमबाणं ।
नियकुलकमागयं अह परिणिज्जइ सा तओ पच्छा ॥ २४२ ॥

तं कममणुपालिंती सा एही[1] मयणपूयणनिमित्तं ।
अम्हे पुण दोवि जणा पुव्वं चिय इत्थ पविसामो ॥ २४३ ॥

अह तीए आगयाए नेवत्थं तीए संतयं[2] अहयं ।
घित्तूण इत्थिरूवो गच्छिस्सं वरयपासम्मि ॥ २४४ ॥

घित्तूण कणगमालं तं पुण नासिज्ज तक्खणा[3] चेव ।
अहयंपि उवाएणं नासिस्सं लद्धपत्थावो[4] ॥ २४५ ॥

---

चित्रगति-र्भणति तत एकोऽपि च तस्याः प्रापणोपायः ।
मम स्फुरति मनसि यदि तव प्रतिभासते सुतनो ! ॥ २४० ॥

भणितञ्च मया कः स ततः स भणति भद्र ! निशृणु ।
किलैष कुलाचारो दक्षिणश्रेण्यां खेचराणाम् ॥ २४१ ॥

कन्याविवाहसमयैकाकी पूजयति कुसुमबाणम् ।
निजकुलक्रमागतमथ परिणेष्यति सा ततः पश्चात् ॥ २४२ ॥

तं क्रममनुपालयन्ती सा एष्यति मदनपूजननिमित्तम् ।
आवाम् पुन-र्द्वावपि जनौ पूर्वमेवात्र प्रविशावः ॥ २४३ ॥

अथ तस्यामागतायां नेपथ्यं तस्याः सत्कमहकम् ।
गृहीत्वा स्त्रीरूपो गमिष्यामि वरकपार्श्वे ॥ २४४ ॥

गृहीत्वा कनकमालां तां पुन-र्नश्येत्तत्क्षणादेव ।
अहकमपि उपायेन नङक्ष्यामि लब्धप्रस्तावः ॥ २४५ ॥

---

१. एष्यति । २. सत्कं=संबन्धि । ३. तत्क्षणात् । ४. लब्धप्रस्तावः=प्राप्तप्रसङ्गः ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

एवं हि कए तीए संपत्ती अत्थि, नन्नहा भद्द ! ।
तह देवयाए वयणं होज्जा एवं च सच्चंति ॥ २४६ ॥

किंच । पुरिसेण पुरिसयारो[1] कायव्वो ताव इच्छियत्थम्मि ।
विहिणो निओगओ पुण हवइ हु कज्जस्स निप्फत्ती[2] ॥ २४७ ॥

एवं च तेण कहिए उचिए उवाए आगामियं गरुयदुक्खमचिंतिऊण ।
भो सुप्पइट्ठ! वयणं पडिवन्नयं से तिव्वाणुरागपरिमोहियमाणसेण ॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि कणगमालापावणउवएससूयगो भणिओ ।
सुरसुंदरीकहाए पंचमओ वरं परिच्छेओ ॥ २५० ॥ १२५० ॥

---

**एवं हि कृते तस्याः संप्राप्ति अस्ति, नान्यथा भद्र ! ।**
**तथा देवताया वचनं भवेदेवं च सत्यमिति ॥ २४६ ॥**

**किञ्च पुरुषेण पुरुषकारः कर्तव्यस्तावदिच्छितार्थे ।**
**विधे-र्नियोगतः पुनर्भवति खलु कार्यस्य निष्पतिः ॥ २४७ ॥**

**एवञ्च तेन कथिते उचिते उपायेऽऽगामिकं गुरुकदुःखमचिन्तयित्वा।**
**भोःसुप्रतिष्ठ! वचनं प्रतिपन्नकं तस्य तीव्रानुरागपरिमोहित-मानसेन ॥ २४८॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽपि कनकमालाप्रापणोपदेशसूचको भणितः ।**
**सुरसुन्दरीकथायाः पञ्चमको वरः परिच्छेदः ॥ २५० ॥ १२५०॥**

**पञ्चमः परिच्छेदः संपूर्णः**

---

१. पुरुषकारः=प्रयत्नः । २. निष्पत्तिः=सिद्धिः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ षष्ठः परिच्छेदः ॥

इत्थंतरम्मि[1] सूरो भमिऊणं गयणमंडलमसेसं ।
अवरसमुद्दं पत्तो पहखिन्नो मज्जंणत्थवं[2] ॥ १ ॥

भणियं च चित्तगइणा अन्नाया एव एत्थ पविसामो ।
मयणस्स गिहे संपइ पत्थुअअत्थस्स हेउम्मि ॥ २ ॥

तत्तो य मए भणियं एवं होउत्ति उट्ठिया दोवि ।
उच्चिणिय[3] कइवयाइं पुप्फाइं तत्थ उज्जाणे ॥ ३ ॥

पविसिय मयणस्स गिहे पूइय मयणं च एवमुल्लवियं ।
भयवं ! तुह प्पसाया संपज्जओ इच्छियं अम्ह ॥ ४ ॥ युग्मम् ॥

एवं भणिऊण तओ दोवि निलुक्का[4] अणंगपट्ठीए ।
रयणीए जाममित्ते बोलीणे, किंचिअहियम्मि ॥ ५ ॥

---

अत्रान्तरे सूरो भ्रान्त्वा गगनमण्डलमशेषम् ।
अपरसमुद्रं प्राप्तःपथखिन्नो मज्जनार्थमिव ॥ १ ॥

भणितञ्च चित्रगतिनाऽज्ञातैवात्र प्रविशावः ।
मदनस्य गृहे संप्रति प्रस्तुतार्थस्य हेतौ ॥ २ ॥

ततश्च मया भणितमेवं भवतु इति उत्थितौ द्वावपि ।
उच्चीत्य कतिपयानि पुष्पाणि तत्रोद्याने ॥ ३ ॥

प्रवेश्य मदनस्य गृहे पूजितं मदनञ्चैवमुल्लपितम् ।
भगवन् ! तव प्रसादात् संपद्यतामिच्छितमावाम् ॥ ४ ॥ युग्मम् ॥

एवं भणित्वा ततो द्वावपि निलीनावनङ्गपृष्ठे ॥
रजन्यां याममात्रेऽतिक्रान्ते किञ्चिदधिके ॥ ५ ॥

---

१. एत्थं । २. मज्जनार्थमिव=स्नानार्थमिव । ३. उच्चीत्य=प्रचायीकृत्य । ४. निलुक्का=निलीनौ ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

बहुपरियणपरियरिया गिज्जंता[1] पवरमंगलसएहिं ।
वज्जंतेण य विविहं नाणाविहतूरनिवहेण ॥ ६ ॥

नियसहियणेण सहिया आरूढा उत्तिमाए सिबियाए ।
कयमंगलोवयारा सियभूसणभूसियसरीरा ॥ ७ ॥

सियवसणपाउयंगी[2] आबद्धसुगंधकुसुमआमेला[3] ।
पत्ता ओ कणगमाला दारे अह कामगेहस्स ॥ ८ ॥ चतसृभिः कलापकम् ॥

उत्तिन्ना सिबियाओ पूयणउवगरणयं गहेऊण ।
धरिऊण दारदेसे सयलं नियपरियणं ताहे ॥ ९ ॥

एगागिणी पविट्ठा मयरद्धयबिंबपूयणनिमित्तं ।
पविसित्तु भवणदारं अग्गलियं[4] ताए बालाए ॥ १० ॥ युग्मम् ॥

संपूइऊण कामं अह सा निवडेवि[5] तस्स चलणेसु ।
दीहं नीससिऊणं गलंतथूलंसुनयणिल्ला ॥ ११ ॥

---

बहुपरिजनपरिवृत्ता गीयमाना प्रवरमङ्गलशतैः ।
वाद्यता च विविधं नानाविधतूर्यनिवहेन ॥ ६ ॥

निजसखीजनेन सहिताऽऽरूढोत्तमायां शिबिकायाम् ।
कृतमङ्गलोपचारा श्वेतभूषणभूषितशरीरा ॥ ७ ॥

श्वेतवसनप्रावृताङ्गी आबद्धसुगन्धकुसुमाऽऽपीडा ।
प्राप्ता ओ कनकमाला द्वारेऽथ कामगेहस्य ॥ ८ ॥ चतसृभिः कलापकम् ।

उत्तीर्णा शिबिकातः पूजनोपकरणकं गृहीत्वा
धृत्वा द्वारदेशे सकलं निजपरिजनं तदा ॥ ९ ॥

एकाकीनी प्रविष्टा मकरध्वजबिम्बपूजननिमित्तम् ।
प्रवेश्य भवनद्वारमर्गलितं तया बालया ॥ १० ॥ युग्मम् ॥

संपूज्य काममथ सा निपत्यऽपि तस्य चरणयोः ।
दीर्घं निश्वस्य गलत्स्थूलाश्रुनयना ॥ ११ ॥

---

१. गीयमाना । २. पाउयंगी=प्रावृताङ्गी। ३. आमेलो=आपीडः=अवतंसः । ४. अर्गलितम्।
५. निपत्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लहुसद्देणं एयं सोवालंभं[1] सगग्गरं[2] भणइ ।
निज्जियसुरमणुओवि हु पहरसि इत्थीण किं भयवं ! ? ॥ १२ ॥ युग्मम् ॥

जइ मज्झ तम्मि लोए भयवं ! गरुओ कओ हु अणुराओ ।
ता कीस तं पमोत्तुं घडसि ममं अन्नलोएणं ? ॥ १३ ॥

अन्नं च । सुम्मंति इत्थ लोए पंचेव सिलीमुहा[3] ओ किल तुज्झ ।
नवरं ममं पडुच्चा[4] सहस्सबाणोव्व तं जाओ ॥ १४ ॥

जइ जाव मज्झ पहरसि पहरसु को तं निवारेइ भयवं ! ।
नवरं तह मह पहरसु कयंतभवणे जह वयामि ॥ १५ ॥

तुमए पुण तह पहया जह न मया[5] नेय जीविया अहयं ।
ता किं भणामि इण्हिं सरणम्मि समागया तुज्झ ? ॥ १६ ॥

दड्ढस्स हुयवहेणं[6] सो[7] चेव जहोसहं तु लोयस्स ।
तुमए पीडियदेहा तह सरणं तुज्झ अल्लीणा[8] ॥ १७ ॥

---

**लघुशब्देन एतद् सोपालम्भं सगद्गदम् भणति ।**
**निर्जितसुरमनुष्योऽपि खलु प्रहरसि स्त्रीणां किं भगवन्!?॥ १२॥ युग्मम्॥**

**यदि मम तस्मिल्लोके भगवन् ! गुरुकः कृतः खल्वनुरागः ।**
**तस्मात् कस्मात् तं प्रमुच्य घटयसि मामन्यलोकेन ? ॥ १३॥**

**अन्यं च । श्रूयते अत्रलोके पञ्चैव शिलीमुखा ओ किल तव।**
**नवरं माम् प्रतीत्य सहस्त्रबाण इव त्वं जातः ॥ १४ ॥**

**यदि यावत् मम प्रहरसि प्रहर कस्त्वां निवारयति भगवन् !।**
**नवरं तथा मम ( मां ) प्रहर कृतान्तभवने यथा व्रजामि ॥ १५ ॥**

**त्वया पुनस्तथा प्रहता यथा न मृता नेति जीविताऽहकम् ।**
**तस्मात् किं भणामि इदानीं शरणं समागता तव? ॥ १६ ॥**

**दग्धस्य हुतवहेन स एव यथौषधं तु लोकस्य ।**
**त्वया पीडितदेहा तथा शरणं तवऽऽलीना ॥ १७ ॥**

---

१. सोपालम्भं=साक्षेपवाक्यम् । २. सगद्गदम् । ३. शिलीमुखाः = बाणाः। ४. पडुच्चा = प्रतीत्य । ५. मृता । ६. हुतवहः=अग्निः । ७. स एव=अग्निरेव । ८. आलीना।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

जइ मज्झ तुमं तुट्ठो देहि वरं पत्थिओ मए एयं ।
मा मह हविज्ज एरिसविडंबणा अन्नजम्मेवि ॥ १८ ॥

ताव इमो मह जम्मो पियजणआसाए [1]वोलिओ अहलो ।
तं चिय दइयं दिज्जसु भयवं ! मह अन्नजम्मेवि ॥ १९ ॥

भो सुप्पइट्ठ ! एवं भणिऊणं ताहि कणगमालाए ।
विअलंतथूलअंसुयपवाहसंसित्तसिहिणाए ॥ २० ॥

नाणाविहरयणविणिम्मियम्मि पसरंतविमलकिरणम्मि ।
[2]गब्भहरदारनिहिए रम्मे अह तोरणे तीए ॥ २१ ॥

बद्धो नि[3]उत्तरीएण पासओ ताहि सा पुणो भणइ ।
एसा मरामि संपइ कुसुमाउह ! तुज्झ पुरओ हं ॥ २२ ॥ तिसृभिः कुलकम् ॥

मा मह भणिज्ज कोवि हु विहियमजुत्तंति कणगमालाए ।
एत्तियमित्तं कालं वि[4]मालियं जेण आसाए ॥ २३ ॥

---

यदि मयि त्वं तुष्टो देहि वरं प्रार्थितो मया एतम् ।
मा मम भवतु ईदशविडम्बनाऽन्यजन्मन्यपि ॥ १८ ॥

तावदिदं मम जन्म प्रियजनाऽशायामतिक्रान्तोऽफलः (लम्) ।
तमेव दयितं देहि भगवन् ! ममाऽन्यजन्मन्यपि ॥ १९ ॥

भोः सुप्रतिष्ठ! एवं भणित्वा तदा कनकमालया ।
विगलत्स्थुलाश्रुकप्रवाहसंसिक्तस्तनया ॥ २० ॥

नानाविधरत्नविनिर्मित्ते प्रसरत्विमलकिरणे ।
गर्भगृहद्वारनिहिते रम्येऽथ तोरणे तया ॥ २१ ॥

बद्धनिजोत्तरीयेण पाशकस्तदा सा पुनर्भणाति ।
एषा म्रिये संप्रति कुसुमायुध ! तव पुरतोऽहम् ॥ २२ ॥ तिसृभिः कुलकम् ॥

मा माम् भणेत् कोऽपि खलु विहितमयुक्तमिति कनकमालया ।
एतावन्मात्रं कालं विगालितं येन आशया ॥ २३ ॥

---

१. वोलिओ=गतः । २. गर्भगृहम्=गृहाभ्यन्तरप्रदेशः । ३. निजोत्तरीयेण = स्वीयोत्तरवस्त्रेण ।
४. विगालितं विलम्बितमित्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इण्हिं पुण न हु सक्का काउं भंगं तु नियपइन्नाए[1] ।
तं मोत्तुं हिययदइयं न लग्गए मह करे अन्नो ॥ २४ ॥

अन्नं च देवयाओ ! अलियं जंपंति नेय कइयावि ।
तंपि हु अन्नह जायं मज्झ अउन्नेहिं[2] पावाए ॥ २५ ॥

अहव कवडेण केणवि पिसायरूवेण वंचिया तइया ।
नहवाहणभत्तेणं अहवा खयरेण केणावि ॥ २६ ॥

ता संपयंमि मा होज्ज मज्झ अभिवंछियत्थवाघाओ[3] ।
भयवं ! तुह प्पसाया सिज्झउ मरणं अविग्घेण ॥ २७ ॥

पियविरहगरुयमोग्गरजज्जरियमणाए मज्झ पावाए ।
मरणं होज्ज न होज्ज व अज्जवि आसंकए हिययं ? ॥ २८ ॥

पियविरहदुक्खसमणं लब्भइ मरणंपि गरुयपुन्नेहिं ।
तं जइ हविज्ज इण्हिं सुकयत्था होज्ज ता अहयं ॥ २९ ॥

---

इदानीं पुनर्न खलु शक्या कर्तुम् भङ्गं तु निजप्रतिज्ञायाः ।
तं मुक्त्वा हृदयदयितं न लगेत् मम करोऽन्यः ॥ २४ ॥

अन्यश्च देवताः अलिकं जल्पन्ति नैव कदापि ।
तमपि खल्वन्यथा जातं ममापुन्यैः पापायाः ॥ २५ ॥

अथवा कपटेन केनाऽपि पिशाचरूपेण वञ्चिता तदा ।
नभोवाहनभर्त्राऽथवा खेचरेण केनापि ॥ २६ ॥

तस्मात् सांप्रतमपि मा भवतु ममाऽभिवाञ्छितार्थव्याघातः ।
भगवन् ! तव प्रसादात् सिध्यतु मरणमविघ्नेन ॥ २७ ॥

प्रियविरहगुरुकमुद्गरजर्जरितमानसाया मम पापायाः ।
मरणं भवेत् न भवेत् वा अद्याऽपि आशंकते हृदयम् ? ॥ २८ ॥

प्रियविरहदुःखशमनं लभ्यते मरणमपि गुरुकपुन्यैः ।
तं यदि भवेदिदानीं सुकृतार्था भवामि तस्मादहकम् ॥ २९ ॥

---

१. पइन्ना=प्रतिज्ञा । २. अपुण्यैः । ३. वाधाओ=व्याघातः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं भणियं तीए मुक्को अप्पा अहोमुहो झत्ति ।
तुरियं[1] गंतूण मए छिन्नो अह पासओ तीए ॥ ३० ॥

गहिऊण तयं अंके ताहे सणियं[2] मए इमं भणिया ।
निज्जियसुरासुरिंदो तुट्ठो तुह सुयणु ! रइनाहो ॥ ३१ ॥

असरिससाहसआवज्जिएण[3] मयरद्धएण तुह सुयणु ! ।
एयम्मि चेव जम्मे उवणीओ सो जणो एसो ॥ ३२ ॥

किज्जउ कंठग्गहणं गाढं उक्कंठिओ जणो तुज्झ ।
एवं भणिया बाला लज्जाए अहोमुही जाया ॥ ३३ ॥

चित्तगईवि य ताहे समागओ तम्मि चेव ठाणम्मि ।
तत्तो य मए भणियं वरमित्तो एस मह सुयणु ! ॥ ३४ ॥

तुज्झ विओए सुंदरि ! अप्पवहे उज्जओ अहमिमेण ।
विणिवारिओ अकारणवच्छल्लजुएण धीरेण ॥ ३५ ॥

---

**एवं भणितं तया मुक्तो आत्माऽधोमुखो झटिति ।**
**त्वरितं गत्वा मया छिन्नोऽथ पाशकस्तस्याः ॥ ३० ॥**

**गृहीत्वा तकां अङ्के तदा शनैर्मयेदं भणिता ।**
**निर्जितसुरासुरेन्द्रस्तुष्टस्तव सुतनो ! रतिनाथः ॥ ३१ ॥**

**असदृशसाहसाऽऽवर्जितेन मकरध्वजेन तव सुतनो ! ।**
**एतस्मिन्नेव जन्मनि उपनीतः स जन एषः ॥ ३२ ॥**

**क्रियतां कण्ठग्रहणं गाढमुत्कण्ठितो जनस्तव ।**
**एवं भणिता बाला लज्जयाऽधोमुखी जाता ॥ ३३ ॥**

**चित्रगतिरपि तदा समागतस्तस्मिन्नेव स्थाने ।**
**ततश्च मया भणितं वरमित्रमेष मम सुतनो ! ॥ ३४ ॥**

**तव वियोगे सुन्दरि ! आत्मवधे उद्यतोऽहमनेन ।**
**विनिवारितोऽकारणवत्सलयुक्तेन धीरेण ॥ ३५ ॥**

१. त्वरितम् । २. शनैः । ३. आवर्जितः=प्रसन्नः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुह पावणे उवाओ एसो मह साहिओ इमेणेव ।
एएण सहाएणं सिज्झिस्सइ[1] इच्छियं अम्ह ॥ ३६ ॥

कन्नासहावसुलहं उज्झित्ता संज्झसं[2] सुयणु ! तम्हा ।
नियनेवत्थं सव्वं झत्ति समुप्पेसु एयस्स ॥ ३७ ॥

काऊण तुज्झ रूवं जेण इमो सुयणु ! वच्चए बाहिं[3] ।
परियणविमोहणट्ठा परकज्जसमुज्जओ धीरो ॥ ३८ ॥

एवं च मए भणिया सहरिसहियया करेइ तं सव्वं ।
अह दोवि निलुक्काइं पुणरवि मयणस्स पट्ठीए ॥ ३९ ॥

चित्तगईवि य तीए नीसेसं निविसिऊण[4] नेवत्थं ।
उग्घाडिउं दुवारं[5] आरूढो झत्ति सिवियाए ॥ ४० ॥

अह तम्मि गइ लोए नीसद्दं जाणिऊण तं भवणं ।
भणिया य मए एसा सुंदरि ! किं इण्हि कायव्वं ? ॥ ४१ ॥

---

**तव प्रापणे उपाय एष मम कथितोऽनेनैव ।**
**एतेन सहायेन सेत्स्यति इच्छितमावयोः ॥ ३६ ॥**

**कन्यास्वभावसुलभमुज्झित्वा साध्वसं सुतनो ! तस्मात् ।**
**निजनेपथ्यं सर्वं झटिति समर्पय एतस्य ॥ ३७ ॥**

**कृत्वा तव रूपं येनायं सुतनो ! व्रजति बहिः ।**
**परिजनविमोहनार्थः परकार्यसमुद्यतो धीरः ॥ ३८ ॥**

**एवं च मया भणिता सहर्षहृदया करोति तं सर्वम् ।**
**अथ द्वावपि निलीनौ पुनरपि मदनस्य पृष्ठे ॥ ३९ ॥**

**चित्रगतिरपि च तस्या निशेषं निवेश्य नेपथ्यम् ।**
**उद्घाट्य द्वारमारूढो झटिति शिबिकायाम् ॥ ४० ॥**

**अथ तस्मिन् गते लोके निःशब्दं ज्ञात्वा तं भवनम् ।**
**भणिता च मयैषा सुन्दरि ! किमिदानीं कर्तव्यम् ? ॥ ४१ ॥**

---

**१. सेत्स्यति=सिद्धं भविष्यति । २. साध्वसं=भयम् । ३. बहिः । ४. निवेश्य । ५. द्वारम् ।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओणयंमुहीए[1] तीए सज्झसवसकंपमाणगत्ताए[2] ।
कहकहवि हु उल्लविओ खलंतअव्वत्तवाणीए ॥ ४२ ॥

गुरुविरहपीडियाए पिययम ! तं पाविओ तुडिवसेण ।
कुणसु सयं जं जुत्तं सरणम्मि समागया तुज्झ ॥ ४३ ॥ युग्मम् ॥

एवं तीए भणिए गंधव्वविहीए सा मए बाला ।
परिणीया तं मयणं देवं काऊण सक्खिणयं[3] ॥ ४४ ॥

अवणित्तु[4] कमेण तओ सज्झसमेईइ विविहवयणेहिं ।
खणमेगं रमिऊणं सुत्तो आलिंगिऊण तयं ॥ ४५ ॥

निद्दाविगमे य मए वज्जरियं सुयणु ! वच्चिमो इण्हि ।
एरिसमायरिऊणं न हु जुत्तं अच्छिउं एत्थ ॥ ४६ ॥

दीहं नीससिएणं अह भणियं तीई हिययदइयाए ।
हा अज्जउत्त[5] ! जुत्तं कमपत्तं आसि मह मरणं ॥ ४७ ॥

---

**अवनतमुखया तया साध्वसवशकम्पमानगात्रया ।**
**कथंकथमपि खलूल्लपितः खलदव्यक्तवाचा ॥ ४२ ॥**

**गुरुविरहपीडितया प्रियतम ! त्वं प्रापितो दैववशेन ।**
**कुरु स्वयं यद्युक्तं शरणं समागता तव ॥ ४३ ॥ युग्मम् ॥**

**एवं तस्या भणिते गान्धर्वविधिना सा मया बाला ।**
**परिणीता तं मदनं देवं कृत्वा साक्षिकम् ॥ ४४ ॥**

**अपनीय क्रमेण ततः साध्वसमेतस्या विविधवचनैः ।**
**क्षणमेकं रङ्क्त्वा सुप्त आलिङ्ग्य तकाम् ॥ ४५ ॥**

**निद्राविगमे च मया कथितं सुतनो ! व्रजाव इदानीं ।**
**ईदृशमाचर्य न हु युक्तमासितुमत्र ॥ ४६ ॥**

**दीर्घं निश्वस्याऽथ भणितं तया हृदयदयितया ।**
**हा आर्यपुत्र ! युक्तं क्रमप्राप्तमासीत् मम मरणम् ॥ ४७ ॥**

---

१. अवनतमुखया तया । २. गत्तं=गात्रं=शरीरम् । ३. साक्षिकम् । ४. अपनीय=दूरीकृत्य।
५. आर्यपुत्र ! ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्झ निमित्ते पाविसि सामिय ! जं गरुयआवइं इण्हि ।
नहवाहणो पयंडो[1] विज्जाबलदप्पिओ[2] तहय ॥ ४८ ॥

नासंताणवि अम्हं न नाह ! सरणं तु विज्जए किंचि ।
ता तुह वइरिणिरूवा जाया परमत्थओ अहयं ॥ ४९ ॥

तुहविरहतावियाए न आसि मह सामि ! तारिसं दुक्खं ।
जं तुह नाह ! विवत्तिं[3] संभाविय इण्हि संजायं ॥ ५० ॥

लद्धोवि नाह ! कहवि हु मज्झ अउन्नाए होसि न हु इण्हिं ।
पुन्नरहियाण अहवा पत्तंपि हु विहडए[4] सहसा ॥ ५१ ॥

भो सुप्पइट्ठ ! एवं भणिउं अवलम्बिऊण मह कंठे ।
गुरुदुक्खनिब्भराए रुन्नं अह तीए बालाए ॥ ५२ ॥

तत्तो य मए भणियं सुंदरि ! किं सोयमसरिसं वहसि ? ।
लद्धं जं लहिअव्वं इण्हिं जं होउ तं होउ ॥ ५३ ॥

---

**मम निमित्ते प्राप्नोषि स्वामिन् ! यद्गुरुकापदमिदानीम् ।**
**नभोवाहनः प्रचण्डो विद्याबलदर्पितस्तथा च ॥ ४८ ॥**

**नश्यतोरपि आवयोर्न नाथ ! शरणं तु विद्यते किञ्चित् ।**
**तस्मात् तव वैरिणीरूपा जाता परमार्थतोऽहकम् ॥ ४९ ॥**

**तवविरहतप्ताया नासीत् मम स्वामिन् ! तादृशं दुःखम् ।**
**यत्तव नाथ ! विपत्तिं संभाव्येदानीं संजातम् ॥ ५० ॥**

**लब्धोऽपि नाथ ! कथमपि खलु मम अपुन्याया भवसि न खल्विदानीम् ।**
**पुन्यरहितानामथवा प्राप्तमपि खलु विघटते सहसा ॥ ५१ ॥**

**भोः सुप्रतिष्ठ ! एवं भणित्वा अवलम्ब्य मम कण्ठे ।**
**गुरुदुःखनिर्भरया रुदितमथ तया बालया ॥ ५२ ॥**

**ततश्च मया भणितं सुन्दरि ! किं शोकमसदृशं वहसि ? ।**
**लब्धं यल्लब्धव्यमिदानीं यद्भवतु तद्भवतु ॥ ५३ ॥**

१. प्रचण्डः। २. दप्पिओ=दृप्तः । ३. विपत्तिः । ४. विघटते=नश्यति ।


Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तुह संगमरहियाणं मरणं जइ होज्ज, होज्ज ता दुक्खं ।
इण्हि पुणम्ह सुंदरि ! मरणेवि हु नत्थि दुक्खंति ॥ ५४ ॥

किञ्च । एसो अचिंतिओवि हु जह जाओ संगमो सह तुमाए[1] ।
तह चेव मा कयावि हु अन्नंपि हु सोहणं होज्जा ॥ ५५ ॥

कीरउ ताव उवाओ अहलो जइ होइ होउ, को दोसो ? ।
मंचयवडियाण पुणो तहट्ठिया चेव भूमित्ति ॥ ५६ ॥

नहवाहणखयरं तं दट्ठूण मए इमं कयं सुयणु ! ।
भवियव्वयाए दिट्ठं होज्जा जं किंचिमह उचियं ॥ ५७ ॥

[2]अब्भुवगयं हि मरणं नासिज्जउ तहवि ताओ खयराओ ।
[3]जलचव्वणुज्जयाणं मा कहवि हु एइ गुंलओवि[4] ॥ ५८ ॥

ता सुयणु ! मुंच सोयं वच्चामो रयणसंचए ताव ।
कालोचियं च पच्छा दिट्ठं दिट्ठं करिस्सामो ॥ ५९ ॥

---

तव सङ्गमरहितानां मरणं यदि भवेत्, भवेत्तस्मात् दुःखम् ।
इदानीं पुनरावयोः सुन्दरि ! मरणेऽपि खलु नास्ति दुःखमिति ॥ ५४ ॥

किञ्च एषोऽचिन्तितोऽपि हु यथा जातस्सङ्गमः सह त्वया ।
तथा चैव माम् कदाचिदपिखल्वन्यदपि हु शोभनं भवेत् ॥ ५५ ॥

क्रियतां तावदुपायो, अफलो यदि भवति भवतु, को दोषः ।
मञ्चकपतितानां पुनस्तथास्थितैव भूमीति ॥ ५६ ॥

नभोवाहनखेचरं तं दृष्टवा मयेदं कृतं सुतनो ! ।
भवितव्यतायां दृष्टं भवेत् यत्किञ्चिदथोचितम् ॥ ५७ ॥

अभ्युपगतं हि मरणं नाश्यतां तथापि तस्मात्खेचरात् ।
जलचर्वणोद्यतानां मा कथमपि खलु एति गुडकोऽपि ॥ ५८ ॥

तस्मात् सुतनो ! मुञ्च शोकं व्रजावो रत्नसञ्चयं तावत् ।
कालोचितश्च पश्चात् दृष्टं दृष्टं करिष्यावः ॥ ५९ ॥

---

१. त्वया । २. अभ्युपगतम्=अङ्गीकृतम् । ३. जलचर्वणोद्यतानाम् । ४. गुडकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य तीए समयं नीहरिओ पणमिऊण रइनाहं ।
अह तीए कंठलग्गो उप्पइओ गयणमग्गम्मि ॥ ६० ॥

रागंधयारमोहियनराण दट्ठुंव तारिसं चरियं ।
दूरं नासियतिमिरो अह सहसा उग्गओ सूरो ॥ ६१ ॥

तत्तो य तीए भणियं सामिय ! गाढं पिवासिया[1] अहयं ।
सूसइ गलयं अज्जवि केद्दूरे[2] अम्ह तं नयरं ? ॥ ६२ ॥

दूरे अज्जवि नयरं सुंदरि ! इत्थ वणनिकुंजम्मि ।
ओयरिमो जं होही इत्थ जलं ऍव[3] मे भणिए ॥ ६३ ॥

तत्तो दोवि जणाइं अवइन्नाइं[4] वणम्मि रम्मम्मि ।
सीयलजलपडिपुन्नं अह दिट्ठं तत्थ निज्झरणं ॥ ६४ ॥

पाऊण जलं अह सा पत्तलतरुछाहियाए उवविट्ठा ।
काउं सरीरचिंतं अहमवि तत्थेव आयाओ ॥ ६५ ॥

---

ततश्च तया समकं निःसृतः प्रणम्य रतिनाथम् ।
अथ तस्याः कण्ठलग्न उत्पतितो गगनमार्गे ॥ ६० ॥

रागान्धकारमोहितनराणां दृष्टमिव तादृशं चरित्रम् ।
दूरं नष्टतिमिरोऽथ सहसा उद्गतःसूरः ॥ ६१ ॥

ततश्च तया भणितं स्वामिन् ! गाढं पिपासिताऽहकम् ।
शुष्यति गलकंऽद्यापि कियद्दूरं आवयोस्तं नगरम् ? ॥ ६२ ॥

दूरेऽद्यापि नगरं सुन्दरि ! अत्र वननिकुञ्जे ।
अवतरावो यद्भविष्यत्यत्र जलमेवं मया भणितम् ॥ ६३ ॥

ततो द्वावपि जनाववतीर्णौ वने रम्ये ।
शीतलजलप्रतिपूर्णमथ दृष्टं तत्र निर्झरणम् ॥ ६४ ॥

पीत्वा जलमथ सा पत्रलतरुच्छायायामुपविष्टौ ।
कृत्वा शरीरचिन्तामहमपि तत्रैवाऽऽयातः ॥ ६५ ॥

---

१. पिपासिता=तृषिता । २. कियद्दूरम् । ३. एवमे=एवं मया । ४. अवतीर्णौ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भो सुप्पइट्ठ ! एवं खणंतरं वीसमामि जा तत्थ ।
ताव य निसुओ[1] सद्दो आसन्ने केलिगेहम्मि ॥ ६६ ॥

जाया सत्थसरीरा सुंदरि ! वच्चामु इण्हिं नियठाणं ।
एयं सद्दं सोउं एस विगप्पो महुप्पन्नो ॥ ६७ ॥

नूणं चित्तगइस्स य एसो सद्दो न होइ अन्नस्स ।
एयम्मि वणनिगुंजे अहवा को संभवो तस्स ? ॥ ६८ ॥

एवं विचिंतियम्मी कयलीगेहाओ ताओ गुविलाओ[2] ।
तरुणमहिलासमेओ चित्तगई झत्ति नीहरिओ ॥ ६९ ॥

तत्तो गंतूण मए सहरिसमालिंगिओ सनेहेणं ।
अहमवि तेणं, तत्तो उवविट्ठा दोवि तत्थेव ॥ ७० ॥

तत्तो य मए भणियो नीहरिएणं तु मयणगेहाओ ।
किं मित्त ! तुमे विहियं विमोहिओ परियणो[3] कहवा ? ॥ ७१ ॥

---

**भोः सुप्रतिष्ठ ! एवं क्षणान्तरं विशाम्यामि यावत्तत्र ।**
**तावच्च निश्रुतश्शब्द आसन्ने कदलिगृहे ॥ ६६ ॥**

**जाता स्वस्थशरीरा सुन्दरि ! व्रजाव इदानीं निजस्थानं ।**
**एतच्छब्दं श्रुत्वा एष विकल्पो ममोत्पन्नः ॥ ६७ ॥**

**नूनं चित्रगतेश्चैष शब्दो न भवत्यन्यस्य ।**
**एतस्मिन् वननिकुञ्जेऽथवा कः संभवस्तस्य ? ॥ ६८ ॥**

**एवं विचिन्तिते कदलीगेहात्तस्मात् गुपिलात् ।**
**तरुणमहिलासमेतश्चित्रगति - झटिति निःसृतः ॥ ६९ ॥**

**ततो गत्वा मया सहर्षसमालिङ्गितः स स्नेहेन ।**
**अहमपि तेन, तत उपविष्टौ द्वावपि तत्रैव ॥ ७० ॥**

**ततश्च मया भणितो निःसृतेन तु मदनगेहात् ।**
**किं मित्रं ! त्वया विहितं विमोहितः परिजनःकथं वा ? ॥ ७१ ॥**

---

१. श्रुतः । २. गुपिलं=गहनम् । ३. परिजनः=स्वजनः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कहव तुमं निच्छुट्टो[1] का वा एसा मणोहरागारा ।
महिला, कत्थ व पत्ता, साहसु मह सव्वमेयंति ? ॥ ७२ ॥

चित्तगई भणइ तओ निसुणसु भो चित्तवेग ! एगमणो ।
काऊण कणगमालारूवमहं ताव नीहरिओ ॥ ७३ ॥

आरूढो सिबियाए पत्तो य कमेण वरसमीवम्मि ।
विज्जाहरिगणगिज्जंतविविहवरमंगलुप्पीलो[2] ॥ ७४ ॥

लग्गे समागयम्मी गहिओ मह करयलो सहरिसेण ।
नहवाहणेण, तत्तो कमेण वत्तो य वीवाहो ॥ ७५ ॥

नहवाहणस्स पुरओ नट्टं[3] विविहंगहारसोहिल्लं ।
पारद्धं वारविलासिणीहिं वरगेयसंवलियं ॥ ७६ ॥

एत्थंतरम्मि एगा जुवई आगम्म करयलं नियय़ं ।
मुद्दारयणसमेयं दंसइ मह सज्झसुप्फुण्णा[4] ॥ ७७ ॥

---

कथं वा त्वं निर्मुक्तः का वा एषा मनोहराकारा ।
महिला, कुत्र वा प्राप्ता, कथय मम सर्वमेतदपि ? ॥ ७२ ॥

चित्रगति-र्भणाति ततो निशृणु भोश्चित्रवेग ! एकमनाः ।
कृत्वा कनकमालारूपमहं तावत् निस्सृतः ॥ ७३ ॥

आरूढः शिबिकायां प्राप्तश्च क्रमेण वरसमीपे ।
विद्याधरीगणगीयमानविविधवरमङ्गलोप्पीलः ॥ ७४ ॥

लग्ने समागते गृहीतो मम करतलः सहर्षेण ।
नमोवाहनेन ततः क्रमेण वृत्तश्च विवाहः ॥ ७५ ॥

नभोवाहनस्य पुरतो नाटयम् विविधाङ्गहारशोभावन्तम् ।
प्रारब्धं वारविलासीभिर्वरगेयसंवलितम् ॥ ७६ ॥

अत्रान्तरैका युवती आगम्य करतलं निजकम् ।
मुद्रारत्नसमेतं दर्शयति मम साध्वसोत्फुण्णा ॥ ७७ ॥

---

१. निर्मुक्तः । २. उप्पीलो=समूहः । ३. नाट्यम् । ४. उप्फुण्णा=पूर्णा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं दट्ठुं चिंतियं मे एसा सा मज्झ संतिया मुद्दा ।
हत्थिभयमोइयाए जा गहिया तीए कन्नाए ॥ ७८ ॥

अइगुरुयं अंगु[1]ट्ठिं मणयं ओ[2]सारिउं मए तत्तो ।
[3]अवलोइया य एसा सहसा अह पच्चभिन्नाया ॥ ७९ ॥

एसा सा मह दइया हत्थिभए जा विमोइया तइया ।
विहिणो निओगओ कह जाया हग्गावणापच्छं ॥ ८० ॥

पेच्छ अइदुग्घडंपि हु सहसा कह मज्झ दंसणं जायं ? ।
अणुकूलो अहव विही किंवा तं जं नवि करेइ ? ॥ ८१ ॥

एवं विचिंतिऊणं निदंसिओ नियकरो मए तीए ।
पुव्वं समप्पियाए तीए मुद्दाए संजुत्तो ॥ ८२ ॥

क[4]न्ने होउ तीए आसन्नसहीय साहियं एयं ।
[5]अवनिद्दएण [6]दुक्खइ सीसं किर कणगमालाए ॥ ८३ ॥

---

**तं दृष्ट्वा चिन्तितं मयैषा सा मम सत्का मुद्रा ।**
**हस्तिभयमोचितया या गृहीता तया कन्यया ॥ ७८ ॥**

**अतिगुरुकमङ्गुलीयकं मनाक् अपसार्य मया ततः ।**
**अवलोकिता चैषा सहसाऽथ प्रत्यभिज्ञाता ॥ ७९ ॥**

**एषा सा मम दयिता हस्तिभये या विमोचिता तदा ।**
**विधेर्नियोगतः कथं जाता हतापदपश्चात् ॥ ८० ॥**

**प्रेक्षस्व अतिर्दुघटमपि खलु सहसा कथं मम दर्शनं जातम् ।**
**अनुकूलोऽथवा विधिः किंवा तत् यन्नाऽपि करोति ? ॥ ८१ ॥**

**एवं विचिन्त्य निदर्शितो निजकरो मया तस्याः।**
**पूर्वं समर्पितया तया मुद्रया संयुक्तः ॥ ८२ ॥**

**कर्णे भूत्वा तयाऽऽसन्नसख्यै कथितमेतद् ।**
**अपनिद्रकेण दुःखयति शीर्षं किल कनकमालायाः ॥ ८३ ॥**

१. अङ्गुलीयकम्। २. अपसार्य। ३. अवलोकिता। ४. कर्णे। ५. अपनिद्रकेण = निद्राया अभावेन । ६. दुःखं करोति=दुःखयति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता एसा खणमेगं असोगवणियाइ सुवइ[1] लग्गत्ति ।
तुम्हे एत्थ ठियाओ जहासुहं चेव अच्छाह ॥ ८४ ॥

वत्ते पुण पेक्खणए जाणाविज्जाउ[2] अम्ह सिग्घंति ।
एवं भणिउं तीए उट्ठविओ चित्तवेग ! अहं ॥ ८५ ॥

तत्तो तीए समयं पवरघरुज्जाणतिलयभूयाए ।
वियसंतसुरहिमंजरिमयरंदामोयसुहयाए[3] ॥ ८६ ॥

पत्तो रमणीयाए असोगवणियाए सहरिसं तीए ।
दिन्नम्मी आसणम्मी उवविट्ठो, सावि मह पुरओ ॥ ८७ ॥

अह सा सज्झसभरिया जाहे न चएइ किंचि वज्जरिउं ।
ताहे नियपउत्ती सव्वावि हु चित्तवेग ! मए ॥ ८८ ॥

पुव्वं जा तुह कहिया तीएवि हु सा मए समासेण ।
कहिया य जाव इत्थं इत्थीरूवेण आयाओ ॥ ८९ ॥

---

**तस्मादेषा क्षणमेकमशोकवाटिकायां स्वपिति अघटमानमिति ।**
**यूयमत्र स्थिता यथासुखमेव आस्ध्वम् ॥ ८४ ॥**

**वृत्ते पुनः प्रेक्षणके ज्ञाप्यतामस्माकं शीघ्रमिति ।**
**एवं भणित्वा तया उत्थापितश्चित्रवेग ! अहं ॥ ८५ ॥**

**ततस्तया समकं प्रवरगृहोद्यानतिलकभूतायां ।**
**विकसत्सुरभिमञ्जरिमकरन्दामोदसुभगायां ( सुखदायां ) ॥ ८६ ॥**

**प्राप्तो रमणीयायामशोकवाटिकायां सहर्षं तया ।**
**दत्तेऽऽसन उपविष्टः साऽपि मम पुरतः ॥ ८७ ॥**

**अथ सा साध्वसभृता यदा न शक्नोमि किञ्चित् कथयितुं ।**
**तदा निजकप्रवृत्तिः सर्वाऽपि खलु चित्रवेग ! मया ॥ ८८ ॥**

**पूर्वं या तव कथिता तस्या अपि खलु सा मया समासेन ।**
**कथिता च यावदत्र स्त्रीरूपेणाऽऽयातः ॥ ८९ ॥**

---

१. स्वपिति । २. ज्ञाप्यताम् । ३. सुहया=सुभगा सुखदा वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुंदरि ! तुज्झ विओगे गुरुदुक्खं माणसं मए पत्तं ।
भमिओ तुज्झ निमित्ते सव्वेसुवि खयरनयरेसु ॥ ९० ॥

ता लज्जं मोत्तूणं साहसु किं तुज्झ नामधेयंति ।
कम्मि कुले तुह जम्मो किंवा नामं तु ते पिउणो ? ॥ ९१ ॥

कहवि पुरे इह पत्ता पभूयलोयस्स [1]मज्झयारम्मी ।
इत्थीरूवोवि अहं विन्नाओ सुयणु ! कह तुमए ? ॥ ९२ ॥

एवं च मए भणिया कहवि हु उज्झित्तु सज्झसं बाला ।
मणयं खलंतवयणा अह एवं भणिउमाढत्ता ॥ ९३ ॥

[2]आयन्नसु मणवल्लह ! कहेमि सव्वंपि जं तुमे पुट्ठं ।
तुम्ह सुपसिद्धमेव हि नयरं सुरनंदणं ताव ॥ ९४ ॥

तत्थासि सुविक्खाओ पहंजणो नाम खयररायत्ति ।
तस्स य पवरो मंती अइकुसलो नीइसत्थेसु ॥ ९५ ॥

---

सुन्दरि ! तव वियोगे गुरुदुःखं मानसं मया प्राप्तम् ।
भ्रान्तस्तव निमित्ते सर्वेष्वपि खेचरनगरेषु ॥ ९० ॥

तस्माल्लज्जां मुक्त्वा कथय किं तव नामधेयमिति ।
कस्मिन् कुले तव जन्म किंवा नाम तु तव पितुः ? ॥ ९१ ॥

कथमपि पुर इह प्राप्ता प्रभूतलोकस्य मध्ये ।
स्त्रीरूपोप्यहं विज्ञातः सुतनो ! कथं त्वया ? ॥ ९२ ॥

एवंच मया भणिता कथमपि खलूज्झित्वा साध्वसं बाला ।
मनाग् खलत्वचनाऽथैवं भणितुमारब्धा ॥ ९३ ॥

आकर्णय मनोवल्लभ ! कथयामि सर्वमपि यत् त्वया पृष्टम् ॥
युष्माकं सुप्रसिद्धमेव हि नगरं सुरनन्दनं तावत् ॥ ९४ ॥

तत्राऽऽसीत् सुविख्यातः प्रभञ्जनो नामा खचरराजेति ।
तस्य च प्रवरो मन्त्री अतिकुशलो नीतिशास्त्रेषु ॥ ९५ ॥

---

१. मध्ये । २. आकर्णय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पहुणो य दढं भत्तो बुद्धीए चउव्विहाए संपन्नो ।
रन्नो विस्सासपयं आसि पुरा मेहनाउत्ति ॥ ९६ ॥ युग्मम् ॥

तस्स य घरिणी पवरा पइव्वया रूवसंवयाकलिया ।
उत्तमकुलप्पसूया इंदुमई नाम आसित्ति ॥ ९७ ॥

तीए सह विसयसोक्खं निसेवमाणस्स मेहनायस्स ।
जाओ सुओ सुरूवो नामेणं असणिवेगोत्ति ॥ ९८ ॥

अब्भसियकलानियरो साहियविज्जो गुणाण आवासो ।
जणयाण कयाणंदो कमसो सो जोव्वणं पत्तो ॥ ९९ ॥

एत्तो य दक्खिणाए इमीए सेढीए कुंजरावत्ते ।
एयम्मि चेव नयरे चंदगई आसि वरखयरो ॥ १०० ॥

तस्स य मणवल्लहिया महिला नामेण मयणरेहत्ति ।
कालेण ताण पुत्तो अमियगई नाम संजाओ ॥ १०१ ॥

---

**प्रभौ च दढं भक्तो बुद्धया चतुर्विधया संपन्नः ।**
**राज्ञो विश्वासपद-मासीत् पुरा मेघनाद इति ॥ ९६ ॥ युग्मम् ॥**

**तस्य च गृहिणी प्रवरा पतिव्रता रूपसंपत्कलिता ।**
**उत्तमकुलप्रसूता इन्दुमती नामाऽऽसीदिति ॥ ९७ ॥**

**तया सह विषयसौख्यं निसेवमानस्य मेघनादस्य ।**
**जातः सुतः सुरुपो नाम्ना अशनिवेग इति ॥ ९८ ॥**

**अभ्यसितकलानिकरः साधितविद्यो गुणानामावासः ।**
**जनकयोः कृतानन्दः क्रमशः स यौवनं प्राप्तः ॥ ९९ ॥**

**इतश्च दक्षिणायामस्यां श्रेण्यां कुञ्जरावर्त्ते ।**
**एतस्मिन्नेव नगरे चंद्रगतिरासीत् वरखेचर ॥ १०० ॥**

**तस्य च मनोवल्लभिका महिला नाम्ना मदनरेखेति ।**
**कालेण तयोः पुत्रोऽमितगतिः नामा सञ्जातः ॥ १०१ ॥**



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

धूया चंपयगोरा चंपयमालत्ति तदणुसंजाया ।
पत्ता य जोव्वणं सा विज्जाहरकुमरमणहरणं ॥ १०२ ॥

अह सा चंपगमाला वरिया सुरनंदणम्मि नयरम्मि ।
मंतिसुयअसणिवेगस्स, सायरं तेण परिणीया ॥ १०३ ॥

नीया नियए नयरे सह तीए सो विसालनयणाए ।
[1]परपीईए जुत्तो भुंजइ माणुस्सए भोगे ॥ १०४ ॥

अह अन्नया कयाइवि मंतिपयं देवि[2] असणिवेगस्स ।
नियतणयस्स तत्तो विरत्तचित्तो महासत्तो ॥ १०५ ॥

रन्ना पहंजणेणं सहिओ संजायगरुयसंवेगो ।
सुगुरुण पायमूले पव्वइओ मेहनाओ सो ॥ १०६ ॥

खयरो वि[3] असणिवेगो चंपगमालाए हिययदइयाए ।
समयं गिहवासफलं अणुहवई विसयसोक्खंति ॥ १०७ ॥

---

**दुहिता चम्पकगौरा चम्पकमालेति तदनुसञ्जाता ।**
**प्राप्ता च यौवनं सा विद्याधरकुमारमनोहरणम् ॥ १०२ ॥**

**अथ सा चम्पकमाला वृत्ता सुरनन्दने नगरे ।**
**मंत्रीसुताऽशनिवेगस्य सादरं तेन परिणीता ॥ १०३ ॥**

**नीता निजके नगरे सह तया स विशालनयनया ।**
**पराप्रीत्या युक्तो भुनक्ति मानुष्यान् भोगान् ॥ १०४ ॥**

**अथान्यदा कदाचिदपि मन्त्रिपदं दत्त्वाऽशनिवेगस्य ।**
**निजकतनयस्य ततो विरक्तचित्तो महासत्त्वः ॥ १०५ ॥**

**राज्ञा प्रभञ्जनेन सहितः सञ्जातगुरुकसंवेगः ।**
**सुगुरुणाम् पादमूले प्रव्रजितो मेघनादः सः ॥ १०६ ॥**

**खेचरश्चाशनिवेगश्चम्पकमालया हृदयदयितया ।**
**समकं गृहवासफलमनुभवति विषयसौख्यमिति ॥ १०७ ॥**

१. परा=उत्कृष्टा । २. दत्त्वा । ३. य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह चंपगमालाए कमेण पुत्ता ओ पंच उप्पन्ना ।
ताणं पिययम! निसुणसु कमेण एयाइं नामाइं ॥ १०८ ॥

वज्जगई वाउगई चंदो तह चंदणो सुसीहो य ।
पंचण्हं पुत्ताणं उवरिं धूया अहं जाया ॥ १०९ ॥

जम्मदिणे मह पिउणा सुयजम्ममहूसवाओ अब्भहिओ ।
काराविओ सहरिसं महोच्छवो गरुयनेहेण ॥ ११० ॥

वत्ते य बारसाहे नामं तु पियंगुमंजरी मज्झ ।
विहियं कमेण अहयं देहोवचएण[1] वड्ढंता ॥ १११ ॥

जणयाण कयाणंदा लालिज्जंता य धाइपणगेण[2] ।
पत्ता कुमारिभावं कयपरियणलोयणाणंदा ॥ ११२ ॥ युग्मम् ॥

जुवईजणजोग्गाओ नट्टाईया कलाओ सयलाओ ।
गहियाओ कमेण तओ पत्ता हं जोव्वणं पढमं ॥ ११३ ॥

---

अथ चम्पकमालायाः क्रमेण पुत्रा ओ पञ्चोत्पन्नाः ।
तेषाम् प्रियतम ! निश्रृणु क्रमेणैतानि नामानि ॥ १०८ ॥

वज्रगति-र्वायुगतिश्चन्द्रस्तथा चन्दनः सुशिखश्च ।
पञ्चानां पुत्राणामुपरि दुहिताऽहं जाता ॥ १०९ ॥

जन्मदिवसे मम पित्रा सुतजन्ममहोत्सवादभ्यधिकः ।
कारितः सहर्षं महोत्सवो गुरुकस्नेहेन ॥ ११० ॥

वृत्ते च द्वादशाह्नि नाम तु प्रियङ्गुमञ्जरी मम ।
विहितं क्रमेणाऽहकं देहोपचयेन वर्धमाना ॥ १११ ॥

जनकयोः कृतानन्दा लाल्यमाना च धात्रीपञ्चकेन ।
प्राप्ता कुमारिभावं कृतपरिजनलोचनानन्दा ॥ ११२ ॥ युग्मम् ॥

युवतीजनयोग्या नर्त्तनादिकाः कलाः सकलाः ।
गृहीताः क्रमेण ततः प्राप्ताऽहं यौवनं प्रथमम् ॥ ११३ ॥

---

१. उपचयः=वृद्धिः । २. पणगं=पञ्चकम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुसिणिद्धसहीसहिया रमामि विविहासु तत्थ कीलासु ।
वरचित्तपत्तछिज्जयन[1]च्चणगंधव्ववीणासु ॥ ११४ ॥

तत्थ य पियथम! अहयं सहावओ पुरिसवेसिणी[2] जाया ।
वरया य मज्झ बहवे इंति तहिं खयरपवराण ॥ ११५ ॥

वररूवकलारिद्धीओ तेसिं, जणओवि मज्झ साहेइ ।
न य कत्थवि मह ईच्छा जायइ तो ते निवारेइ ॥ ११६ ॥

जो जो आवइ[3] वरओ तं तं नेच्छामि जावय अहं तु ।
ताहे य असणिवेगो मज्झ पिया सोयमावन्नो ॥ ११७ ॥

दट्ठूणं तं ससोगं चंपगमाला उ भणइ नियदइयं ।
कीस[4]ससोगो सामिय! दीससि चिंताउरो धणियं ? ॥ ११८ ॥

तत्तो य तेण भणियं मह धूया ताव जोव्वणं पत्ता ।
न य इच्छइ किंपि वरं सुंदरि! गरुई इमा चिंता ॥ ११९ ॥

---

सुस्निग्धसखीसहिता रमे विविधासु तत्र क्रीडाषु ।
वरचित्रप्राप्तछेद्यकनर्तनगान्धर्ववीणासु ॥ ११४ ॥

तत्र च प्रियतम ! अहकं स्वभावतः पुरुषद्वेषिणी जाता ।
वरकाश्च मम बहवेऽऽयन्ति( स्म ) तत्र खेचरप्रवराणाम् ॥ ११५ ॥

वररूपकलार्द्धयस्तेषां जनकोऽपि माम् कथयति ।
न च कुत्राऽपि ममेच्छा जायते ततस्तान्निवारयति ॥ ११६ ॥

यो यो आयाति वरकस्तं तं नेच्छामि यावच्चाहन्तु ।
तदा चाशनिवेगो मम पिता शोकमापन्नः ॥ ११७ ॥

दृष्ट्वा तं सशोकं चंपकमाला तु भणति निजदयितम् ।
कस्मात् सशोकः स्वामिन् ! पश्यसि चिन्तातुरो गाढम् ॥ ११८ ॥

ततश्च तेन भणितं मम दुहिता तावद्यौवनं प्राप्ता ।
न चेच्छति किमपि वरं सुन्दरि ! गुर्वी इयं चिन्ता ॥ ११९ ॥

---

१. छिज्जयं=छेद्यकम् । २. वेसिणा=द्वेषिणी । ३. आयाति । ४. कीस=कस्मात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूया जोव्वणपत्ता वररहिया कुलहरम्मि वसमाणा ।
तं किंपि कुणइ कज्जं लहइ कुलं [1]मइलणं जेण ॥ १२० ॥

को होज्ज वरो धूयाए हंदि ! मणइच्छिउत्ति चिंताए ।
सुदंरि! न एइ निद्दा रयणीएवि मह पसुत्तस्स ॥ १२१ ॥

एयं निसम्म वयणं चंपगमालावि ताहि मे जणणी ।
मज्झ निमित्ते सुंदर! जाया सोगाउरा धणियं ॥ १२२ ॥

अन्नदिणम्मि पियसही पभायसमयम्मि धारिणीनामा ।
सुज्जापहस्स धूया समागया मज्झ पासम्मि ॥ १२३॥

भणइ य किमज्ज पियसहि! [2]हियव्व [3]विक्कियव्व [4]वुन्नव्व ।
दीससि अन्नमणा विव विद्दाणमुहा ससोगिल्ला ॥ १२४ ॥

चिरआगयावि पियसहि! कीस न संभासिया अहं तुमए ?।
ता भणसु सोगकारणमेयं जं तुज्झ संजायं ? ॥ १२५ ॥

---

**दुहिता यौवनप्राप्ता वररहिता कुलगृहे वसन्ती ।**
**तं कमपि करोति कार्यं लभते कुलं मलिनतां येन ॥ १२० ॥**

**को भवेद्वरो दुहितु-र्हन्दि मन-इच्छितमिति चिन्तायाम् ।**
**सुन्दरि ! नैति निद्रा रजन्यामपि मम प्रसुप्तस्य ॥ १२१ ॥**

**एतद् निशम्य वचनं चंपकमालाऽपि तदा मे जननी ।**
**मम निमित्ते सुन्दर ! जाता शोकातुरा गाढम् ॥ १२२ ॥**

**अन्यदिने प्रियसखी प्रभातसमये धारिणीनामा ।**
**सूर्याप्रभस्य दुहिता समागता मम पार्श्वे ॥ १२३ ॥**

**भणति च किमद्य प्रियसखे ! हृतेव विकृतेव वुन्नेव ।**
**दृश्यसे अन्यमना इव विद्राणमुखी सशोका ॥ १२४ ॥**

**चिरमागतापि प्रियसखे ! कस्मान्न संभाषिताऽहं त्वया ? ।**
**तस्माद् भण शोककारणमेतद् यत् तव सञ्जातम् ? ॥ १२५ ॥**

१. मलिनताम् । २. हृतेव। ३ विकृतेव । ४. वुन्ना=भीता उद्विग्ना च ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च पियसहीए भणियाए मए तया समुल्लवियं ।
सम्ममुवलक्खियं ते धारिणि! निसुणेसु वुत्तंतं ॥ १२६ ॥

तुज्झेहिं समं पियसहि ! कीलित्ता ता [१]वियालसमयम्मि ।
नाणाविहकीलाहिं समागया निययगेहम्मि ॥ १२७ ॥

उवरिम[२]भूमीइ तओ नाणामणिरयणहेममइयम्मि ।
पल्लंके पासुत्ता पवराए हंसतूलीए ॥ १२८ ॥

अह [३]अड्ढरत्तसमए दुंदुहिसद्दं सुणित्तु पडिबुद्धा ।
पिच्छामि गयणमग्गं दिव्वविमाणेहिं संकिन्नं ॥ १२९ ॥

दट्ठूण देवनिवहं उज्जोइयगयणमंडलं तत्थ ।
सुरसुंदरिगणसहियं चिंता मे एरिसा जाया ॥ १३० ॥

कत्थेरिसाइं मन्ने दिव्वविमाणाइं दिट्ठपुव्वाइं ।
एवंविहा य देवा देवीओ कत्थ दिट्ठाओ ॥ १३१ ॥

---

**एवञ्च प्रियसख्या भणितया मया तदा समुल्लपितम् ।**
**सम्यगुपलक्षितं ते धारिणी ! निश्रृणु वृतान्तम् ॥ १२६ ॥**

**युष्माभिस्सह प्रियसखे ! क्रीडित्वा तस्माद्विकालसमये ।**
**नानाविधक्रीडाभिः समागता निजकगेहे ॥ १२७ ॥**

**उपरितनभूमौ ततो नानामणिरत्नहेममये ।**
**पल्यंके प्रसुप्ता प्रवरायां हंसतूलिकायां ॥ १२८ ॥**

**अथार्धरात्रसमये दुन्दुभिशब्दं श्रुत्वा प्रतिबुद्धा ।**
**प्रेक्षे गगनमार्गं दिव्यविमानैः सङ्कीर्णम् ॥ १२९ ॥**

**दृष्टवा देवनिवहमुद्योतितगगनमण्डलं तत्र ।**
**सुरसुन्दरीगणसहितं चिन्ता ममेदृशा जाता ॥ १३० ॥**

**कुत्रेदृशानि मन्ये दिव्यविमानानि दृष्टपूर्वाणि ।**
**एवंविधा च देवा देव्यः कुत्र दृष्टाः ॥ १३१ ॥**

---

१. विकालसमये = सायम् । २. मीए । ३. अर्धरात्रसमये ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं विंचिंतयंती पियसहि! मुच्छावसं अहं पत्ता ।
मुच्छाविरमे तत्तो जाईसरणं[1] समुप्पन्नं ॥ १३२ ॥

संभरिया[2] पुव्वभवा दोन्नि मए मणुयदेवसंबद्धा ।
जह तं निसुणसु धारिणि! सव्वंपि हु वेज्जरिज्जंतं[3] ॥ १३३ ॥

जंबुद्दीवे दीवे सुरगिरिणो उत्तरम्मि पासम्मि ।
एरवयं वरखित्तं इहत्थि तेलोक्कविक्खायं[4] ॥ १३४ ॥

तम्मि य मज्झिमखंडे आरियखित्तम्मि आसि वरनयरं ।
अमरपुरसरिसरूवं पडिवक्खनरिंददुग्गम्मं ॥ १३५ ॥

तिहुअणलच्छीनिलयं इब्भ[5]सहस्सोवसेवियं विउलं।
आकालसुप्पइट्ठं नामेणवि सुप्पइट्ठंति ॥ १३६ ॥ युग्मम् ॥

उवहसियधणयविहवो उवयाररओ य सयललोयस्स ।
देवगुरुपूयणरओ वेच्छल्लयरो[6] य बंधूणं ॥ १३७ ॥

---

**एवं विचिन्तयन्ती प्रियसखे ! मूर्च्छावशाऽहं प्राप्ता ।**
**मूर्च्छाविरमे ततो जातिस्मरणं समुत्पन्नम् ॥ १३२ ॥**

**संस्मृतौः पूर्वभवौ द्वौ मया मनुजदेवसम्बद्धौ ।**
**यथा तं निश्रृणु धारिणि ! सर्वमपि हु कथ्यमानम् ॥ १३३ ॥**

**जम्बूद्वीपे द्वीपे सुरगिरेरुत्तरे पार्श्वे ।**
**ऐरावतं वरक्षेत्रमिहास्ति त्रैलोक्यविख्यातम् ॥ १३४ ॥**

**तस्मिँश्च मध्यखण्डेऽऽर्यक्षेत्रेऽऽसीद् वरनगरम् ।**
**अमरपुरसदृशरूपं प्रतिपक्षनरेन्द्रदुर्गमम् ॥ १३५ ॥**

**त्रिभुवनलक्ष्मीनिलयं इभ्यसहस्त्रोपसेवितं विपुलम् ।**
**आकालसुप्रतिष्ठं नाम्नेति सुप्रतिष्ठमिति ॥ १३६ ॥ युग्मम् ॥**

**उपहसितधनदवैभव उपकाररतश्च सकललोकस्य ।**
**देवगुरुपूजनरक्तो वात्सल्यकरश्च बन्धूनाम् ॥ १३७ ॥**

---

१. जातिस्मरणं=पूर्वभवज्ञानम् । २. संस्मृताः । ३. कथ्यमानम् । ४. त्रैलोक्यविख्यातम्।
५. इभ्यः=श्रेष्ठी । ६. वात्सल्यकरः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्खिन्नदयाकलिओ अग्गाणी[1] सयलवणियसत्थस्स ।
हरिदत्तो नामेणं इब्भो परिवसइ अह तत्थ ॥ १३८ ॥ युग्मम् ॥

निज्जियरइसोहग्गा[2] सीलवई महुरभासिणी दक्खा[3] ।
पाणपिया विणयवई विणयवई भारिया तस्स ॥ १३९ ॥

पंचपयारे विसए तीए समं तस्य अणुहवंतस्स ।
जाओ पहाणपुत्तो वसुदत्तो नाम सुप्रसिद्धो ॥ १४० ॥

ततो विणयवईए कमेण धूयाओ तिन्नि जायाओ ।
निज्जियसुरिंदसुंदररूवाइसएण कलियाओ ॥ १४१ ॥

जेट्ठा सुलोयणत्ति य बीया कन्ना अणंगवईनामा ।
वसुवइनामा तइया तिलोयअच्छेरयब्भूया ॥ १४२ ॥

कमसो वड्ढंतीओ तरुणजणुम्मायकारयं रम्मं ।
अह ताओ पत्ताओ तिन्निवि नवजोव्वणारंभं ॥ १४३ ॥

---

दाक्षिण्यदयाकलितोऽग्रणीः सकलवणिक्सार्थस्य ।
हरिदत्तो नाम्ना इभ्यः परिवसत्यथ तत्र ॥ १३८ ॥ युग्मम् ॥

निर्जितरतिसौभाग्या शीलवती मधुरभाषिणी दक्षा ।
प्राणप्रिया विनयवती विनयवती भार्या तस्य ॥ १३९ ॥

पञ्चप्रकारान् विषयान् तया समं तस्यानुभवतः ।
जातः प्रधानपुत्रो वसुदत्तो नामा सुप्रसिद्धः ॥ १४० ॥

ततो विनयवत्या क्रमेण दुहितरस्तिस्त्रः जाताः ।
निर्जितसुरेन्द्रसुन्दरिरूपातिशयेन कलिताः ॥ १४१ ॥

ज्येष्ठा सुलोचनेति च द्वितीया कन्याऽनङ्गवती नाम्नी ।
वसुमतीनाम्नी तृतीया त्रिलोकाश्चर्याद्भूता ॥ १४२ ॥

क्रमशो वर्धमानास्तरुणजनोन्मादकारकं रम्यम् ।
अथ ताः प्राप्तास्तिस्त्र अपि नवयौवनारम्भम् ॥ १४३ ॥

---

१. अग्रणीः। २. सोहग्गं सौभाग्यम् । ३. दक्षा=चतुरा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन्ना सुलोयणा सा परिणीया मेहलावइपुरीए ।
सागरदत्तसुएणं सुबंधुनामेण वणिएण ॥ १४४ ॥

विजयवईनयरीए सुएण धणभूइसत्थवाहस्स ।
धणवाहणनामेणं विवाहियाऽणंगवइकन्ना ॥ १४५ ॥

सावि हु वसुमइकन्ना नयरीए मेहलावईए ओ ।
धणवइणा परिणीया तणएण समुद्ददत्तस्स ॥ १४६ ॥

अह सो धणवइवणिओ कलासु कुसलो अणंगपडिरूवो ।
समयं तु वसुमईए भुंजइ माणुस्सए भोए ॥ १४७ ॥

वड्ढंतसिणेहाणं ताणं अन्नोन्नरत्तचिताणं ।
नवजोव्वणाण सरसं[1] विसयसुहं सेवमाणाणं ॥ १४८ ॥

गुरुजणविणयरयाणं अवरोप्परविरहदुक्खरहियाणं ।
वच्चंति वासराइं आणंदियबंधुवग्गाणं ॥ १४९ ॥ युग्मम् ॥

---

**कन्या सुलोचना सा परिणीता मेखलावतीपुर्याम् ।**
**सागरदत्तसुतेन सुबन्धुनाम्ना वणिजा ॥ १४४ ॥**

**विजयवतीनगर्यां सुतेन धनभूतिसार्थवाहस्य ।**
**धनवाहननाम्ना विवाहिताऽनङ्गवती कन्या ॥ १४५ ॥**

**साऽपि खलु वसुमती कन्या नगर्यां मेखलावत्यां ओ ।**
**धनपतिना परिणीता तनयेन समुद्रदत्तस्य ॥ १४६ ॥**

**अथ स धनपतिवणिग् कलासु कुशलोऽनङ्गप्रतिरूपः ।**
**समकंतु वसुमत्या भुनक्ति मानुष्यान् भोगान् ॥ १४७ ॥**

**वर्धमानस्नेहयोस्तयोरन्योन्यरक्तचितयोः ।**
**नवयौवनयोः सदृशं विषयसुखं सेवमानयोः ॥ १४८ ॥**

**गुरुजनविनयरक्तयोः परस्परविरहदुःखरहितयोः ।**
**व्रजतो वासराणि आनन्दितबन्धुवर्गयोः ॥ १४९ ॥ युग्मम् ॥**

---

१. सरिसं ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाइवि पवरे हम्मियतलम्मि[1] पासुत्तो ।
धणवइवणिओ तीए वसुमइदइयाए संजुत्तो ॥ १५० ॥

निम्मलससिकरउज्जोइयाए रयणीए पच्छिमे जामे ।
निद्दाखए विबुद्धा मुद्धा सा वसुमई वरई ॥ १५१ ॥

नियसयणीय[2]पसुत्तं परपुरिसं पिक्खिऊण भयभीया ।
सा पवणहया तणुतरुलयव्व अह कंपिया सहसा ॥ १५२ ॥

चिंतइ सा मियनयणा कत्थ गओ मज्झ नियनाहो सो ।
[3]दुक्खपवेसम्मि गिहे एसो पुरिसो कह पविट्ठो ? ॥ १५३ ॥

किंवा सो मणदइओ हविज्ज निहओ इमेण पावेण ।
सोच्चिय दइओ अन्नो पडिहासइ किं विवज्जासा[4] ? ॥ १५४ ॥

अहवा न होइ एसो मह दइओ ताव निच्छओ एस ।
एस [5]अउव्वो कोवि हु दीसइ दिव्वाणुकारित्ति ॥ १५५ ॥

---

**अथान्यदा कदाचिदपि प्रवरे हर्म्यतले प्रसुप्तः ।**
**धनपतिवणिग् तया वसुमतीदयितया संयुक्तः ॥ १५० ॥**

**निर्मलशशीकरोद्योतितायां रजन्यां पश्चिमे यामे ।**
**निद्राक्षये विबुद्धा मुग्धा सा वसुमती वराकी ॥ १५१ ॥**

**निजशयनीयप्रसुप्तं परपुरुषं प्रेक्ष्य भयभीता ।**
**सा पवनहता तनुतरुलतेवाथ कम्पिता सहसा ॥ १५२ ॥**

**चिन्तयति सा मृगनयना कुत्र गतो मम निजकनाथः सः ।**
**दुःखप्रवेशे गृहे एष पुरुषः कथं प्रविष्टः ? ॥ १५३ ॥**

**किं वा स मनोदयितो भवेत् निहतोऽनेन पापेन ।**
**स एव दयितोऽन्यः प्रतिभासते किं विपर्यासात् ॥ १५४ ॥**

**अथवा न भवति एष मम दयितस्तावत् निश्चय एषः ।**
**एषोऽपूर्वः कोऽपि हु दृश्यते दिव्यानुकारीति ॥ १५५ ॥**

---

१. हर्म्यम्=गृहम् । २. शयनीयम्=शय्या । ३. दुःखेन प्रवेशः शक्यो यत्र तद् दुःखप्रवेशम् ।
४. विपर्यासात्=भ्रमात् । ५. अपूर्वः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह सुवइ सुंवीसत्थो[1] पविसित्ता परगिहम्मि जं एसो ।
तं नूणं भवियव्वं केणावि हु कारणेणित्थ ॥ १५६ ॥

जइ एस अन्नपुरिसो दइओ वा तहवि इण्हि मह जुत्तं ।
नियसासुयाए[2] सिग्घं जहट्ठियं चेव साहेउं[3] ॥ १५७ ॥

जइ पुण एयं न कहेमि कहवि नियसासुयाए वुत्तंतं ।
आजम्मंपि कलकं सुदूसहं होइ ता मज्झ ॥ १५८ ॥

एवं विचिंतिऊणं उत्तरिया हम्मियाओ सा बाला ।
पत्ता य सासुयाए सुदंसणाए समीवम्मि ॥ १५९ ॥

सा सणियं उट्ठविया[4] भणइ किमागमणकारणं सुण्हे[5] ! ।
तत्तो य वसुमईए जहट्ठियं साहियं सव्वं ॥ १६० ॥

भणियं सुदंसणाए न संभवो अत्थि इत्थ अन्नस्स ।
निद्दावसओ होज्जा तुह जाओ विब्भमो एसो ॥ १६१ ॥

---

**तथा स्वपिति सुविश्वस्तः प्रवेश्य परगृहे यदेषः ।**
**तन्नूनं भवितव्यं केनाऽपि खलु कारणेनात्र ॥ १५६ ॥**

**यद्येषोऽन्यपुरुषो दयितो वा तथापीदानीम् मम युक्तम् ।**
**निजश्वस्वाः शीघ्रं यथास्थितमेव कथयितुम् ॥ १५७ ॥**

**यदि पुन एतं न कथयामि कथमपि निजश्वश्वाः वृतान्तम् ।**
**आजन्माऽपि कलङ्कं सुदूस्सहं भवति तस्मात् मम ॥ १५८ ॥**

**एवं विचिन्त्य उतीर्य हर्म्यात् सा बाला ।**
**प्राप्ता च श्वश्वाः सुदर्शनायाः समीपे ॥ १५९ ॥**

**सा शनैरुत्थापिता भणति किमागमकारणं स्नुषे ! ।**
**ततश्च वसुमत्या यथास्थितं कथितं सर्वम् ॥ १६० ॥**

**भणितं सुदर्शनया न सम्भवोऽस्त्यत्रान्यस्य ।**
**निद्रावशतो भवेत्तव जातो विभ्रम एषः ॥ १६१ ॥**

---

१. सुविश्वस्तः। २. सासुया=श्वश्रूः। ३. साहेउं=कथयितुम्। ४. उत्थापिता। ५. स्नुषा=पुत्रवधूः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणियं च वसुमईए अंब ! सयं चेव ता निरूवेसु[1] ।
एवं तीए भणिया सुदंसणा लहुं गया तत्थ ॥ १६२ ॥

सम्मं निरूविओ सो निद्दाए पसुत्तओ तहिं पुरिसो ।
नायं सुदंसणाए जह एस न होइ मह पुत्तो ॥ १६३ ॥

तत्तो सुदंसणाए पोक्करियं[2] दीहरेण सद्देण ।
धावह धावह लोया ! एस अउव्वो नरो कोवि ॥ १६४ ॥

अम्ह घरम्मि पविट्ठो जारो चोरोव्व नूण[3] होऊण ।
एवं सुदंसणाए विहियं सोऊण हलबोलं[4] ॥ १६५ ॥

रे ! लेह[5] लेह धावह कत्थ गओ कत्थ अच्छइ निलुक्को ।
एमाइ वाहरंतो समुट्ठिओ परियणो सव्वो ॥ १६६ ॥

मिलिओ य भूरिलोगो किं किं एयंति एव जंपंतो ।
सिट्ठी समुद्ददत्तो भणइ पिए ! केण मुसिया सि ? ॥ १६७ ॥

---

भणितं च वसुमत्या अम्बे ! स्वयमेव तस्माद् निरूपय ।
एवं तया भणिता सुदर्शना लघु गता तत्र ॥ १६२ ॥

सम्यग् निरूपितः स निद्रायां प्रसुप्तकस्तत्र पुरुषः ।
ज्ञातं सुदर्शनया यथैषो न भवति मम पुत्रः ॥ १६३ ॥

ततः सुदर्शनया पूत्कृतम् दीर्घेण शब्देन ।
धावत धावत लोकाः ! एषोऽपूर्वो नरः कोऽपि ॥ १६४ ॥

अस्माकं गृहे प्रविष्टो जारश्चौर इव नूनं भूत्वा ।
एवं सुदर्शनया विहितं श्रुत्वा कलकलम् ॥ १६५ ॥

रेः ! लात लात धावत कुत्र गतः कुत्राऽस्ते निलीनः ।
एवामादि व्याहरन् समुत्थितः परिजनः सर्वः ॥ १६६ ॥

मिलितश्च भूरिलोकः किं किं एतदिति एवं जल्पन् ।
श्रेष्ठी समुद्रदत्तो भणति प्रिये ! केन मुषिताऽसि ? ॥ १६७ ॥

---

१. निरूपय=अवलोकय । २. पूत्कृतम् । ३. एव=नूनम् । ४. कलकलम् ।५. लात=गृहीतेत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोवि हु सयणीयाओ समुट्ठिओ कलयलं निसामित्तं ।
वज्जरइ केण अंबे ! मुसिया, जं एवमुल्लवसि ? ॥ १६८ ॥

न हु इत्थ कोवि दीसइ दुट्ठमई कीस अंबि ! उव्विग्गा ? ।
एवं तु तेण भणिया सुदंसणा एवमुल्लवइ ॥ १६९ ॥

को सि तुमं कस्स सुओ कीस गिहं मज्झ आगओ पाव ! ? ।
हा ! धिट्ठ[1] ! किंनिमित्तं अंबित्ति ममं समुल्लवसि ? ॥ १७० ॥

कीस मह पुत्तसेज्जाए इत्थ सुत्तोसि नट्ठमज्जाय ! ।
कत्थ कओ मे पुत्तो धणवइनामो हयास ! तुमे ? ॥ १७१ ॥

एवं च तीइ निट्ठुरवयणाणि निसम्म विम्हिओ चित्ते ।
सो पुरिसो नियदेहं पुणो पुणो अह [2]पुलोएइ ॥ १७२ ॥

आलोइऊण सुइरं नियदेहं जाव सामलमुहो सो ।
उप्पइयमणो ताहे आलोयइ नहयलं सहसा ॥ १७३ ॥

---

**सोऽपि खलु शयनीयात् समुत्थितः कलकलं निशम्य ।**
**कथयति केन अम्बे ! मुषिता यद्येवमुल्लपसि ? ॥ १६८ ॥**

**न खल्वत्र कोऽपि दृश्यते दुष्टमतिः कस्माद् अम्बे ! उद्विग्ना ? ।**
**एवं तु तेण भणिता सुदर्शना एवमुल्लपति ? ॥ १६९ ॥**

**कोऽसि त्वं कस्य सुतः कस्माद् गृहं मम आगतः पाप ! ।**
**हा ! धृष्ट ! किंनिमितं अम्बेति माम् समुल्लपसि ॥ १७० ॥**

**कस्माद्मम पुत्रशय्यायामत्र सुप्तोऽसि नष्टमर्याद ! ।**
**कुत्र कृतो मम पुत्रो धनपतिनामा हताश ! त्वया ? ॥ १७१ ॥**

**एवञ्च तस्याः निष्ठुरवचनानि निशम्य विस्मितश्चित्ते ।**
**स पुरुषो निजदेहं पुनः पुनरथ पश्यति ॥ १७२ ॥**

**आलोक्य सुचिरं निजदेहं यावत् श्यामलमुखः स ।**
**उत्पतितमनास्तदाऽऽलोकयति नभस्तलं सहसा ॥ १७३ ॥**

१. धृष्ट ! । २. पश्यति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुड बुड इय अव्वत्तं [1]जावं दिंतोव्व पवरविज्जाए ।
[2]उल्ललइ य पुणरुत्तं दद्दुर इव भूमिपट्ठम्मि ॥ १७४ ॥

जाओ खणेण दीणो खयरकुमारोव्व नट्ठ वरविज्जो ।
गाढं वेविरदेहो मूढोव्व [3]हिउव्व संजाओ ॥ १७५ ॥

अह तं तारिसरूवं पुरिसं दट्ठूं सुदंसणा भणइ ।
पाविट्ठ ! किं न साहसि कत्थ कओ मह सुओ तुमए ? ॥ १७६ ॥

सोवि [4]अहोमुहवयणो होऊण ठिओ न जंपई जाव ।
ताहे सो जणनिवहो विविहं उल्लविउमाढत्तो ॥ १७७ ॥

एसो इब्भघरम्मी समागओ [5]चोरियाए धणलुद्धो ।
अन्ने भणंति चोरो जइ ता सेज्जाए किं सुत्तो ? ॥ १७८ ॥

ता एस वसुमईए [6]कएण [7]परदारियाए आयाओ ।
अन्ने भणंति जारो जइ ता अंबित्ति किं भणइ ? ॥ १७९ ॥

---

**बुड बुडेति अव्यक्तं जापं ददानैव प्रवरविद्यया ।**
**उल्ललति च पुनरुक्तं दर्दुर इव भूमिपृष्ठे ॥ १७४ ॥**

**जातः क्षणेन दीनः खेचरकुमार इव नष्टो वरविद्यः ।**
**गाढं वेपमानदेहो मूढ इव हृत इव संजातः ॥ १७५ ॥**

**अथ तं तादृशरुपं पुरुषं दृष्ट्वा सुदर्शना भणति ।**
**पापिष्ट ! किं न कथयसि कुत्र कृतो मम सुतस्त्वया ? ॥ १७६ ॥**

**सोऽपि अधोमुखवदनो भूत्वा स्थितो न जल्पति यावत् ।**
**तदा स जननिवहो विविधमुल्लपितुमारब्धः ॥ १७७ ॥**

**एष इभ्यगृहे समागतश्चौर्याय धनलुब्धः ।**
**अन्ये भणंति चौरो यदि तस्मात् शय्यायां किं सुप्तः? ॥ १७८ ॥**

**तस्मादेष वसुमत्या कृतेन पारदारिकतयाऽऽयातः ।**
**अन्ये भणन्ति जारो यदि तस्मात् अम्बेति किं भणाति ? ॥ १७९ ॥**

---

१. जापम् । २. उल्ललति=उन्नमति । ३. हृत इव । ४. अधोमुखं=अधस्ताद् । ५. चोरिका=चौर्यम् । ६. कृतेन=तदर्थ=वसुमत्यर्थमिति यावत् । ७. पारदारिकतया।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता एस धणवइच्चिय विहिओ केणावि अन्नरुवेण ।
देवेण दाणवेण व केलीए पिएण मन्नामो ॥ १८० ॥

अन्ने भणंति भूओ एस पिसाउव्व आगओ एत्थ ।
अम्हाण छलणहेउं एरिसरुवेण दुट्ठप्पा ॥ १८१ ॥

भो भो न एवमेयं भणंति अन्ने उ किंतु निसुणेह ।
वसुमइयाए सीलं परिक्खिउं आगओ तियसो ॥ १८२ ॥

एमाइ बहुविगप्पं परोप्परं जा जणो समुल्लवइ ।
ताव य पियसहि! धारिणि ! निसुणसु जं तत्थ संजायं ॥ १८३ ॥

केऊरहारअंगयविरायमाणो मणोहरसरीरो ।
सहसा पयडीभूओ भासुरदित्ती तहिं तियसो ॥ १८४ ॥

देवेण तेण भणियं निसुणह एयस्स वइयरं भद्दा! ।
अवियाणियपरमत्था करेह किं बहुविहविगप्पे ! ॥ १८५ ॥

---

तस्मादेष धनपतिरेव विहितः केनाऽप्यन्यरुपेण ।
देवेन दानवेन वा केल्यां प्रियेण मन्यामहे ॥ १८० ॥

अन्ये भणन्ति भूत एष पिशाच इवाऽऽगतोऽत्र ।
अस्माकं छलनहेतुमीदृशरूपेण दुष्टात्मा ॥ १८१ ॥

भो भो नैवैतद् भणन्ति अन्ये तु किन्तु निशृणुत ।
वसुमत्याः शीलं परीक्षितुमागतस्त्रिदशः ॥ १८२ ॥

एवमादि बहुविकल्पं परस्परं यावत् जनः समुल्लपति ।
तावच्च प्रियसखे ! धारिणि ! निशृणु यत्तत्र सञ्जातम् ॥ १८३ ॥

केयूरहाराङ्गदविराजमानो मनोहरशरीरः ।
सहसा प्रकटीभूतो भासुरदिप्तिस्तत्र त्रिदशः ॥ १८४ ॥

देवेन तेन भणितं निशृणुत एतस्य व्यतिकरं भद्राः ! ।
अविज्ञातपरमार्था कुरुत किं बहुविधविकल्पान् ॥ १८५ ॥



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

एसो हु पावकारी सुमंगलो नाम नहयरो आसि ।
साहियबहुविहविज्जो विज्जाहरनयरसुपसिद्धो ॥ १८६ ॥

अह अन्नया कयाइवि भममाणो इच्छिएसु नयरेसु ।
एसो इत्थ पुरए समागओ जोव्वणुम्मत्तो ॥ १८७ ॥

हम्मियतलमारुढा ण्हाणुत्तिन्ना[1] हु वसुमई एसा ।
गयणट्ठिएण दिट्ठा इमेण सुइरं च निज्झाया[2] ॥ १८८ ॥

दट्ठुं इमीए रूवं खुहियं अह माणसं तु एयस्स ।
काउं धणवइरुवं अवयरिओ[3] इत्थ गेहम्मि ॥ १८९ ॥

अवियाणियपरमत्था भुत्ता अह वसुमई इमेणावि ।
सुरयम्मि रंजियमणो चिंतइ एवं महापावो ॥ १९० ॥

धणवइरूवेण ठिओ अन्नाओ[4] एत्थ सयललोएण ।
एईए वरतणूए समयं सेवामि सुरयसुहं ॥ १९१ ॥

---

एष खलु पापकारी सुमङ्गलो नामा नभश्चरोऽऽसीत् ।
साधितबहुविधविद्यः विद्याधरनगरसुप्रसिद्धः ॥ १८६ ॥

अथान्यदा कदाचिदपि भ्रमन्निच्छितेषु नगरेषु ।
एषोऽत्र पुर्यां समागतो यौवनोन्मत्तः ॥ १८७ ॥

हर्म्यतलारूढा स्नानोतीर्णा खलु वसुमत्येषा ।
गगनस्थितेन दृष्टाऽनेन सुचिरं च निध्याता ॥ १८८ ॥

दृष्ट्वाऽस्या रूपं क्षुभितमथ मानसन्तु एतस्य ।
कृत्वा धनपतिरूपमवत्तीर्णात्रगेहे ॥ १८९ ॥

अविज्ञातपरमार्था भुक्ताऽथ वसुमत्यनेनाऽपि ।
सुरते रञ्जितमनाश्चिंतयति एवं महापापः ॥ १९० ॥

धनपतिरूपेण स्थितोऽज्ञातोऽत्र सकललोकेन ।
एतया वरतन्वा समकं सेवे सुरतसुखम् ॥ १९१ ॥

---

१. स्नानोत्तीर्णा । २. निध्याता=दृष्टा । ३. अवतीर्णः । ४. अज्ञातः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्जाहरीहिं किंवा मह कज्जं किंव अन्नजुवईहिं ।
सोहग्गनिहाणाए पत्ताए इमाए महिलाए ? ॥ १९२ ॥

एवं विचिंतिउणं अवहरिओ[1] धणवई इमेणं तु ।
नेऊण भरहखित्ते मुक्को उ विणीयनयरीए[2] ॥ १९३ ॥

पच्छाइय नियरुवं धणवइरुवं विहित्तु विज्जाए ।
वसुमइसुरयासत्तो एसो सो चिट्ठई एत्थ ॥ १९४ ॥

सोवि हु धणवइवणिओ विणीयनयरीए पाविओ वरओ[3] ।
दट्ठुं अउव्वनयरिं विम्हियहियओ विंचितेइ ॥ १९५ ॥

का एसा वरनयरी कत्थ व सा मेहलावई नयरी ।
किं केण व अवहरिओ पेच्छामि व सुमिणयं एयं ? ॥ १९६ ॥

एवं विचिंतयंतो बाहिं नयरीए[4] जाव परिभमई ।
तावय पवरुज्जाणे समोसढो[5] केवली दिट्ठो ॥ १९७ ॥

---

**विद्याधरीभिः किं वा मम कार्यं किं वाऽन्ययुवतीभिः ।**
**सौभाग्यनिधानायाः प्राप्ताया अस्याः महिलायाः ? ॥ १९२ ॥**

**एवं विचिन्त्य अपहृतो धनपतिरनेन तु ।**
**नीत्वा भरतक्षेत्रे मुक्तस्तु विनीतनगर्याम् ॥ १९३ ॥**

**प्रच्छादितनिजरूपं धनपतिरूपं विधाय विद्यया ।**
**वसुमतीसुरतासक्त एष स तिष्ठत्यत्र ॥ १९४ ॥**

**सोऽपि खलु धनपतिवणिग् विनीतनगर्यां प्राप्तो वराकः ।**
**दृष्ट्वाऽपूर्वनगरीं विस्मयहृदयो विचिन्तयति ॥ १९५ ॥**

**का एषा वरनगरी कुत्र वा सा मेखलावती नगरी ।**
**किं केन वाऽपहृतः प्रेक्षे वा स्वप्नमेतद् ? ॥ १९६ ॥**

**एवं विचिन्तयन् बर्हि नगर्यायावत् परिभ्राम्यति ।**
**तावच्च प्रवरोद्याने समवसृतः केवली दृष्टः ॥ १९७ ॥**

---

१. अपहृतः । २. विनीता=अयोध्या। ३. वरओ=वराकः । ४. रीइ । ५. समवसृतः=आगतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिरिउसहनाहजिणवरवंसपसूओ तिलोयविक्खाओ ।
नामेणं दंडविरओ रायरिसी[1] मुणिगणसमेओ ॥ १९८ ॥

तं दट्ठुं जायतोसो काऊण पयाहिणं[2] तु तिक्खुत्तो[3] ।
पणमिय केवलिचलणे उवविट्ठो उचियदेसम्मि ॥ १९९ ॥

नाऊण य पत्थावं विहियपणामेण तेण संलत्तं[4] ।
केण अहं अवहरिओ भवयं! किंवा इमं खित्तं ? ॥ २०० ॥

का वा एसा नयरी एवं पुट्ठेण भगवया तस्स ।
धणवइणो पुव्वुत्तं सव्वंपि हु साहियं तइया ॥ २०१ ॥

विन्नायसरुवो सो भज्जापिइमाइबंधुपरिहीणो ।
गुरुसोगसमावन्नो केवलिणा एरिसं भणिओ ॥ २०२ ॥

मा भद्द! कुणसु सोयं एरिसओ चेव एस संसारो ।
इट्ठविओगाऽणिट्ठप्पओगदुक्खेहिं संकिन्नो ॥ २०३ ॥

---

श्रीऋषभनाथजिनवरवंशप्रसूतस्त्रिलोकविख्यातः ।
नाम्ना दण्डविरतो राजर्षि-र्मुनिगणसमेतः ॥ १९८ ॥

तं दृष्ट्वा जाततोषः कृत्वा प्रदक्षिणां तु त्रिःकृत्वः ।
प्रणम्य केवलीचरणावुपविष्ट-उचितदेशे ॥ १९९ ॥

ज्ञात्वा च प्रस्तावं विहितप्रणामेन तेन संलप्तम् ।
केनाऽहमपहृतो भगवन् ! किं वेदं क्षेत्रम् ? ॥ २०० ॥

का वा एषा नगरी एवं पृष्टेन भगवता तस्य ।
धनपतेः पूर्वोक्तं सर्वमपि खलु कथितं तदा ॥ २०१ ॥

विज्ञातस्वरुपः स भार्यापितामाताबन्धुपरिहीनः ।
गुरुशोकसमापन्नः केवलिनेदृशं भणितः ॥ २०२ ॥

मा भद्र ! कुरु शोकं एतादृश एवैष संसारः ।
इष्टवियोगऽनिष्टप्रयोगदुःखैः संकीर्णः ॥ २०३ ॥

---

१. राजर्षिः । २. प्रदक्षिणाम् । ३. त्रिः=त्रिवारम् । ४. संलप्तम्=उक्तम्=पृष्टमति यावत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयम्मि वसंताणं जीवाणं विसयमोहियमणाणं ।
संजोगविप्पओगा अणंतसो भद्द! जायंति ॥ २०४ ॥

परमत्थओ य दुक्खं जायइ नियदुट्ठ[1]कम्मुणा जणियं ।
हवइ हु निमित्तमित्तं सेसं पुण [2]बेज्झअत्थम्मि ॥ २०५ ॥

ता तेण नहयरेणं न मज्झपरमत्थओ कयं दुक्खं ।
किंतु नियकम्मजणियं एवं भावेसु नियचित्ते ॥ २०६ ॥

अविय। "[3]पत्थरेणाहओ [4]कीवो पत्थरं [5]डक्कुमिच्छई ।
मिगारिओ सरं [6]पप्प [7]सरुप्पत्तिं विमग्गई ॥ २०७ ॥"

ता भद्द! जिणाणाए कम्मसमुच्छेयणम्मि उज्जमसु ।
तत्तो विलीणकम्मो पाविहिसि न एरिसं दुक्खं ॥ २०८ ॥

इय केवलिया भणिओ पडिबुद्धो धणवई इमं भणइ ।
इच्छामो [8]अणुसट्ठिं पव्वज्जं देह मे भयवं ! ॥ २०९ ॥

---

**एतस्मिन् वसतां जीवानां विषयमोहितमनसां ।
संयोगविप्रयोगौ अनंतशः भद्र ! जायेते ॥ २०४ ॥**

**परमार्थतश्च दुःखं जायते निजदुष्टकर्मणा जनितम् ।
भवति खलु निमित्तमात्रं शेषं पुनर्बाह्यार्थे ॥ २०५ ॥**

**तस्मात् तेन नभश्चरेण न मम परमार्थतः कृतं दुःखम् ।
किन्तु निजकर्मजनितमेव भावय निजचित्ते ॥ २०६ ॥**

**अपि च ! प्रस्तरेणाहतः क्लीबः प्रस्तरं दंष्टुमिच्छति ।
मृगारिः शरं प्राप्य शरोत्पत्तिं विमार्गयति ॥ २०७ ॥**

**तस्मात् भद्र ! जिनाज्ञया कर्मसमुच्छेदने उद्यम ।
ततो विलीनकर्मा प्राप्स्यसि नेदृशं दुःखम् ॥ २०८ ॥**

**इति केवलिना भणितः प्रतिबुद्धो धनपतिरिदं भणति ।
इच्छामोऽनुशास्तिं प्रव्रज्यां देहि माम् भगवन् ॥ २०९ ॥**

१. कम्मुणा=कर्मणा । २. बज्झो=बाह्यः । ३. पत्थरो=प्रस्तरः=पाषाणः । ४. क्लीबः, प्रस्तावादत्र श्वा । ५. डक्कुं=दंष्टुम् । ६. पप्प=प्राप्य । ७. स्वरस्य शब्दस्योत्पत्तिम् । ८. अनुशास्तिम्=आज्ञाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलिणा से दिन्ना पव्वज्जा सव्वपावमलहरणी ।
अह जाओ सो समणो सामन्नगुणेहिं[1] उववेओ ॥ २१० ॥

पुव्वसयसहस्साइं[2] तीसं काऊण उग्गतवचरणं ।
तेमासिंय च काऊण अणसणं चत्तदेहो सो ॥ २११ ॥

उववण्णो ईसाणे अच्छरगणसंकुले विमाणम्मि ।
चंदज्जुणाभिहाणे देवो चंदज्जुणो नाम ॥ २१२ ॥ युग्मम् ॥

ओहिन्नाणेण तओ नाऊणं सयलनिययवुत्तंतं ।
सो हं भो भो भद्दा ! समागओ एत्थ नयरीए ॥ २१३ ॥

वसुमइकंठविलग्गो सयणीयगओ पसुत्तओ दिट्ठो ।
पच्छाइयनियरूवो धणवइरूवेण एस ठिओ ॥ २१४ ॥

जाओ य मज्झ कोवो तव्वसओ चिंतियं मए एयं ।
मारेमि इमं पावं मह दइयाए सह पसुत्तं ॥ २१५ ॥

---

केवलिना तस्य दत्ता प्रव्रज्या सर्वपापमलहरणी ।
अथ जातः स श्रमणः श्रामण्यगुणैरुपपेतः ॥ २१० ॥

पूर्वशतसहस्राणि त्रिंशत् कृत्वा उग्रतपश्चरणम् ।
त्रैमासिकं च कृत्वाऽनशनं त्यक्तदेहः सः ॥ २११ ॥

उपपन्न ईशानेऽप्सरागणसङ्कुले विमाने ।
चन्द्रार्जुनाभिधाने देवश्चंद्रार्जुनो नामा ॥ २१२ ॥ युग्मम् ॥

अवधिज्ञानेन ततो ज्ञात्वा सकलनिजकवृतान्तम् ।
सोऽहं भो भो भद्राः ! समागतोऽत्र नगर्याम् ॥ २१३ ॥

वसुमती कंठविलग्नः शयनीयगतः प्रसुप्तको दृष्टः ।
प्रच्छादितनिजरूपो धनपतिरुपेणैष स्थितः ॥ २१४ ॥

जातश्च मम कोपस्तद्वशतश्चिन्तितं मयैतद् ।
मारयामीमं पापं मम दयितया सह प्रसुप्तम् ॥ २१५ ॥

१. श्रामण्यगुणैः । २. त्रिंशत्पूर्वलक्षमितानि 'वर्षाणि' इति शेषः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जणणिजणयाण अहवा जाणावित्ता[1] य सयललोयस्स ।
एयस्स दुट्ठचरियं काहामि विणिग्गहं पच्छा ॥ २१६ ॥

एवं विचिंतिऊणं अवहरियाओ इमस्स पावस्स ।
सव्वाओ विज्जाओ जाओ य इमो सभावत्थो[2] ॥ २१७ ॥

तत्तो य वसुमईए सहसा निद्दा मए खयं नीया ।
एईए विबुद्धाए नायं जह एस परपुरिसो ॥ २१८ ॥

गंतूण सासुयाए सिट्ठा वत्ता इमीइ सव्वावि ।
तत्तो सुदंसणाए दठूण इमं कओ रोलो[3] ॥ २१९ ॥

पडिबुद्धेण इमेणवि तेणिह अंबा सुदंसणा भणिया ।
सोउं निट्ठुरवयणं पलोइयं नियदेहं तु ॥ २२० ॥

दठूण पुव्वरूवं नियदेहं विम्हिओ इमो चित्ते ।
मह विज्जाए[4] पभावो अवहरिओ केण अज्जत्ति ? ॥ २२१ ॥

---

जननीजनकयोरथवा ज्ञापयित्वा च सकललोकस्य ।
एतस्य दुष्टचरित्रं करिष्यामि विनिग्रहं पश्चात् ॥ २१६ ॥

एवं विचिन्त्याऽपहृता अस्य पापस्य ।
सर्वा विद्या जातश्चायं स्वभावस्थः ॥ २१७ ॥

ततश्च वसुमत्याः सहसा निद्रा मया क्षयं नीता ।
अनया विबुद्धया ज्ञातं यथैष परपुरुषः ॥ २१८ ॥

गत्वा श्वश्वै शिष्टा वार्ताऽनया सर्वापि ।
ततः सुदर्शनया दृष्टवा अयं कृतो रोलः ॥ २१९ ॥

प्रतिबुद्धेनऽनेनाऽपि तेनेहांऽबा सुदर्शना भणिता ।
श्रुत्वा निष्ठुरवचनं प्रलोकितं निजकदेहन्तु ॥ २२० ॥

दृष्ट्वा पूर्वरूपं निजदेहं विस्मितोऽयं चित्ते ।
मम विद्यायाः प्रभावोऽपहृतः केनाद्येति ? ॥ २२१ ॥

---

१. ज्ञापयित्वा । २. स्वभाव=मूलरूपः । ३. रोलो=कोलाहलः । ४. लाए ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं विचिंतिऊणं उप्पइउमणेण[1] ताहि एएण ।
नियविज्जा संभरिया पवरा नहगामिणी नाम ॥ २२२ ॥

तहवि हु उप्पइऊणं जाहे न चएइ ताहि विन्नायं ।
कुविएण मज्झ केणवि विज्जाच्छेओ कओऽवस्सं ॥ २२३ ॥

तेणेव सभावत्थो जाओ न चएमि गयणमुप्पइउं ।
एवं विगप्पयंतो एसो दीणत्तणं पत्तो ॥ २२४ ॥

एवं पियसहि ! धारिणि ! सोउं तियसस्स भासियं तस्स ।
सेट्ठी[2] समुद्ददत्तो सुदंसणा सावि से भज्जा ॥ २२५ ॥

आलिंगिय तं देवं अइगुरुसुयदुक्खदलियहिययाइं ।
दीहरसरेण दोण्णिवि करुणं रोत्तु[3] पवत्ताइं ॥ २२६ ॥

तह तेहिं तत्थ रुन्नं करुणपलावेहिं नेहभरिएहिं ।
जह सो समागयजणो सव्वोवि हु रोविउं[4] लग्गो ॥ २२७ ॥

---

**एवं विचिन्त्य उत्पतितुमनसा तदा एतेन ।**
**निजविद्या संस्मृता प्रवरा नभोगमिनी नाम्नी ॥ २२२ ॥**

**तथापि खलूत्पतितुं यदा न शक्नोति तदा विज्ञातम् ।**
**कुपितेन मम केनाऽपि विद्याच्छेदः कृतोऽवश्यम् ॥ २२३ ॥**

**तेनैव स्वभावस्थो जातो न शक्नोति गगनमुत्पतितुम् ।**
**एवं विकल्पयन्नेष दीनत्वं प्राप्तः ॥ २२४ ॥**

**एवं प्रियसखे ! धारिणि ! श्रुत्वा त्रिदशस्य भाषितं तस्य ।**
**श्रेष्ठी समुद्रदत्तः सुदर्शना साऽपि तस्य भार्या ॥ २२५ ॥**

**आलिङ्ग्य तं देवमतिगुरुसुतदुःखदलितहृदयौ ।**
**दीर्घस्वरेण द्वावपि करुणं रोदितुं प्रवृत्तौ ॥ २२६ ॥**

**तथा ताभ्यां रुदितं करुणप्रलापैः स्नेहभृतैः ।**
**यथा स समागतजनः सर्वोऽपि खलु रोदितुं लग्नः ॥ २२७ ॥**

---

१. उत्पतितुमनसा = उड्डयितुकामेन । २. सिट्ठी । ३. रोदितुम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऊण रुन्नसद्दं सेट्ठिस्स गिहम्मि नयरवत्थव्वो[1] ।
सव्वोवि हु संमिलिओ सबालवुड्ढो जणो तत्थ ॥ २२८ ॥

नाऊण य वुत्तंतं सव्वं अन्नुन्नवज्जरिज्जंतं[2] ।
अक्कोसंति बहुविहं सुमंगलं नयरनारीओ ॥ २२९ ॥

एयस्स पडउ विज्जू सुत्तो मा एस बुज्झउ[3] पावो ।
निद्दोसोवि धणवई अवहरिओ जेण पावेण ॥ २३० ॥

हा ! पाव ! किं न आसी खयरीओ तुह सरूवजुत्ताओ ।
मुद्धाए वसुमईए जेण तुमे खंडियं सीलं ? ॥ २३१ ॥

ता पाव ! इण्हि पावसु अणज्जकज्जम्मि[4] निरय ! निल्लज्ज ! ।
नियदुच्चेट्ठियसरिसं इहपरलोए फलं कडुयं ॥ २३२ ॥

एयं न होइ जोग्गं नामं एयस्स दुट्ठचरियस्स ! ।
पावो अमंगलो एस जेण एयं कयं पावं ॥ २३३ ॥

---

**श्रुत्वा रुदितशब्दं श्रेष्ठिनो गृहे नगरवास्तव्यः ।**
**सर्वोऽपि खलु संमिलितः सबालवृद्धो जनस्तत्र ॥ २२८ ॥**

**ज्ञात्वा च वृतान्तं सर्वमन्योन्यं कथ्यमानम् ।**
**आक्रोशति बहुविधं सुमंगलं नगरनार्यः ॥ २२९ ॥**

**एतस्य पततु विद्युत् सुप्तो मा एष बुध्यतां पापः ।**
**निर्दोषोऽपि धनपतिरपहृतो येन पापेन ॥ २३० ॥**

**हा ! पाप ! किं नासीत् खेचर्यस्तवस्वरूपयुक्ताः ।**
**मुग्धाया वसुमत्या येन त्वया खण्डितं शीलम् ? ॥ २३१ ॥**

**तस्मात् पाप ! इदानीं प्राप्नुहि अनार्यकार्ये निरक्त ! निर्लज्ज ! ।**
**निजदुश्चेष्टितसदृशमिहपरलोके फलं कटुकम् ॥ २३२ ॥**

**एतन्न भवति योग्यं नाम एतस्य दुष्टचरितस्य ।**
**पापोऽमङ्गल एष येन एतद् कृतं पापम् ॥ २३३ ॥**

---

१. नगरवास्तव्यः । २. अन्नुन्नं=अन्योन्यम् । ३. बुध्यताम्=उत्थीयताम्; सुप्त एव म्रियतामित्यर्थः । ४. अणज्जं=अनार्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन्नकडुएहिं एवं असब्भवयणेहिं तेण लोएणं ।
अक्कोसिओ स बहुहा सुदीणवयणो तहिं वरओ ॥ २३४ ॥

तेणेव देवेण तहिं मा[1]यावित्ताइं रोवमाणाइं ।
अणुसासियाइं सम्मं तुण्हिक्काइं तु जायाइं ॥ २३५ ॥

तत्तो सुरेण भणिया मुंचंती थूलअंसुयपवाहं ।
भद्दे! वसुमइ! इण्हिं को तुह हिययस्स उ[2]च्छाहो? ॥ २३६ ॥

अह तीए वज्जरियं लज्जाए समोणमंतवयणाए।
जं किंचि तुम सामिय! [3]आइससि तहिं समुच्छाहो ॥ २३७ ॥

भणियं सुरेण सुंदरि! जइ एवं ता करेसु पव्वज्जं ।
जिणवरभणियं धम्मं कम्ममहाकंदकोद्दालं ॥ २३८ ॥

जइवि हु सुंदरि! तुमए अ[4]याणमाणाए एयमायरियं ।
तहवि हु इमस्स ओसहं होउ पव्वज्जा ॥ २३९ ॥

---

**कर्णकटुकैरेवमसभ्यवचनैस्तेन लोकेन ।**
**आक्रुष्टो स बहुधा सुदीनवदनः तत्र वराकः ॥ २३४ ॥**

**तेनैव देवेन तत्र मातापितरौ रुदन्तौ ।**
**अनुशासितौ सम्यक् तूष्णीकौ तु जातौ ॥ २३५ ॥**

**ततः सुरेण भणिता मुञ्चती स्थूलाश्रुकप्रवाहम् ।**
**भद्रे वसुमति ! इदानीं को तव हृदयस्योत्साहः ? ॥ २३६ ॥**

**अथ तया कथितं लज्जया समावनमत्वदनया ।**
**यत्किंचित्त्वं स्वामिन् ! आदिशसि तत्र समुत्साहः ॥ २३७ ॥**

**भणितं सुरेण सुन्दरि ! यद्येवं तदा कुरु प्रव्रज्याम् ।**
**जिनवरभणितं धर्मं कर्ममहाकन्दकुद्दालम् ॥ २३८ ॥**

**यद्यपि खलु सुन्दरि ! त्वयाऽजानत्या एतदाचरितम् ।**
**तथापि खल्वस्य पापस्यौषधं भवतु प्रव्रज्या ॥ २३९ ॥**

---

१. माता=पितरौ । २. उत्साहः । ३. आदिशसि=आज्ञां करोषि । ४. अजानत्या ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य वसुमईए तहत्ति बहु मन्नियं तयं वयणं ।
महईए विभूईए नियबंधवअणुमया ताहे ॥ २४० ॥

तत्थेव य नयरीए सुहम्मनामस्स पवरसूरिस्स ।
मयहरियाए बहुविहसाहुणिगणसेवियकमाए ॥ २४१ ॥

चंदजसानामाए समप्पिया सुरवरेण सयमेव ।
तीएवि य आगमविहिणा दिन्ना दिक्खा वसुमईए ॥ २४२ ॥ तिसृभिः कुलकम्।

सोवि सुमंगलखयरो गुरुरोसेणावि तेण देवेण ।
दट्ठूण दीणवयणो न मारियो कहवि हु दयाए ॥ २४३ ॥

नेऊण माणुसुत्तरगिरिस्स परओ स उज्झिओ वरओ ।
अह सो तियसो पत्तो नियविमाणम्मि वेगेण ॥ २४४ ॥

सावि हु वसुमइअ[1]ज्जा समिईगुत्तीसु सम्ममुवउत्ता ।
[2]सज्झायज्झाणजुत्ता उज्जुत्ता विणयकरणम्मि ॥ २४५ ॥

---

ततश्च वसुमत्या तथेति बहुमतं तद् वचनम् ।
महत्या विभूत्या निजबन्धवानुमता तदा ॥ २४० ॥

तत्रैव च नगर्यां सुधर्मनाम्नः प्रवरसूरेः ।
महत्तरिकाया बहुविधसाध्वीगणसेवितक्रमायाः ॥ २४१ ॥

चन्द्रयशानाम्न्याः समर्पिता सुरवरेण स्वयमेव ।
तयाऽपि चागमविधिना दत्ता दिक्षा वसुमत्याः ॥ २४२ ॥ तिसृभिः कुलकम्॥

सोऽपि सुमंगलखचरो गुरुरोषेणाऽपि तेन देवेन ।
दृष्ट्वा दीनवदनो न मारितः कथमपि खलु दयया ॥ २४३ ॥

नीत्वा मानुषोत्तरगिरेः परतः स उज्झितो वराकः ।
अथ स त्रिदशः प्राप्तो निजकविमाने वेगेण ॥ २४४ ॥

सोऽपि खलु वसुमत्यार्या समितिगुप्तीषु सम्यगुपयुक्ता ।
स्वाध्यायध्यानयुक्ता उद्युक्ता विनयकरणे ॥ २४५ ॥

१. आर्या=साध्वी । २. सज्झाओ=स्वाध्यायः ।


Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

पुव्वसयसहस्साइं बहूणि काऊण पवरसामन्नं ।
संलेहणाए सम्मं झोसित्ता[1] निययदेहं तु ॥ २४६ ॥

अणुरायवसा तं चिय झायंती सुरवरं निए हियए ।
कयअणसणा वसुमई कालं काऊण उववन्ना ॥ २४७ ॥

ईसाणनामम्मि बिइज्जकप्पे चंदज्जुणे दिव्वविमाणयम्मि ।
देवस्स चंदज्जुणनामगस्स चंदप्पहा नाम पहाणदेवी ॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि परिसमप्पइ वसुमइसुरलोयपावणो नाम ।
सुरसुंदरिनामाए कहाए छट्ठो परिच्छेओ ॥ २५० ॥

---

**पूर्वशतसहस्त्राणि बहूनि कृत्वा प्रवरश्रामण्यम् ।**
**संलेखनया सम्यक् झूषित्वा निजकदेहन्तु ॥ २४६ ॥**

**अनुरागवशात्तमेव ध्यायन्ती सुरवरं निजे हृदये ।**
**कृतानशना वसुमती कालं कृत्वा उपपन्ना ॥ २४७ ॥**

**ईशाननाम्नि द्वितीयकल्पे चन्द्रार्जुने दिव्यविमाने ।**
**देवस्य चन्द्रार्जुननामकस्य चन्द्रप्रभा नाम्नी प्रधानदेवी ॥ २४८ ॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽपि परिसमाप्यते वसुमतीसुरलोकप्रापणो नामा ।**
**सुरसुन्दरीनाम्न्याः कथायाः षष्ठः परिच्छेदः ॥ २५० ॥ १५०० ॥**

**॥ षष्ठः परिच्छेदः समाप्तः ॥**

---

१. झोसित्ता=झूषित्वा=क्षीणं कृत्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सप्तमः परिच्छेदः

अह पुव्वसंगएणं समयं चंदज्जुणेण देवेण ।
गाढाणुरायरत्ता भुंजइ दियलोगसोक्खाइं ॥ १ ॥

चंदप्पहदेवीए सुरलोए सुरवरेण तेण समं ।
बोलीणो बहुकालो दिव्वसुहं अणुहवंतीए ॥ २ ॥

अह अन्नया कयाइवि विच्छायं पिच्छिऊण नियदइयं ।
भयभीया सा देवी तं देवं एवमुल्लवइ ॥ ३ ॥

सामिय ! कीस ससंको अरईपरद्धोव्व[1] दीससि तुमंति ।
तह कंत ! रुइविवज्जियदेहो दीणोव किं इण्हिं ? ॥ ४ ॥

---

अथ पूर्वसङ्गतेन समकं चन्द्रार्जुनेन देवेन ।
गाढानुरागरक्ता भुनक्ति दिव्यलोकसौख्यानि ॥ १ ॥

चन्द्रप्रभादेव्याः सुरलोके सुरवरेण तेन समं ।
अतिक्रान्तो बहुकालो दिव्यसुखमनुभवत्याः ॥

अथान्यदा कदाचिदपि विच्छायं प्रेक्ष्य निजदयितम् ।
भयभीता सा देवी तं देवमेवमुल्लपति ॥ ३ ॥

स्वामिन् ! कस्मात् सशङ्कोऽरतिपीडित इव पश्यसि त्वमिति ।
तथा कान्त ! रुचिविवर्जितदेहो दीन इव किमिदानीम् ? ॥ ४ ॥

---

१. परद्धो=पीडितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुक्कइ कीस अकम्हा कुसुमसमूहो सिरम्मि संजमिओ[1] ? ।
[2]वसणाणि तुज्झ सामिय ! सामलवन्नाणि किं अहुणा ? ॥ ५ ॥

[3]थरहरइ कीस दिट्ठी कामम्मि य सिढिलआयरो इण्हिं ।
मोडसि[4] य कीस अंगं पुणो पुणो, देव ! वज्जरसु ? ॥ ६ ॥

अह चंदज्जुणदेवो एवं पुट्ठो पियाए वज्जरइ ।
किं न याणसि सुंदरि ! जेण ममं पुच्छसि इमं तु ? ॥ ७ ॥

देवस्स चवणसमए इमाणि जायंति सुयणु ! लिंगाणि !।
ता मज्झवि [5]चुइसमओ आसन्नो वट्टइ इयाणिं ॥ ८ ॥

एवं निसम्म वयणं देवी अइवल्लहस्स देवस्स ।
उप्पन्नगरुयसोया दुक्खं [6]नरओवमं पत्ता ॥ ९ ॥

अह अन्नया कयाइवि सो देवो तीइ पिच्छमाणीए ।
खरतरपवणसमुद्धयदीवोव्व अदंसणीभूओ ॥ १० ॥

---

**शुष्यति कस्मादकस्मात् कुसुमसमूहः शिरसि संयमितः ? ।**
**वसनानि तव स्वामिन् ! श्यामलवर्णानि किमधुना ? ॥ ५ ॥**

**कम्पते कस्माद्दृष्टि कामे च शिथिलादर इदानीम् ।**
**मोटयसि च कस्मादङ्गं पुनः पुनर्देव ! कथय ? ॥ ६ ॥**

**अथ चन्द्रार्जुनदेव एवं पृष्टः प्रियायै कथयति ।**
**किं न जानासि सुन्दरि ! येन मम पृच्छसि इदन्तु ॥ ७ ॥**

**देवस्य च्यवनसमये इमानि जायन्ते सुतनो ! लिङ्गानि ।**
**तस्मात्ममाऽपि च्युतिसमयोऽऽसन्नो वर्तत इदानीम् ॥ ८ ॥**

**एवं निशम्य वचनं देव्यतिवल्लभस्य देवस्य ।**
**उत्पन्नगुरुकशोका दुःखं नरकोपमं प्राप्ता ॥ ९ ॥**

**अथान्यदा कदाचिदपि स देवस्तस्यां प्रेक्षमाणायां ।**
**खरतरपवनसमुद्धतदीपइवाऽदर्शनीभूतः ॥ १० ॥**

१. संयमितः=निबद्धः । २. वसनानि=वस्त्राणि । ३. थरहरइ=कम्पते । ४. मोटसि, मोटयसि वा "मरडेछे" इति भाषायाम् । ५. च्युतिः=मरणम् । ६. नरकोपमम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दट्ठूण चुयं देवं देवी चंदप्पहा सुदुक्खत्ता ।
मुच्छाविरमे करुणं विलविउमेवं समारद्धा ॥ ११ ॥

हा ! नाह ! पाणवल्लह ! मोत्तूण ममं गओ कहिं देव ! ।
तुमए रहिया सामिय ! कं सरणमहं पवज्जामि ? ॥ १२ ॥

खणलवमेत्तंपि तुमं विणा मए नेव नाह ! अच्छंतो ।
मोत्तूण ममं इण्हिं कत्थ गओ लोयणाणंद ! ॥ १३ ॥

तं चेव मज्झ सरणं तं नाहो जीवियं तुमं देव ! ।
तुमए मुक्का सामिय ! भण इण्हिं कत्थ वच्चामि ? ॥ १४ ॥

हा ! कत्थ गओ वल्लह ! एत्थ अणाहं ममं पमोत्तूणं ।
को मह सरणं इण्हि सामिय ! तुमए पमुक्काए ? ॥ १५ ॥

सो चेव देवलोगो देवसहस्सोवसोहिओ रम्मो ।
तुह विरहियाए इण्हिं [1]भावइ नरओवमो मज्झ ॥ १६ ॥

---

दृष्टवा च्युतं देवं देवी चन्द्रप्रभा सुदुःखार्त्ता ।
मूर्च्छाविरमे करुणं विलपितुमेवं समारब्धा ॥ ११ ॥

हा ! नाथ ! हा प्राणवल्लभ ! मुक्त्वा माम् गतः क्व देव ! ।
त्वया रहिता स्वामिन् ! कं शरणमहं प्रव्रजामि ? ॥ १२ ॥

क्षणलवमात्रमपि त्वां विना मया नैव नाथ ! आस्यमाना ।
मुक्त्वा मामिदानीं क्व गतो लोचनानन्द ! ॥ १३ ॥

त्वमेव मम शरणं त्वं नाथोः जीवितं त्वं देव ! ।
त्वया मुक्ता स्वामिन् ! भण इदानीं कुत्र व्रजामि ? ॥ १४ ॥

हा क्व गतो वल्लभ ! अत्राऽनाथां माम् प्रमुच्य ।
को मम शरणमिदानीं स्वामिन् । त्वया प्रमुक्त्या ? ॥ १५ ॥

स एव देवलोको देवसहस्त्रोपशोभितो रम्यः ।
तव विरहिताया इदानीं भासते नरकोपमो मम ॥ १६ ॥

१. भासते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं चिय इमं विमाणं रम्मं मणिकणगरयण[1]विच्छुरियं ।
तुमए मुक्कं [2]भावइ [3]घडियालय[4]सच्छहं नाह ! ॥ १७ ॥

किंकरवग्गोपि इमो चाडुकरो विणयकरणतल्लिच्छो ।
परमाहम्मियसरिसो भासइ तुह नाह ! विरहम्मि ॥ १८ ॥

पुंनागनागचंपयनमेरुमंदाररेहिरं रम्मं ।
उज्जाणं तुह विरहे असिपत्तवणंव पडिहाइ ॥ १९ ॥

वरमज्जणवावीओ निम्मलजलपूरियाओ रम्माओ ।
भासंति तुज्झ विरहे वेयरणिनईए तुल्लाओ ॥ २० ॥

धन्नाओ नारीओ जाओ [5]मयं अणुसरंति भत्तारं ।
एयम्मि देवभावे कत्तो एयारिसं मज्झ ? ॥ २१ ॥

एमाइ पलवमाणा सा देवी हणइ नियय हत्थेहिं ।
अंगाइं सुदुक्खत्ता कंदंती करुणसद्देण ॥ २२ ॥

---

**तमेव इदं विमानं रम्यं मणिकनकरत्नव्याप्तम् ।**
**त्वया मुक्तं भासते घटिकालयसदृशं नाथ ! ? ॥ १७ ॥**

**किंकरवर्गोऽप्ययं चाटुकरो विनयकरणतल्लिप्सः ।**
**परमाधार्मिकसदृशो भासते तव नाथ ! विरहे ॥ १८ ॥**

**पुंनागनागचम्पकनमेरुमन्दारराजितं रम्यम् ।**
**उद्यानं तव विरहे असिपत्रवनमिव प्रतिभाति ॥ १९ ॥**

**वरमज्जनवाप्यो निर्मलजलपूरिता रम्याः ।**
**भासन्ते तवविरहे वैतरणिनद्यस्तुल्याः ॥ २० ॥**

**धन्या नार्यो या मृतमनुसरति भर्तारम् ।**
**एतस्मिन् देवभावे कुत एतादृशं मम ? ॥ २१ ॥**

**एवमादि प्रलपन्ती सा देवी हन्ति निजकहस्तैः ।**
**अङ्गानि सुदुःखार्त्ता क्रन्दन्ती करुणशब्देन ॥ २२ ॥**

---

१. विच्छुरितं=व्याप्तम् । २. भासते । ३. घटिकालयं = घटिकावादनगृहम् । ४. सच्छहं=सदृशम् । ५. मृतम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुच्छिज्जइ पुणरुत्तं नीसाहारा य पडइ भूमीए ।
संपत्तचेयणा सा पुणरवि एवं समुल्लवइ ॥ २३ ॥

हा ! नाह ! किं न पेच्छसि विलवंतिं जं न देसि उल्लावं ।
किं वा रुट्ठो वल्लह ! किं अवरद्धं मए तुज्झ ? ॥ २४ ॥

[1]पणयकुवियाए सामिय ! चाडुसहस्साणि मज्झ कुव्वंतो ।
इण्हि कीस अकंडे विलवंतिं मुंचसि ममं तु ? ॥ २५ ॥

हा ! नाह ! किं न याणसि अइगुरुअणुरायमोहिया एसा ।
मह विरहे कह होही जेण अकंडे तुमे मुक्का ? ॥ २६ ॥

एवं बहुप्पगारं पिययमविरहम्मि कंदमाणा सा ।
जाया उम्मूलियकमलिणिव्व वि[2]च्छायमुहकमला ॥ २७ ॥

दट्ठूण गरुयसोयं गुरुदुक्ख[3]समोहयं तयं देविं ।
तीए नि[4]द्धवयंसा सयंपभा एवमुल्लवइ ॥ २८ ॥

---

मूर्च्छयते पुनरुक्तं निराधारा च पतति भूम्यां ।
संप्राप्तचेतना सा पुनरपि एवं समुल्लपति ॥ २३ ॥

हा ! नाथ ! किं न प्रेक्षसे विलपन्तीं यन्न ददासि उल्लापम् ।
किं वा रुष्टो वल्लभ ! किमपराद्धं मया तव ? ॥ २४ ॥

प्रणयकुपितायाः स्वामिन् ! चाटुसहस्राणि मम कुर्वन् ।
इदानीं कस्मादकाण्डे विलपन्तीं मुञ्चसि मां तु ? ॥ २५ ॥

हा ! नाथ ! किं न जानास्यतिगुर्वनुरागमोहितैषा ।
मम विरहे कथं भविष्यति येनाकाण्डे त्वया मुक्ता ? ॥ २६ ॥

एवं बहुप्रकारं प्रियतमविरहे क्रन्दन्ती सा ।
जातोन्मूलितकमलिनीव विच्छायमुखकमला ॥ २७ ॥

दृष्टवा गुरुकशोकं गुरुदुःखसमवहतां तकां देवीं ।
तस्याः स्निग्धवयस्या स्वयंप्रभा एवमुल्लपति ॥ २८ ॥

---

१. प्रणयकुपिताया मम। २. पव्वाय। ३. समोहयं=समवहताम्। ४. स्निग्धवयस्या=प्रियसखी।



Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

जाणियजिणवयणावि हु संसारसरूवयं सुणेऊण ।
इयरमहिलव्व पियसहि ! विलवसि किं एरिसं बहुहा ? ॥ २९ ॥

पियसहि ! न हु साहारो बहुणावि हु विलविएण जं अत्थि ।
ता किं [1]छालियगलथणसमेण विहलेण रुन्नेण ? ॥ ३० ॥

जइ विलवसि सयहुत्तं पिट्टसि[2] देहं करेसि गुरुसोयं ।
तहवि हु न एइ दइओ कालकयंतेण जो नीओ ॥ ३१ ॥

तो एयं नाऊणं नेहं सिढिलेसु[3] मुंच गुरुसोगं ।
उज्जम जिणिंदधम्मे एवंविहदुक्खसमणम्मि ॥ ३२ ॥

सो[4] तवसंजमरूवो देवभवे नत्थि वट्टमाणाए ।
सम्मत्तसुद्धिहेउं सुंदरि ! ता उज्जमं कुणसु ॥ ३३ ॥

गंतूण विदेहेसुं वंदसु तिलोक्कबंधवजिणिंदे ।
केवलिणो तह साहू संजमकरणुज्जए धीरे ॥ ३४ ॥

---

ज्ञातजिनवचनाऽपि हु संसारस्वरूपं श्रुत्वा ।
इतरमहिलेव प्रियसखे ! विलपसि किमीदृशं बहुधा ॥ २९ ॥

प्रियसखे ! न खलु साधारो बहुनाऽपि हु विलपितेन यदस्ति ।
तस्मात्किं छागिकागलस्तनसमेन विफलेन रुदितेन ? ॥ ३० ॥

यदि विलपसि शतकृत्वस्ताडयसि देहं करोषि गुरुशोकम् ।
तथापि हु नैति दयितः कालकृतान्तेन यो नीतः ॥ ३१ ॥

तत एतद् ज्ञात्वा स्नेहं शिथिलय मुञ्च गुरुशोकम् ।
उद्यच्छ जिनेन्द्रधर्मे एवविधं दुःखशमने ॥ ३२ ॥

स तपःसंयमरुपो देवभवे नास्ति वर्तमानायाः ।
सम्यकत्त्वशुद्धिहेतुं सुन्दरि ! तस्मादुद्यमं कुरु ॥ ३३ ॥

गत्वा विदेहेषु वन्दस्व त्रैलोक्यबान्धवजिनेन्द्रान् ।
केवलिनस्तथा साधून् संयमकरणोद्यतान् धीरान् ॥ ३४ ॥

---

१. छालिका = छागिका = अजा । २. ताडयसि । ३. शिथिलय = शिथिलं कुरु ।
४. सः=जिनेन्द्रधर्मः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सासयजिणभवणट्ठियजिणिंदबिंबाणि परमभत्तीए ।
कुलसेलदीवपव्वयठियाणि गंतूण पणमेसु ॥ ३५ ॥

एवं विसुद्धसम्मत्तसंजुया पाविऊण मणुयत्तं ।
लद्धुं जिणवरदिक्खं हयकम्मा [1]वंयसि सिद्धीए ॥ ३६ ॥

एवंविहदुक्खाइं [2]तत्थ गया नेव पाविसि अवस्सं ।
जरमरणरोगसोगेहिं वज्जिया होसि आकालं ॥ ३७ ॥

एवं सयंपभाए भणिया चंदप्पहा तहिं देवी ।
मोत्तुण दइयसोगं समागया एत्थ लोयम्मि ॥ ३८ ॥

सहिया सयंपभाए वंदित्ता जिणवरिंदबिंबाइं ।
नंदीसरम्मि ताहे समागया एत्थ भरहम्मि ॥ ३९ ॥

तत्थ य पेच्छइ नयरे रायगिहे पवर[3]बाहिरूज्जाणे ।
समणगणसेवियकमं ससुरासुरमणुयपरियरियं ॥ ४० ॥

---

शाश्वतजिनभवनस्थितजिनेन्द्रबिम्बानि परमभक्त्या ।
कुलशैलद्वीपपर्वतस्थितानि गत्वा प्रणम ॥ ३५ ॥

एवं विशुद्धसम्यकत्वसंयुक्ता प्राप्य मनुष्यत्वम् ।
लब्ध्वा जिनवरदीक्षां हतकर्मा व्रजसि सिद्धौ ॥ ३६ ॥

एवंविधदु:खानि तत्र गता नैव प्राप्स्यस्यवश्यम् ।
जरामरणरोगशोकैर्वर्जिता भवसि आकालम् ॥ ३७ ॥

एवं स्वयंप्रभया भणिता चन्द्रप्रभा तदा देवी ।
मुक्त्वा दयितशोकं समागताऽत्र लोके ॥ ३८ ॥

सहिता स्वयंप्रभया वन्दित्वा जिनवरेन्द्रबिम्बानि ।
नंदीश्वरे तदा समागताऽत्र भरते ॥ ३९ ॥

तत्र च प्रेक्षते नगरे राजगृहे प्रवरबाह्योद्याने ।
श्रमणगणसेवितक्रमं ससुरासुरमनुजपरिवृत्तम् ॥ ४० ॥

---

१. व्रजसि=गच्छसि । २. तत्र=सिद्धौ । ३. बाहिरं=बाह्यम् ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

धम्मं वागरमाणं[1] सुहंकरं नाम केवलिं ताहे ।
गयणाओ ओयरिया सा देवी पियसहिसमेया ॥ ४१ ॥ युग्मम् ॥

वंदिय सुहंकरं तं सुहं करंतं तु भवियसत्ताणं ।
सेसंपि समणसंघं उवविट्ठा उचियदेसम्मि ॥ ४२ ॥

अह सो भयवं तीए सदेवमणुयासुराइपरिसाए ।
गंभीरभारईए एवं भणिउं समाढत्तो ॥ ४३ ॥

अइदुलहो मणुयभवो सुकुलुप्पत्ती जिणिंदधम्मो य ।
पत्तम्मि तम्मि उज्जमह सव्वहा मा पमाएह[2] ॥ ४४ ॥

करगहियसलिलसरिसं खणे खणे झिज्जए[3] इमं आउं ।
तम्हा जिणवरधम्मे मा हु पमायं कुणह तुम्हे ॥ ४५ ॥

कुससूइअग्गसंगयजललवतुल्लम्मि जीवियव्वम्मि ।
उज्जमह भावसारं अइविसमा जेण कम्मगई ॥ ४६ ॥

---

धर्मं व्याकुर्वन्तं शुभंकरं नाम केवलिनं तदा ।
गगनादवतीर्णा सा देवी प्रियसखीसमेता ॥ ४१ ॥ युग्मम् ॥

वंदित्वा शुभंकरं तं सुखं (शुभं) कुर्वन्तन्तु भविकसत्त्वानाम् ।
शेषमपिश्रमणसङ्घमुपविष्टोचितदेशे ॥ ४२ ॥

अथ स भगवान् तस्यां सदेवमनुजासुरादिपर्षदि ।
गंभीरभारत्यैवं भणितुं समारब्धः ॥ ४३ ॥

अतिदुर्लभो मनुष्यभवस्सुकुलोत्पत्ति-र्जिनेन्द्रधर्मश्च ।
प्राप्ते तस्मिन्नुद्यच्छत सर्वथा मा प्रमाद्यत ॥ ४४ ॥

करगृहीतसलिलसदृशं क्षणे क्षणे क्षीयते इदमायुः ।
तस्मात् जिनवरधर्मे मा खलु प्रमादं कुरुत यूयम् ॥ ४५ ॥

कुशसूच्याग्रसङ्गतजललवतुल्ये जीवितव्ये ।
उद्यच्छत भावसारमतिविषमा येन कर्मगतिः ॥ ४६ ॥

---

१. व्याकुर्वन्तम्=उपदिशन्तम् । २. प्रमाद्यत=प्रमादं कुरुत । ३. क्षीयते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जम्हा पमायमूलं दुक्खं सव्वंपि एत्थ संसारे ।
चउसुवि गईसु नियमा तेण इमो होइ मोत्तव्वो ॥ ४७ ॥

एसो जम्मनिमित्तं रोगजरामरणदुक्खसयहेऊ ।
एयवसगा य सत्ता भमंति भवसागरे घोरे ॥ ४८ ॥

मोत्तुण ता पमायं करेह वरउज्जमं जिणिंदस्स ।
धम्मम्मि तग्गयमणा संसारसमुद्दबोहित्थे[१] ॥ ४९ ॥

परमत्थबंधुभूए इमम्मि धम्मम्मि उज्जमं कुणह ।
निद्धूयसव्वपावा पावह तो मोक्खसोक्खाइं ॥ ५० ॥

नाउं [२]कहंतरं सा देवी चंदप्पहा इमं भणइ ।
भयवं ! कत्थुववन्नो दइओ चंदज्जुणो मज्झ ? ॥ ५१ ॥

मह कित्तियं च आउं इओ चुयाए य कत्थ मह जम्मो ? ।
दइएण तेण होज्ज नवा दंसणं मज्झ ? ॥ ५२ ॥

---

**यस्मात् प्रमादमूलं दुःखं सर्वमप्यत्र संसारे ।**
**चतुर्ष्वपि गतिषु नियमा तेनायं भवति मोक्तव्यः ॥ ४७ ॥**

**एष जन्मनिमित्तं रोगजरामरणदुःखशतहेतुः ।**
**एतद्वशगाश्च सत्त्वा भ्राम्यन्ति भवसागरे घोरे ॥ ४८ ॥**

**मुक्त्वा तस्मात् प्रमादं कुरुत वरोद्यमं जिनेन्द्रस्य ।**
**धर्मे तद्गतमनाः संसारसमुद्रबोहित्थे ॥ ४९ ॥**

**परमार्थबन्धुभूतेऽस्मिन् धर्मे उद्यमं कुरुत ।**
**निर्धूतसर्वपापाः प्राप्नुत ततो मोक्षसौख्यानि ॥ ५० ॥**

**ज्ञात्वा कथान्तरं सा देवी चन्द्रप्रभेदं भणति ।**
**भगवन् कुत्रोत्पन्नो दयितश्चन्द्रार्जुनो मम ? ॥ ५१ ॥**

**मम कियच्चायुरितश्च्युतायाश्च कुत्र मम जन्म ? ।**
**दयितेन तेन समकं भवेन्नवा दर्शनं मम ? ॥ ५२ ॥**

---

**१. बोहित्थो=यानपात्रम् । २. कथाया उपदेशस्यान्तरं विचालरूपं कथान्तरं/प्रस्तावमिति भावः ।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च पुच्छिओ सो बहुमाणजुयाए तीए देवीए ।
भयवं सुहंकरो अह एवं भणिउं समाढत्तो ॥ ५३ ॥

भद्दे ! सो तुह दइओ इह चेव य भारहम्मि वासम्मि ।
वेयड्डपव्वयवरे उत्तरसेढीए रम्माए ॥ ५४ ॥

नयरम्मि चमरचंचे भाणुगईनामयस्स खयरस्स ।
पियजायाकुच्छीए उप्पन्नो पुत्तभावेण ॥ ५५ ॥ युग्मम् ॥

पलिओवमाणि अट्ठ ओ तुह आउ आसि समुदियं[1] मद्दे ! ।
इण्हिं तु वासलक्खं अवसेसं चिट्ठए आउं ॥ ५६ ॥

पुन्नम्मि वासलक्खे चइऊण तुमंपि तीइ सेढीए ।
सुरनंदणम्मि नयरे खयरस्स ओ असणिवेगस्स ॥ ५७ ॥

धूया होहिसि भद्दे ! पवरा उ पियंगुमंजरीनामा ।
पुव्वदइएण समयं तत्थ य तुह दंसणं होही ॥ ५८ ॥ युग्मम् ॥

---

**एवञ्च पृष्टः स बहुमानयुक्तया तया देव्या ।
भगवान् शुभंकरोऽथैवं भणितुं समारब्धः ॥ ५३ ॥**

**भद्रे ! स तव दयित इहैव च भरते वर्षे ।
वैताढयपर्वतवरे उत्तरश्रेण्यां रम्यायाम् ॥ ५४ ॥**

**नगरे चमरचञ्चायां भानुगतिनामकस्य खेचरस्य ।
प्रियजायाकुक्षावुत्पन्नः पुत्रभावेण ॥ ५५ ॥ युग्मम् ॥**

**पल्योपमानिऽष्ट ओ तवाऽऽयुरासीत् समुदितं भद्रे ! ।
इदानीन्तु वर्षलक्षमवशेषं तिष्ठति आयुः ॥ ५६ ॥**

**पूर्णे वर्षलक्षे च्युत्वा त्वमपि तस्यां श्रेण्यां ।
सुरनन्दने नगरे खेचरस्य ओ अशनिवेगस्य ॥ ५७ ॥**

**दुहिता भविष्यसि भद्रे ! प्रवरा तु प्रियङ्गुमञ्जरी नामा ।
पूर्वदयितेन समकं तत्र च तव दर्शनं भविष्यति ॥ ५८ ॥ युग्मम् ॥**

१. समुदितं=जन्मतः प्रभृति सर्वम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य भणइ देवी नायव्वो सो मए कहं भयवं ! ।
कहवा पाणिग्गहणं होही मह तेण समयंपि ? ॥ ५९ ॥

अह केवलिणा भणियं निसुणसु जत्ताए जिणवरिंदस्स ।
उम्मिट्ठकरिवराओ मोइस्सइ जो तुमं भद्दे ! ॥ ६० ॥

सो चेव य नायव्वो एसो सो पुव्ववल्लहो मज्झ ।
पुणरवि विसेसदंसणमेवं तुह होहिही तेण ॥ ६१ ॥ युग्मम् ॥

तुह माउलधूयाए पाणिग्गहणम्मि कणगमालाए ।
काउं तीए रूवं एही सो मित्तकज्जेण ॥ ६२ ॥

जो तत्थ कणगमालारूवो होही स पुव्वदइउत्ति ।
नायव्वो नीसंकं भद्दे ! चंदप्पभे ! तुमए ॥ ६३ ॥

तयणंतरं च होही पाणिग्गहणंपि तेण सह तुज्झ ।
जाईसरणेण तुमं सुमरिस्ससि[1] मह इमं वयणं ॥ ६४ ॥

---

**ततश्च भणति देवी ज्ञातव्यः स मया कथं भगवन् ! ।**
**कथं वा पाणिग्रहणं भविष्यति मम तेन समकमपि ? ॥ ५९ ॥**

**अथ केवलिना भणितं निशृणु यात्रायां जिनवरेन्द्रस्य ।**
**उन्मिष्टकरिवरात् मोक्ष्यति यस्त्वं भद्रे ! ॥ ६० ॥**

**स एव च ज्ञातव्य एषः स पूर्ववल्लभो मम ।**
**पुनरपि विशेषदर्शनमेवं तव भविष्यति तेन ॥ ६१ ॥ युग्मम् ॥**

**तव मातुलदुहितुः पाणिग्रहणे कनकमालायाः ।**
**कृत्वा तस्या रूपमेष्यति स मित्रकार्येण ॥ ६२ ॥**

**यस्तत्र कनकमालारूपो भविष्यति स पूर्वदयितेति ।**
**ज्ञातव्यो निःशङ्कं भद्रे । चन्द्रप्रभे ! त्वया ॥ ६३ ॥**

**तदनन्तरञ्च भविष्यति पाणिग्रहणमपि तेन सह तव ।**
**जातिस्मरणेन त्वं स्मरिष्यति ममेदं वचनम् ॥ ६४ ॥**

---

१. स्मरिष्यसि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं पियसहि ! धारिणि ! केवलिवयणं निसम्म सा देवी ।
जाया हरिसियहियया केवलिणो नमिय पयकमलं ॥ ६५ ॥

तत्तो उप्पइया सा सासयजिणचेइयाइं सव्वाइं ।
वंदित्ता तित्थयरे महाविदेहेसु सव्वेवि ॥ ६६ ॥

सट्ठाणं संपत्ता तं चिय देवं मणेण चिंतेंती ।
अह अन्नया कयाइवि साविं चुया आउयखयम्मि ॥ ६७ ॥ तिसृभिः कुलकम् ॥

एवं च ठिए । जा सा वसुमई अज्जा देवी चंदप्पहा य सुरलोए ।
सा हं पियंगुमंजरिनामा इह सुयणु ! संजाया ॥ ६८ ॥

दट्ठूण देवनिवहं जाईसरणम्मि अज्ज उप्पन्ने ।
संभरिओ सो देवो पाणप्पिओ आसि जो सग्गे ॥ ६९ ॥

चिरपरिचियस्स पियसहि ! गाढं उक्कंठिया अहं इण्हि ।
तस्संगमइच्छाए समुच्छुगं इण्हि मह चित्तं ॥ ७० ॥

---

एवं प्रियसखे ! धारिणि ! केवलीवचनं निशम्य सा देवी ।
जाता हर्षितहृदया केवलिनो नत्वा पदकमलम् ॥ ६५ ॥

तत उत्पतिता सा शाश्वतजिनचैत्यानि सर्वाणि ।
वन्दित्वा तीर्थंकरान् महाविदेहेषु सर्वान्नपि ॥ ६६ ॥

स्वस्थानं संप्राप्ता तमेव देवं मनसा चिन्तयन्ती ।
अथान्यदा कदाचिदपि साऽपि च्युताऽऽयुः क्षये ॥ ६७ ॥ तिसृभिः कुलकम् ॥

एवञ्चस्थिते । या सा वसुमत्यार्या देवी चन्द्रप्रभा च सुरलोके ।
साऽहं प्रियङगुमञ्जरीनामेह सुतनो ! सञ्जाता ॥ ६८ ॥

दृष्टवा देवनिवहं जातिस्मरणेऽद्योत्पन्ने ।
संस्मृतः स देवः प्राणप्रियोऽऽसीत् यः स्वर्गे ॥ ६९ ॥

चिरपरिचितस्य प्रियसखे ! गाढमुत्कण्ठिताऽहमिदानीम् ।
तत्सङ्गमेच्छया समुत्सुकमिदानीं मम चित्तम् ॥ ७० ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं [1]कइय दिणं होही जम्मि ससिणेहनिद्धदिट्ठीए ।
पुव्वभवनेहबद्धं पेच्छिस्सं वल्लहं तमहं ? ॥ ७१ ॥

कह सो मे दट्ठव्वो सिग्घं कह तेण संगमो होही ।
एवंविहचिंताए जाया सोगाउरा अहयं ॥ ७२ ॥

तं चिय चिंतंतीएऽवक्खित्तमणाइ आगयावि तुमं ।
पियसहि ! नो सच्चविया तेण न संभासिया भद्दे ! ॥ ७३ ॥

तं जं तुमए पुट्ठं जायं किं सोगकारणं तुज्झ ।
पियसहि ! धारिणि ! तं तुह नीसेसं साहियं एयं ॥ ७४ ॥

अह धारिणीए भणियं केवलिवयणं न अन्नहा भद्दे ! ।
ता कीस कुणसि सोयं एवं एएण होयव्वं ? ॥ ७५ ॥

हसिऊण मए भणियं एवं एयंति नत्थि संदेहो ।
नवरं अइउक्कंठा [2]तुवरइ मह माणसं सुयणु ! ॥ ७६ ॥

---

**तं कदा दिनं भविष्यति यस्मिन् सस्नेहस्निग्धदृष्टया ।**
**पूर्वभवस्नेहबद्धं प्रेक्षिष्ये वल्लभं तमहम् ॥ ७१ ॥**

**कथं स मया दृष्टव्यः शीघ्रं कथं तेन सङ्गमो भविष्यति ।**
**एवंविधचिन्तया जाता शोकातुराऽहकम् ॥ ७२ ॥**

**तमेव चिन्तयन्त्याऽक्षिप्तमनसाऽऽगताऽपि ! त्वं ।**
**प्रियसखे ! न दृष्टा तेन न संभाषिता भद्रे ! ॥ ७३ ॥**

**तद्यत्त्वया पृष्टं जातं किं शोककारणं तव ।**
**प्रियसखे ! धारिणि ! तत्तव निःशेषं कथितमेतद् ॥ ७४ ॥**

**अथ धारिण्या भणितं केवली वचनं नान्यथा भद्रे ! ।**
**ततः कस्मात् करोषि शोकमेवमेतेन भवितव्यम् ? ॥ ७५ ॥**

**हसित्वा मया भणितं एवमेतदिति नास्ति सन्देहः ।**
**नवरं अत्युत्कण्ठा त्वरते मम मानसं सुतनो ! ॥ ७६ ॥**

१. कइय=कदा । २. त्वरते ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एत्थंतरम्मि पियमय ! चंपगमाला समागया जणणी ।
भणइ लहु पुत्ति ! मज्जसु भुंजसु कुण पवरसिंगारं ॥ ७७ ॥

भणियं च मए किं अम्मि ! कारणं जं [1]अइप्पगे चेव ।
जाया भोयणवेला, अम्माए तओ इमं भणियं ॥ ७८ ॥

उज्जाणे जिणभवणे होही ण्हवणं जुगादिदेवस्स ।
महया विच्छड्डेणं अत्थमणं जाव सूरस्स ॥ ७९ ॥

तत्थ य पुरवत्थव्वो वच्चइ ण्हवणस्स पे[2]क्खओ लोगो ।
अम्हेवि गमिस्सामो परियणसहियाइं तत्थेव ॥ ८० ॥

तेणेव कारणेणं पभायसमयम्मि भोयणं सिद्धं ।
ता होसु[3] लहुं [4]पउणा जिणभवणे जेण वच्चामो ॥ ८१ ॥

एवं नियजणणीए वयणं सोऊण उट्ठिया झत्ति ।
कयभोयणाइचेट्ठा आरूढा सं[5]दणे पवरे ॥ ८२ ॥

---

**अत्रान्तरे प्रियतम ! चंपकमाला समागता जननी ।**
**भणति लघु पुत्रि ! मज्ज भुङ्ग्धि कुरु प्रवरशृंगारम् ॥ ७७ ॥**

**भणितं च मया किं अम्बे ! कारणं यदतिप्रगैव ।**
**जाता भोजनवेला अम्बया तत इदं भणितम् ॥ ७८ ॥**

**उद्याने जिनभवने भविष्यति स्नपनं युगादिदेवस्य ।**
**महता विच्छर्देनास्तमयनं यावत्सूरस्य ॥ ७६ ॥**

**तत्र च पुरवास्तव्यो व्रजति स्नपनस्य प्रेक्षको लोकः ।**
**वयमपि गन्तास्मः परिजनसहितास्तत्रैव ॥ ८० ॥**

**तेनैव कारणेन प्रभातसमये भोजनं सिद्धम् ।**
**तस्माद्भव लघु प्रगुणा जिनभवने येन व्रजामः ॥ ८१ ॥**

**एवं निजजनन्या वचनं श्रुत्वोत्थिता झटिति ।**
**कृतभोजनादिचेष्टाऽऽरूढा स्यन्दने प्रवरे ॥ ८२ ॥**

---

१. अतिप्रगे=अतिप्रभाते । २. प्रेक्षकः । ३. भव । ४. प्रगुणा=सज्जा । ५ स्यन्दनः=रथः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियपरियणपरियरिया गया य उज्जाणभूसणे तत्थ ।
जिणमंदिरम्मि सम्मं पूइत्ता वंदिओ भयवं ॥ ८३ ॥

दिट्ठं जिणिंद ण्हवणं कीरंतं भत्तिजुत्तखयरेहिं ।
वित्तप्पाये न्हवणे नियपरियणसंजुया अहयं ॥ ८४ ॥

आरूढा रहपवरे वलिया नयरस्स अभिमुहा जाव ।
उम्मिट्ठो नयराओ नीहरिओ करिवरो ताव ॥ ८५ ॥

तं दट्ठुं संमुहमिंतं तुरया मह रहवरस्स उत्तट्ठा[1] ।
उम्मग्गेण पयट्ठा भग्गो सो संदणो ताहे ॥ ८६ ॥

भूमीए अहं पडिया मुच्छाए विगयचेयणा जाया ।
तेण परं जं जायं पिययम ! तमहं न जाणामि ॥ ८७ ॥

नवरं दिट्ठो सि तुमं वीयंतो[2] निययउत्तरीएण ।
दट्ठूण तुमं जाओ गरुओ हिययम्मि आणंदो ॥ ८८ ॥

---

**निजपरिजनपरिवृत्ता गता चोद्यानभूषणे तत्र ।**
**जिनमन्दिरे सम्यग् पूजयित्वा वंदितो भगवान् ॥ ८३ ॥**

**दृष्टं जिनेन्द्र स्नपनं क्रियमाणं भक्तियुक्तखेचरैः ।**
**वृत्तप्राये स्नपने निजपरिजनसंयुक्ताऽहकम् ॥ ८४ ॥**

**आरुढा रथप्रवरे वलिता नगरस्याऽभिमुखा यावत् ।**
**उन्मिष्टो नगरात् निःसृतःकरिवरस्तावत् ॥ ८५ ॥**

**तं दृष्टवा संमुखमायन्तं त्वरया मम रथवरस्योत्त्रस्ता ।**
**उन्मार्गेण प्रवृत्तो भग्नः स स्यन्दनस्तदा ॥ ८६ ॥**

**भूम्यामहं पतिता मूर्च्छया विगतचेतना जाता ।**
**तेन परं यज्जातं प्रियतम ! तमहं न जानामि ॥ ८७ ॥**

**नवरं दृष्टोऽसि त्वम् व्यजनं कुर्वन् निजकोत्तरीयेण ।**
**दृष्ट्वा त्वं जातो गुरुको हृदयेऽऽनन्दः ॥ ८८ ॥**

१. उत्त्रस्ता=भयभीताः । २. व्यजनं कुर्वन् ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तत्तो मज्झ विगप्पो पिययम ! एसो मणम्मि संजाओ ।
एयं तं संजायं केवलिणा जं तयाइट्ठं[1] ॥ ८९ ॥

पुव्वभवसंगओ सो ता नूणं एस वल्लहो मज्झ ।
रमइ य इमम्मि दिट्ठी मणं च आणंदमुव्वहइ ॥ ९० ॥

अमएणव संसित्तं दिट्ठम्मि इमम्मि मह सरीरंपि ।
वियसियनयणो एसोवि दीसए साणुरागोव्व ॥ ९१ ॥

ता मह पाणपिओ सो अवस्समेसोत्ति जाव चिंतेमि ।
ताव य परियणसहिया समागया तत्थ मह धाई ॥ ९२ ॥

अभिनंदिऊण तीए आपुट्ठो ताहिं पिययम ! तुमंति ।
वच्चमो नियनयरे उस्सूरं वट्टए जेण ॥ ९३ ॥

एवं भणिउं चलिया तत्तो य मए विचिंतियं एयं ।
पुन्नेहिं पिओ दिट्ठो इण्हिं न चएमि छड्डेउं[2] ॥ ९४ ॥

---

ततो मम विकल्पः प्रियतम ! एष मनसि सञ्जातः ।
एतं तं सञ्जातं केवलिना यत्तदादिष्टम् ॥ ८९ ॥

पूर्वभवसङ्गतः स तस्मान्नूनमेष वल्लभो मम ।
रमते चास्मिन् दृष्टि-र्मनश्चानन्दमुद्वहति ॥ ९० ॥

अमृतेनैव संसिक्तं दृष्टेऽस्मिन् मम शरीरमपि ।
विकसितनयन एषोऽपि पश्यति सानुरागमिव ॥ ९१ ॥

ततो मम प्राणप्रियः सोऽवश्यमेष इति यावच्चिन्तयामि ।
तावच्च परिजनसहिता समागता तत्र मम धात्री ॥ ९२ ॥

अभिनंद्य, तया आपृष्टस्तदा प्रियतम ! त्वमपि ।
व्रजामो निजनगरे उत्सूरं वर्तते येन ॥ ९३ ॥

एवं भणित्वा चलिता ततश्च मया विचिन्तितमेतद् ।
पुन्यैःप्रियो दृष्ट इदानीं न शक्नोमि मोक्तुम् ॥ ९४ ॥

---

१. तदा आदिष्टम् । २. छड्डेउं=मोक्तुम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयस्स वयणपंकयपलोयणं मोत्तु मह इमा दिट्ठी ।
पंकनि[1]बुड्डा दुब्बलगाई[2]व्व न सक्कए गंतुं ॥ ९५ ॥

अविय । एवंविहे मुहुत्ते नयणजुयं मिलइ कस्सवि जणस्स ।
हत्थिव्व पकखु[3]त्तो [4]दुक्खुत्तारं दढं होइ ॥ ९६ ॥

एसा वि मज्झ धाई चलिया एयं पमोत्तु मणदइयं ।
लज्जाए वज्जरिउं अहंपि सक्केमि नो किंपि ॥ ९७ ॥

ता मज्झ इमं जुत्तं गिण्हामि इमस्स किंचि आभरणं ।
तं चिय [5]पलोइऊणं जेण मणं नि[6]व्वुइं कुणइ ॥ ९८ ॥

मणवल्लहेण एएण विरहिया नियम्गिहम्मि संपत्ता ।
तं चेव [7]पुलइऊणं संधीरिस्सामि नियहिययं ॥ ९९ ॥

अन्नं च । किल एस इत्थिरूवो पाणिग्गहणम्मि कणगमालाए ।
एही, तत्थ य होही पुणोवि किल दंसणं इमिणा ॥ १०० ॥

---

**एतस्य वदनपङ्कजप्रलोकनं मुक्त्वा ममेयं दृष्टिः ।**
**पङ्कनिमग्ना दुर्बलगौरिव न शक्यते गन्तुम् ॥ ९५ ॥ अपि च ।**

**एवंविधे मुहूर्त्ते नयनयुगं मिलति कस्याऽपि जनस्य ।**
**हस्ति इव पङ्कनिमग्नो दुःखोत्तारं दृढं भवति ॥ ९६ ॥**

**एषाऽपि मम धात्री चलिता एनं प्रमुच्य मनोदयितम् ।**
**लज्जया कथयितुमहमपि शक्नोमि न किमपि ॥ ९७ ॥**

**तस्माद् ममेदं युक्तं गृह्णाम्यस्य किञ्चिदाभरणम् ।**
**तमेव प्रलोक्य येन मनो निर्वृत्तिं करोति ॥ ९८ ॥**

**मनोवल्लभेनैतेनविरहिता निजगृहे संप्राप्ता ।**
**तञ्चैवं दृष्ट्वा संधारयिष्यामि निजहृदयम् ॥ ९९ ॥ अन्यञ्च ।**

**किलैष स्त्रीरुपः पाणिग्रहणे कनकमालायाः ।**
**एष्यति तत्र च भविष्यति पुनरपि किल दर्शनमनेन ॥ १०० ॥**

---

१. निबुड्डा=मग्ना । २. गाई=गौः । ३. खुत्तो=निमग्नः । ४. दुःखेन उत्तरणं=उत्तारो यस्य तत् 'मिलितं नयनयुगं' इति विशेष्यम् । ५. प्रलोक्य । ६. निर्वृत्तिः । ७. दृष्ट्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय तइया केवलिया आइट्ठं मज्झ तेण एयस्स ।
तं चेव य आभरणं साभिन्नाणं[1] तहिं होही ॥ १०१ ॥

एवं विचिंतिऊणं मुद्दारयणं तु तुम्ह हत्थाओ ।
गहियं वल्लह ! तइया नियया य समप्पिया मुद्दा ॥ १०२ ॥

पियकर[2]फासपवित्तं [3]परिहित्ता तंपि गुरुपमोएण ।
चलिया वलंतगीवा सपरियणा नयरसंमुहिया ॥ १०३ ॥

अह धारिणिनामाए कन्ने होऊण मज्झ उल्लवियं ।
एयं केवलिवयणं नि[4]व्वडियं ताव इक्कं तु ॥ १०४ ॥

ता एस देवजीवो पुव्विं जो आसि तुज्झ वल्लहओ ।
एवं तीए भणिए सरोसमेवं मए भणियं ॥ १०५ ॥

हुं हुं दिट्ठा सि तुमं धारिणि ! [5]अवसरसु दिट्ठिमग्गाओ ।
एवंविहमणि[6]बद्धं जा जंपसि अम्ह पुरउत्ति ॥ १०६ ॥

---

**इति तदा केवलिनाऽऽदिष्टं मम तेनैतस्य ।**
**तमेव चाभरणं स्वाभिज्ञानं तर्हि भविष्यति ॥ १०१ ॥**

**एवं विचिन्त्य मुद्रारत्नन्तु तव हस्तात् ।**
**गृहीतं वल्लभ ! तदा निजका च समर्पिता मुद्रा ॥ १०२ ॥**

**प्रियकरस्पर्शपवित्रं परिधाय तमपि गुरुप्रमोदेन ।**
**चलिता वलत्ग्रीवा सपरिजना नगर संमुखिका (संमुखा) ॥ १०३ ॥**

**अथ धारिणीनाम्नः कर्णेभूत्वा ममोल्लपितम् ।**
**एतद् केवलिवचनं निर्वृत्तं तावदेकन्तु ॥ १०४ ॥**

**तत एष देवजीवः पूर्वं योऽऽसीत् तव वल्लभकः ।**
**एवं तस्या भणिते सरोषमेव मया भणितम् ॥ १०५ ॥**

**हुं हुं दृष्टाऽसि त्वं धारिणि ! अपसर दृष्टिमार्गात् ।**
**एवंविधमनिबद्धं यावज्जल्पसि अस्मान् पुरत इति ॥ १०६ ॥**

---

१. स्वाभिज्ञानम्=उपलक्षकं चिह्नम्। २. फासो=स्पर्शः। ३. परिधाय। ४. निर्वृत्तम्=सिद्धम्। ५. अपसर=दूरीभव। ६. अनिबद्धं=असंबद्धम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इण्हिं न वल्लहो किं पुव्वं जं आसि मज्झ वल्लहओ ।
ईसिं हसिऊण तओ कयंजली धारिणी भणइ ॥ १०७ ॥

पियसहि ! खम अवराहं सव्वमसच्चं इमं मए भणियं ।
जह पुव्वं तह अहुणावि वल्लहो चेव तुह एसो ॥ १०८ ॥

किं पुण भणामि सच्चं जइ दइओ कीस उज्झिउं चलिया ? ।
ता मा पियसहि ! रूससु घडइ चिय मह इमं वयणं ॥ १०९ ॥

एमाइ बहुविगप्पं सहासवयणाइ तीइ संजुत्ता ।
पत्ता गिहम्मि कमसो [1]अत्थमिओ ताव सूरोवि ॥ ११० ॥

अह तीए धारिणीए जाइसरणाइसयलवुत्तंतो ।
कहिओ मह माऊए तं सोऊं हरिसिया एसा ॥ १११ ॥

तीएवि सव्वं कहियं मह पिउणो असणिवेगनामस्स ।
तत्तो य हरिसिएण वज्जरियं तेण एवं तु ॥ ११२ ॥

---

**इदानीं न वल्लभः किं पूर्वं यदाऽऽसीत् मम वल्लभः ।
ईषद्धसित्वा ततः कृताञ्जलि धारिणी भणति ॥ १०७ ॥**

**प्रियसखे ! क्षमस्व अपराधं सर्वमसत्यमिदं मया भणितं ।
यथा पूर्वं तथाऽधुनाऽपि वल्लभश्चैव तवैषः ॥ १०८ ॥**

**किं पुनर्भणामि सत्यं यदि दयितः कस्मादुज्झित्वा चलिता ? ।
तस्माद् मा प्रियसखे ! रुष्यसि घटति एव ममेदं वचनम् ॥ १०९ ॥**

**एवमादिबहुविकल्पं सहास्यवचनानि तया संयुक्ता ।
प्राप्ता गृहे क्रमशोऽस्तमितस्तावत् सूरोऽपि ॥ ११० ॥**

**अथ तया धारिण्या जातिस्मरणादि सकलवृतान्तः ।
कथितो मम मातुस्तच्छ्रुत्वा हर्षितैषा ॥ १११ ॥**

**तयापि सर्वं कथितं मम पितुरशनिवेगनाम्नः ।
ततश्च हर्षितेन कथितं तेन एवन्तु ॥ ११२ ॥**

१. अस्तम् इतो=गतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसि मह गरुयचिंता धूया जं पुरिसवेसिणी जाया ।
न य इच्छइ किंचि वरं कहमेयमहं करिस्सामि ? ॥ ११३ ॥

सुंदरमेयं जायं जाईसरणं इमीए जं जायं ।
अम्हं चिय अब्भुदओ अब्भुदओ [1]उब्भिन्ने पाणियं पडियं ॥ ११४ ॥

अन्नं च । पुरिसेहिं मज्झ सिट्ठं हत्थिभए जेण मोइया एसा ।
सो भाणुमइपुत्तो चित्तगई नाम वरकुमरो ॥ ११५ ॥

तस्सेव देमि एयं जइ इच्छा अत्थि तम्मि एआए ? ।
तत्तो चंपगमाला हरिसियचित्ता इमं भणइ ॥ ११६ ॥

जोगो च्चिय सो कुमरो इमाइ पवराइ मज्झ धूयाए ।
एईएवि संजाओ अइगुरुओ तम्मि अणुराओ ॥ ११७ ॥

किंतु निसुणेसु सामिय ! रन्नो कणगप्पहस्स एयस्स ।
भाणुगइणो य रण्णो परोप्परं गरुयवेरंति ॥ ११८ ॥

---

**आसीत् मम गुरुकचिन्ता दुहिता यत् पुरुषद्वेषिणी जाता ।**
**न चेच्छति किञ्चिद्वरं कथमेतदहं करिष्यामि ? ॥ ११३ ॥**

**सुन्दरमेतज्जातं जातिस्मरणमस्या यज्जातम् ।**
**आवयोरेवाऽभ्युदय उद्भिन्ने पानीयं पतितम् ॥ ११४ ॥ अन्यच्च ।**

**पुरुषैर्मम शिष्टं हस्तिभये येन मोचितैषा ।**
**स भानुम( ग )तिपुत्रश्चित्रगतिर्नामा वरकुमारः ॥ ११५ ॥**

**तस्यैव ददामि एनां यद्येच्छाऽस्ति तस्मिन्नेतस्याः ।**
**ततश्चम्पकमाला हर्षितचित्तेदं भणति ॥ ११६ ॥**

**योग्यश्चैव स कुमारोऽस्याः प्रवराया मम दुहितुः ।**
**एतस्याऽपि सञ्जातोऽतिगुरुकस्तस्मिन्ननुरागः ॥ ११७ ॥**

**किंतु निशृणु स्वामिन् ! राज्ञः कनकप्रभस्यैतस्य ।**
**भानुगतेश्चराज्ञः परस्परं गुरुकवैरमिति ॥ ११८ ॥**

---

१. उद्भिन्ने=अङ्कुरितमात्रे पानीयं=जलवृष्टिर्यथा गुणावहा तथेत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलणप्पहकज्जेणं, सुप्पसिद्धं चेव तुम्ह एयंति ।
ता कह एही इहइं चित्तगई पाणिगहणत्थं ? ॥ ११९ ॥

धूया सयंवरा जइ पेसिज्जइ तम्मि चेव नयरम्मि ।
एवं न होइ पिययम ! आणंदो मज्झ हिययस्स ॥ १२० ॥

जओ । एसा एक्का धूया वल्लहिया ता इमीए वीवाहं ।
जह नवि पेच्छामि अहं ता किं मह जीविएणंति ? ॥ १२१ ॥

एवं चंपगमाला मह जणणी जाव तत्थ उल्लवइ ।
ताव य चंदणनामो मह भाया आगओ भणइ ॥ १२२ ॥

किं अच्छह वीसत्था तुम्हे इह ताय ! निव्विंचिंतत्ति[1] ।
एयं नयरं ताव य सव्वंपि हु आउलीभूयं ॥ १२३ ॥

तत्तो भणियं पिउणा केण व कज्जेण पुत्त ! जाणासि ? ।
अह चंदणेण भणियं इय वत्ता ताव नयरम्मि ॥ १२४ ॥

---

**ज्वलेनप्रभकार्येण, सुप्रसिद्धमेव तव एतदिति ।**
**तस्मात्कथमेष्यति इह चित्रगतिः पाणिग्रहणार्थम् ? ॥ ११९ ॥**

**दुहिता स्वयंवरा यदि प्रेष्यते तस्मिन्नेव नगरे ।**
**एवं न भवति प्रियतम ! आनन्दो मम हृदयस्य ॥ १२० ॥ यतः ।**

**एषा एका दुहिता वल्लभिका ततोऽस्या विवाहम् ।**
**यदि नाऽपि प्रेक्षेऽहं तस्मात्किं मम जीवितेनेति ? ॥ १२१ ॥**

**एवं चंपकमाला मम जननी यावत्तत्रोल्लपति ।**
**तावच्च चन्दननामा मम भ्राता आगतो भणति ॥ १२२ ॥**

**किं आस्ध्वं विश्वस्ता यूयमिह तात ! निर्विचिन्तेति ।**
**एतन्नगरं तावच्च सर्वमपि खल्वाकुलीभूतम् ॥ १२३ ॥**

**ततो भणितं पित्रा केन वा कार्येण पुत्र ! जानासि ? ।**
**अथ चन्दनेन भणितमिति वार्ता तावन्नगरे ॥ १२४ ॥**

---

१. निर्विचिन्ताः=निश्चिन्ताः ।



Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

किल कणगप्पहरन्नो जिणभवणे लंघियम्मि कुद्धेण ।
विज्जाणं अवहारो विहिओ धरणिंदनामेण ॥ १२५ ॥

जलणप्पहस्स सिद्धा रोहिणिनामा किलऽज्ज विज्जत्ति ।
तस्स य भयाउ नट्ठो राया कणगप्पहो ताव ॥ १२६ ॥

सिरिगंधवाहणस्स उ खयरप्पहाणस्स सो गओ सरणं ।
तव्विरहे पुरमेयं सयलंपि हु आउलीभूयं ॥ १२७ ॥

जलणप्पहभयभीया सव्वेवि हु [1]नायरा पलायंति ।
मोत्तूण इमं नयरं वयंति अवरावरपुरेसु ॥ १२८ ॥

एवं च ठिए । अम्हंपि ताय ! इण्हिं विसेसओ होइ नासियव्वंति ।
कणगप्पहस्स रन्नो पवरो मंती जओ [2]ताओ ॥ १२९ ॥

एवं च पुत्तवयणं सोऊणं ताहि असणियवेगेण ।
आणत्ता नियपुरिसा सं[3]जत्ति कुणह गमणत्थं ॥ १३० ॥

---

**किल कनकप्रभराज्ञो जिनभवने लङ्घिते कुद्धेन ।**
**विद्यानामपहारो विहितो धरणेन्द्रनाम्ना ॥ १२५ ॥**

**ज्वलनप्रभस्य सिद्धा रोहिणिनाम्नी किलाऽद्य विद्येति ।**
**तस्य च भयात् नष्टो राजा कनकप्रभो तावत् ॥ १२६ ॥**

**श्रीगन्धवाहनस्य तु खेचरप्रधानस्य स गतः शरणम् ।**
**तद्विरहे पुरमेतद् सकलमपि हु आकुलीभूतम् ॥ १२७ ॥**

**ज्वलनप्रभभयभीता सर्वेऽपि खलु नागराः पलायन्ते ।**
**मुक्त्वेदं नगरं व्रजन्ति अपरापरपुरेषु ॥ १२८ ॥ एवञ्च स्थिते ॥**

**अस्माकमपि तात ! इदानीं विशेषतो भवति नंष्टव्यमिति ।**
**कनकप्रभस्य राज्ञः प्रवरो मन्त्री यतस्तातः ॥ १२९ ॥**

**एवं च पुत्रवचनं श्रुत्वा तदाऽशनिवेगेन ।**
**आज्ञप्ता निजपुरुषा सामग्रीं कुरुत गमनार्थम् ॥ १३० ॥**

---

१. नागराः=नगरजनाः । २. तातः । ३. सामग्रीम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्जाए वरविमाणं विउव्वियं[1] ताहिं मज्झ जणएण ।
आरोवियं च सव्वं घरसारं तत्थ पुरिसेहिं ॥ १३१ ॥

एवं च मज्झ पिययम ! धारिणीनामाए साहियं सव्वं ।
अहमवि तम्मि विमाणे आरूढा परियणेण समं ॥ १३२ ॥

तत्तो य तं विमाणं उप्पइयं खग्गसामलं गयणं ।
वेगेण य संपत्तं गंगावत्तम्मि नयरम्मि ॥ १३३ ॥

कणगप्पहस्स रन्नो आवासे तत्थ तं समोइन्नं[2] ।
अह गंधवाहणेणवि उचियपवित्ती कया तस्स ॥ १३४ ॥

एवं गंगावत्ते कइवयदिवसाणि जाव अच्छामि ।
हियएण चिंतयंती पिययम ! तुह दंसणोवायं ॥ १३५ ॥

अविय । पेच्छिस्सं कइय अहं कइया मह तेण संगमो होही ।
कइया वीवाहदिणं होही तं कणगमालाए ? ॥ १३६ ॥

---

विद्यया वरविमानं विकुर्वितं तदा मम जनकेन ।
आरोपितं च सर्वं गृहसारं तत्र पुरुषैः ॥ १३१ ॥

एवञ्च मम प्रियतम ! धारिणीनाम्ना कथितं सर्वम् ।
अहमपि तस्मिन् विमानेऽऽरूढा परिजनेन समम् ॥ १३२ ॥

ततश्च तं विमानमुत्पतितं खड्गश्यामलं गगनम् ।
वेगेन च संप्राप्तं गंगावर्त्ते नगरे ॥ १३३ ॥

कनकप्रभस्य राज्ञ आवासे तत्र तं समवतीर्णम् ।
अथ गंधवाहनेनाप्युचितप्रवृत्तिः कृता तस्य ॥ १३४ ॥

एवं गंगावर्त्ते कतिपयदिवसानि यावदासे ।
हृदयेन चिन्तयन्ती प्रियतम ! तव दर्शनोपायम् ॥ १३५ ॥ अपि च ।

प्रेक्षिष्ये कदाऽहं कदा मम तेन सङ्गमो भविष्यति ।
कदा विवाहदिनं भविष्यति तं कनकमालायाः ॥ १३६ ॥

---

१. विकुर्वितम्=विकृतम् । २. समवतीर्णम् ।


Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

एमाइ बहुविगप्पं चिंतेमाणी अहोनिसं तत्थ ।
रयणीएवि नो निद्दं लहामि तुह नाह ! विरहम्मि ॥ १३७ ॥

अन्नदिवसम्मि भाया चंपगमालाए मज्झ जणणीए ।
अमियगई तत्थ पुरे समागओ रायकज्जेण ॥ १३८ ॥

दट्ठूण असणिवेगं अह सो संजायपहरिसो भणइ ।
सिरिगंधवाहणेणं रन्ना बहुमाणपुव्वं तु ॥ १३९ ॥

नहवाहणस्स कज्जे विमग्गिया अज्ज कणगमालत्ति ।
सहरिसवयणेणं मएवि तस्स दिन्ना इमा भद्द ! ॥ १४० ॥ युग्मम् ॥

एईए पंचमीए विवाहलग्गं निरूविंय तीए ।
नियबंधवजुत्तेणं आगंतव्वं तहिं तुमए ॥ १४१ ॥

अह भणइ असणिवेगो सयमेव य तत्थ गंतुमुचियम्हे ।
तुम्ह वयणाओ संपइ विसेसओ होइ गंतव्वं ॥ १४२ ॥

---

**एवमादिबहुविकल्पं चिन्तयन्त्यहर्निशं तत्र ।**
**रजन्यामपि न निद्रां लभे तव नाथ ! विरहे ॥ १३७ ॥**

**अन्यदिवसे भ्राता चम्पकमालाया मम जनन्याः ।**
**अमितगतिस्तत्र पुरे समागता राजकार्येण ॥ १३८ ॥**

**दृष्टवाऽशनिवेगमथ स सञ्जातप्रहर्षो भणति ।**
**श्रीगन्धवाहनेन राज्ञा बहुमानपूर्वं तु ॥ १३९ ॥**

**नभोवाहनस्य कार्ये विमार्गिताऽद्य कनकमालेति ।**
**सहर्षवचनेन मयाऽपि तस्मै दत्तेयं भद्र ! ॥ १४० ॥ युग्मम् ।**

**एतस्यां पञ्चम्यां विवाहलग्नं निरूपितं तस्याः ।**
**निजबन्धवयुक्तेनागन्तव्यं तर्हि त्वया ॥ १४१ ॥**

**अथ भणति अशनिवेगः स्वयमेव च तत्र गन्तुमुचितोऽस्मान् ।**
**तव वचनात् संप्रत्ति विशेषतः भवति गन्तव्यम् ॥ १४२ ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंतु निसुणेसु कारणमम्हं गमणं न होइ जह उचियं ।
कणगप्पहस्स रण्णो वट्टइ विसमा दसा जेण ॥ १४३ ॥

एक्कं विज्जाछेओ रज्जब्भंसो[1] य नियपुरिच्चाओ ।
ता तम्मि ससोगम्मि कह गमणं होइ मह उचियं ? ॥ १४४ ॥

जे दुहियम्मि[2] न दुहिया आवयपत्ते बिइज्जया नेव ।
पहुणो न ते उ भिच्चा धुत्ता परमत्थओ नेया ॥ १४५ ॥

एत्थत्थे ता संपइ निब्बंधो ते न होइ कायव्वो ।
तुह भगिणी पुण एही लग्गदिणे आउला जइवि ॥ १४६ ॥

अमियगई भणइ तओ पेसेहिँ[3] पियंगुमंजरिं ताव ।
एईए कणगमाला अच्छइ उक्कंठिया जेण ॥ १४७ ॥

तत्तो जणएण अहं पट्ठविया माउलेण सह एत्थ ।
पत्ता य कमेण इहं मिलिया तो कणगमालाए ॥ १४८ ॥

---

**किन्तु निश्रृणु कारणमस्माकं गमनं न भवति यथोचितम् ।**
**कनकप्रभस्य राज्ञो वर्तते विषमा दशा येन ॥ १४३ ॥**

**एको विद्याच्छेदो राज्यभ्रंशश्च निजपुरीत्यागः ।**
**ततस्तस्मिन् सशोके कथं गमनं भवति ममोचितम् ? ॥ १४४ ॥**

**ये दुःखिते न दुःखिता आपत्प्राप्ते द्वितीया नैव ।**
**प्रभोर्न ते खलु भृत्या धूर्त्ताः परमार्थत ज्ञेया ॥ १४५ ॥**

**अत्रार्थे ततः संप्रति निर्बन्धस्ते न भवति कर्तव्यः ।**
**तव भगिनी पुनरेष्यति लग्नदिनेऽऽकुला यद्यपि ॥ १४६ ॥**

**अमितगति-र्भणति ततः प्रेषय प्रियङ्गुमञ्जरीं तावत् ।**
**एतस्यां कनकमालाऽऽस्ते उत्कण्ठिता येन ॥ १४७ ॥**

**ततो जनकेनाऽहं प्रस्थापिता मातुलेन सहाऽत्र ।**
**प्राप्ता च क्रमेणेह मिलिता ततः कनकमालायाः ॥ १४८ ॥**

---

१. राज्यभ्रंशः । २. दुःखिते । ३. प्रेषय ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं पिययम ! अहयं माउलयगिहम्मि एत्थ आयाया[1] ।
चिंतेमि कइय होही लग्गदिणं मज्झ पुण्णेहिं ? ॥ १४९ ॥

जत्थ मए दट्ठव्वो सो हु जणो जीवियाओ अब्भहिओ ।
एवं चिंतेतीए समागया पंचमी एसा ॥ १५० ॥

जाव य कमेण वत्ते पाणिग्गहणम्मि ताहे पिक्खणए[2] ।
नहवाहणस्स पुरओ पारद्धे चिंतियं हि मए ॥ १५१ ॥

एसा हु कणगमाला सहिजणमज्झम्मि दीसइ निविट्ठा ।
सो मह मणवल्लहओ न कोवि इह दीसए ता किं ? ॥ १५२ ॥

केवलिणो तं वयणं होज्जा अलियं तु मह अउन्नेहिं ।
नहि नहि, अवरदीसाए अवि उग्गमइ रवी कहवि ॥ १५३ ॥

[3]पयलिज्ज व मेरुगिरी पलयं गच्छेज्ज उदहिणो सव्वे ।
न य केवलिणा भणिया भावा इह अन्नहा होंति ॥ १५४ ॥

---

एवं प्रियतम ! अहकं मातुलगृहेऽत्राऽऽयाता ।
चिन्तयामि कदा भविष्यति लग्नदिनं मम पुन्यैः ? ॥ १४९ ॥

यत्र मया द्रष्टव्यः स हु जनो जीवितादभ्यधिकः ।
एवं चिंतयंत्या समागता पञ्चम्येषा ॥ १५० ॥

यावच्च क्रमेण वृत्ते पाणिग्रहणे तदा प्रेक्षणके ।
नभोवाहनस्य पुरतः प्रारब्धे चिंतितं हि मया ॥ १५१ ॥

एषा खलु कनकमाला सखीजनमध्ये दृश्यते निविष्टा ।
स मम मनोवल्लभको न कोऽपि इह दृश्यते ततः किं ॥ १५२ ॥

केवलिनस्तं वचनं भवेदलिकं तु ममाऽपुन्यैः ।
नहि नहि अपरदिश्यप्युद्गच्छति रविः कथमपि ॥ १५३ ॥

प्रचलेत् वा मेरुगिरिः प्रलयं गच्छेदुदधयः सर्वे ।
न च केवलिना भणिता भावेहाऽन्यथा भवंति ॥ १५४ ॥

---

१. आयाता । २. प्रेक्षणकम्=नाट्यादिदृश्यम् । ३. प्रचलेत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता किं नु कणगमाला अहवा सो हिययवल्लहो मज्झ ? ।
दंसिय मुद्दारयणं करेमि नीसंकियं एयं ॥ १५५ ॥

एवं विचिंतिऊणं समागया ताहि तुज्झ पासम्मि ।
मुद्दारयणसमेओ नियकरो दंसिओ ताहे ॥ १५६ ॥

तत्तो पिययम ! तुमए मुद्दासहियम्मि दंसिए हत्थे ।
एसो सो मह दइउत्ति पेच्चओ[1] झत्ति उप्पन्नो ॥ १५७ ॥

पेच्छ कह एस एवं काऊणवि विगयसयलआसंको ।
चिट्ठइ, किं नवि बीहइ नहवाहणरायउत्तस्स ? ॥ १५८ ॥

किंचि उवायं ताहिं करेमि एयस्स मोयणट्ठाए ।
एवं विचिंतिऊणं वंचिय तं सहियणं सव्वं ॥ १५९ ॥

कवडेण मए सामिय ! समाणिओ इह असोगवणियाए ।
तं जं तुमए पुट्ठं तं सव्वं साहियं एयं ॥ १६० ॥ युग्मम् ॥

---

तस्मात्किन्नु कनकमालाऽथवा सो हृदयवल्लभो मम ।
दर्शित्वा मुद्रारत्नं करोमि निःशङ्कितमेतद् ॥ १५५ ॥

एवं विचिन्त्य समागता तदा तव पार्श्वे ।
मुद्रारत्नसमेतो निजककरो दर्शितस्तदा ॥ १५६ ॥

ततः प्रियतम ! त्वया मुद्रासहिते दर्शिते हस्ते ।
एष स मम दयित इति प्रत्ययो झटित्युत्पन्नः ॥ १५७ ॥

प्रेक्षस्व कथमेष एवं कृत्वाऽपि विगतसकलाऽऽशङ्कः ।
तिष्ठति, किं नाऽपि बिभेति नभोवाहनराजपुत्रस्य ? ॥ १५८ ॥

किञ्चिदुपायं तदा करोमि एतस्य मोचनार्थे ।
एवं विचिन्त्य वञ्चितं तं सखीजनं सर्वम् ॥ १५९ ॥

कपटेन मया स्वामिन् ! समानीत इहाऽशोकवाटिकायां ।
तद्यत् त्वया पृष्टं तं सर्वं कथितमेतद् ॥ १६० ॥ युग्मम् ॥

---

१. प्रत्ययो=विश्वासः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविय । जइवि हु कन्ना पिययम ! सज्झसभरिया न सक्कए कहवि ।
मणवल्लहस्स पुरओ एक्कंपि हु वयणमुल्लविउं ॥ १६१ ॥

तहवि मए सविसेसं णियचरियं साहियं इमं जम्हा ।
जाईसरणगुणेणं परिचिय इव भाससि तुमंति ॥ १६२ ॥ युग्मम् ॥

भो चित्तवेग ! एवं तीए वयणं निसम्म सहसत्ति ।
मुच्छाविरमे मज्झवि जाईसरणं समुप्पन्नं ॥ १६३ ॥

संभरियं सव्वंपि हु मएवि पुव्वोइयं[1] नियंचरियं ।
अह तीए संलत्तं पिययम ! किं इण्हि कायव्वं ? ॥ १६४ ॥

तत्तो य मए भणियं वियाणियं कुलहरं तु ते सुयणु ! ।
ता वच्च तुमं गेहं अहमवि इत्तो[2] पलाइस्सं ॥ १६५ ॥

पडिया हु कणगमाला मड्डाए[3] मज्झ एत्थ वावीए ।
कलयलपुव्वं एवं साहिज्जसु सयललोयस्स ॥ १६६ ॥

---

**अपि च । यद्यपि हु कन्या प्रियतम ! साध्वसभृता न शक्यते कथमपि ।**
**मनोवल्लभस्य पुरत एकमपि वचनमुल्लपितुम् ॥ १६१ ॥**

**तथापि मया सविशेषं निजचरित्रं कथितमिदं यस्मात् ।**
**जातिस्मरणगुणेन परिचितेव भाससे त्वमपि ॥ १६२ ॥ युग्मम् ॥**

**भोश्चित्रवेग ! एवं तस्या वचनं निशम्य सहसेति ।**
**मूर्च्छाविरमे ममाऽपि जातिस्मरणं समुत्पन्नम् ॥ १६३ ॥**

**संस्मृतं सर्वमपि हु मयाऽपि पूर्वोदितं निजचरित्रम् ।**
**अथ तया संलप्तं प्रियत्तम ! किमिदानीं कर्तव्यम् ? ॥ १६४ ॥**

**ततश्च मया भणितं विज्ञातं कुलगृहं तु ते सुतनो ! ।**
**तस्मात् व्रज त्वं गृहमहमपि इतः पलायिष्ये ॥ १६५ ॥**

**पतिता खलु कनकमाला बलात्मध्येऽत्र वाप्याम् ।**
**कलकलपूर्वकमेवं कथय सकललोकस्य ॥ १६६ ॥**

---

१. पूर्वोदित्तम् । २. इतः । ३. बलात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं कए न कस्स वि आसंका होइ चित्तवेगम्मि ।
नाहवाहणाओ एवं विमोइओ होइ वरमित्तो ॥ १६७ ॥

अन्नं च [1]निसुयं च मए सुंदरि ! सुरनंदणपुरवरम्मि आगम्म ।
जलणप्पहेण पुणरवि अहिट्ठियं नियरज्जंति ॥ १६८ ॥

[2]वंडियं च पुरवरं तं रन्ना संमाणिओ य पुरलोओ ।
ता तत्थ अहं गंतुं [3]आणाविस्सामि तुह जणगं ॥ १६९ ॥

जलणप्पहोवि राया पेक्खिस्सइ [4]पुव्वगउरवेणेव ।
तत्थ तुमं परिणिस्सं अम्मापीईणणुन्नाया (न्नाओ ?) ॥ १७० ॥

एवं च कए वल्लहि ! [5]सलाहणिज्जं तु होइ सव्वंपि ।
अन्नह पुण विहियम्मि उभयकुलं [6]मइलियं होइ ॥ १७१ ॥

तत्तो य तीए भणियं जमिह तुमं किंचि आणवेसि मए ।
तं सव्वं कायव्वं नवरं पिय ! सुणसु [7]विन्नत्तिं ॥ १७२ ॥

---

**एवं कृते न कस्याऽपि आशङ्का भवति चित्रवेगे ।**
**नभोवाहनादेवं विमोचितो भवति वरमित्रम् ॥ १६७ ॥**

**अन्यच्च । निश्रुतं च मया सुन्दरि ! सुरनंदनपुरेऽऽगम्य ।**
**ज्वलेनप्रभेण पुनरप्यधिष्ठितं निजराज्यमिति ॥ १६८ ॥**

**गृहीतं च पुरवरं तं राज्ञा सन्मानितश्च पुरलोकः ।**
**तस्मात्तत्राऽहं गत्वा आनाययिष्यामि तव जनकम् ॥ १६९ ॥**

**ज्वलनप्रभोऽपि राजा प्रेक्षिष्यते पूर्वगौरवेणैव ।**
**तत्र त्वं परिणिष्ये मातापित्रोरनुज्ञाता ॥ १७० ॥**

**एवं च कृते वल्लभि ! श्लाधनीयं तु भवति सर्वमपि॥**
**अन्यथा पुनर्विहित उभयकुलं मलिनं भवति ॥ १७१ ॥**

**ततश्च तया भणितं यदिह त्वं किञ्चिदाज्ञापयसि मया ।**
**तं सर्वं कर्तव्यं नवरं प्रिय ! शृणु विज्ञप्तिम् ॥ १७२ ॥**

१. श्रुतम् । २. गृहीतम् । ३. आनाययिष्यामि । ४. पूर्वगौरवेण=पूर्वादरेण । ५. श्लाधनीयम् । ६. मलिनम् । ७. विज्ञप्तिम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवियसंदेहेणं कहवि मए अज्ज नाह ! संपत्तो ।
मोत्तूण तुमं इण्हि कत्थवि सक्केमि नो गंतुं ॥ १७३ ॥

तावच्चिय मह जीयं[1] जाव तुमं नयणगोयरे वससि ।
तुह दंसणरहिया पुण झत्ति य पाणेहिं मुंचामि ॥ १७४ ॥

जंपि निमिसंति नयणा एत्तियमेत्तंपि[2] दूसहं मन्ने ।
किं पुण जं बहुदिवसे तुह विरहे नाह ! अच्छिस्सं ? ॥ १७५ ॥

ता नाह ! जत्थ वच्चसि अणुगंतव्वं मएवि तत्थेव ।
एवं च ठिए कज्जे जं कायव्वं तयं भणसु ॥ १७६ ॥

अन्नं च । सट्ठाणे पत्ताए पाणिग्गहणं भविस्सई मज्झ ।
एवंविहआसाए सगिहं वच्चामि जइ नाह ! ॥ १७७ ॥

एत्तो य मज्झ जणओ भणिओवि हु जइ न वच्चई कहवि ।
जलणप्पहेण रन्ना, कणगपहं मोत्तु नियनयरे ॥ १७८ ॥

---

**जीवितसंदेहेन कथमपि मयाऽद्य नाथ ! संप्राप्तः ।**
**मुक्त्वा त्वमिदानीं कुत्राऽपि शक्नोमि न गन्तुम् ॥ १७३ ॥**

**तावदेव मम जीवितं यावत्त्वं नयनगोचरे वससि ।**
**तवदर्शनरहिता पुनर्झटिति च प्राणैर्मुञ्चामि ॥ १७४ ॥**

**यदपि निमिषतः नयने-एतावन्मात्रमपि दुस्सहं मन्ये ।**
**किं पुनर्यत् बहु दिवसे तव विरहे नाथ ! आसिष्ये ॥ १७५ ॥**

**तस्मात् नाथ ! यत्र व्रजस्यनुगन्तव्यं मयाऽपि तत्रैव ।**
**एवञ्च स्थिते कार्ये यत्कर्तव्यं तद् भण ॥ १७६ ॥**

**अन्यञ्च । स्वस्थाने प्राप्तायां पाणिग्रहणं भविष्यति मम ।**
**एवंविधाऽऽशया स्वगृहं व्रजामि यदि नाथ ! ॥ १७७ ॥**

**इतश्च मम जनको भणितोऽपि हु यदि न व्रजति कथमपि ।**
**ज्वलनप्रभेण राज्ञा, कनकप्रभं मुक्त्वा निजनगरे ॥ १७८ ॥**

---

१. जीवितम् । २. एतावन्मात्रमपि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता मह का होज्ज गई तुमए सह दंसणंपि न हु होज्जा ।
अच्छउ पाणिग्गहणं दूरे च्चिय मह मणाणंदं ॥ १७९ ॥ तिसृभिः कुलकम् ॥

ता किं बहुणा वल्लह ! मेल्लामि[1] तुमं न ताव हत्थाओ ।
अन्नं जं कायव्वं तं चिय मह आणवेसुत्ति ॥ १८० ॥

भो चित्तवेग ! एवं तीए भणिए मएवि संलत्तं[2] ।
जइ एवं ता सुंदरि ! सिग्धं पउणा[3] भवेसुत्ति ॥ १८१ ॥

वियलइ जाव न रयणी पेक्खणगक्खित्तमाणसो जाव ।
नहवाहणपमुहो इह लोगो, ता वच्चिमो सुयणु ! ॥ १८२ ॥

भणियं च तीए एसा पउणा चिट्ठामि नाह ! तुह पुरओ ।
तत्तो उप्पइओ हं सहसा गयणम्मि सह तीए ॥ १८३ ॥

जाव य कित्तियमेत्तं[4] खेत्तं वच्चामि वल्लहाइ सह ।
ताव य तीए भणियं उदरे पीडा ममं जाया ॥ १८४ ॥

---

**तस्मात्मम का भवेत् गतिस्त्वया सह दर्शनमपि न खलु भवेत् ।**
**आस्तां पाणिग्रहण दूरेव मम मन-आनन्दम् ॥१७९॥ तिसृभिः कुलकम् ॥**

**तस्मात्किं बहुना वल्लभ ! मुञ्चामि त्वां न तावद्धस्तात् ।**
**अन्यं यत् कर्तव्यं तमेव ममऽऽज्ञापय इति ॥ १८० ॥**

**भो- श्चित्रवेग ! एवं तस्या भणिते मयाऽपि संलपितम् ।**
**यद्येवं तस्मात् सुन्दरि ! शीघ्रं प्रगुणा भवेति ॥ १८१ ॥**

**विगलति यावन्न रजनी प्रेक्षणकाक्षिप्तमानसो यावत् ।**
**नभोवाहनप्रमुख इह लोकस्ततो व्रजावः सुतनो ! ॥ १८२ ॥**

**भणितं च तयेषा प्रगुणा तिष्ठामि नाथ ! तव पुरतः ।**
**तत उत्पतितोऽहं सहसा गगने तया सह ॥ १८३ ॥**

**यावच्च कियन्मात्रं क्षेत्रं व्रजामि वल्लभ्या सह ।**
**तावच्च तया भणितमुदरे पीडा माम् जाता ॥ १८४ ॥**

---

१. मुञ्चामि । २. संलपितम्=उक्तम् । ३. प्रगुणा । ४. कियन्मात्रम् ।



Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

थक्कं[1] सव्वसरीरं हियए सूलं सुदूसहं एइ ।
ता सामि ! कुण परित्तं सक्केमि न गंतुमहमिण्हिं ॥ १८५ ॥

तत्तो य मए भणियं सुंदरि ! सुकुमालदेहिया तं सि ।
रत्तीए नेव सुत्ता वायइ अइसीयलो वाओ ॥ १८६ ॥

तेण तुह उदरपीडा जाया ता मा करेहिसि विसायं ।
पउणीकरोमि[2] सिग्घं ओयरिउं[3] इह निउंजम्मि ॥ १८७ ॥

एवं भणमाणो हं ओयरिओ एत्थ वणनिउंजम्मि ।
एत्थ निवाए[4] दइया पवेसिया कयलिगेहम्मि ॥ १८८ ॥

घसिऊण अरणिकट्ठं अग्गी पज्जालिओ मए पच्छा ।
संसेवियं सरीरं बहुहा तत्तो मए भणियं ॥ १८९ ॥

जाया सत्थसरीया सुंदरि ! वच्चामु इण्हि नियठाणं ।
तत्तो य तीए भणियं पिययम ! एवं करेमोत्ति ॥ १९० ॥

---

**परिश्रान्तं सर्वशरीरं हृदये शूलं सुदुस्सहमेति ।**
**तस्मात् स्वामिन् ! कुरु परित्राणं शक्नोमि न गन्तुमहमिदानीम् ॥१८५ ॥**

**ततश्च मया भणितं सुन्दरि ! सुकुमारदेहा त्वमसि ।**
**रात्र्यां नैव सुप्ता वात्यतिशीतलो वातः ॥ १८६ ॥**

**तेन तवोदरपीडा जाता तस्मात्मा करिष्यसि विषादम् ।**
**प्रगुणीकरोमि शीघ्रमवतीर्येदं निकुञ्जे ॥ १८७ ॥**

**एवं भणन्नहमवतीर्णात्र वननिकुञ्जे ।**
**अत्र निर्वाते दयिता प्रवेशिता कदलीगृहे ॥ १८८ ॥**

**घर्षित्वाऽरणिकाष्ठमग्निः प्रज्वालितो मया पश्चात् ।**
**संसेवितं शरीरं बहुधा ततो मया भणितम् ॥ १८९ ॥**

**जाता स्वस्थशरीरा सुन्दरि ! व्रजाव इदानीं निजस्थानम् ।**
**ततश्च तया भणितं प्रियतम ! एवं कुर्व इति ॥ १९० ॥**

---

१. परिश्रान्तम् । २. प्रगुणीकरोमि=स्वस्थीकरोमि । ३. अवतीर्य । ४. निवातः=आश्रयः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं दोवि जणाइं नीहरियाइं तु कयलिगेहाओ ।
भो चित्तवेग ! तत्तो दिट्ठो सहसा तुमं एत्थ ॥ १९१ ॥

एसा हु कणगमालाभगिणी उ पियंगुमंजरीनामा ।
तुह उवयार[1]कलाओ संपत्ता मित्त ! एवंति ॥ १९२ ॥

तं जं तुमए पुट्ठं तं सव्वं साहियं मए एयं ।
भो सुप्पइट्ठ ! एवं वज्जरियं चित्तगइणा ओ ॥ १९३ ॥

तत्तो य मए[2] भणियं निग्घिणहियओ न अत्थि मह सरिसो ।
जेण सकज्जरएणं पवेसिओ मित्त ! वि[3]समम्मि ॥ १९४ ॥

तुह पुण महाणुभावत्तणेण परकज्जकरणनिरयस्स ।
अभिवंछियत्थसिद्धी नियपुन्नपभावओ जाया ॥ १९५ ॥

ता मित्त ! तुह सरिच्छो निक्कारणवच्छलो जए न[4]न्नो ।
अइदुल्लहोवि जेणं दइयाए समागओ विहिओ ॥ १९६ ॥

---

**एवं द्वौ जनौ निःसृतौ तु कदलीगेहात् ।**
**भोश्चित्रवेग ! ततो दृष्टः सहसा त्वमत्र ॥ १९१ ॥**

**एषा हु कनकमालाभगिनी तु प्रियङ्गुमञ्जरी नामा ।**
**तवोपकारफलतः संप्राप्ता मित्रं ! एवमिति ॥ १९२ ॥**

**तद् यत्त्वया पृष्टं तं सर्वं कथितं मया एतद् ।**
**भोः सुप्रतिष्ठ ! एवं कथितं चित्रगतिना ओ ॥ १९३ ॥**

**ततश्च मया भणितं निर्घृणहृदयो नास्ति मम सदृशः ।**
**येन स्वकार्यरतेन प्रवेशितो मित्रं ! विषमे ॥ १९४ ॥**

**तव पुनर्महानुभावत्वेन परकार्यकरणनिरक्तस्य ।**
**अभिवाञ्छितार्थसिद्धि-र्निजपुन्यप्रभावतो जाता ॥ १९५ ॥**

**ततो मित्रं ! तव सदृशो निष्कारणवत्सलो जगति नान्यः ।**
**अतिदुर्लभोऽपि येन दयितायाः समागमो विहितः ॥ १९६ ॥**

---

१. फला । २. मया=चित्रवेगेण । ३. विषमे=कष्टे । ४. नन्नो=नान्यः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह जीवियंपि दिन्नं तुमए मह एरिसं करिंतेण ।
ता मित्त ! तुमं मोत्तुं उवगारी नत्थि अन्नोत्ति ॥ १९७ ॥

तत्तो य चित्तगइणा भणियं किं उवकयं मए तुज्झ ? ।
तं चेव कयं सुकयं परिणामे सुंदरं जमिह ॥ १९८ ॥

मुहरसियं परिणामे य दारुणं सज्जणा न संसंति[1] ।
उवगारं विसमीसियभोयणदाणंव खुहियस्स ॥ १९९ ॥

एयस्सवि मह सुंदर ! पडिहासइ न सुंदरो परिणामो ।
नहवाहणो हि जेणं विज्जाबलदप्पिओ चंडो ॥ २०० ॥

दारावहारवेरं अइगरुयं हंदि ! एत्थ लोयम्मि ।
ता भद्द ! तुमं चिंतसु नित्थारो[2] कह णु रायाओ ? ॥ २०१ ॥

तत्तो य मए भणियं विचिंतिएणं तु एत्थ किं बहुणा ? ।
तं चेव किंचि होही जं दिट्ठं मम पुन्नेहिं ॥ २०२ ॥

---

तथा जीवितमपि दत्तं त्वया ममेदृशं कुर्वता ।
तस्मात् मित्रं ! त्वां मुक्त्वा उपकारी नास्ति अन्य इति ॥ १९७ ॥

ततश्च चित्रगतिना भणितं किमुपकृतं मया तव ? ।
तमेव कृतं सुकृतं परिणामे सुन्दरं यदिह ॥ १९८ ॥

मुखरसिकं परिणामे च दारुणं सज्जना न शंसन्ति ।
उपकारं विषमिश्रितभोजनदानमिव क्षुधितस्य ॥ १९९ ॥

एतस्याऽपि मम सुन्दर ! प्रतिभासते न सुन्दरः परिणामः ।
नभोवाहनो हि येन विद्याबलदर्पितश्चण्डः ॥ २०० ॥

दारापहारवैरमतिगुरुकं हन्दि अत्र लोके ।
तस्मात् भद्र ! त्वं चिन्तय निस्तार कथन्नु राज्ञः ? ॥ २०१ ॥

ततश्च मया भणितं विचिन्तितेन त्वत्र किंबहुना ? ।
तमेव किञ्चिद् भविष्यति यद्दृष्टं मम पुन्यैः ॥ २०२ ॥

---

१. प्रशंसन्तीत्यर्थः । २. निस्तारः=विमुक्तिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अइदुल्लहावि हु मए संपत्ता विहिवसेण जह एसा ।
अन्नंपि सुंदरं तह ! होही भवियव्वयादिट्ठं ॥ २०३ ॥

भणइ तओ चित्तगई एवं एयं तु निच्छयमएण ।
तहवि हु न होइ जुत्ता एसा पायप्पसारणिया ॥ २०४ ॥

तत्तो य मए भणियं एवं तु [1]ववत्थियम्मि कज्जम्मि ।
जं कायव्वं संपइ तं चेव य इत्थ साहेसु ॥ २०५ ॥

भणइ तओ चित्तगई पलायणं चेव संपयं उचियं ।
नियनयरम्मिवि गमणं संपइ उचियं न होइत्ति ॥ २०६ ॥

महई वेला वट्टइ [2]अच्छंताणं इमम्मि ठाणम्मि ।
ता मा करेसु इण्हिं कालक्खेवं महाभाग ! ॥ २०७ ॥

तह कहवि हु कायव्वं सरीरहाणी न होइ जह मित्त ! ।
सुरनंदणम्मि नयरे अहंपि एत्तो गमिस्सामि ॥ २०८ ॥

---

**अतिदुर्लभाऽपि खलु मया संप्राप्ता विधिवशेन यथैषा ।**
**अन्यमपि सुन्दरं तथा ! भविष्यति भवितव्यतादिष्टम् ॥ २०३ ॥**

**भणति ततश्चित्रगतिरेवं एतत्तु निश्चयमतेन ।**
**तथापि हु न भवति युक्तैषा पादप्रसारिता ॥ २०४ ॥**

**ततश्च मया भणितमेवन्तु व्यवस्थिते कार्ये ।**
**यत्कर्तव्यं संप्रति तमेव चात्र कथय ॥ २०५ ॥**

**भणति ततश्चित्रगति पलायनमेव साम्प्रतमुचितम् ।**
**निजनगरेऽपि गमनं संप्रति उचितं न भवति इति ॥ २०६ ॥**

**महती वेला वर्तते आसीनानामस्मिन् स्थाने ।**
**ततो मा कुरु इदानीं कालक्षेपम् महाभाग् ! ॥ २०७ ॥**

**तथा कथमपि खलु कर्तव्यं शरीरहानी न भवति यथा मित्रं ! ।**
**सुरनन्दने नगरेऽहमपि इतो गमिष्यामि ॥ २०८ ॥**

---

१. व्यवस्थिते । २. आसीनानाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलणप्पहेण समयं च संगयं[1] कट्टुं[2] असणिवेगस्स ।
तेण विइन्नं एयं परिणेस्सं पुव्वभवदइयं ॥ २०९ ॥

भो सुप्पइट्ठ ! एवं भणिऊण पियंगुमंजरीइ समं ।
चित्तगई उप्पइओ पत्तो य कमेण सट्ठाणं ॥ २१० ॥

तत्तो तमालदलसामलम्मि गयणे अहंपि अप्पइओ ।
भो सुप्पइट्ठ ! सहिओ दइयाए कणगमालाए ॥ २११ ॥

नवविथसियअरविंदविंदसंछन्नसच्छसलिलाइं ।
पुलएंतो विउलसरोवराइं वरहंसकलियाइं ॥ २१२ ॥

फलभरविणमियसाहासहस्ससोहंतसाहिसहियाइं ।
पिच्छंतो गिरिवरनिज्झराइं कयकोइलरवाइं ॥ २१३ ॥

किंनरसुरमिहुणऽद्धासियाइं[1] सियकंतकंतिकलियाइं ।
लंघंतो रम्माइं गिरिवरगुरुसाणुसिहराइं ॥ २१४ ॥

---

ज्वलनप्रभेण समकं च सङ्गतं कृत्वाऽशनिवेगस्य ।
तेन वितीर्णामेतां परिणेष्यामि पूर्वभवदयिताम् ॥ २०९ ॥

भोः सुप्रतिष्ठ ! एवं भणित्वा प्रियङगुमञ्ज्या समम् ।
चित्रगतिरुत्पतितः प्राप्तश्चक्रमेण स्वस्थानम् ॥ २१० ॥

ततस्तमालदलश्यामले गगनेऽहमप्युत्पतितः ।
भोःसुप्रतिष्ठ ! सहितो दयितया कनकमालया ॥ २११ ॥

नवविकसितारविन्दवृन्दसंच्छन्नस्वच्छसलिलानि ।
पश्यन् विपुलसरोवराणि वरहंसकलितानि ॥ २१२ ॥

फलभरविनतशाखासहस्त्रशोभमानशाखिसहितानि ।
प्रेक्षमाणो गिरिवरनिर्झरणानि कृतकोकिलरवाणि ॥ २१३ ॥

किन्नरसुरमिथुनऽधिष्ठितानि श्वेतकान्तकान्तिकलितानि ।
लङ्घयन् रम्यानि गिरिवरगुरुसानुशिखराणि ॥ २१४ ॥

१. संगतं=मैत्रीम् । २. कृत्वा । १. अध्यासितानि=अधिष्ठितानि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुविहवावारपरायणेण सहियाइ खयरलोएण ।
पेच्छंतो गामाइयं पमुइयनरनारिपुन्नाइं ॥ २१५ ॥

दक्खिणदिसामुहो हं वच्चामि कमेण जाव गहणम्मि[1] ।
दूराओ ताव दिट्ठं तडिल्लयासच्छहं किंचि ॥ २१६ ॥

तं दट्ठु मए भणियं किं मन्ने एरिसं इमं दइए ! ।
दीसइ अइतेइल्लं[2] एंतं[3] अम्हाण संमुहयं ॥ २१७ ॥

भणियं च तीए पिययम ! विज्जू[4] उक्का[5] व ताव नवि होई ।
थिरभावाओ, नवरं होज्ज सुरो सुरविमाणं वा ॥ २१८ ॥

भो सुप्पइट्ठ ! एवं उल्लवमाणाण अम्ह सहसत्ति ।
भासुरसरीरधारी समागओ सुरवरो एक्को ॥ २१९ ॥

नमिओ य भणइ एसो अवि कुसलं तुम्ह चित्तवेगत्ति ? ।
परियाणसि भद्द ! ममं नवत्ति, तत्तो मए भणियं ॥ २२० ॥

---

**बहुविधव्यापारपरायणेन सहितानि खेचरलोकेन ।**
**प्रेक्षमाणो ग्रामादिकं प्रमुदितनरनारीपूर्णानि ॥ २१५ ॥**

**दक्षिणदिग्मुखोऽहं व्रजामि क्रमेण यावद्गहने ।**
**दूरात्तावत् दृष्टं तडिल्लतासदृशं किञ्चित् ॥ २१६ ॥**

**तं दृष्ट्वा मया भणितं किं मन्ये ईदृशमिदं दयिते ! ।**
**दृश्यतेऽतितेजस्वी आयतावयोः संमुखकम् ॥ २१७ ॥**

**भणितंच तया प्रियतम ! विद्युदुल्का वा तावन्नाऽपि भवति ।**
**स्थिरभावात् नवरं भवेत् सुरः सुरविमानं वा ॥ २१८ ॥**

**भोः सुप्रतिष्ठ ! एवमुल्लपन्त्योरावयोः सहसेति ।**
**भासुरशरीरधारी समागतः सुरवर एकः ॥ २१९ ॥**

**नतश्च भणति एषोऽपि कुशलं तव चित्रवेग इति ? ।**
**परिजानासि भद्र ! माम् नवेति ततो मया भणितम् ॥ २२० ॥**

---

१. गहने = निर्जलस्थाने। २. तेइल्लं = तेजस्वि । ३. आयत् = आगच्छत् । ४. विद्युत्।
५. उल्का ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाणामि कंपि देवं सामन्नेणं, विसेसओ न पुणो ।
भणियं सुरेण तत्तो चिरपरिचियमवि न याणेसि ॥ २२१ ॥

विणयपणएण भणियं इह जम्मे परिचओ न तावत्थि ।
जइ नवरं अन्नभवे तुमए सह मह महाभाग ! ॥ २२२ ॥

नवरं तुमम्मि दिट्ठे दिट्ठी आणंदिया मणं मुइयं[1] ।
जाणामि तेण कोवि हु पुव्वभवे आसि संबंधो ॥ २२३ ॥

एवं च मए भणिए पयडीकाउं[2] फुरंततेइल्लं ।
वज्जरइ सुरवरो सो मित्त ! मणिं गेण्ह एयंति ॥ २२४ ॥

मणिणो समप्पणत्थं[3] समागओ सुयणु ! तुह समीवम्मि ।
तम्हा विसहरमहणं गेण्हसु[4] पवरं मणिं एयं ॥ २२५ ॥

तत्तो य मए भणियं सुरवर ! वज्जरसु ताव मह एयं ।
निक्कारणा पवित्ती न होइ जं उत्तमा बिंति ॥ २२६ ॥

---

**जानामि कमपि देवं सामान्येन विशेषतो न पुनः ।**
**भणितं सुरेण ततश्चिरपरिचितमपि न जानासि ॥ २२१ ॥**

**विनयप्रणतेन भणितमिह जन्मनि परिचयो न तावदस्ति ।**
**यदि नवरमन्यभवे त्वया सह मम महाभाग् ! ॥ २२२ ॥**

**नवरं त्वयि दृष्टे दृष्टिरानन्दिता मनो मुदितम् ।**
**जानामि तेन कोऽपि खलु पूर्वभवेऽऽसीत् संबंधः ॥ २२३ ॥**

**एवं च मयि भणिते प्रकटीकृत्य स्फुरत्तेजस्वी ।**
**कथयति सुरवरः स मित्रं ! मणिं गृहाण एनमिति ॥ २२४ ॥**

**मणेः समर्पणार्थं समागतः सुतनो ! तव समीपे ।**
**तस्मात् विषधरमथनं गृहाण प्रवरं मणिमेनम् ॥ २२५ ॥**

**ततश्च मया भणितं सुरवर ! कथय तावत् मम एतद् ।**
**निष्कारणा प्रवृत्ति- र्न भवति यदुत्तमा ब्रुवन्ति ॥ २२६ ॥**

---

१. मुदितं=हर्षितम् । २. प्रकटीकृत्य । ३. समर्पणार्थम् । ४. गिण्ह ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता केण कारणेणं मज्झ समप्पेसि दिव्वमणिमेयं ? ।
पुव्वभवे संबंधो तुमए सह आसि को मज्झ ? ॥ २२७ ॥

तत्तो सुरेण भणियं [1]पत्थावो वित्थरस्स न हु एसो ।
सयलाऽऽवयाविणासं गेण्हसु एयं मणिं ताव ॥ २२८ ॥

भणियं च मए किंचिह मज्झ कत्तोवि आवया होही ।
तव्विगमत्थं सुरवर ! जेण समप्पेसि मणिमेयं ? ॥ २२९ ॥

भणियं सुरेण सुंदर ! तुह चरियं सव्वमेव विज्जाए ।
पन्नत्तीए सिट्ठं नहवाहणरायतणयस्स ॥ २३० ॥

दइयावहारकुविओ अमरिसफुरफुरंतअहरुल्लो ।
बहुनहयरपरियरिओ तुज्झ वहट्ठाए संचलिओ ॥ २३१ ॥

तुज्झ अणुमग्गलग्गो आसन्नो चेव वट्टइ इयाणिं ।
तत्ता [2]जीवंतयरी होही तुह आवया गरुई ॥ २३२ ॥

---

**तस्मात्केन कारणेण मम समर्पयसि दिव्यमणिमेतं ? ।**
**पूर्वभवे सम्बन्धस्त्वया सहाऽऽसीत् को मम ? ॥ २२७ ॥**

**ततः सुरेण भणितं प्रस्तावो विस्तारस्य न खल्वेषः ।**
**सकलाऽऽपत्तिविनाशं गृहाण एतं मणिं तावत् ॥ २२८ ॥**

**भणितं च मया किञ्चिदिह मम कुतोऽपि आपत् भविष्यति ।**
**तत्विगमार्थं सुरवर ! येन समर्पयसि मणिमेतम् ? ॥ २२९ ॥**

**भणितं सुरेण सुन्दर ! तव चरित्रं सर्वमेव विद्यया ।**
**प्रज्ञप्तया शिष्टं नभोवाहनराजतनयस्य ॥ २३० ॥**

**दयितापहारकुपितोऽमर्षवशस्फुरस्फुरदधरवान् ।**
**बहुनभश्चरपरिवृतस्तव वधनार्थे संचलितः ॥ २३१ ॥**

**तवानुमार्गलग्नोऽऽसन्न एव वर्तत इदानीम् ।**
**ततो जीवान्तकरी भविष्यति तवाऽऽपत् गुर्वी ॥ २३२ ॥**

---

१. प्रस्ताव:=प्रसङ्ग:=अवसर इति यावत् । २. जीवान्तकरी=जीवितव्यविनाशकारिणी ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एयस्स पभावाओ नित्थरिहिसि[1] आवइ सुभीमंपि ।
ता गिण्ह इमं सुंदर ! दिव्वमणिं पाणरक्खट्ठा ॥ २३३ ॥
बंधसु निजुत्तिमंगे[2] गुत्तं कुंतलकलावमज्झम्मि ।
नहवाहणविज्जाणं पडिघायसमत्थमच्चत्थं[3] ॥ २३४ ॥
जइ पुण कहवि हु उवसमइ नेय तव्विहियवेयणानिवहो ।
ता मणिजलेण देहं सिंचेयव्वं पयत्तेण ॥ २३५ ॥
एवं विहिए होहिसि पणट्ठवियणो पुण्णणवसरीरो ।
ता एस मणी सययं संनिहिओ भद्द ! कायव्वो ॥ २३६ ॥
सयमेव अहंपि तुमं सुंदर ! रक्खेमि ताओ खयराओ ।
नवरं समुच्छुगो हं अइगरुयपओयणवसेण ॥ २३७ ॥
ता तं पओयणमहं झडित्ति संपाडिऊण एहामि[4] ।
काहामि सयलसुत्थं[5] मा काहिसि अन्नहाभावं ॥ २३८ ॥

---

**एतस्य प्रभावात् निस्तरिष्यसि आपत्तिं सुभीमामपि ।**
**तस्माद् गृहाण इमं सुन्दर ! दिव्यमणिं प्राणरक्षणार्थः ॥ २३३ ॥**
**बधान निजोत्तमाङ्गे गुप्तं कुन्तलकलापमध्ये ।**
**नभोवाहनविद्यानां प्रतिघातसमर्थमत्यर्थम् ॥ २३४ ॥**
**यदि पुनः कथमपि खल्युपशाम्यति नैतद् तद्विहितवेदनानिवहः ।**
**तस्मात् मणिजलेन देहं सिक्तव्यं प्रयत्नेन ॥ २३५ ॥**
**एवं विहिते भविष्यसि प्रनष्टवेदनः पूर्णनवशरीरः ।**
**तस्मादेषमणिः सततं संनिहितो भद्र ! कर्तव्यः ॥ २३६ ॥**
**स्वयमेवाऽहमपि त्वं सुन्दर ! रक्षामि तस्मात् खेचरात् ।**
**नवरं समुत्सुकोऽहमतिगुरुकप्रयोजनवशेन ॥ २३७ ॥**
**तस्मात्तं प्रयोजनमहं झटिति संपाद्य एष्यामि ।**
**करिष्यामि सकलसुस्थं मा करिष्यसि अन्यथाभावम् ॥ २३८ ॥**

---

१. निस्तरीष्यसि=उल्लङ्घिष्यसे । २. निजोत्तमाङ्गं=निजमस्तकम् । ३. अच्चत्थं=अत्यर्थम् ।
४. एष्यामि । ५. सुत्थं=समीचीनम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नं च तेण समयं विज्जाबलदप्पिएण खयरेण ।
मा काहिसि संगामं गरुओ विज्जाहि तुह[1] जं सो ॥ २३९ ॥

अइदुक्करं हि जइवि हु एयं पुरुसाहिमाणजुत्ताणं ।
कारणवसेण तहवि हु जुद्धारंभो न कायव्वो ॥ २४० ॥

जं तेण समं जुज्झे अवस्स तुह होइ पाणचाउत्ति ।
ता मह वयणाउ तुमे वारहडी[2] नेव कायव्वा ॥ २४१ ॥

किंच । संकुइय केसरी जं उप्पइउमणो गयस्स वहणट्ठा ।
सोंडीरत्तं किं तत्तिएण[3] उवहासयं लहइ ?॥ २४२ ॥

लद्धावसरो पच्छा साहियविज्जो करिज्जं जं रुइयं[4] ।
झाडपलियंचणेणवि[5] तुरियगई सिग्घओ[6] चेव॥ २४३ ॥

किं बहुणा ? । एसो च्चिय दिव्वमणी मंदपभावाओ तस्स विज्जाओ ।
काही, किं तुह कज्जं ससरीरायासकरणेण ?॥ २४४॥

---

**अन्यच्च तेन समकं विद्याबलदर्पितेन खेचरेण ।**
**मा करिष्यसि संग्रामं गुरुको विद्याभिस्त्वत् यत् सः ॥ २३९ ॥**

**अतिदुष्करं हि यद्यपि खल्वेतद् पुरुषाभिमानयुक्तानाम् ।**
**कारणवशेन तथापि खलु युद्धारम्भो न कर्तव्यः ॥ २४० ॥**

**यत्तेन समं युद्धेऽवश्यं तव भवति प्राणत्यागेति ।**
**तस्मात्मम वचनात् त्वया युद्धं नैव कर्तव्यम् ॥ २४१ ॥ किञ्च ।**

**संकुचितः केशरी यतुत्पतितुमना गजस्य वधार्थः ।**
**शौण्डीर्यत्वं किं तावता उपहास्यं लभते ॥ २४२ ॥**

**लब्धावसरः पश्चात् साधितविद्यः कूर्याद्यत् रुचितम् ।**
**झाडप्रत्यञ्चनेनाऽपि त्वरितगतिः शीघ्रगामी चेव ॥ २४३ ॥ किं बहुना ? ।**

**एष एव दिव्यमणि- र्मन्दप्रभावाः तस्य विद्याः ।**
**करिष्यति किं तव कार्यं स्वशरीरायासकरणेन ? ॥ २४४ ॥**

---

१. त्वत् । २. युद्धम् । ३. तावता । ४. रुचितम्=अभीष्टम् । ५. झाडं=लतागहनम् तत्र प्रत्यञ्चनेनापि परिभ्रमणेनापि । ६. शीघ्रगामी ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सुरेण भणिए काऊणं अंजलिं पयत्तेण ।
विहियपणामेण मए भणियं जं आणवेसित्ति॥ २४५ ॥

बहुमाणपुव्वयं अह दिव्वमणी सुरवरेण मह सीसे ।
बद्धो नियहत्थेणं सरीररक्खा य विहियत्ति ॥ २४६ ॥

बद्धे मणिम्मि सहसा गरुयपमोओ मणम्मि संजाओ ।
भो सुप्पइट्ठ ! नट्ठं भयं असेसं सरीराओ ॥ २४७ ॥

सं[१]भासेउं हयगुरुभयं नेहसारं ममं सो । कंताजुत्तं विविहवयणालावसंभासणाए ।
तत्तो दित्तीभरियगयणो निज्जियाणंगरूवो। देवो पत्तो तुरियगमणो झत्ति अद्दंसणंति॥ २४८॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए॥ २४९ ॥

एसोवि परिसमप्पइ दिव्वमणिसमप्पणोत्ति नामेण ।
सुरसुंदरीकहाए सत्तमओ वरपरिच्छेओ॥ २५०॥ १७५० ॥

---

**एवं सुरेण भणिते कृत्वा अञ्जलीं प्रयत्नेन ।**
**विहितप्रणामेन मया भणितं यदाज्ञापयसि इति ॥ २४५ ॥**

**बहुमानपूर्वकमथ दिव्यमणिः सुरवरेण मम शीर्षे ।**
**निबद्धो निजहस्तेन शरीररक्षा च विहितेति ॥ २४६ ॥**

**बद्धे मणौ सहसा गुरुकप्रमोदो मनसि सञ्जातः ।**
**भोः सुप्रतिष्ठ ! नष्टं भयमशेषं शरीरात् ॥ २४७ ॥**

**संभाष्य हतगुरुभयं स्नेहसारं माम् सः ।**
**कान्ता-युक्तं विविधवचनालापसंभाषणया ।**
**ततो दिप्तीभृतगगनः निर्जितानङ्गरूपः ।**
**देवः प्राप्तस्त्वरितगमनो झटिति अदर्शनमिति ॥ २४८ ॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽपि परिसमाप्यते दिव्यमणिसमर्पणेति नाम्ना ।**
**सुरसुन्दरीकथायाः सप्तमो वरपरिच्छेदः ॥ २५० ॥ १७५० ॥**

**सप्तमः परिच्छेदः समाप्तः**

---

**१. संभाष्य ।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अष्टमः परिच्छेदः

अहयंपि तओ दक्खिणदिसामुहो सह पियाए संचलिओ ।
चिंतेमि य किं काही खयरो नहवाहणो इण्हिं ?॥ १ ॥

कयसुररक्खस्स महं बहुविज्जादप्पिओवि सो खयरो ।
न हु सक्किस्सइ काउं अवयारं[1] गरुयरोसोवि ॥ २ ॥

अहवा किं मह इमिणा विचिंतिएणेह फग्गुभूएण[2] ।
होही किंचि ममं चिय जं दिट्ठं पुव्वकम्मेहिं ॥ ३ ॥

दिव्वमणिणो पभावा संनिज्झेणं[3] च तहय देवस्स ।
पुन्नाणुभावसरिसं होही भवियव्वयादिट्ठं ॥ ४ ॥

एमाइबहुविगप्पे चिंतेमाणो वयामि जा तत्थ ।
ताव य मह दइयाए भणियं भयवेविरतणूए ॥ ५ ॥

---

**अहकमपि ततो दक्षिणदिग्मुखः सह प्रियया सञ्चलितः ।
चिन्तयामि च किं करिष्यति खेचरो नभोवाहन इदानीम् ॥ १ ॥**

**कृतसुररक्षस्य मम बहुविद्यादर्पितोऽपि स खेचरो ।
न खलु शक्यते कर्तुमपकारं गुरुरोषोऽपि ॥ २ ॥**

**अथवा किं ममाऽनेन विचिन्तितेनेह फल्गुभूतेन ।
भविष्यति किञ्चित् मामेव यद्दष्टं पूर्वकर्मभिः ॥ ३ ॥**

**दिव्यमणेः प्रभावात् सांनिध्येन च तथा देवस्य ।
पुन्यानुभावसदृशं भविष्यति भवितव्यतादिष्टम् ॥ ४ ॥**

**एवमादिबहुविकल्पांश्चिन्तयन् व्रजामि यावत्तत्र ।
तावच्च मम दयितया भणितं भयवेपमानतन्वा ॥ ५ ॥**

---

१. अपकारम् । २. फल्गुभूतेन=व्यर्थरूपेण । ३. सांनिध्येन=साहाय्येन ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

हा नाह ! कोवि एसो दीसइ एंतोऽणुमग्गमम्हाणं ।
विज्जाहरपरियरिओ मन्ने नहवाहणो होही ॥ ६ ॥

ता पिय ! किंपि उवायं चिंतसु पीडा न होई जह तुम्ह ।
अहयंपि विरहगुरुदुक्खभाइणी जह न होमित्ति ॥ ७ ॥

वलियग्गीवं तत्तो पुलोइऊणं मइवि संलत्तं ।
एमेव कीस सुंदरि ! गरुयविसायं समुव्वहसि ? ॥ ८ ॥

जइ ता अतक्किओवि[1] हु एज्ज[2] इमो खयरविंदपरियरिओ ।
ता होज्ज भयं गरुयं, विन्नाए किं भयं सुयणु ! ? ॥ ९ ॥

देवेण चेव कहियं आगमणमिमस्स तुज्झ पच्चक्खं ।
ता किं एयं दट्ठुं भयाउरा सुयणु ! संजाया ? ॥ १० ॥

देवस्स दिव्वमणिणो पभावओ सुयणु ! सुंदरं होही ।
मा मा कुणसु विसायं एंतं दट्ठूण एयंति ॥ ११ ॥

---

**हा नाथ ! कोऽपि एष दृश्यते आयन्ननुमार्गमस्माकम् ।**
**विद्याधरपरिवृतो मन्ये नभोवाहनो भविष्यति ॥ ६ ॥**

**तस्मात्प्रिय ! किमप्युपायं चिन्तय पीडा न भवति यथा तव ।**
**अहकमपि विरहगुरुदुःखभागिनी यथा न भवामीति ॥ ७ ॥**

**वलितग्रीवं ततो दृष्ट्वा मयाऽपि संलपितम् ।**
**एवमेव कस्मात् सुन्दरि ! गुरुकविषादं समुद्वहसि ? ॥ ८ ॥**

**यदि तस्मादतर्कितोऽपि खल्वेयादयं खेचरवृन्दपरिवृत्तः ।**
**तस्माद्भवेत् भयं गुरुकं विज्ञाते किं भयं सुतनो !? ॥ ९ ॥**

**देवेणैव कथितमागमनाऽस्य तव प्रत्यक्षम् ।**
**तस्मात्किं एनं दृष्ट्वा भयातुरा सुतनो ! सञ्जाता ? ॥ १० ॥**

**देवस्य दिव्यमणेः प्रभावात्सुतनो ! सुन्दरं भविष्यति ।**
**मा मा कुरु विषादं आयतं दृष्ट्वा एवमिति ॥ ११ ॥**

---

१. अतर्कितः=अलक्षितः । २. एयात्=आगच्छेत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नो न कोवि इण्हिं काउं सक्किज्जए उवाउत्ति ।
एसो जं सिग्घगई आसन्नो वट्टइ इयाणिं ॥ १२ ॥

दूरेवि न सक्किज्जइ उक्कडविज्जस्स नासिउमिमस्स[1] ।
किं पुण लोयणविसए पत्तेहिं सुयणु ! अम्हेहिं ॥ १३ ॥

ता होउ पिए ! किंचिवि जं दिट्ठं मज्झ पुव्वकम्मेहिं ।
नवि किंचि सोइएणं[2] इह लब्भइ जीवलोगम्मि ॥ १४ ॥

एवं च मए भणिए मुंचंती थूलअंसुयपवाहं ।
गरुयभयसोयतविया सा बाला इय पुणो भणइ ॥ १५ ॥

हा ! नाह ! पाणवल्लह ! हयविहिणा पावकारिणी अहयं ।
वंसस्सेव[3] फलसमओ तुह विणासाय विहियत्ति ॥ १६ ॥

जइ तइया मणवल्लह ! पाणच्चाओ मए कओ होंतो[4] ।
ता किं एरिसगरुआवईए तं नाह ! निवडंतो[5] ? ॥ १७ ॥

---

**अन्यो न कोऽप्यिदानीं कर्तुं शक्यत उपायेति ।**
**एष यत्शीघ्रगतिरासन्नो वर्तत इदानीम् ॥ १२ ॥**

**दूरेऽपि न शक्यते उत्कटविद्यस्य नंष्टुमस्मात् ।**
**किं पुन-र्लोचनविषये प्राप्ताभ्यां सुतनो ! आवाभ्याम् ? ॥ १३ ॥**

**तस्माद्भवतु प्रिये ! किञ्चिदपि यद्दष्टं मम पूर्वकर्मभिः ।**
**नाऽपि किञ्चित् शोचितेनेह लभते जीवलोके ॥ १४ ॥**

**एवञ्च मयि भणिते मुञ्चती स्थुलाश्रुप्रवाहम् ।**
**गुरुकभयशोकतप्ता सा बालेति पुनर्भणति ॥ १५ ॥**

**हा ! नाथ ! प्राणवल्लभ ! हतविधिना पापकारिण्यहकम् ।**
**वंशस्येव फलसमयस्तव विनाशाय विहितेति ॥ १६ ॥**

**यदि तदा मनोवल्लभ ! प्राणत्यागो मया कृतोऽभविष्यत् ।**
**तस्मात्किमीदृशगुरुकाऽऽपदि त्वं नाथ ! न्यपतिष्यः ॥ १७ ॥**

---

१. नासिउं इमस्स=नंष्टुमस्मात् । २. शोचितेन=विचिन्तनेन । ३. वंशवृक्षस्य हि विनाशसमयसामीप्ये एव फलोद्गमो भवति । ४. अभविष्यत् । ५. न्यपतिष्यः ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ गब्भाओ पडंता बालत्ते वावि जइ मैया[1] हींता ।
ता किं मज्झ निमित्ते होज्ज इमा आवया[2] तुज्झ ? ॥ १८ ॥

एसो मुहमहुरोवि हु परोप्परं अम्ह गरुयअणुराओ ।
गब्भोव्ववेसराए[3] जाओ गरुआवयाहेऊ ॥ १९ ॥

इण्हिं च तुमं सामिय ! कम्मं अवलंबिऊण थक्को[4] सि ।
आवयनिवारणत्थं न चिंतसे किंचिवि उवायं ॥ २० ॥

तत्तो य मए भणियं मा सुंदरि ! कुणसु किंचिवि विसायं ।
अवियारिय[5] कयकज्जं एरिसयं होइ नणु सुयणु ! ॥ २१ ॥

अप्पबलं च परबलं अणवेक्खिय[6] आढवेइ[7] जो कज्जं ।
अवमाणपाणनासं[8] अवस्सं[9] सो पावए पुरिसो ॥ २२ ॥

नीईए वट्टमाणा मणुया न लहंति आवयानिवहं ।
सुयणु ! मए का नीई तुमं हरंतेण विहियत्ति ? ॥ २३ ॥

---

**यदि गर्भतोऽपतिष्यत् बालत्वे वाऽपि यदि मृताऽभविष्यत् ।**
**तस्मात्किं मम निमित्ते भवेदियं आपत्तव ? ॥ १८ ॥**

**एष मुखमधुरोऽपि खलु परस्परमावयोर्गुरुकानुरागः ।**
**गर्भ इव वेसरीयाँ जातो गुरुकापद्धेतुः ॥ १९ ॥**

**इदानीं च त्वं स्वामिन् ! कर्मावलम्ब्य स्थितोऽसि ।**
**आपन्निवारणार्थं न चिन्तयसि किञ्चिदपि उपायम् ॥ २० ॥**

**ततश्च मया भणितं मा सुन्दरि ! कुरु किञ्चिदपि विषादम् ।**
**अविचार्य कृतकार्यमीदृशं भवति ननु सुतनो ! ॥ २१ ॥**

**आत्मबलञ्च परबलमनपेक्ष्याऽऽरभते यो कार्यम् ।**
**अपमानप्राणनाशमवश्यं स प्राप्नोति पुरुषः ॥ २२ ॥**

**नीतौ वर्तमाना मनुष्या न लभन्ते आपन्निवहम् ।**
**सुतनो ! मया का नीतिस्त्वां हरता विहितेति ? ॥ २३ ॥**

---

१. मृता । २. आपत् । ३. वेसरी=अश्वतरी । ४. स्थितः । ५. अविचार्य । ६. अनवेक्ष्य=अपर्यालोच्य । ७. आढवेइ=आरभते । ८. अपमानं च प्राणनाशश्च तयोः समाहारः । ९. अवश्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहियं रायविरुद्धं अणुरायपरव्वसेहिं अम्हेहिं ।
ता इण्हिं आवयाए सुयणु ! विसाओ न कायव्वो ॥ २४ ॥
किंच । एवं ठिएवि सुंदरि ! अणुकूलो कहवि जइ विही होइ ।
ता आवयावि अम्हं परिणमिही संपयत्तेण ॥ २५ ॥
बलिओ हु इमो सत्तू ताव य सज्झो न पुरिसगारस्स ।
पुव्वभवनिम्मिएहिं वारिज्जइ नवरि पुन्नेहिं ॥ २६ ॥
जइ ताव अत्थि पुन्नं किं कज्जं सुयणु ! पुरिसगारेण ? ।
अह नत्थि किंचि पुन्नं विहलो ता पुरिसगारोवि ॥ २७ ॥
एक्कत्तो मह पुन्नं अन्नत्तो दप्पिओ इमो सत्तू ।
पेच्छामो ता सुंदरि ! कस्स जओ होज्ज एयाण ? ॥ २८ ॥
एमाइबहुविगप्पं उल्लवमाणो पियाए सह जाव ।
भो सुप्पइट्ठ ! पत्तो तुरियगई इह पएसम्मि ॥ २९ ॥

---

**विहितं राज्यविरुद्धमनुरागपरवशाभ्यामावाभ्याम् ।**
**तस्मादिदानीमापदि सुतनो ! विषादो न कर्तव्यः ॥ २४ ॥ किञ्च ।**
**एवं स्थितेऽपि सुन्दरि ! अनुकूलः कथमपि यदि विधिर्भवति ।**
**तस्मादापदपि आवयोः परिणेस्यति संपत्त्वेन ॥ २५ ॥**
**बलिकः खल्वयं शत्रुस्तावच्च साध्यो न पुरुषकारस्य ।**
**पूर्वभवनिर्मितै-र्वार्यते नवरं पुन्यैः ॥ २६ ॥**
**यदि तावदस्ति पुन्यं किं कार्यं सुतनो ! पुरुषकारेण ? ।**
**अथ नास्ति किञ्चित् पुन्यं विफलस्तस्मात् पुरुषकारोऽपि ॥ २७ ॥**
**एकत्र मम पुन्यमन्यत्र दर्पितोऽयं शत्रुः ।**
**प्रेक्षावहे तस्मात्सुन्दरि ! कस्य जयो भवेदेतयोः ? ॥ २८ ॥**
**एवमादिबहुविकल्पमुल्लपन्प्रियया सह यावत् ।**
**भोः सुप्रतिष्ठ ! प्राप्तस्त्वरितगतिरिह प्रदेशे ॥ २९ ॥**

---

१. परिणेस्यति । २. संपत्त्वेन=संपत्तिभावेन=आपत्तिरपि संपत्तिरूपा भविष्यतीति भावः ।
३. मत्पुण्यशत्रुदर्पयोर्मध्य इत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताव य तुरिययरगई पत्तो नहवाहणो मह समीवं ।
रोसायासासंजियसोयजलोहलियगंडयलो ॥ ३० ॥

भणियं च तेण रे ! रे खयराहम ! कत्थ वच्चसे इन्हिं ? ।
इहपरलोयविरुद्धं एरिसं कम्मं समायरिउं ? ॥ ३१ ॥ युग्मम् ॥

काउं रायविरुद्धं नासंतो कत्थ छुट्टसे पाव ! ? ।
सूयारसालवडिओ[1] ससउव्वं विणस्ससे इण्हिं ॥ ३२ ॥

रे ! रे ! केण बलेणं एरिसकम्मं तुमे समायरियं ? ।
हरिऊण मह महेलं[2] नासंतो कत्थ छुट्टिहिसि[3] ? ॥ ३३ ॥

रे मूढ ! केण दिन्ना तुह बुद्धी एरिसा अहम्मेण[4] ? ।
अहवा कुविओ दइवो पुरिसं किं हणइ लउडेण[5] ? ॥ ३४ ॥

रे मूढ ! पुन्नवज्जिय ! उम्मग्गपयट्ट ! नट्ठमज्जाय ! ।
कुविओ तुज्झ कयंतो[6] तेण तुमे एरिसं विहियं ॥ ३५ ॥

---

**तावच्च त्वरिततरगतिः प्राप्तो नभोवाहनो मम समीपम् ।**
**रोषायाअसङ्घितशोकजलौघलिप्तगंडस्थलः ॥ ३० ॥**

**भणितञ्च तेन रे ! रे खेचराधम ! कुत्र व्रजसीदानीम् ? ।**
**इहपरलोकविरुद्धमीदृशं कर्म समाचर्य ? ॥ ३१ ॥ युग्मम् ॥**

**कृत्वा राज्यविरुद्धं नश्यन् कुत्र छुटसि पाप ! ? ।**
**सूपकारशालापतितः शशक इव विनश्यस इदानीम् ॥ ३२ ॥**

**रे ! रे ! केन बलेनेदृशकर्म त्वया समाचरितम् ? ।**
**हृत्वा मम महिलां नश्यन् कुत्र मुच्यसे ?॥ ३३ ॥**

**रे ! मूढ ! केन दत्ता तव बुद्धीदृश्यधर्मेण ।**
**अथवा कुपितो दैवः पुरुषं किं हन्ति लकुटेन ॥ ३४ ॥**

**रे मूढ ! पुन्यवर्जित ! उन्मार्गप्रवृत्त ! नष्टमर्याद ! ।**
**कुपितः तव कृतान्तस्तेन त्वयेदृशं विहितम् ॥ ३५ ॥**

---

१. सूपकारशालापतितः । २. महिला=भार्या । ३. मुच्यसे । ४. अधर्मेण=पापेन । ५. लगुडो=लोहमयी यष्टिः । ६. कृतान्तो =यमः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेण बलेणं एयं रायविरुद्धं तुमे समायरियं ।
तं कुणसु इण्हि पयडं मा भणिहिसि जं न भणियंति ॥ ३६ ॥

एसो तुह तिक्खेण सीसं छिंदामि [1]अद्धचंदेण ।
जइ अत्थि पोरिसं किंचि होसु ता जुज्झसज्जोत्ति ॥ ३७ ॥

भो सुप्पइट्ठ ! एवं भणिऊणं तेण गरुयरोसेण ।
[2]आयड्ढिऊण धणुहं मुक्को मह संमुहो बाणो ॥ ३८ ॥

अह सो धणुहविमुक्को वेगेणागम्म मज्झ आसन्ने ।
आवडिउव्व सिलाए [3]वलिओ पच्छामुहो झत्ति ॥ ३९ ॥

तं दट्ठुं सो खयरो विम्हियहियओ ससंकिओ किंचि ।
खणमेगमच्छिऊणं इय वज्जरिउं समाढत्तो ॥ ४० ॥

जइ कहवि खुद्दविज्जापभावओ मह सरो पडिक्खलिओ ।
तहवि न छुट्टसि इण्हिं [4]अग्गेयाईण सत्थाण ॥ ४१ ॥

---

येन बलेन एतद्राज्यविरुद्धं त्वया समाचरितम् ।
तत्कुरु इदानीं प्रकटं मा भणिष्यसि यन्न भणितमिति ॥ ३६ ॥

एषस्तव तीक्ष्णेन शीर्षं छिनद्मि अर्धचन्द्रेण ।
यद्यस्ति पौरुषं किञ्चित् भव तस्मात् युद्धसज्ज इति ॥ ३७ ॥

भोः सुप्रतिष्ठ ! एवं भणित्वा तेन गुरुकरोषेण ।
आकृष्य धनु-र्मुक्तो मम संमुखो बाणः ॥ ३८ ॥

अथ स धनुर्विमुक्तो वेगेनाऽऽगम्य ममाऽऽसन्ने ।
आपतित इव शिलायां वलितः पश्चात्मुखो झटिति ॥ ३९ ॥

तं दृष्ट्वा स खचरो विस्मितहृदयः सशङ्कितः किञ्चित् ।
क्षणमेकासित्वेति कथयितुं समारब्धः ॥ ४० ॥

यदि कथमपि क्षुद्रविद्याप्रभावतो मम शरः प्रतिस्खलितः ।
तथापि न छुटसि इदानीमाग्नेयादीनां शस्त्राणाम् ॥ ४१ ॥

---

१. अर्धचन्द्रो=बाणविशेषः । २. आकृष्य । ३. वलितः=प्रतिगतः । ४. आग्नेयादीनां शस्त्राणाम् ।



Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

एवं च भणंतेणं तेणं [1]आवाहियाइं सत्थाइं ।
[2]अहिमंतिय मंतेहिं मुंचइ इक्किक्कयं कमसो ॥ ४२ ॥

अविय । [3]उट्ठिंतफुलिंगालं फुरंतजालासहस्स[4]संवलियं ।
अग्गेयं अइभीमं मज्झ [5]वहट्ठाए [6]पट्ठवियं ॥ ४३ ॥

तंपि हु मह आसन्ने मणिप्पभावाओ होउमसमत्थं ।
पासे संभमिऊणं [7]विज्झायं झत्ति तत्तो य ॥ ४४ ॥

वारुणवायव्वाइं पट्ठवियाइं कमेण सत्थाइं ।
ताणिवि मणिप्पभावा दूरिच्चिय मह विलीणाइं ॥ ४५ ॥

अह ताणि [8]अमोहाणिवि [9]पडिहयसत्तीणि दट्ठु सत्थाणि ।
जाओ विच्छायमुहो रायसुओ [10]विम्हियक्खित्तो ॥ ४६ ॥

खणमेगमच्छिऊणं पुणोवि सो एरिसं समुल्लवइ ।
रे खयराहम ! दप्पं मा हु करिज्जासि नियचित्ते ॥ ४७ ॥

---

**एवञ्च भणता तेनाऽऽरचितानि शस्त्राणि ।**
**अभिमन्त्र्य मन्त्रैर्मुञ्चति एकैकं क्रमशः ॥ ४२ ॥ अपि च ।**

**उत्तिष्ठत्स्फुलिङ्गं स्फुरज्ज्वालासहस्रसंवलितम् ।**
**आग्नेयमतिभीमं मम वधार्थं प्रस्थापितम् ॥ ४३ ॥**

**तमपि खलु ममाऽऽसन्ने मणिप्रभावात् भूत्वाऽसमर्थम् ।**
**पार्श्वे संभ्रम्य विध्यातं झटिति ततश्च ॥ ४४ ॥**

**वारुणवायव्यानि प्रस्थापितानि क्रमेण शस्त्राणि ।**
**तान्यपि मणिप्रभावात् दूरैव मम विलीनानि ॥ ४५ ॥**

**अथ तानि अमोघान्यपि प्रतिहतशक्तिनी दृष्ट्वा शस्त्राणि ।**
**जातो विच्छायमुखो राजसुतो विस्मयाऽऽक्षिप्तः ॥ ४६ ॥**

**क्षणमेकमासित्वा पुनरपि स ईदृशं समुल्लपति ।**
**रे खचराधम ! दर्पं मा खलु कुरु निजचित्ते ॥ ४७ ॥**

---

१. आवाहियं=आरचितम् । २. अभिमन्त्र्य । ३. उत्तिष्ठन्त ऊर्ध्वं गच्छन्तो ये स्फुलिङ्गा अग्निकणास्ते सन्त्यस्य तत्तथा । ४. संवलितं=व्याप्तम् । ५. वधार्थम् । ६. प्रस्थापितम्=प्रेषितम् । ७. विध्यातं=विनष्टम् । ८. अमोघानि=अव्यर्थानि । ९. प्रतिहता विनष्टा शक्तिर्येषां तानि । १०. विस्मयाऽऽक्षिप्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मह मंतस्स पभावा विज्जाए वावि ओसहीए वा ।
एमाइं सत्थाइं निहयपयावाइं जायाइं ॥ ४८ ॥

जओ । मंतेण व तंतेण व हंतुं सक्कंति नेव एयाइं ।
किंतु निसुणेसि कारणमेतेहिं जं न निहओ तं ॥ ४९ ॥

एसो हु पावकारी [1]सुहमच्चूए न चेव जोग्गोत्ति ।
ता [2]दुहमारेण इमो मारेयव्वो तुमे कुमर ! ॥ ५० ॥

इय मज्झ सिक्खणत्थं हओ तुमं नेव दिव्वसत्थेहिं ।
न उणो तुह विज्जाहिं हम्मइ सत्तीओ एएसिं ॥ ५१ ॥ युग्मम् ॥

ता इण्हि [3]मह न छुट्टसि पायालं जइवि पविससे मूढ ! ।
मोरोवि[4] अहव धिप्पइ हंत ! तइ[5]ज्जम्मि [6]उड्डाणे ॥ ५२ ॥

रे खयराहम ! इण्हिं कत्तो मह जासि दिट्ठिपहपडिओ ? ।
दुहमच्चूए एसो मारेमि तुमं न संदेहो ॥ ५३ ॥

---

**मम मन्त्रस्य प्रभावात् विद्यायाः वाऽपि औषध्या वा ।**
**एतानि शस्त्राणि निहतप्रतापानि जातानि ॥ ४८ ॥ यतः ।**

**मन्त्रेण वा तन्त्रेण वा हन्तुं शक्नुवन्ति नैवैतानि ।**
**किन्तु निशृणु कारणमेतैर्यन्न निहतस्त्वम् ॥ ४९ ॥**

**एष खलु पापकारी सुखमृत्योर्नैव योग्येति ।**
**तस्मात् दुःखमारेणाऽयं मारयितव्यं त्वया कुमार ! ॥ ५० ॥**

**इति मया शिक्षणार्थं हतस्त्वां नैव दिव्यशस्त्रैः ।**
**न पुनस्तव विद्याभिर्हन्यते शक्तय एतेषाम् ॥ ५१ ॥ युग्मम् ॥**

**तस्मादिदानीं मन्न छुटसि पातालं यद्यपि प्रविशसि मूढ ! ।**
**मयूरोऽपि अथवा गृह्यते हन्त ! तृतीयस्मिन्नुड्डयने ॥ ५२ ॥**

**रे खेचराधम इदानीं कुत्र मम यासि दृष्टिपथपतितः ? ।**
**दुःखमृत्योरेष मारयामि त्वां न सन्देहः ॥ ५३ ॥**

---

१. सुखमृत्योः । २. दुःखमारेण=दुःखबहुलमरणेन । ३. मत् । ४. मयूरोऽपि । ५. तृतीयस्मिन् । ६. उड्डाणं=उड्डयनम् ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भो सुप्पइट्ठ ! एवं भणिऊणं गरुयअभिनिवेसेणं ।
नहवाहणेण नागिणिविज्जा आवाहिया तत्तो ॥ ५४ ॥

भीसणभुयगेहिं खणेण वेढियं उग्गविसवियारेहिं ।
सव्वंगेसु बद्धो सरागजीवोव्व कम्मेहिं ॥ ५५ ॥

तत्तो महंतवियणा पाउब्भूया[1] ममं तओ देहं ।
गयणाओ निवडिओ हं भुयंगभारेण भूमीए ॥ ५६ ॥

वियणाए विब्भलंगो[2] संवलितरुणो[3] इमस्स हिट्ठम्मि ।
गयचेयणोव्व जाओ भुजंगसंघायउब्बद्धो ॥ ५७ ॥

सावि मह पाणदइया गरुयं दट्ठूण आवयं मज्झं ।
अइदुक्खिया वराई रोयंता घग्घरसरेण[4] ॥ ५८ ॥

हा अज्जउत्त ! वल्लह ! एय अणत्थस्स कारिणी अहयं ।
हा पाविट्ठा तइया किं न मया मयणपच्चक्खं ॥ ५९ ॥

---

**भोः सुप्रतिष्ठ ! एवं भणित्वा गुरुकाभिनिवेशेन ।**
**नभोवाहनेन नागिणी विद्याऽऽवाहिता ततः ॥ ५४ ॥**

**भीषणभुजङ्गैः क्षणेण वेष्टितमुग्रविषविकारैः ।**
**सर्वाङ्गेषु बद्धः सरागजीव इव कर्मभिः ॥ ५५ ॥**

**ततो महद्वेदना प्रादुर्भूता माम् (मम) ततो देहम् ।**
**गगनान्निपतितोऽहं भुजङ्गभारेण भूम्याम् ॥ ५६ ॥**

**वेदनया विह्वलाङ्गः शाल्मलीतरोरस्याऽधः ।**
**गतचेतन इव जातो भुजङ्गसङ्घातोद्बद्धः ॥ ५७ ॥**

**साऽपि मम प्राणदयिता गुर्वीं दृष्ट्वाऽऽपत् मम ।**
**अतिदुःखिता वराकी रुदती गद्गदस्वरेण ॥ ५८ ॥**

**हा आर्यपुत्र ! वल्लभ ! एतदनर्थस्यकारिण्यहकम् ।**
**हा ! पापिष्ठा तदा किन्न मृता मदनप्रत्यक्षम् ॥ ५९ ॥**

---

१. प्रादुर्भूता। २. विह्वलं=व्याकुलम् अङ्गं यस्य स तथा। ३. शाल्मलीतरोः। ४. गद्गदस्वरेण।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हा कह मज्झनिमित्ते पिययम ! अइगरुय आवयं पत्तो ।
हा अज्जउत्त! इण्हिं तुह विरहे नत्थि मह जीयं ॥ ६० ॥

भो भो धणदेव ! इमं सोउं खयरस्स भासियं तस्स ।
एत्थंतरम्मि य महं एस विगप्पो समुप्पन्नो ॥ ६१ ॥

महिलापलावसद्दो पुव्विं जो आसि इह मए निसुओ ।
एयदइयाए[1] नूणं सो होही कणगमालाए ॥ ६२ ॥

तत्तो य पुरिससद्दो तयणंतरमेव जो मए निसुओ ।
नहवाहणस्स होही सो सद्दो एयसत्तुस्स ॥ ६३ ॥

अहवा किं मए इमिणा विचिंतिएणं तु ताव निसुणेमि ।
जं किंचि कहइ एसो नियचरियं चित्तवेगोत्ति ॥ ६४ ॥

एवं विचिंतिऊणं तत्तो धणदेव ! सुणिउमाढत्तो[2] ।
तव्वयणमहं सव्वं अह सो एवं समुल्लवइ ॥ ६५ ॥

---

हा कथं ममनिमित्ते प्रियतम ! अतिगुर्व्यापदं प्राप्तः ।
हा आर्यपुत्र ! इदानीं तव विरहे नास्ति मम जीवितम् ॥ ६० ॥

भो भो धनदेव ! इदं श्रुत्वा खेचरस्य भाषितं तस्य ।
अत्रान्तरे च मामेषो विकल्पः समुत्पन्नः ॥ ६१ ॥

महिलाप्रलापशब्दः पूर्वं य आसीदत्र मया निश्रुतः ।
एतद्दयिताया नूनं स भविष्यति कनकमालायाः ॥ ६२ ॥

ततश्च पुरुषशब्दस्तदनन्तरमेव यो मया निश्रुतः ।
नभोवाहनस्य भविष्यति स शब्द एतत्शत्रोः ॥ ६३ ॥

अथवा किं मया अनेन विचिन्तितेन तु तावन्निश्रृणोमि ।
यत्किञ्चित् कथयति एष निजचरित्रं चित्रवेग इति ॥ ६४ ॥

एवं विचिन्त्य ततो धनदेव ! श्रोतुमारब्धः ।
तद्वचनमहं सर्वं अथ स एवं समुल्लपति ॥ ६५ ॥

---

१. एतस्य दयिता एतद्दयिता तस्याः । २. आरब्धः=आरम्भं कृतवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भो सुप्पइट्ठ एवं विलवंता बहुविहं सुदुक्खत्ता ।
नहवाहणेण नीया मज्झ पिया कणगमालत्ति ॥ ६६ ॥

अहयंपि तओ दूसहविसहरकयवेयणाए [1]वेवंतो ।
दइया विओयगुरुदुक्खताविओ जाव चिट्ठामि ॥ ६७ ॥

भो सुप्पइट्ठ ! ताव य तुमंपि इह आगओ पएसम्मि ।
तुमए मणिनीरेणं एसो मे[2]ल्लाविओ अहयं ॥ ६८ ॥ युग्मम् ॥

ता भो तुमए दिन्नं मह जीयं एत्थ नत्थि संदेहो ।
मणिणो य पभावाओ न य [3]डक्को दुट्ठसप्पेहिं ॥ ६९ ॥

अन्नह कह मह जीयं हविज्जगुरुवेयणा परद्धस्स ।
की[4]णासवयणसच्छहभीसणभुयगेहिं गहियस्स ॥ ७० ॥

तं जं तुमए पुट्ठं केण तुमं एरिसाए महईए ।
खित्तो सि आवयाए तं सव्वं साहियं एयं ॥ ७१ ॥

---

**भोः सुप्रतिष्ठ एवं विलपंती बहुविधं सुदुःखत्वात् ।**
**नभोवाहनेन नीता मम प्रिया कनकमालेति ॥ ६६ ॥**

**अहकमपि ततो दुस्सहविषधरकृतवेदनया वेपमानः ।**
**दयिता वियोगगुरुदुःखतप्तो यावत् तिष्ठामि ॥ ६७ ॥**

**भोः सुप्रतिष्ठ तावच्च त्वमपि इहाऽऽगतः प्रदेशे ।**
**त्वया मणिनीरेणैष मोचितोऽहकम् ॥ ६८ ॥ युग्मम् ॥**

**तस्मात् भोस्त्वया दत्तं मम जीवितमत्र नास्ति सन्देहः ।**
**मणेश्च प्रभावात् न च दष्टः दुष्टसर्पैः॥ ६९ ॥**

**अन्यथा कथं मम जीवितं भवेद्गुरुवेदना पीडितस्य ।**
**कीनाशवदनसदृशभीषणभुजङ्गैः गृहीतस्य ॥ ७० ॥**

**तद्यत् त्वया पृष्टं केन त्वमीदृशि महति ।**
**क्षिप्तोऽसि आपदि तं सर्वं कथितमेतद् ॥ ७१ ॥**

---

१. वेपमानः=कम्पमानः । २. मेल्लाविओ=मोचितः । ३. दष्टः । ४. कीनाशः=यमः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय भो धणदेव ! तया सोउं खयरस्स भासियं तस्स ।
तत्तो य मए एयं विचिंतियं निययचित्तम्मि ॥ ७२ ॥

पेच्छ नरा विबुहावि हु अणुरायपरवसा विसयगिद्धा ।
पाविंति आवयाओ विविहाओ एत्थ संसारे ॥ ७३ ॥

अच्छउ ता परलोगे इहेव पाविंति गरुयदुक्खाइं ।
रागविमोहियचित्ता कज्जाकज्जं अयाणंता ॥ ७४ ॥

सारीरमाणसाणं दूसहदुक्खाण कारणं पढमं।
इह परलोए घोरो रागो च्चिय सयलजीवाणं ॥ ७५ ॥

रागंधा इह जीवा दुल्लहलोयम्मि गाढमणुरत्ता ।
जं वेइंति[1] असायं[2] कत्तो तं हंदि ! नरएवि ? ॥ ७६ ॥

वल्लहविओयतविया[3] असमंजसचिट्ठियाइं[4] कुणमाणा ।
नरए नेरइया इव निच्चं चिय दुक्खिया होंति ॥ ७७ ॥

---

इति भो धनदेव ! तदा श्रुत्वा खचरस्य भाषितं तस्य ।
ततश्च मयैतद् विचिन्तितं निजकचित्ते ॥ ७२ ॥

प्रेक्षध्वं नरा विबुधाऽपि खल्वनुरागपरवशा विषयगृद्धाः ।
प्राप्नुवन्ति आपदो विविधाऽत्र संसारे ॥ ७३ ॥

आस्तां तावत् परलोक इहैव प्राप्नुवन्ति गुरुकदुःखानि ।
रागविमोहितचित्ता कार्याकार्यमजानन्तः ॥ ७४ ॥

शारीरमानसानां दुस्सहदुःखानां कारणं प्रथमम् ।
इह-परलोके घोरो राग एव सकलजीवानाम् ॥ ७५ ॥

रागान्धेह जीवा दुर्लभलोके गाढमनुरक्ताः ।
यद्वेदयन्ति असातां कुत्र तद्धन्दि ! नरकेऽपि ? ॥ ७६ ॥

वल्लभवियोगतप्ताऽसमञ्जसचेष्टितानि कुर्वन्तः ।
नरके नैरयिका इव नित्यमेव दुःखिता भवन्ति ॥ ७७ ॥

---

१. वेदयन्ति=अनुभवन्ति । २. असातं=दुःखम् । ३. तविया=तप्ताः । ४. चेष्टितानि=व्यापाराः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वहबंधमारणाइं लहंति रागेण मोहिया जीवा ।
वच्चंत्ति दुग्गईए सहंति विविहाइं दुक्खाइं ॥ ७८ ॥

रागो हि दुक्खरूवो रागो चिय सयलआवयाहेऊ ।
रागपरद्धा[1] जीवा भमंति भवसागरे घोरे ॥ ७९ ॥

ताव चिय परमसुहं जाव न रागो मणम्मि उच्छरइ[2] ।
हंदि ! सरागम्मि मणे दुक्खसहस्साइं पविसंति ॥ ८० ॥

एमाइ चिंतिऊणं धणदेव ! मए इमं तु वज्जरियं ।
भो चित्तवेग ! इण्हि मा कीरउ कोवि सोगोत्ति ॥ ८१ ॥

जं एसो संसारो एरिसदुक्खाण निययआवासो ।
पत्ताए आवयाए तेण विसाओ न कायव्वो ॥ ८२ ॥

जरमरणरोगवल्लहविओगबहुलम्मि एत्थ संसारे ।
जम्हा सकम्मजणियं जायइ जीवाण दुक्खंति ॥ ८३ ॥

---

**वधबन्धमारणानि लभन्ते रागेण मोहिता जीवाः ।**
**व्रजन्ति दुर्गतौ सहन्ते विविधानि दुःखानि ॥ ७८ ॥**

**रागो हि दुःखरूपो राग एव सकलापद्धेतुः ।**
**रागपीडिता जीवा भ्राम्यन्ति भवसागरे घोरे ॥ ७९ ॥**

**तावदेव परमसुखं यावन्न रागो मनसि प्रादुर्भवति ।**
**हन्दि ! सरागे मनसि दुःखसहस्त्राणि प्रविशन्ति ॥ ८० ॥**

**इत्यादि चिन्तयित्वा धनदेव ! मयेदन्तु कथितम् ।**
**भो-श्चित्रवेग ! इदानीं मा क्रियतां कोऽपि शोकेति ॥ ८१ ॥**

**यदेष संसार ईदशदुःखानां नियतऽऽवासः ।**
**प्राप्तायामापदि तेन विषादो न कर्तव्यः ॥ ८२ ॥**

**जरामरणरोगवल्लभवियोगबहुलेऽत्र संसारे ।**
**यस्मात् स्वकर्मजनितं जायते जीवानां दुःखमिति ॥ ८३ ॥**

---

१. परद्धा=पीडिताः । २. प्रादुर्भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो भणइ चित्तवेगो भद्द ! विसाओ न कोवि मह अन्नो ।
एकच्चिय मह चिंता कुणइ मणे दूसहं दुक्खं ॥ ८४ ॥

सा कह वरई होही नीया नहवाहणेण रुयमाणी ।
जीवइ व नवा इण्हिं दट्ठुं मह तारिसमवत्थं ? ॥ ८५ ॥

एवं च जाव साहइ सो खयरो मज्झ भद्द ! धणदेव ! ।
एत्थंतरम्मि निसुणसु जो वुत्तंतो तहिं जाओ ॥ ८६ ॥

एक्को कमलदलऽच्छो पिहुवच्छो[1] सुरवरो तहिं सहसा ।
ओइन्नो गयणाओ उज्जोइंतो[2] दिसावलयं ॥ ८७ ॥

दट्ठुं समागयं तं वियसियवयणो य चित्तवेगो सो ।
अब्भुट्ठिऊण[3] पणमइ तं देवं परमविणएण ॥ ८८ ॥

अह सो सुहासणत्थो तियसो संलवइ भद्द ! तुह कुसलं ? ।
मणिणो य पभावाओ नित्थिन्ना आवया विउला ! ॥ ८९ ॥

---

ततो भणति चित्रवेगो भद्र ! विषादो न कोऽपि ममाऽन्यः ।
एकैव मम चिन्ता करोति मनसि दुःसहं दुःखम् ॥ ८४ ॥

सा कथं वराकी भविष्यति नीता नभोवाहनेन रुदती ।
जीवति वा न वेदानीं दृष्टुम् मम तादृशामवस्थाम् ? ॥ ८५ ॥

एवञ्च यावत्कथयति स खेचरो मम भद्र ! धनदेव ! ।
अत्रान्तरे निशृणु यो वृतान्तस्तत्र जातः ॥ ८६ ॥

एकः कमलदलाऽक्षः पृथुवक्षाः सुरवरस्तत्र सहसा ।
अवतीर्णो गगनादुद्द्योतयन् दिग्वलयम् ॥ ८७ ॥

दृष्ट्वा समागतं तं विकसितवदनश्च चित्रवेगः सः ।
अभ्युत्थाय प्रणमति तं देवं परमविनयेन ॥ ८८ ॥

अथ स सुखासनस्थस्त्रिदशः संलपति भद्र ! तव कुशलं ? ।
मणेः च प्रभावात् निस्तीर्णा आपदो विपुलाः ॥ ८९ ॥

---

१. पृथुवक्षाः । २. उद्द्योतयन् । ३. अभ्युत्थाय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो भणइ चित्तवेगो तुम्ह पभावाओ संपयं[1] कुसलं ।
ता संपइ मह साहसु महंतकोऊहलं इत्थ[2] ॥ ९० ॥

पुव्वभवे संबंधो तुमए सह आसि को ममं देव ! ? ।
केण व कज्जेण तुमं आसि गओ उच्छुगो तइया ? ॥ ९१ ॥

तत्तो य भणइ तियसो इमेण कज्जेण आगओ सुयणु ! ।
सा एगमणो होउं साहिज्जंतं निसामेहि ॥ ९२ ॥

जंबुद्दीवे इहइं एरवए अत्थि आरिए[3] देसे ।
विजयवई नामेणं नयरी सुरनयरिसंकासा[4] ॥ ९३ ॥

तीएवि सुविक्खाओ धणभूई नाम आसि सत्थाहो[5] ।
दक्खिन्नदयाजुत्तो उज्जुत्तो जइणधम्मम्मि ॥ ९४ ॥

चंदोव्व कलानिलओ गयव्व निच्चं पयट्टवरदाणो[6] ।
अणुयत्तिय[7]मित्तो वासरोव्व बुहलोयमणइट्ठो ॥ ९५ ॥

---

ततो भणति चित्रवेगः तव प्रभावात् साम्प्रतं कुशलम् ।
तस्मात्संप्रति मम कथय महत्कुतुहलमत्र ॥ ९० ॥

पूर्वभवे सम्बन्धस्त्वया सहाऽऽसीत् को मम देव ? ।
केन वा कार्येण त्वमासीत् गतोत्सुकस्तदा ? ॥ ९१ ॥

ततश्च भणति त्रिदशोऽनेन कार्येणाऽऽगतः सुतनो ! ।
स एकमना भूत्वा कथ्यमानं निशृणु ॥ ९२ ॥

जम्बूद्वीपे इहैरावतेऽस्ति आर्ये देशे ।
विजयवती नाम्ना नगरी सुरनगरीसंकाशा ॥ ९३ ॥

तस्यामपि सुविख्यातो धनभूति- र्नामाऽऽसीत् सार्थवाहः ।
दाक्षिण्यदयायुक्त उद्युक्तो जैनधर्मे ॥ ९४ ॥

चन्द्र इव कलानिलयो गज इव नित्यं प्रवृत्तवरदानः ।
अनुवर्तितमित्रो वासर इव बुधलोकमन-इष्टः ॥ ९५ ॥

---

१. सांप्रतं=संप्रति । २. अत्र । ३. आर्ये । ४. संकाशा=तुल्या । ५. सत्थाहो=सार्थवाहः ।
६. दाने त्यागः, मदश्च । ७. सत्कृतमित्रः, वासरपक्षे मित्रः सूर्यः धनभूतिपक्षे मित्राणि सुहृदः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्स य पसंतरूवा पइव्वया सच्चसीलदयजुत्ता ।
भज्जा सुंदरदेहा सुंदरिनामा सुविक्खाया ॥ ९६ ॥

विमलं सावगधम्मं सम्मं अह ताण पालयंताणं ।
वच्चंति वासराइं सुसाहुजणभत्तिजुत्ताणं ॥ ९७ ॥

अह अन्नया कयाइवि पहाण सुविणेहिं सूइयं तणयं ।
सा सुंदरी पसूया पभूयसुहलक्खणाइन्नं ॥ ९८ ॥

निज्जियअणंगरूवं तेएण य दिणयरस्स सारिच्छं ।
सोमं ससिबिंबं पिवं[1] जिणिंदधम्मंव सुहजणयं ॥ ९९ ॥

अह तस्स बारसाहे वोलीणे नियजणणिजणएहिं ।
गरुयपमोएण कयं विहिणा नामं सुधम्मोत्ति ॥ १०० ॥

धणवाहणाभिहाणो बीओ कालेण से सुओ जाओ ।
सोवि हु सुधम्मनामो जाओ अह अट्ठवारिसओ[2] ॥ १०१ ॥

---

**तस्य च प्रशान्तरूपा पतिव्रता सत्यशीलदयायुक्ता ।**
**भार्या सुन्दरदेहा सुन्दरीनाम्नी सुविख्याता ॥ ९६ ॥**

**विमलं श्रावकधर्मं सम्यगथ तयोः पालयतोः ।**
**व्रजन्ति वासराणि सुसाधुजनभक्तियुक्तयोः ॥ ९७ ॥**

**अथान्यदा कदाचिदपि प्रधानस्वप्नैः सूचितं तनयम् ।**
**सा सुन्दरी प्रसूता प्रभूतशुभलक्षणाऽऽकीर्णम् ॥ ९८ ॥**

**निर्जितानङ्गरूपं तेजसा च दिनकरस्य सदृशम् ।**
**सौम्यं शशीबिम्बमिव जिनधर्ममिव शुभजनकम् ॥ ९९ ॥**

**अथ तस्य द्वादशाऽह्नि अतिक्रान्ते निजकजननीजनकाभ्याम् ।**
**गुरुकप्रमोदेन कृतं विधिना नाम सुधर्म इति ॥ १०० ॥**

**धनवाहनाभिधानो द्वितीयः कालेन तस्याः सुतो जातः ।**
**सोऽपि खलु सुधर्मनामा जातोऽथाष्टवार्षिकः ॥ १०१ ॥**

---

१. पिव=इवार्थेऽव्ययमिदम् । २. अष्टवार्षिकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीए य पुरवरीए विहरंतो अन्नया समोयरिओ ।
समणसयसेवियकमो सुदंसणो नाम आयरिओ ॥ १०२ ॥

अप्पडिबद्धविहारी चउदस पुव्वी गुणाण आवासो ।
पुव्वुत्तरदिसिभाए अवट्ठिओ नंदणुज्जाणे ॥ १०३ ॥

सव्वोपि नयरलोओ विण्गिओ सूरिवंदणनिमित्तं ।
धणभूईवि हु चलिओ भत्तीए तणयसंजुत्तो ॥ १०४ ॥

उम्मुक्कवाहणो अह दूराओ विहियउत्तरासंगो ।
तिपयक्खिणिऊण गुरुं वंदइ परमाए भत्तीए ॥ १०५ ॥

भीमभवोयहिनिवडंतजंतुसंतरणवरतरंडम्मि[1] ।
दिन्नम्मि धम्मलाभे गुरुणा, सेसे मुणी नमिउं ॥ १०६ ॥

उवविट्ठो सत्थाहो महिवट्ठे[2] पुरजणेण संजुत्तो ।
सूरीवि मोक्खमग्गं जिणधम्मं कहिउमाढत्तो ॥ १०७ ॥ युग्मम् ॥

---

तस्याञ्च पुरवर्यां विहरन्नन्यदा समवसृतः ।
श्रमणशतसेवितक्रमः सुदर्शनो नामाऽऽचार्यः ॥ १०२ ॥

अप्रतिबद्धविहारी चतुर्दशपूर्वी गुणानामावासः ।
पूर्वोत्तरदिग्भागेऽवस्थितो नन्दनोद्याने ॥ १०३ ॥

सर्वोऽपि नगरलोको विनिर्गतः सूरिवन्दननिमित्तम् ।
धनभूतिरपि खलु चलितो भक्त्या तनयसंयुक्तः ॥ १०४ ॥

उन्मुक्तवाहनोऽथ दूरात् विहितोत्तरासङ्गः ।
त्रिःप्रदक्षिणं कृत्वा गुरुं वन्दते परमया भक्त्या ॥ १०५ ॥

भीमभवोदधिनिपतज्जन्तुसंतरणवरतरण्डे ।
दत्ते धर्मलाभे गुरुणा शेषान् मुनीन् नत्वा ॥ १०६ ॥

उपविष्टः सार्थवाहो महीपृष्ठे पुरजनेन संयुक्तः ।
सूरिरपि मोक्षमार्गं जिनधर्मं कथितुमारब्धः ॥ १०७ ॥ युग्मम् ॥

---

१. तरण्डं=प्रवहणम् । २. महीपृष्ठे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविय । सम्मद्दंसणमूलो पंचमहव्वयमहल्लदढखंधो[1] ।
समिईगुत्तीतवसंजमाइसाहापसाहिल्लो[2] ॥ १०८ ॥
विविहाभिग्गहगोच्छो[3] मणहरसीलंगपत्तसोहिल्लो ।
वरलद्धिकुसुमकलिओ सग्गऽपवग्गाइसुहफलओ ॥ १०९ ॥
चारित्तकप्परुक्खो[4] वित्थरओ साहिओ जिणाणाए ।
दुहतावताविवाणं जियाण सरणं अणन्नसमं ॥ ११० ॥ तिसृभिः कुलकम् ।
चवलाइं इंदियाइं दुक्खनिमित्तं च विसयसंगोवि ।
कोहाइणो कसाया निबंधणं दोग्गइए उ ॥ १११ ॥
एक्कसि[5] कओ पमाओ जीवं पाडेइ भवसमुद्दम्मि ।
भीमो य भवो बहुसो पयासिओ तीए परिसाए ॥ ११२ ॥
सूरिस्स तस्स वयणं परमामयसच्छहं निसामित्ता ।
संविग्गा सा परिसा जहागयं पडिगया सव्वा ॥ ११३ ॥

---

**अपि च । सम्यक्दर्शनमूलः पञ्चमहाव्रतमहान्दृढस्कन्धः ।**
**समितिगुप्तितपःसंयमादयशाखाप्रशाखावान् ॥ १०८ ॥**
**विविधाऽभिग्रहगुच्छः मनोहरशीलाङ्गपत्रशोभावान् ।**
**वरलब्धिकुसुमकलितः स्वर्गापवर्गादिशुभफलकः ॥ १०९ ॥**
**चारित्रकल्पवृक्षो विस्तरतः कथितो जिनाज्ञया ।**
**दुःखतापतप्तानां जीवानां शरणमनन्यसमम् ॥ ११० ॥ तिसृभिः कुलकम् ॥**
**चपलानि इन्द्रियाणि दुःखनिमित्तं च विषयसङ्गोऽपि ।**
**क्रोधादयः कषाया निबन्धनं दुर्गत्यास्तु ॥ १११ ॥**
**एकशः कृतः प्रमादः जीवं पातयति भवसमुद्रे ।**
**भीमश्च भवो बहुशः प्रकाशितस्तस्यां पर्षदि ॥ ११२ ॥**
**सूरेस्तस्य वचनं परमामृतसदृशं निशम्य ।**
**संविग्ना सा पर्षद् यथागतं प्रतिगताः सर्वाः ॥ ११३ ॥**

---

१. महल्लो=महान् । २. समितिगुप्तितपःसंयमादय एव शाखाप्रशाखा यस्य स तथा । ३. गुच्छः=स्तबकः। ४. रुक्खो=वृक्षः। ५. सकृत् ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

सोऊण सुधम्मनामो धम्ममई[1] गुरुगिरं निसामित्ता ।
संसारभउव्विग्गो[2] पणमिय सूरिं इमं भणइ ॥ ११४ ॥

इच्छामि तुम्ह मूले निरवज्जं[3] गिण्हिउं सुपव्वज्जं ।
जणगेहिं अणुन्नाओ भीओ जरजम्ममरणाणं ॥ ११५ ॥

भणियं गुरुणा य तओ होउ अविग्धं तुहेत्थ वत्थुम्मि ।
अम्मापिऊहिं मुक्को अह सो पव्वाविओ[4] गुरुणा ॥ ११६ ॥

अब्भसियदुविह[5]सिक्खो संजमतवविणयकरणउज्जुत्तो ।
विहिणागुरुपा[6]मूले अहिज्जिउं[7] सो समाढत्तो ॥ ११७ ॥

सिग्घ महामई सो जाओ सुत्तत्थतदुमभयविहिन्नू[8] ।
चुद्दसपुव्वी गुरुसाहुसम्मओ गुणगणावासो ॥ ११८ ॥

नाऊण जोग्गयं[9] से सुहरिक्खे सूरिणा नियपयम्मि ।
अहिसित्तो सूरीवि य संलिहियतणू गओ मोक्खं ॥ ११९ ॥

---

**श्रुत्वा सुधर्मनामा धर्ममति- र्गुरुगिरं निशम्य ।**
**संसारभयोद्विग्नः प्रणम्य सूरिमिदं भणति ॥ ११४ ॥**

**इच्छामि युष्माकं मूले निरवद्यं ग्रहीतुं सुप्रव्रज्याम् ।**
**जनकाभ्यामनुज्ञातो भीतः जराजन्ममरणानाम् ॥ ११५ ॥**

**भणितं गुरुणा च ततो भवत्वविघ्नं तवात्र वस्तुनि ।**
**अम्बापितृभ्यां मुक्तोऽथ सः प्रव्राजितो गुरुणा ॥ ११६ ॥**

**अभ्यसितद्विविधशिक्षः संयमतपोविनयकरणोद्युक्तः ।**
**विधिना गुरुपादमूलेऽध्येतुं स समारब्धः ॥ ११७ ॥**

**शीघ्रं महामतिः स जातः सूत्रार्थतदुभयविधिज्ञः ।**
**चतुर्दशपूर्वी गुरुसाधुसम्मतो गुणगणावासः ॥ ११८ ॥**

**ज्ञात्वा योग्यतां तस्य शुभर्क्षे सूरिणा निजपदे ।**
**अभिषिक्तः सूरिरपि संलेखिततनुर्गतो मोक्षम् ॥ ११९ ॥**

---

१. धर्मे मतिर्यस्य स धर्ममतिः। २. भउव्विग्गो=भयोद्विग्नः। ३. निरवद्यां=निर्दोषाम्। ४. प्रव्राजितः=दीक्षितः। ५. ग्रहणासेवनारुपा द्विविधा शिक्षा। ६. पामूलं=पादमूलम्। ७. अध्येतुम्। ८. विहिन्नू=विधिज्ञः । ९. योग्यताम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समणगणसंपरिवुंडो[1] सुहम्मसूरीवि विविहदेसेसु ।
बोहिंतो भवियजणं विहरइ पुरगामनगरेसु ॥ १२० ॥

धणवाहणोवि कमसो वड्ढंतो पंचधाइपरियरिओ ।
पत्तो कुमरभावं अहिज्जिओ तह कलानिवहं ॥ १२१ ॥

पत्तो य जोव्वणं सो कामिणिजणहिययचोरणसमत्थं ।
पिउणा य तन्निमित्तं वरिया[2] वररुवसंपन्ना ॥१२२ ॥

सिरिसुप्पइट्ठनयरे धूया हरिदत्तपवरइब्भस्स।
विणयवईसंमूयाऽणंगवई नाम वरकन्ना ॥ १२३ ॥

महया विच्छड्डेणं परिणीया सोहणम्मि सा लग्गे ।
धणवाहणेण तत्तो आणीया नियनयरीए ॥ १२४ ॥

अह सो तीए रत्तो जोव्वणवररुवसोउमल्लेसु[3] ।
गाढं विसयासत्तो गयंवि कालं न याणाइ ॥ १२५ ॥

---

**श्रमणगणसंपरिवृत्तः सुधर्मसूरिरपि विविधदेशेषु ।**
**बोध्यमानो भविकजनं विचरति पुरग्रामनगरेषु ॥ १२० ॥**

**धनवाहनोऽपि क्रमशो वर्धमानः पञ्चधात्रीपरिवृत्तः ।**
**प्राप्तः कुमारभावमध्येत तथा कलानिवहम् ॥ १२१ ॥**

**प्राप्तश्च यौवनं स कामिनीजनहृदयचोरणसमर्थम् ।**
**पित्रा च तन्निमित्तं वर्या वररुपसंपन्ना ॥ १२२ ॥**

**श्रीसुप्रतिष्ठनगरे दुहिता हरिदत्तप्रवरेभ्यस्य ।**
**विनयवतीसंभूताऽनङ्गवती नाम्नी वरकन्या ॥ १२३ ॥**

**महता विच्छर्देन परिणीता शोभने सा लग्ने ।**
**धनवाहनेन तत आनीता निजकनगर्याम् ॥ १२४ ॥**

**अथ स तस्यां रक्तो यौवनवररूपसौकुमार्येषु ।**
**गाढं विषयासक्तो गतमपि कालं न जानाति ॥ १२५ ॥**

---

१. संपरिवृतः=परिकरितः । २. वर्या=श्रेष्ठा । ३. सोउमल्लं=सौकुमार्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया सुधम्मो विहरंतो मुणिवरो तहिं पत्तो ।
विजयवईनयरीए वासारत्तस्स पारंभे ॥ १२६ ॥

साहूहिं तत्थ वसही विमग्गिया ताहि सत्थवाहेण ।
धणभूइणा विदिन्ना सुविसुद्धा जाणसालासु[1] ॥ १२७ ॥

नियपरियणेण सहिओ सत्थाहो एइ गुरुसमीवम्मि ।
सामाइयाइजुत्तो संविग्गो सुणइ जिणधम्मं ॥ १२८ ॥

धणवाहणो उ दइयासुरयसुहासत्तमाणसो धणियं ।
पिउणा भणिओवि दढं न ए (हो?)इ गुरुवंदओ[2] कहवि ॥ १२९॥

अहतं विसयासत्तं गुरुरागं धम्मकरणनिरवेक्खं ।
परिचत्तसेसकज्जं दट्ठुं लहुभायरं गुरुणो ॥ १३० ॥

जाया एसा चिंता भाया मे रागमोहिओ वरओ ।
जिणवयणबाहिरमई इंदियविसएसु आसत्तो ॥ १३१ ॥

---

**अथान्यदा सुधर्मा विहरन् मुनिवरस्तत्र प्राप्तः ।**
**विजयवतीनगर्यां वर्षारात्रस्यः प्रारम्भे ॥ १२६ ॥**

**साधुभिस्तत्र वसति विमार्गिता तदा सार्थवाहेन ।**
**धनभूतिना विदत्ता सुविसुद्धा यानशालासु ॥ १२७ ॥**

**निजपरिजनेन सहितः सार्थवाह एति सुगुरुसमीपे ।**
**सामायिकादियुक्तः संविग्नः श्रृणोति जिनधर्मम् ॥ १२८ ॥**

**धनवाहनस्तु दयितासुरतसुखाऽऽसक्तमानसो गाढं ।**
**पित्रा भणितोऽपि दृढं नैति गुरुवन्दकः कथमपि ॥ १२९ ॥**

**अथ तं विषयाऽऽसक्तं गुरुरागं धर्मकरणनिरपेक्षम् ।**
**परित्यक्तशेषकार्यं दृष्ट्वा लघुभ्रातरं गुरोः ॥ १३० ॥**

**जातैषा चिन्ता भ्राता मम रागमोहितो वराकः ।**
**जिनवचनबहिर्मतिरिन्द्रियविषयेष्वासक्तः ॥ १३१ ॥**

---

१. जाणं=यानम् । २. वन्दत इति वन्दकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुल्लहमवि मणुयत्तं पावित्ता धम्मविरहिओ एसो ।
गच्छिस्सइ नरयम्मि घोरासु य तिरियजोणीसुं ॥ १३२ ॥ तिसृभिः कुलकम् ॥

केणावि उवाएणं बोहेमि रागमोहियं एयं।
एवं विचिंतिऊणं गुरुणा सद्दाविओ[1] भाया ॥ १३३ ॥

महया उवरोहेणं समागओ वंदिऊण तो सूरिं ।
उवविट्ठो से पुरओ अह सूरि भणिउमाढत्तो ॥ १३४ ॥

पोग्गलपरियट्टेहिं[2] बहूहिं संपाविऊण मणुयत्तं ।
हारेसु मा मुहाए[3] विसयामिस[4]मोहिओ भद्द ! ॥ १३५ ॥

विसएसु दढं सत्ता[5] सत्ता[6] बंधंति असुहकम्माइं ।
तव्वसओ संसारे भमंति अहमासु जोणीसु ॥ १३६ ॥

वहबंधमारणाई नाणाविहवेयणाओ नरएसु ।
पाविंति विसयगिद्धा दूसहाओ दीहरं कालं ॥ १३७ ॥

---

**दुर्लभमपि मनुष्यत्वं प्राप्य धर्मविरहित एषः ।**
**गमिष्यति नरके घोरासु च तिर्यग्योनीषु ॥ १३२ ॥ तिसृभिः कुलकम् ॥**

**केनाऽपि उपायेन बोधामि रागमोहितमेनम् ।**
**एवं विचिन्त्य गुरुणा शब्दायितो भ्राता ॥ १३३ ॥**

**महतोपरोधेन समागतो वन्दित्वा ततः सूरिम् ।**
**उपविष्टस्तस्य पुरत अथ सूरिर्भणितुमारब्धः ॥ १३४ ॥**

**पुद्गलपरावर्त्तैर्बहुभिः संप्राप्य मनुष्यत्वम् ।**
**हारय मा मुधा विषयाऽऽमिषमोहितो भद्र ! ॥ १३५ ॥**

**विषयेषु दृढं सक्ताः सत्त्वा बध्नन्ति अशुभकर्माणि ।**
**तद्वशतः संसारे भ्राम्यन्ति अधमासु योनीषु ॥ १३६ ॥**

**वधबन्धमारणादिर्नानाविधवेदना नरकेषु ।**
**प्राप्नुवन्ति विषयगृद्धा दुस्सहा दीर्घं कालम् ॥ १३७ ॥**

---

१. शब्दायितः=आहूतः । २. पुद्गलपरिवर्तैः=अनन्तकालविशेषैः । ३. मुधा । ४. आमिषं=मांसम् । ५. सक्ताः=अवबद्धाः । ६. सत्त्वाः=जीवाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अच्छउ ता परलोए इहेव पाविंति गुरुयदुक्खाइं ।
विसयपसत्ता दुद्दंतइंदिया देहिणो बहवे ॥ १३८ ॥

मोत्तूण निययजूहं[1] करेणुसुहसुरयफासपडिबद्धो ।
बद्धो वारीबंधे फासेण गओ[2] गओ[3] निहणं[4] ॥ १३९ ॥

रसणिंदियम्मि लुद्धो विद्धो गलएण मच्छओ[5] निहओ ।
घाणिंदियम्मि सत्तो पत्तो उरगोवि मरणदुहं ॥ १४० ॥

उज्जोइयसयलदिसं दीवसिहं पेच्छिउं पयंगोवि ।
तग्गहणरओ मरणं पत्तो नणु चक्खुदोसेण ॥ १४१ ॥

गोरीसद्दासत्तो निच्चलतड्डुविय[6]कन्नजुयलिल्लो ।
सवणिंदियदोसेणं मिओ[7] मओ वाह[8]बाणेण ॥ १४२ ॥

एक्किक्किंदियवसगा एए सव्वेवि पाविया निहणं ।
पंचिंदियवसगाणं नराण पुण का गई होज्जा? ॥ १४३ ॥

---

**आस्तां तस्मात् परलोकयिहैव प्राप्नोति गुरुकदुःखानि ।**
**विषयप्रसक्ता दुर्दान्तेन्द्रिया देहिनो बहवः ॥ १३८ ॥**

**मुक्त्वा निजकयूथं करेणुसुखसुरतस्पर्शप्रतिबद्धः ।**
**बद्धो वारीबन्धे स्पर्शेन गजो गतो निधनम् ॥ १३९ ॥**

**रसनेन्द्रिये लुब्धो विद्धो गलकेन मत्स्यको निहतः ।**
**घ्राणेन्द्रिये सक्तः प्राप्त उरगोऽपि मरणदुःखम् ॥ १४० ॥**

**उद्योतितसकलदिशं दीपशिखां प्रेक्ष्य पतङ्गोऽपि ।**
**तद्ग्रहणरतो मरणं प्राप्तो ननु चक्षुर्दोषेन ॥ १४१ ॥**

**गौरीशब्दाऽऽसक्तो निश्चलततकर्णयुगलवान् ।**
**श्रवणेन्द्रियदोषेण मृगः मृतो व्याधबाणेन ॥ १४२ ॥**

**एकैकेन्द्रियवशगैते सर्वेऽपि प्राप्ता निधनम् ।**
**पञ्चेन्द्रियवशगानां नराणां पुन-र्का गति - र्भवेत् ॥ १४३ ॥**

---

१. जूहो=यूथः=हस्तिसमुदायः। २. गजः । ३. गतः । ४. निधनम्=मरणम् । ५. मत्स्यकः।
६. तड्डवियं=ततं । ७. मिओ=मृगः । ८. वाहो=व्याधः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता पंचिदियवसगो विसयसुहं सेविऊण मा भद्द! ।
धम्मोवज्जणरहिओ[1] वच्चसु घोरम्मि नरयम्मि ॥ १४४ ॥

किज्जउ धम्मम्मि मई विसयसुहं उज्झिऊण ता इण्हि ।
सहलीकरेसु[2] सुंदर! अइदुलहं मणुयजम्मंति ॥ १४५ ॥

एयं गुरुणो वयणं निसम्म धणवाहणो इमं भणइ ।
इच्छामि तुम्हवयणं किं पुण निसुणेह मह भणियं ॥ १४६ ॥

अइनेहपरा वरई खणमवि विरहं न सक्कए सोढुं ।
दइयाऽणंगवई मह तेण न सक्केमि तं मोत्तुं ॥ १४७ ॥

तुब्भंपि वंदणत्थं आगमणं तेण होइ न मज्झ ।
मह विरहे सा वरई इण्हिपि हु अच्छए किंच्छं[3] ॥ १४८ ॥

तत्तो गुरुणा भणियं चंचलचित्ताणं महिलिआण कए ।
को व सकन्नो[4] पुरिसो हारिज्जा अप्पयं भद्द! ॥ १४९ ॥

---

**तस्मात् पञ्चेन्द्रियवशगो विषयसुखं सेवित्वा मा भद्र ! ।**
**धर्मोपार्जनरहितो व्रज घोरे नरके ॥ १४४ ॥**

**क्रियतां धर्मे मति-र्विषयसुखमुज्झित्वा तस्मादिदानीम् ।**
**सफलीकुरुष्व सुन्दर ! अतिदुर्लभं मनुष्यजन्म इति ॥ १४५ ॥**

**एतद्गुरोः वचनं निशम्य धनवाहन इदं भणति ।**
**इच्छामि युष्माकं वचनं किम्पुनर्निश्रृणुत मम भणितम् ॥ १४६ ॥**

**अतिस्नेहपरा वराकी क्षणमपि विरहं न शक्यते सोढुम् ।**
**दयिताऽनङ्गवती मम तेन न शक्नोमि तां मोक्तुम् ॥ १४७ ॥**

**युष्माकमपि वन्दनार्थमागमनं तेन न भवति मम ।**
**मम विरहे सा वराकी इदानीमपि खल्वास्ते कृच्छ्रम् ॥ १४८ ॥**

**ततो गुरुणा भणितं चञ्चलचित्तानां महिलानां कृते ।**
**को वा सकर्णः पुरुषो हारयेदात्मानं भद्र ! ॥ १४९ ॥**

---

१. धर्मोपार्जनरहितः=धर्मकरणवर्जितः। २. सफलीकुरुष्व । ३. कृच्छ्रं यथा स्यात्तथा, कष्टेनेत्यर्थः । ४. सकर्णः=मतिमान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पवणुद्धुयधयचंचलचित्तासुं महिलिआसु आसत्तो ।
जो धम्मम्मि पमायइ, सो काउरिसो न सप्पुरिसो ॥ १५० ॥

अविय । अंतोविसभरियाओ मणहररुवाओ बज्झवित्तीए ।
गुंजाफलसरिसाओ होंति सभावेण महिलाओ ॥ १५१ ॥

सच्चदयसोयरहिया अकज्जनिरयाओ साहसधणाओ ।
भयजणणीओ, तासुं को व संकन्नो रइं कुज्जा? ॥ १५२ ॥

रत्ताओ हरंति धणं पाणेवि हरंति तह विरत्ताओ ।
रागेवि विरागेवि य भयंकरा दुट्ठजुवईओ ॥ १५३ ॥

अन्नं चिंतेंति मणे नियंति अन्नं घडेंति अन्नेण ।
चलचित्ताणं ताणं को नाम हविज्ज वल्लहओ? ॥ १५४ ॥

मारेंति पइ जारस्स कारणे तंपि हंदि ! अन्नट्ठा ।
वीसासंति य अन्नं सब्भावं नेय पयडेंति ॥ १५५ ॥

---

**पवनोद्धूतध्वजचञ्चलचित्तासु महिलास्वासक्तः ।**
**यो धर्मे प्रमाद्यति स कापुरुषो न सत्पुरुषः ॥ १५० ॥ अपिच ।**

**अन्तर्विषभृता मनोहररुपा बाह्यवृत्त्या ।**
**गुञ्जाफलसदृश्यो भवन्ति स्वभावेण महिलाः ॥ १५१ ॥**

**सत्यदयाशौचरहिताऽकार्यनिरताः साहसधनाः ।**
**भयजननीयाः, तासु को वा सकर्णो रतिं कूर्यात् ? ॥ १५२ ॥**

**रक्ता हरन्ति धनं प्राणान्नपि हरन्ति तथा विरक्ताः ।**
**रागेऽपि विरागेऽपि च भयङ्करा दुष्टयुवतयः ॥ १५३ ॥**

**अन्यं चिन्तयन्ति मनसि पश्यन्त्यन्यं धटन्तेऽन्येन ।**
**चलचित्तानां तासां को नाम भवेत् वल्लभकः? ॥ १५४ ॥**

**मारयन्ति पतिं जारस्य कारणे तमपि हन्दि ! अन्यार्थम् ।**
**विश्वसन्ति चान्यं सद्भावं नैतद् प्रकटयन्ति ॥ १५५ ॥**

---

१. कापुरुषः=कातरः । २. साहसम्=अविचार्यकारित्वं धनं यासां ताः, साहसिक्य इत्यर्थः। ३. सकर्णः=मतिमान्। ४. रतिम्=आसक्तिम्। ५. पश्यन्ति। ६. घटन्ते=संबध्यन्ते । ७. अन्यार्थम्। ८. विश्वसन्ति । ९. प्रकटयन्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं बहुणा भणिएणं जाओ य हणंति निययपुत्तंपि ।
को नाम पिओ तासिं हविज्ज चवलाण महिलाण? ॥ १५६ ॥

ता भद्द! एरिसाणं तडिच्छडाडोवचवलहिययाणं ।
महिलाण कए को इह हविज्ज सिढिलायरो धम्मे ? ॥ १५७ ॥

इय गुरुभणियं सोउं विहसिय धणवाहणेण संलत्तं ।
अन्नाओ जुवईओ एवंविहदुट्ठचरियाओ ॥ १५८ ॥

मह महिला पुण सरला पइव्वया सच्चसीलदयजुत्ता ।
अणुरत्ता सुविणीया थिरनेहा गुरुजणे भत्ता ॥ १५९ ॥

सरिसा सा कह होज्जा असुद्धचरियाण अन्नमहिलाण? ।
लोहतुरंगाईणं दीसइ गुरु अंतरं लोए ॥ १६०॥

तत्तो गुरुणा भणियं मणोहरा तुज्झ जइवि सा महिला ।
तहवि हु उवभुज्जंता सरणी सा नरयनयरस्स ॥ १६१ ॥

---

**किं बहुना भणितेन जातश्च हन्ति निजकपुत्रमपि ।**
**को नाम प्रियस्तासां भवेच्चपलानां महिलानाम् ? ॥ १५६ ॥**

**तस्मात्भद्र ! ईदृशीनां तडिच्छटाटोपचपलहृदयानाम् ।**
**महिलानां कृते क इह भवेत् शिथिलादरो धर्मे ? ॥ १५७ ॥**

**इति गुरुभणितं श्रुत्वा विहस्य धनवाहनेन संलपितम् ।**
**अन्या युवतय एवंविधदुष्टचरित्राः ॥ १५८ ॥**

**मम महिला पुनः सरला पतिव्रता सत्यशीलदयायुक्ता ।**
**अनुरक्ता सुविनीता स्थिरस्नेहा गुरुजने भक्ता ॥ १५९ ॥**

**सदृशी सा कथं भवेदशुद्धचरित्राणामन्यमहिलानाम् ? ।**
**लोहतुरङ्गादीनां दृश्यते गुर्वन्तरं लोके ॥ १६० ॥**

**ततो गुरुणा भणितं मनोहरा तव यद्यपि सा महिला ।**
**तथाऽपि खलूपभुनक्ती सरणिः सा नरकनगरस्य ॥ १६१ ॥**

---

१. तडिच्छटाऽऽटोपचपलहृदयानाम् । २. सरणिः=मार्गः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जह किंपागफलाइं भुत्ताइं दुहावहाइं इह होंति ।
तह इत्थीसुरयसुहं मणहरमवि दोग्गइं[1] नेइ ॥ १६२ ॥

जह विसमीसं सरसंपि भोयणं जीवियं हरइ भुत्तं ।
तह सुंदरावि रमणी रमिया नणु दोग्गइं[1] देइ ॥ १६३ ॥

ता उज्झसु अणुरायं कुगइनिमित्ताए निययदइयाए ।
पंचमहव्वयजुत्तो होसुं तुमं चरणनिरउत्ति ॥ १६४ ॥

एवं दिवसे दिवसे संवेगकरेहिं महुरवयणेहिं ।
बोहिज्जंतो मणयं जाओ अह पयणुरागो[2] सो ॥ १६५ ॥

अन्नदिणे एगंते गुरुपुरओ अंजलिं करेऊण ।
धणवाहणो स एवं वज्जरई परमसंविग्गो ॥ १६६ ॥

तुम्हाणममयभूए वयणे निसुएवि मज्झ हिययाओ ।
किं नो सक्कइ[3] रागो विसंव दुट्ठस्स सप्पस्स? ॥ १६७ ॥

---

**यथा किंपागफलानिभुक्तानि दुःखावहानीह भवन्ति ।**
**तथा स्त्रीसुरतसुखं मनोहरमपि दुर्गतिं नयति ॥ १६२ ॥**

**यथा विषमिश्रं सरसमपि भोजनं जीवितं हरति भुक्तम् ।**
**तथा सुन्दराऽपि रमणी रता ननु दुर्गतिं ददाति ॥ १६३ ॥**

**तस्मादुज्झाऽनुरागं कुगतिनिमित्ताया निजदयितायाः ।**
**पञ्चमहाव्रतयुक्तो भव त्वञ्चरणनिरत इति ॥ १६४ ॥**

**एवं दिवसे दिवसे संवेगकरै-र्मधुरवचनैः ।**
**बोध्यमानो मनाग् जातोऽथ प्रतनुरागः सः ॥ १६५ ॥**

**अन्यदिन एकान्ते गुरुपुरतोऽञ्जलिं कृत्वा ।**
**धनवाहनः स एवं कथयति परमसंविग्नः ॥ १६६ ॥**

**युष्माकममृतभूते वचने निश्रुतेऽपि मम हृदयात् ।**
**किं न ष्वष्कते रागो विषमिव दुष्टस्य सर्पस्य ? ॥ १६७ ॥**

---

१. दुर्गतिम् । २. प्रतनुः=अल्पः । ३. ष्वष्कते=अपगच्छति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयवं! ताव न तुट्टइ दइयाए उवरि सव्वहा रागो ।
नवरं करेमि एक्कं जइ जुत्तं तुम्ह पडिहाइ ॥ १६८ ॥

सुरयसुहनिप्पिवासो दिक्खं गिण्हामि तुम्ह पामूले ।
दइयाए समं अहयं दंसणमित्तेण संतुट्ठो ॥ १६९ ॥

एवं ववत्थियम्मि जइ जोग्गं देह मज्झ तो दिक्खं।
तीए अदंसणेणं सक्केमि न जीवियं धरिउं ॥ १७० ॥

तव्वयणं सोऊण य सुधम्मसूरि विचिंतए एवं ।
पेच्छह अइदुरंतो रागो कह विलसए लोए ? ॥ १७१ ॥

एवंपि ता दिज्जउ पव्वज्जा ताहि गहियसुत्तत्थो ।
सयमेव विवेगजुओ उज्झिस्सइ रागसंबंधं ॥ १७२ ॥

एवं विचिंतिऊणं अणंगवइयाए संजुओ ताहे ।
धणवाहणो सभाया गुरुणा पव्वाविओ विहिणा ॥ १७३ ॥

---

भगवन् ! तावन्न त्रुट्यति दयिताया उपरि सर्वथा रागः ।
नवरं करोमि एकं यदि युक्तं तव प्रतिभाति ॥ १६८ ॥

सुरतसुखनिष्पिपासो दिक्षां गृह्णामि तव पादमूले ।
दयितया सममहकं दर्शनमात्रेण संतुष्टः ॥ १६९ ॥

एवं व्यवस्थिते यदि योग्यं देहि मम ततो दिक्षाम् ।
तस्याऽदर्शनेन शक्नोमि न जीवितं धर्त्तुम् ॥ १७० ॥

तद्वचनं श्रुत्वा च सुधर्मसूरिर्विचिन्तयत्येवम् ।
प्रेक्षध्वमतिदुरन्तो रागः कथं विलसेत् लोके ? ॥ १७१ ॥

एवमपि तस्मात् दीयतां प्रवज्या तदा गृहीतसूत्रार्थः ।
स्वयमेव विवेकयुक्त उज्झिष्यति रागसम्बन्धम् ॥ १७२ ॥

एवं विचिन्त्याऽनङ्गवत्या संयुक्तस्तदा ।
धनवाहनः स्वभ्राता गुरुणा प्रव्राजितो विधिना ॥ १७३ ॥

---

१. स्वभ्राता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चंदजसानामाए मयहरियाए समप्पिया सावि ।
साहुणिगणमज्झगया सिक्खइ वरसाहुणीकिरियं ॥ १७४ ॥

एवं च ताण दोण्हवि परोप्परं जाव तुट्टइ न रागो ।
बहुणावि हु कालेणं सुत्तत्थ विसारयाणंपि ॥ १७५ ॥

ताव य गुरुणा भणियं एगंते भारईए महुराए ।
एयं न जुत्तमहुणा उत्तमसत्ताण तुम्हाण ॥ १७६ ॥ ॥ युग्मम् ॥

अविरइजुवइजणेवि हु सवियारपलोयणम्मि साहुस्स ।
पायच्छित्तं गरुयं भणियं सुत्ते जिणिंदस्स ॥ १७७ ॥

जं पुण साहुणि विसए सवियारपलोयणं तु साहुस्स ।
तं भद्द! गुरुअणत्थस्स कारण वन्नियं समए[1] ॥ १७८ ॥

इयरमहिलाजणेवि हु दिट्ठीपाओ[2] न होइ जुत्तोति ।
किं पुण समणीविसए अबोहिबीयस्स मूलम्मि ? ॥ १७९ ॥

---

चन्द्रयशानामन्याः महत्तरिकायाः समर्पिता साऽपि ।
साध्वीगणमध्यगता शिक्षते वरसाध्वीक्रियाम् ॥ १७४ ॥

एवञ्च तयोर्द्वयोरपि परस्परं यावत् त्रुट्यति न रागः ।
बहुनाऽपि खलु कालेण सूत्रार्थं विशारदयोरपि ॥ १७५ ॥

तावच्च गुरुणा भणितमेकांते भारत्या मधुरया ।
एतन्न युक्तमधुनोत्तमसत्त्वानां युष्माकम् ॥ १७६ ॥ युग्मम् ॥

अविरतियुवतीजनेऽपि हु सविकारप्रलोकने साधोः ।
प्रायश्चितं गुरुकं भणितं सूत्रे जिनेन्द्रस्य ॥ १७७ ॥

यत्पुनः साध्वीविषये सविकारप्रलोकनं तु साधोः ।
तं भद्र ! गुर्वनर्थस्य कारणं वर्णितं समये ॥ १७८ ॥

इतरमहिलाजनेऽपि हु दृष्टिपातो न भवति युक्तेति ।
किं पुनः श्रमणीविषयेऽबोधिबीजस्य मूले ॥ १७९ ॥

---

१. समयः=सिद्धान्तः । २. दृष्टिपातः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता उज्झिय अविवेयं रागं अवहत्थिऊण[1] भावेण।
परिहरसु सव्वहच्चिय दिट्ठिकुसीलत्तणं एयं ॥ १८० ॥

एवं गुरुणा भणिओ संविग्गो[2] सोवि चिंतए एवं।
अइरागपरवसस्स ओ धी!धी! मह निव्विवेयस्स ॥ १८१ ॥

जो हं पणट्ठलज्जो गयरायपयम्मि[3] वट्टमाणोवि ।
साहुजणनिंदणिज्जं रागं न चएमि छड्डेउं[4] ॥ १८२ ॥

लद्धूणवि निरवज्जं पव्वज्जं दुट्ठरागपडिबद्धो ।
होहामि पुन्नरहिओ दीहरसंसारआभागी ॥ १८३ ॥

ही जीव! पाव! भमिहिसि नारयतिरिएसु दीहरं कालं ।
अविसयपयट्टरागो लद्धूणवि धम्ममणवज्जं ॥ १८४ ॥

एवं भावेंतस्सवि धणवाहणसाहुणो न उत्तरइ[5] ।
अणुरागो तव्विसए ताएवि य तस्स उवरिम्मि ॥ १८५ ॥

---

**तस्मादुज्झित्वाऽविवेकं रागमपहस्त्य भावेन ।**
**परिहर सर्वथा चैवं दृष्टिकुशीलत्वमेतद् ॥ १८० ॥**

**एवं गुरुणा भणितः संविग्नः सोऽपि चिन्तयत्येवम् ।**
**अतिरागपरवशस्य अहो धिग् ! धिग् मम निर्विवेकस्य ॥ १८१ ॥**

**योऽहं प्रणष्टलज्जो गतरागपदे वर्तमानोऽपि ।**
**साधुजननिन्दनीयं रागं न त्यजामि मोक्तुम् ॥ १८२ ॥**

**लब्ध्वाऽपि निरवद्यां प्रवज्यां दुष्टरागप्रतिबद्धः ।**
**भविष्यामि पुन्यरहितो दीर्घसंसाराऽऽभागी ॥ १८३ ॥**

**हा ! जीव ! पाप ! भ्रमिष्यसि नारकतिर्यक्षु दीर्घं कालम् ।**
**अविषयप्रवृत्तरागो लब्ध्वाऽपि धर्ममनवद्यम् ॥ १८४ ॥**

**एवं भावयतोऽपि धनवाहनसाधो-र्नोत्तरति ।**
**अनुरागस्तद्विषये तस्या अपि च तस्योपरे ॥ १८५ ॥**

---

१. अपहस्त्य=अपनीय । २. संविज्ञ=संवेगमापन्नः । ३. गतरागपदे=साधुपदे । ४. छड्डेउं= मोक्तुम् । ५. विनश्यति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं वच्चइ कालो संजमतवविणयकरणनिररयाणं ।
गुरुआणासंपाडणपराण अह ताण दोण्हंपि ॥ १८६ ॥

अह अन्नया कयाइवि भगिणीए वसुमईए संजुत्ता।
चलियाऽणंगवई वियारभूमिए बहियाओ ॥ १८७ ॥

दिट्ठो य ताहि एगो महिलासहिओ नरो उ उम्मत्तो ।
धूलिरयधूसरंगो जर[1]चीवरचीरियाइन्नो ॥ १८८ ॥

[2]उगायंतो बहुहा नच्चंतो डिंभ[3]सत्थपरिकिन्नो ।
तं दुट्ठुमणंगवई सुइरं पुलएइ तं जुयलं ॥ १८९ ॥

तत्तो तीए भणियं भगिणीए सुलोयणाए अ[4]णुहरइ ।
अ[5]ज्जो! एसा जुवई गहगहियनरस्स पा[6]सत्था ॥ १९० ॥

भणियं च वसुमईए सुइरं निज्झाइऊण सविसायं ।
सच्चिय एसा अम्हं भगिणी ओ सुलोयणा नाम ॥ १९१ ॥

---

**एवं व्रजति कालः संयमतपोविनयनिरतयोः ।**
**गुर्वाज्ञासंपादनपरयोरथ तयोर्द्वयोरपि ॥ १८६ ॥**

**अथान्यदा कदाचिदपि भगिन्या वसुमत्या संयुक्ता ।**
**चलिताऽनङ्गवती सा विचारभूमौ बहिः ॥ १८७ ॥**

**दृष्टश्चतदैको महिला सहितो नरस्तून्मत्तः ।**
**धूलिरजोधूसराङ्गो जरच्चीवरचीरिकाऽऽकीर्णः ॥ १८८ ॥**

**उद्‌गायन् बहुधा नृत्यन् डिम्भसार्थपरिकीर्णः ।**
**तं दृष्ट्वाऽनङ्गवती सुचिरं प्रलोकयति तं युगलम् ॥ १८९ ॥**

**ततस्तया भणितं भगिन्याः सुलोचनाया अनुकरोति ।**
**आर्ये ! एसा युवती ग्रहगृहीतनरस्य पार्श्वस्था ॥ १९० ॥**

**भणितञ्च वसुमत्या सुचिरं निर्ध्याय सविषादम् ।**
**सा चैवमेषाऽस्माकं भगिनी अहो ! सुलोचना नाम्नी ॥ १९१ ॥**

---

१. चीवरं=वस्त्रं, चीरिका कीटविशेषास्तैराकीर्णो व्याप्तः । २. उद्‌गायन् । ३. डिम्भाः=बालकाः । ४. अनुहरते=अनुकरोति । ५. आर्ये! । ६. पार्श्वस्था ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणीया आसि पुरा सुबंधुणा मेहलावइपुरीए ।
दिट्ठा कणगरहेणं कयाइ अह रायउत्तेणं ॥ १९२ ॥

अंतेउरम्मि छूढा[1] अइगुरुअणुरायहरियहियएण।
सयलोरोहपहाणा जाया अह तस्स वल्लहिया ॥ १९३ ॥

एयं मह पच्चक्खं सव्वंपि हु सासुरे[2] वसंतीए ।
वित्तं, तुमएवि सुयं अज्जे ! लोयप्पवायाओ ॥१९४॥

एसो गहगहियनरो दीसइ सरिसो उ रायउत्तस्स ।
ता एसो कणगरहो एसावि सुलोयणा नूणं ॥१९५॥

भणियमणंगवईए संभासेमो इमं तु नियभगिणिं ।
किं अम्हे परियाणइ, अहवाविअ भंभला[3] एसा ॥१९६॥

तत्तो गंतुं दोहिवि महुरं आभासियावि सा जाहे ।
नवि जाणइ किंचि फुडं[4] बोल्लइ य बहुअसंबध्धं ॥१९७॥

---

**परिणीताऽऽसीत् पुरा सुबन्धुना मेखलावती पुर्याम् ।**
**दृष्टा कनकरथेन कदाचिदथ राजपुत्रेण ॥ १९२ ॥**

**अंतःपुरे क्षिप्ताऽतिगुर्वनुरागहृतहृदयेन ।**
**सकलावरोधप्रधाना जाताऽथ तस्य वल्लभिका ॥ १९३ ॥**

**एतन्मम प्रत्यक्षं सर्वमपि खलु श्वसुरगृहे वसन्त्याः ।**
**विदितं त्वयाऽपि श्रुतं आर्ये ! लोकप्रवादतः ॥ १९४ ॥**

**एषो ग्रहगृहीतनरो दृश्यते सदृशस्तु राजपुत्रस्य ।**
**तस्मादेष कनकरथ एषाऽपि सुलोचना नूनम् ॥ १९५ ॥**

**भणितमनङ्गवत्या संभाषावहे इमान्तु निजभगिनीम् ।**
**किमावां परिजानाति अथवा चैव भंभला एषा ? ॥ १९६ ॥**

**ततो गत्वा द्वाभ्यामपि आभाषिताऽपि सा यदा ।**
**नाऽपि जानाति किञ्चित् स्पष्टं ब्रवीति च बह्वसम्बद्धम् ॥ १९७ ॥**

---

१. क्षिप्ता । २. श्वशुरगृहे । ३. भंभला=मूर्खा । ४. फुडं=स्पष्टम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताहे दोवि जणाइं सुधम्मसूरिस्स पायमूलम्मि ।
करुणापराहिं अज्जाहिं ताहि नीयाइं सविसायं ।।१९८।। युग्मम् ।

भणिओ अज्जाहिं गुरू एसा अम्हाण जिट्ठभगिणी ओ ।
किं होइ नवा भयवं ! जाया उम्मत्तिया कहवा ? ।।१९९।।

भणियं गुरुणा तत्तो नाणेण वियाणिऊण परमत्थं ।
सच्चिय सुलोयणा सा कणगरहो एस जुवराया ।।२००।।

[1]जोगो मइमोहकरो सीसे खित्तो इमाण [2]सुत्ताण ।
एक्काए [3]सवत्तीए ईसावसगाढकुद्धाए ।।२०१।।

तस्स वसेणं दोण्हवि मइसंमोहो इमाणं संजाओ ।
रन्ना य तओ वि[4]ज्जा बहवे सद्दाविआ तत्थ ।।२०२।।

न य केणवि पउणाइं कयाइं कालेण रक्खगनरा[5]ण ।
कहवि पमायपरोणं नीहरियाइं इमाइं तु ।।२०३।।

---

**तदा द्वावपि जनौ सुधर्मसूरेः पादमूले ।**
**करुणापराभ्यामार्याभ्यां ताभ्यां नीतौ सविषादम् ।। १९८ ।।**

**भणितं आर्याभ्यां गुरुरेषाऽऽवयो - र्ज्येष्ठभगिनी ओ ।**
**किं भवति न वा भगवन् जातोन्मत्तिका कथं वा ? ।। १९९ ।।**

**भणितं गुरुणा ततो ज्ञानेन विज्ञाय परमार्थम् ।**
**स एव (सत्यं) सुलोचना सा कनकरथ एष युवराजः ।। २०० ।।**

**योगोः मतिमोहकरः शीर्षे क्षिप्तोऽनयोः सुप्तयोः ।**
**एकया सपत्न्या ईर्ष्यावशगाढकुद्धया ।। २०१ ।।**

**तस्य वशेन द्वयोरपि मतिसंमोहोऽनयोः सञ्जातः ।**
**राज्ञा च ततो वैद्या बहवे शब्दायितास्तत्र ।। २०२ ।।**

**न च केनाऽपि प्रगुणौ कृतौ कालेण रक्षकनराणाम् ।**
**कथमपि प्रमादपराणाम् निःसृतौ इमौ तु ।। २०३ ।।**

---

१. योगः=औषधचूर्णयोगः। २. सुप्तयोः। ३. सपत्न्या। ४. वैद्याः। ५. सप्तम्याः स्थाने षष्ठी।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणिंय च वसुमईए भयवं ! एयाण मूढचित्ताणं ।
जइ पेच्छह उवयारं, [1]पडिजोगं देह चिंतेउं ॥२०४॥

तत्तो गुरुणा तेसिं दिन्नो उम्मायनासण[2]पडिट्ठो ।
पडिजोगो, जायाइं दोण्णिवि अह सत्थचित्ताइं ॥२०५॥

दट्ठूण भगिणिजुयलं सुलोयणा विम्हिया इमं भणइ ।
किं नाम इमं [3]सुमिणं किंवा मइविब्भमो एस ? ॥२०६॥

सा कत्थ अम्ह नयरी सा य विभूई य ते अलंकारा ।
कह धूलिघूसराइं इह म्हि (म्हो ?) संपावियाइंति ? ॥२०७॥

दोन्निवि गहिय[4]वयाओ कत्थ व भगिणीओ मज्झ इहइं तु ? ।
ता नूण इंदयालं एयं अहवावि [3]सुमिणंति ॥२०८॥

तत्तो य वसुमईए कहियं उम्मायकारणं सव्वं ।
जाव य गुरु[5]माहप्पा नट्ठो तुम्हाण उम्माओ ॥२०९॥

---

भणितं च वसुमत्या भगवन् ! एतयो-र्मूढचित्तयोः ।
यदि प्रेक्षध्वमुपचारं प्रतियोगं देहि चिन्तयितुम् ॥ २०४ ॥

ततो गुरुणा तयो-र्दत्त उन्मादनाशनपटिष्ठः ।
प्रतियोगः, जातौ द्वावपि अथ स्वस्थचित्तौ ॥ २०५ ॥

दृष्ट्वा भगिनीयुगलं सुलोचना विस्मितेदं भणति ।
किं नामेदम् स्वप्नं किं वा मतिविभ्रम एषः ? ॥ २०६ ॥

सा कुत्र अस्माकं नगरी सा च विभूतिश्च तेऽङ्लकाराः ।
कथं धूलिधूसराविह स्वः संप्राप्ताविति ? ॥ २०७ ॥

द्वयपि गृहीतव्रते कुत्र वा भगिन्यौ ममेह तु ? ।
तस्मान्नूनमिन्द्रजालमेतदथवाऽपि स्वप्नमिति ॥ २०८ ॥

ततश्च वसुमत्या कथितमुन्मादकारणं सर्वम् ।
यावच्च गुरुमाहात्म्यात् नष्टो युवयोरुन्मादः ॥ २०९ ॥

---

१. पूर्वस्माद् मतिमोहकराद् योगात् प्रतिकूलो योगः । २. पटिष्ठः । ३. स्वप्नः । ४. वय=व्रतम् । ५. माहप्पं=माहात्म्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइया य तुमं भद्दे ! छूढा अंतेउरम्मि जुवरन्ना ।
तइयच्चिय खयरेणं मायाइ सुमंगलेण अहं ॥२१०॥

भुत्ता पभूयकालं धणवइदेवेण बोहिया तत्तो ।
जाया चंदजसाए पयमूले सुयणु ! पव्वइया ॥२११॥

एसावि अणंगवई धम्मं सोऊण भवभयुव्विग्गा ।
नियभत्तुणा समेया पव्वइया एत्थ गच्छम्मि ॥२१२॥

ता सुयणु ! न सुविणमिणं सच्चं चिय जं इमं दिट्ठं ।
एसो सो अम्ह गुरु सुधम्मनामो महासत्तो ॥२१३॥

तत्तो दोवि जणाइं सुधम्मसूरिस्स परमविणएणं ।
वंदंति हरिरिसाइं पयकमलं सयलदोसहरं ॥२१४॥

तत्तो संवेयकरिं गुरुणो सोऊण देसणं पवरं ।
पडिबुद्धाइं दोन्निवि कमेण पव्वाइयाइंति ॥२१५॥

---

**यदा च त्वं भद्रे ! क्षिप्ताऽन्तःपुरे युवराजेन ।**
**तदैव खेचरेण मायया सुमङ्गलेनाऽहम् ॥ २१० ॥**

**भुक्ता प्रभूतकालं धनपतिदेवेन बोधिता ततः ।**
**जाता चन्दयशसः पादमूले सुतनो ! प्रव्रजिता ॥ २११ ॥**

**एषाऽपि अनङ्गवती धर्मं श्रुत्वा भवभयोद्विग्ना ।**
**निजभर्त्रा समेता प्रव्रजिताऽत्र गच्छे ॥ २१२ ॥**

**तस्मात् सुतनु ! न स्वप्नमिदं सत्यमेव यत्त्वयेदम् दृष्टम् ।**
**एष सोऽस्माकं गुरुः सुधर्मनामा महासत्त्वः ॥ २१३ ॥**

**ततो द्वावपि जनौ सुधर्मसूरेः परमविनयेन ।**
**वन्देते हर्षितौ पदकमलं सकलदोषहरम् ॥ २१४ ॥**

**ततः संवेगकरिं गुरोः श्रुत्वा देशनां प्रवराम् ।**
**प्रतिबुद्धौ द्वावपि क्रमेण प्रव्रजिताविति ॥ २१५ ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मयहरियाए पासे भगिणीजुअलेण संजुया तत्तो ।
संजमगुरुविणयरया सुलोयणा कुणइ विविहतवं ॥२१६॥

एवं चंदजसाए पयमूले ताण अच्छमाणाणं ।
तिण्हंपि हु भगिणीणं वोलीणा वासरा बहवे ॥२१७॥

मुणिणो कणगरहस्स उ धणवाहणसाहुणो य संजाओ ।
भो चित्तवेग ! तइया अन्नोन्नं गरुयनेहोत्ति ॥२१८॥

पंचमहव्वयजुत्ता समिईगुत्तीसु सम्ममुवउत्ता ।
नाणाविहतवनिरया गिण्हंति य सुत्तअत्थाई ॥२१९॥

गुरुआणाए निरया दोन्निवि पालेंति चरणकरणाइं ।
एवं पभूयकालो वोलीणो ताव दोण्हंपि ॥ २२०॥ युग्मम् ॥

अह अन्नया कयाइवि थोवं नियआउयं मुणेऊणं ।
सूरी संलिहियतणू अणसणविहिणा मओ[1] सम्मं ॥२२१॥

---

महत्तरिकायाः पार्श्वे भगिनीयुगलेन संयुक्ता ततः ।
संयमगुरुविनयरक्ता सुलोचना करोति विविधतपः ॥ २१६ ॥

एवं चन्द्रयशसः पादमूले तासामासीनानाम् ।
तिसृणां खलु भगिनीनामतिक्रान्ता वासरा बहवः ॥ २१७ ॥

मुनेः कनकरथस्य तु धनवाहनसाधोश्च सञ्जातः ।
भोः चित्रवेग ! तदाऽन्योन्यं गुरुकस्नेह इति ॥ २१८ ॥

पञ्चमहाव्रतयुक्तौ समितीगुप्तीषु सम्यगुपयुक्तौ ।
नानाविधतपोनिरतौ गृह्णीतश्च सूत्रार्थे ॥ २१९ ॥

गुर्वाज्ञायां निरतौ द्वावपि पालयतश्चरणकरणे ।
एवं प्रभूतकालोऽतिक्रान्तस्तावत् द्वयोरपि ॥ २२० ॥

अथान्यदा कदाचिदपि स्तोकं निजायुष्कं ज्ञात्वा ।
सूरिः संलिखिततनुरनशनविधिना मृतः सम्यक् ॥ २२१ ॥

---

१. मृतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बीयम्मि देवलोगे पवरे चंदज्जुणे विमाणम्मि ।
जाओ विमाणसामी देवो उ ससिप्पभो नाम ॥२२२॥

धणवाहणोवि साहू अ[1]तुट्टरागो च[2]रित्तु सा[3]मन्नं ।
कालं काउं विहिणा उप्पन्नो बीयकप्पम्मि ॥२२३॥

सामाणियठाणम्मि देवस्स ससिप्पहस्स सो जाओ ।
भासुरसरीरधारी देवो विज्जुप्पहो नाम ॥२२४॥

सावि हु अणंगवइया अविगयरागा चरित्तु सामन्नं ।
विज्जुप्पहस्स जाया देवी अह चंदरेहत्ति ॥२२५॥

सं[4]भरिय पुव्ववेरं बहूवसग्गे करित्तु अइभीमे ।
अग्गिकुमारसुरेणं सुबंधुजीवेण पावेण ॥२२६॥

कणगरहो सो साहू सुलोयणाए समं तु अज्जाए ।
निहओ तं उवसग्गं विसहंतो सम्मभावेण ॥२२७॥

---

**द्वितीयस्मिन् देवलोके प्रवरे चन्दार्जुने विमाने।**
**जातो विमानस्वामी देवस्तु शशिप्रभो नामा ॥ २२२ ॥**

**धनवाहनोऽपि साधुरत्रुटितरागश्चरित्वा श्रामण्यम् ।**
**कालं कृत्वा विधिनोत्पन्नो द्वितीयकल्पे ॥ २२३ ॥**

**सामानीकस्थाने देवस्य शशिप्रभस्य स जातः ।**
**भासुरशरीरधारी देवो विद्युत्प्रभो नामा ॥ २२४ ॥**

**साऽपि खलु अनङ्गवत्यविगतरागा चरित्वा श्रामण्यम् ।**
**विद्युत्प्रभस्य जाता देव्यथ चन्द्रलेखेति ॥ २२५ ॥**

**संस्मृत्य पूर्ववैरं बह्वोपसर्गान् कृत्वाऽतिभीमान् ।**
**अग्निकुमारसुरेण सुबन्धुजीवेन पापेन ॥ २२६ ॥**

**कनकरथः स साधुः सुलोचनया समं त्वार्यया ।**
**निहतस्तमुपसगं विसहमानः सम्यग्भावेन ॥ २२७ ॥**

---

१. अत्रुटितरागः=अत्यक्त रागः। २. चरित्वा=प्रपाल्य। ३. श्रामण्यं=साधुत्वम्। ४. संस्मृत्य।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालं काउं दोन्निवि उवन्नाइं[1] तु बीयकप्पम्मि ।
चंदज्जुणे विमाणे सामाणियदेवभावेण ॥२२८॥ तिसृभिः कुलकम् ॥

कणगरहो ओ विहुप्पहनामो ईयरा[2] सयंपभा नाम ।
सावि तइज्जा भगिणी वसुमइया आउयखयम्मि ॥२२९॥

पुव्वदइयस्स जाया चंदज्जुणनामगस्स देवस्स ।
तत्थेव किल विमाणे देवी चंदप्पभा नाम ॥२३०॥

एवं एगविमाणे दिव्वसुहं ताण अणुहवंताणं ।
सव्वेसिं अन्नोन्नं अइगरुया आसि पीईओ ॥२३१॥

पलिओवमाणि अट्ठ उ दिव्वसुहं तत्थ अणुहवेऊणं ।
देवो विज्जुप्पहो सो चइऊण इमम्मि वेयड्ढे ॥२३२॥

दक्खिणसेढीइ पुरे रमणीए रयणसंचए पवरे ।
पवणगइखयरपुत्तो उप्पन्नो बउलवइयाए ॥२३३॥

---

कालं कृत्वा द्वावपि उपपन्नौ तु द्वितीयकल्पे ।
चन्द्रार्जुने विमाने सामानीकदेवभावेन ॥ २२८ ॥ तिसृभिः कुलकम् ।

कनकरथ ओ विधुप्रभनामा इतरा स्वयम्प्रभानाम्नी ।
साऽपि तृतीया भगिनी वसुमती आयुःक्षये ॥ २२९ ॥

पूर्वदयितस्य जाता चन्द्रार्जुननामकस्य देवस्य ।
तत्रैव किल विमाने देवी चन्द्रप्रभा नाम्नी ॥ २३० ॥

एवमेकविमाने दिव्यसुखं तेषामनुभवताम् ।
सर्वेषामन्योन्यमतिगुरुकाऽऽसन् प्रीतयः ॥ २३१ ॥

पल्योपमान्यष्ट तु दिव्यसुखं तत्रानुभूय ।
देवो विद्युत्प्रभः स च्युत्वाऽस्मिन् वैताढये ॥ २३२ ॥

दक्षिणश्रेण्यां पुरे रमणीये रत्नसञ्चये प्रवरे ।
पवनगतिखेचरपुत्र उत्पन्नो बकुलवत्याः ॥ २३३ ॥

---

१. उपपन्नौ=उत्पन्नौ । २. इतरा=कनकरथस्य स्त्री सुलोचनाख्या ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं चि ठिए । जो धणवाहणजीवो देवो विज्जुप्पहो य दियलोए ।
सो य तुमं इह सुंदर! उप्पन्नो चित्तवेगोत्ति ॥२३४॥

देवीवि चंदरेहा तत्तो आउक्खए चुया संती ।
उप्पन्ना वेयड्ढे नयरे सिरिकुंजरावत्ते ॥२३५॥

खयरस्स अमियगइणो पियाए भज्जाए चित्तमालाए ।
कुच्छीए संभूया पियधूया कणगमालत्ति ॥२३६॥ युग्मम् ॥

भो चित्तवेग ! पुव्विं तुब्भं जो आसि रागसंबंधो ।
सामन्नमुवगयाणवि तस्स फलं एरिसं जायं ॥२३७॥

रुवं बलं च दित्ती रिद्धीवि य आसि थेविया[1] तुम्ह ।
देवभवे तुह आउं विमज्झिमं थवेयं आसि ॥२३८॥

एत्थवि माणुस्स-भवे अवरोप्पर-दंसणाओ आरब्भ ।
दुसहं विओय-दुक्खं संजायं तुम्ह दोण्हंपि ॥ २३९ ॥

---

**॥ एवञ्च स्थिते ॥**

**यो धनवाहनजीवो देवो विद्युत्प्रभश्च दिव्यलोके ।**
**स च त्वमिह सुन्दर ! उत्पन्नश्चित्रवेग इति ॥ २३४ ॥**

**देव्यपि चन्द्रलेखा तत आयुःक्षये च्युता सती ।**
**उत्पन्ना वैताढये नगरे श्रीकुञ्जरावर्त्ते ॥ २३५ ॥**

**खेचरस्यामितगतेः प्रियाया भार्यायाः चित्रमालायाः ।**
**कुक्षौ संभूता प्रियदुहिता कनकमालेति ॥ २३६ ॥**

**भोः चित्रवेग ! पूर्वं युवयो-र्य आसीत् रागसम्बन्धः ।**
**श्रामण्यमुपगतयोरपि तस्य फलमीदृशं जातम् ॥ २३७ ॥**

**रूपं बलंच दिप्ती ऋद्धयपिचासीत् स्तोकिका तव ।**
**देवभवे तवायुः विमध्यमं स्तोकमासीत् ॥ २३८ ॥**
**अत्राऽपि मनुष्यभवे परस्परदर्शनादारभ्य ।**
**दुस्सहं वियोगदुःखं सञ्जातं युवयो-र्द्वयोरपि ॥ २३९ ॥**

---

१. स्तोकिका=अल्पा ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुमएच्चिय अणुभूयं विओयदुक्खं सुदूसहं जमिह ।
भो चित्तवेग ! किंवा कहिएणं तेण तुह पुरओ? ॥२४०॥

काऊणवि सामन्नं सरागभावो तुमे न जं [1]चत्तो ।
तस्स फलेणं एसा दूसहा तुह आवया जाया ॥२४१॥

देवभवे तुह मित्तो चंदज्जुणनामगो य जो आसि ।
चइऊण सोवि तत्तो चित्तगई एत्थ संजाओ ॥२४२॥

वसुमइनामा अज्जा देवी चंदप्पहा य दियलोए ।
सावि य पियंगुमंजरिनामा इह भद्र ! उप्पन्ना ॥२४३॥

जं पुव्वसंगओ सो चित्तगई तेण तुम्ह संजाओ ।
अन्नोन्नं गुरुनेहो सुंदर! [2]सइदंसणेणंपि ॥२४४॥

तेणं उवायपुव्वं [3]घडिया सा तुज्झ कणगमालाओ ।
इण्हिं सकम्मवसओ जाओ तुह तीइ सह विरहो ॥२४५॥

---

त्वया चैवानुभूतं वियोगदुःखं सुदुस्सहं यदिह ।
भो-श्चित्रवेग ! किंवा कथितेन तेन तव पुरतः ? ॥ २४० ॥

कृत्वाऽपि श्रामण्यं सरागभावस्त्वया न यत्त्यक्तः ।
तस्य फलेनैषा दुःसहा तवापज्जाता ॥ २४१ ॥

देवभवे तव मित्रं चन्द्रार्जुननामकश्च योऽऽआसीत् ।
च्युत्वा सोऽपि ततश्चित्रगतिरत्र सञ्जातः ॥ २४२ ॥

वसुमती नाम्न्यार्या देवी चन्द्रप्रभा च दिव्यलोके ।
साऽपि च प्रियङ्गुमञ्जरी नाम्नीह भद्र ! उत्पन्ना ॥ २४३ ॥

यत्पूर्वसङ्गतस्स चित्रगतिस्तेन तव सञ्जातः ।
अन्योन्यं गुरुस्नेहः सुन्दर ! सकृत् दर्शनेनाऽपि ॥ २४४ ॥

तेनोपायपूर्वं घटिता सा तव कनकमाला ओ ।
इदानीं स्वकर्मवशतो जातस्तव तया सह विरहः ॥ २४५ ॥

---

१. चत्तो=त्यक्तः । २. सइ=सकृत् । ३. घटिता=संयोजिता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भो चित्तवेग! बहुणा किंवा भणिएण एत्थ अन्नेण ? ।
जं चेव आसि पुट्ठं तं चिय तुह ताव साहेमि ॥२४६॥

कणगरहो सो साहू अइप्पिओ आसि तुज्झ अन्नभवे ।
तत्तो य देवलोए विहुप्पहो नाम जो देवो ॥२४७॥

सो य अहं तुह वल्लहमित्तो अज्जवि तत्थ वसामि दिवम्मि ।
कारणमित्थमिमं तु [1]पडुच्च मे अइसंगय[2]ओ सि तुमंति ॥२४८॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥२४९॥

एसो एत्थ समप्पइ चिरपरिचियवन्नणोत्ति नामेण ।
सुरसुंदरिकहाए अट्ठमओ वरपरिच्छेओ ॥२५०॥

---

**भो-श्चित्रवेग ! बहुना किं वा भणितेनाऽत्रान्येन ? ।**
**यदेवासीत् पृष्टं तमेव तव तावत् कथयामि ॥ २४६ ॥**

**कनकरथः स साधुरतिप्रिय आसीत् तवान्यभवे ।**
**ततश्च देवलोके विधुप्रभो नामा यो देवः ॥ २४७ ॥**

**स चाऽहं तव वल्लभमित्रमद्याऽपि तत्र वसामि दिवि ।**
**कारणमत्रेदं तु प्रतीत्य मेऽतिसङ्गतकोऽसि त्वमिति ॥ २४८ ॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।**
**रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥**

**एषोऽत्र समाप्यते चिरपरिचितवर्णन इति नाम्ना ।**
**सुरसुन्दरिकथाया अष्टमको वरपरिच्छेदः ॥ २५० ॥**

**॥ अष्टमः परिच्छेदः समाप्तः ॥ २००० ॥**

---

१. प्रतीत्य । २. संगतक=मैत्री ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# नवमः परिच्छेदः

अह भणइ चित्तवेगो सुरवर ! मह कहसु केण कज्जेण ।
तइया मणिं समप्पिय कत्थ गओ आसि तुरियगई ? ॥१॥

तो भणइ सुरो सुंदर ! निसुणसु एयंपि वज्जरिज्जंतं ।
अज्ज अहं [1]आणत्तो ससिप्पहेणं तु देवेण ॥२॥

गच्छ विहुप्पह! खिप्पं जंबूद्दीवम्मि भरहखेत्तम्मि ।
नयरे कुसग्गनामे धणवाहणमुणिवरसमीवे ॥३॥

सो पुव्ववेरिएणं दिट्ठो झाणम्मि संठिओ तत्थ ।
तं [2]दट्ठु कुविओ सो काही अइगरुयउवसग्गं ॥४॥

ता तस्स रक्खणट्ठा सिग्धं वच्चाहि तम्मि नयरम्मि ।
अहमवि [3]इंदाणत्तिं समाणिउं आगमिस्सामि ॥५॥

---

**अथ भणति चित्रवेगः सुरवर ! मम कथय केन कार्येण ।**
**तदा मणिं समर्प्य कुत्र गतोऽसि त्वरित गतिः ? ॥ १ ॥**

**ततो भणति सुरः सुन्दर ! निशृणु एतदपि कथ्यमानम् ।**
**अद्याऽहमाज्ञप्तः शशीप्रभेन तु देवेन ॥ २ ॥**

**गच्छ विधुप्रभ ! क्षिप्रं जम्बूद्वीपे भरतक्षेत्रे ।**
**नगरे कुशाग्रनाम्नि घनवाहनमुनिवरसमीपे ॥ ३ ॥**

**स पूर्ववैरिणा दृष्टो ध्याने संस्थितस्तत्र ।**
**तं दृष्ट्वा कुपितः स करिष्यत्यतिगुरुकोपसर्गम् ॥ ४ ॥**

**तस्मात्तस्य रक्षणार्थे शीघ्रं व्रज तस्मिन्नगरे ।**
**अहमपि इन्द्राज्ञप्तिं समानीयाऽऽगमिष्यामि ॥ ५ ॥**

---

१. आज्ञप्तः=आदिष्टः । २. दृष्ट्वा । ३. इन्द्राज्ञाप्तिम् = इन्द्रोदेशम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो तहत्ति भणिउं वेगेण समागओ अहं इहइं ।
तावय दइयासहिओ [1]पलायमाणो तुमं दिट्ठो ॥६॥

ओहिनाणेण मए नायं जह एस सो हि विज्जुपहो ।
मह मित्तो नहवाहणभयाउरो वच्चए तुरियं ॥७॥

नहवाहणोवि एसो [2]पट्ठिविलग्गो इमस्स एइत्ति ।
ताहे करेमि किंचिवि उवगारं पुव्वमित्तस्स ॥८॥

एवं विचिंतिऊणं तुम्ह समीवम्मि आगओ अहयं ।
तइया य मणी दिव्वो समप्पिओ जीवरक्खट्ठा ॥९॥

तत्तो य गओ तुरियं घणवाहणमुणिवरस्स पासम्मि ।
दिट्ठो य मए देवो उवसग्गं तस्स कुणमाणो ॥१०॥

भणियं च मए रे! रे! तियसाहम! कत्थ वच्चसे इण्हिं ।
देविदवंदियाणं मुणीण एवं करेमाणो ? ॥११॥

---

**ततस्तथेति भणित्वा वेगेण समागतोऽहमिह ।**
**तावश्च दयितासहितः पलायमानस्त्वं दृष्टो ॥ ६ ॥**

**अवधिज्ञानेन मया ज्ञातं यथैष स हि विद्युत्प्रभः ।**
**मम मित्रं नभोवाहनभयातुरो व्रजति त्वरितम् ॥ ७ ॥**

**नभोवाहनोऽपि एष पृष्ठिविलग्नोऽस्य एति इति ।**
**तदा करोमि किञ्चिदपि उपकारं पूर्वमित्रस्य ॥ ८ ॥**

**एवं विचिन्त्य तवसमीपेऽऽगतोऽहम् ।**
**तदा च मणि-र्दिव्यः समर्पितो जीवरक्षणार्थः ॥ ९ ॥**

**ततश्च गतस्त्वरितं घनवाहनमुनिवरस्य पार्श्वे ।**
**दृष्टश्च मया देव उपसर्गं तस्य कुर्वन् ॥ १० ॥**

**भणितं च मया रे ! रे ! त्रिदशाधम ! कुत्र व्रजसि इदानीम् ।**
**देवेन्द्रवन्दितानां मुनीनामेवं कुर्वन् ? ॥ ११ ॥**

---

१. दिट्ठो सि तुमं पुरो इंतो । २. पृष्ठिः पीठम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उप्पायंतो पीडं मुणीण समसत्तुमित्तवग्गाणं ।
पाविट्ठ ! कत्थ वच्चसि दिट्ठीमग्गम्मि मह पडिओ ? ॥१२॥

एवं च मए भणिए भवणवई सो सुरो [1]ससंभंतो ।
नट्ठो सहसा ताव य सुक्कज्झाणे पविट्ठस्स ॥ १३ ॥

मुणिणो मोहावगमा उप्पन्नं केवलं वरं नाणं ।
केवलिमहिमा विहिया तओ मए परमविणएणं ॥ १४ युग्मम् ॥

सोउं दुंदुहिसद्दं देवा मणुया य आगया बहवे ।
कहिओ तेसिं धम्मो केवलिणा मोक्खसुहहेऊ ॥ १५ ॥

पत्थावं लहिऊणं पुट्ठो सो केवली मए एवं ।
भयवं ! किं अवरद्धं इमस्स देवस्स तुम्हेहिं ॥ १६ ॥

जेणेसो पावमई जीविय[2]ववरोवणम्मि उज्जुत्तो ? ।
तो भणइ मुणी निसुणसु जह वेरं आसि अन्न भवे ॥ १७ ॥

---

उत्पादयन् पीडां मुनीनां समशत्रुमित्रवर्गाणाम् ।
पापिष्ठ ! कुत्र व्रजसि दृष्टिमार्गे मम पतितः ? ॥ १२ ॥

एवं च मयि भणिते भवनपतिः स सुरः ससंभ्रान्तः ।
नष्टः सहसा तावच्च शुक्लध्याने प्रविष्टस्य ॥ १३ ॥

मुने-र्मोहापगमादुत्पन्नं केवलं वरं ज्ञानम् ।
केवलिमहिमा विहितस्ततो मया परमविनयेन ॥ १४ ॥ युग्मम् ।

श्रुत्वा दुन्दुभिशब्दं देवा मनुजाश्चाऽऽगता बहवः ।
कथितस्तेभ्यो धर्मः केवलिना मोक्षसुखहेतुः ॥ १५ ॥

प्रस्तावं लब्ध्वा पृष्टस्स केवली मयैवम् ।
भगवन् ! किमपराद्धमस्य देवस्य युष्माभिः ॥ १६ ॥

येनैष पापमतिर्जीवितव्यपरोपणे उद्युक्तः ? ।
ततो भणति मुनि-र्निशृणु यथा वैरमासीदन्यभवे ॥ १७ ॥

---

१. ससंभ्रान्तः=भयभीतः २. व्यपरोपणम्=नाशः ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

धाायइसंडविदेहे चंपानामेण आसि वरनयरी ।
तीए प[1]उमो राया जुवराया समरकेउत्ति ॥ १८ ॥

जिणवयणभावियप्पा सहोयरा दोवि नेहसंजुत्ता ।
पालेंति देसविरइं रज्जधुरं तह य नीईए ॥ १९ ॥

अत्थाणमुवगयाणं ना[2]हियवाई समागओ कविलो ।
वज्जरइ नत्थि जीवो न य सव्वन्नू न ने[3]व्वाणं ॥ २० ॥

जिणमयस[4]त्थत्थवियाणएण जुवराइणा जिओ वाए ।
दिट्ठंतहेउकारणनाणाविहजुत्तिनिवहेण ॥ २१ ॥

जुवरन्नो पडिवयणं जाहे न चे[5]एइ किंपि सो दाउं ।
ताहे मंतिमहत्तमसामंताईहिं उवहसिओ ॥ २२ ॥

जाओ य विलक्खो सो दढं [6]पउट्ठो य समरकेउस्स ।
कह णु महायणमज्झे एएणं धरिसिओ अहयं ? ॥ २३ ॥

---

**धातकीखण्डविदेहे चम्पानाम्नाऽऽसीत् वरनगरी ।**
**तस्यां पद्मो राजा युवराजः समरकेतुरिति ॥ १८ ॥**

**जिनवचनभावितात्मानौ सहोदरौ द्वावपि स्नेहसंयुक्तौ ।**
**पालयतो देशविरतिं राज्यधुरं तथा च नीत्या ॥ १९ ॥**

**आस्थानमुपगतयोर्नास्तिकवादी समागतः कपिलः ।**
**कथयति नास्ति जीवो न च सर्वज्ञो न निर्वाणम् ॥ २० ॥**

**जिनमतशास्त्रार्थविज्ञायकेन युवराजेन जितो वादे ।**
**दृष्टान्तहेतुकारणनानाविधयुक्तिनिवहेन ॥ २१ ॥**

**युवराजस्य प्रतिवचनं यदा न शक्नोति किमपि स दातुम् ।**
**तदा मंत्रीमहत्तमसामन्तादिभिरुपहसितः ॥ २२ ॥**

**जातश्च विलक्षः स दृढं प्रदुष्टश्च समरकेतोः ।**
**कथन्नु महाजनमध्ये एतेन धर्षितोऽहकम् ?॥ २३ ॥**

---

१. पद्मः, तन्नामा राजेत्यर्थः । २. नाहियवाइं=नास्तिकवादी । ३. निर्वाणं=मोक्षः । ४. शास्त्रार्थविज्ञायकेन । ५. चएइ=शक्नोति । ६. प्रदुष्टः प्रद्विष्टो वा रुष्ट इत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं विचिंतयंतो अइगुरुरोसेण धमधमंतो सो ।
अत्थाणमंडवाओ नीहरिओ चिंतए एवं ॥ २४ ॥

न य केणइ पुव्वमहं पराइओ वाइणा इहं लोए ।
पावेण इमेण पुणो सभाए मज्झम्मि कह विजिओ ? ॥ २५ ॥

ता रयणीए भवणे इमस्स गंतूण गहियकरवालो ।
छिंदामि उत्तिमंगं जेण मणं निव्वुइं[१] लहइ ॥ २६ ॥

रोद्दज्झाणोवगओ एवं सो चिंतिऊण रयणीए ।
[२]गहियाउहो पविट्ठो वासहरे समरकेउस्स ॥ २७ ॥

व[३]च्चोहरभितीए पच्छन्नो अच्छए पलीणो सो ।
काऊण गोसकिच्चं समागओ तत्थ जुवराया ॥ २८ ॥

दीवयवग्गकरेहिं नरेहिं उज्जोइएण मग्गेणं ।
वच्चोहरगमणिच्छा अह जाया रायउत्तस्य[४] ॥ २९ ॥

---

**एवं विचिन्तयन्नतिगुरुरोषेण धमधमन् सः ।**
**आस्थानमण्डपात् निःसृतःचिन्तयत्येवम् ॥ २४ ॥**

**न च केनचित् पूर्वमहं पराजितो वादिनेहलोके ।**
**पापेनाऽनेन पुनः सभायां मध्ये कथं विजितः ॥ २५ ॥**

**तस्माद्रजन्यां भवनेऽस्य गत्वा गृहीतकरवालः ।**
**छिनद्मि उत्तमाङ्गं येन मनो निवृत्तिं लभते ॥ २६ ॥**

**रौद्रध्यानवशगत एवं स चिन्तयित्वा रजन्याम् ।**
**गृहीतायुधः प्रविष्टो वासगृहे समरकेतोः ॥ २७ ॥**

**वर्चोगृहभित्त्यां प्रच्छन्नोऽऽस्ते प्रलीनः सः ।**
**कृत्वा गोसकृत्यं समागतस्तत्र युवराजः ॥ २८ ॥**

**दीपकवर्गकरैर्नरैरुद्योतितेन मार्गेण ।**
**वर्चोगृहगमनेच्छाऽथ जाता राजपुत्रस्य ॥ २९ ॥**

---

१. निर्वृतिः सुखम् । २. गृहीतायुधः=आत्तशस्त्रः । ३. वर्चो=विष्ठा तदुत्सर्गाय गृहं वर्चोगृहम् ।
४. राजपुत्रस्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरिसेहिं तत्थ दिट्ठो वच्चोहरसंठिओ स दुट्ठमई ।
[1]आयड्ढंतो खग्गं गहिओ बद्धो य सहसत्ति ॥ ३० ॥

जुवरन्ना नाओ सो नाहियवाई स एस कविलोत्ति ।
नूणं वायम्मि जिओ मज्झ वहट्ठा इह पविट्ठो ॥ ३१ ॥

दट्ठूण दीणवयणं वेवंतसरीरयं तयं कविलं ।
परिचत्तजीवियासं जाया करुणा कुमारस्स ॥ ३२ ॥

भणियं कुमरेण तओ जीवंतो ताव इण्हि मुक्को सि ।
मोत्तूण मज्झ देसं ठाएयव्वं तुमे पाव ! ॥ ३३ ॥

इय भणिओ सो नट्ठो गंतूणं ताहि दूरदेसम्मि ।
भि[2]ल्लजणाइन्नाए अवट्ठिओभिल्लपल्लीए ॥ ३४ ॥

अह अन्नया य पउमो पुत्तं अहिसिंचिऊण रज्जम्मि ।
जुवराइणा समेओ पव्वइओ गुरुसमीवम्मि ॥ ३५ ॥

---

पुरुषैस्तत्र दृष्टो वर्चोगृहसंस्थितः स दुष्टमतिः ।
आकर्षन् खड्गं गृहीतो बद्धश्च सहसेति ॥ ३० ॥

युवराजेन ज्ञातः स नास्तिकवादी स एष कपिल इति ।
नूनं वादे जितो मम वधार्थ इह प्रविष्टः ॥ ३१ ॥

दृष्ट्वा दीनवदनं वेपमानशरीरं तकं कपिलम् ।
परित्यक्तजीविताशं जाता करुणा कुमारस्य ॥ ३२ ॥

भणितं कुमारेण ततो जीवन् तावदिदानीं मुक्तोऽसि ।
मुक्त्वा मम देशं स्थातव्यं त्वया पाप ! ॥ ३३ ॥

इति भणितः स नष्टो गत्वा तदा दूरदेशे ।
भिल्लजनैराकीर्णायामवस्थितो भिल्लपल्ल्याम् ॥ ३४ ॥

अथाऽन्यदा च पद्मः पुत्रमभिसिञ्च्य राज्ये ।
युवराजेन समेतः प्रव्रजितो गुरुसमीपे ॥ ३५ ॥

---

१. आकर्षन् । २. भिल्लजनैराकीर्णायां व्याप्तायाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोन्निवि गुरुणा सहिया विहरंता बहुविहेसु देसेसु ।
सत्थेण समं चलिया रयणपुरं नाम वरनयरं ॥ ३६ ॥

सत्थाओ कहवि भट्ठा दोन्निवि अडवीए मोहिया मुणिणो ।
संपत्ता पल्लीए पाणयअट्ठा पविट्ठा ते ॥ ३७ ॥

दिट्ठा य परियडंता कविलेणं कहवि [1]पच्चभिन्नाया ।
कुद्धो य दढं एसो दट्ठूण मुणिं समरकेउं ॥ ३८ ॥

चिंतेइ ताहे कविलो इमेण वाएवि निज्जिओ अहयं ।
निव्विसओ आणत्तो तइया य इमेण पावेण ॥ ३९ ॥

ता कवडेणं केणवि वइरस्संतं करेमि इण्हिपि ।
इय चिंतिऊण वंदइ [2]ते मुणिणो परमविणएण ॥ ४० ॥

नीया य निजे गेहे विसमीसं भत्तपाणयं दिन्नं ।
भणिया य विणयपुव्वं भयवं ! एत्थेव भुंजेह ॥ ४१ ॥

---

**द्वावपि गुरुणा सहितौ विहरन्तौ बहुविधेषु देशेषु ।**
**सार्थेन समं चलितौ रत्नपुरं नाम वरनगरम् ॥ ३६ ॥**

**सार्थतः कथमपि भ्रष्टौ द्वावप्यटव्यां मोहितौ मुनी ।**
**संप्राप्तौ पल्ल्यां पानकार्थौ प्रविष्टौ तौ ॥ ३७ ॥**

**दृष्टौ च पर्यटता कपिलेन कथमपि प्रत्यभिज्ञातौ ।**
**कुद्धश्च दृढमेष दृष्ट्वा मुनिं समरकेतुम्॥ ३८ ॥**

**चिन्तयति तदा कपिलोऽनेन वादेऽपि निर्जितोऽहकम् ।**
**निर्विषय आज्ञप्तस्तदा चानेन पापेन ॥ ३९ ॥**

**तस्मात् कपटेन केनाऽपि वैरस्यान्तं करोमीदानीम् ।**
**इति चिन्तयित्वा वन्दते तौ मुनी परमविनयेन ॥ ४० ॥**

**नीतौ च निजेगेहे विषमिश्रं भक्तपानकं दत्तम् ।**
**भणितौ च विनयपूर्वं भगवन्तौ! अत्रैव भुङ्क्तं ॥ ४१ ॥**

---

१. प्रत्यभिज्ञातौ='तावेवेमौ' इत्युपलक्षितौ । २. तौ कर्मतापन्नौ ।



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

अद्धाणगमणखिन्ना निव्वियणे[1] एत्थ एगदेसम्मि ।
भुंजिय वीसमिउं तो पभायकाले वएज्जाह ॥ ४२ ॥

एवं भणिया तेणं सुहभावा वीसमित्तु खणमेगं ।
सज्झायं काऊणं पारद्धा भोयणं काउं ॥ ४३ ॥

संनिहियदेवयाए मुणिअणुकंपाए तयं विसं हरियं ।
भोत्तूण तओ दोन्निवि सज्झायं काउमारद्धा ॥ ४४ ॥

चिंतेइ तओ कविलो हंतं[2] विसेणं न किं मया[3] एए ।
नूणं मंतबलेणं अवहरिया होज्ज विससत्ती ॥ ४५ ॥

ता रयणीइ अवस्सं मारेयव्वो मए इमो मुंडो ।
जीवंतम्मि इमम्मि नत्थि ममं जेण संतोसो ॥ ४६ ॥

पत्ताए रयणीए सज्झायं कट्टु[4] साहुणो सुत्ता ।
कविलोवि अद्धरत्ते समागओ साहुवहणट्ठा ॥ ४७ ॥

---

अध्वानगमनखिन्नौ निर्विजनेऽत्रैकदेशे ।
भुङ्क्त्वा विश्रम्य ततो प्रभातकाले व्रजतम् ॥ ४२ ॥

एवं भणितौ तेन शुभभावौ विश्रम्य क्षणमेकम् ।
स्वाध्यायं कृत्वा प्रारब्धौ भोजनं कर्त्तुम् ॥ ४३ ॥

संनिहितदेवतया मुन्यनुकम्पया तकं विषं हृतम् ।
भुक्त्वा ततो द्वावपि स्वाध्यायं कर्तुमारब्धौ ॥ ४४ ॥

चिन्तयति ततः कपिलो हन्त ! विषेण न किम् मृतावेतौ ।
नूनं मंत्रबलेनाऽपहृता भवेत् विषशक्तिः ॥ ४५ ॥

तस्मात् रजन्यामवश्यं मारयितव्यो मयाऽयं मुण्डः ।
जीवत्यस्मिन्नास्ति मम येन संतोषः ॥ ४६ ॥

प्राप्तायां रजन्यां स्वाध्यायं कृत्वा साधू सुप्तौ ।
कपिलोऽपि अर्धरात्रे समागतः साधुवधनार्थः ॥ ४७ ॥

---

१. निर्विजने=एकान्ते । २. विमर्शेऽत्राव्ययमिदम् । ३. मृतौ । ४. कृत्वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयड्ढिऊणं[1] खग्गं जाव पहारं करेइ साहुस्स ।
रुट्ठाए देवयाए पहओ सो तेण खग्गेण ॥ ४८ ॥

रोद्दज्झाणोवगओ मरिऊण गओ बिइज्जपुढवीए[2] ।
मुणिणोवि निरइयारं सामन्नं काउं बहुकालं ॥ ४९ ॥

कालं काउं विहिणा दोन्निवि सोहम्मनामकप्पम्मि ।
उप्पन्ना सुहप्पुन्ना[3] अच्छरगणसंकुलविमाणे ॥ ५० ॥ युग्मम् ॥

तत्तो य पउमजीवो सागरमेगं तु आउयं तत्थ ।
अणुहविऊणिह दीवे एरवए विजयनयरीए ॥ ५१ ॥

धणभूइनामगस्स ओ जाओ तणओ सुधम्मनामोत्ति ।
काऊण य सामन्नं उप्पन्नो बीयकप्पम्मि ॥ ५२ ॥ युग्मम् ॥

चंदज्जुणे विमाणे ससिप्पहो नाम सो सुरो जाओ ।
दो चेव सागराइं संपुन्नं आउयं तस्स ॥ ५३ ॥

---

आकृष्य खड्गं यावत्प्रहारं करोति साधोः ।
रुष्टया देवतया प्रहतः स तेन खड्गेन ॥ ४८ ॥

रौद्रध्यानौपगतो मृत्वा गतो द्वितीयपृथिव्याम् ।
मुन्यपि निरतिचारं श्रामण्यं कृत्वा बहुकालम् ॥ ४९ ॥

कालं कृत्वा विधिना द्वावपि सौधर्मनामकल्पे ।
उत्पन्नौ शुभपुण्यात् ( सुखपूर्णौ ) अप्सरागणसंकुलविमाने ॥ ५० ॥ युग्मम् ॥

ततश्च पद्मजीवः सागरमेकन्तु आयुस्तत्र ।
अनुभूय इह द्वीपे ऐरावते विजयनगर्याम् ॥ ५१ ॥

धनभूतिनामकस्य उत जातस्तनयः सुधर्मनामेति ।
कृत्वा च श्रामण्यमुपपन्नो द्वितीयकल्पे ॥ ५२ ॥ युग्मम् ॥

चन्द्रार्जुने विमाने शशिप्रभो नामा स सुरो जातः ।
द्वेचैव सागरे संपूर्णमायुष्कं तस्य ॥ ५३ ॥

---

१. आकृष्य । २. द्वितीयपृथिव्यां=द्वितीयनरके । ३. शुभपुण्यात्, सुखपूर्णौ वा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भद्द ! विहुप्पह ! संपइ विमाणसामी उ सो सुरो तुम्ह ।
जस्साएसेण तुमं समागओ मह समीवम्मि ॥ ५४ ॥

सो समरकेउजीवो सागरमेगं तु अट्ठपलिएहिं[1] ।
अब्भहियं अणुभविउं देवभवे अह चुंओ[2] तत्तो ॥ ५५ ॥

एत्थेव भरहखेत्ते कुसग्गनयरम्मि भद्दकित्तिस्स ।
रन्नो पियमहिलाए सुबंधुदत्ताए कुच्छीए ॥ ५६ ॥

उप्पन्नो सो देवो जाओ य कमेण दारओ तत्तो ।
घणवाहणोत्ति नामं विहियं से उचियसमयम्मि ॥ ५७ ॥

वड्ढंतो य कमेणं पत्तो अह जोव्वणं जणाणंदं ।
अहिसिंचिय तं रज्जे जाओ समणो पिया तस्स ॥ ५८ ॥ युग्मम् ॥

सोवि बहुपुव्वलक्खे रज्जं परिवालिऊण संबुद्धो ।
नरवाहणं तु पुत्तं रज्जे ठविऊण पव्वइओ ॥ ५९ ॥

---

**भद्र ! विधुप्रभ ! संप्रति विमानस्वामी तु स सुरः युष्माकम् ।**
**यस्याऽऽदेशेन त्वं समागतो मम समीपे ॥ ५४ ॥**

**स समरकेतुजीवः सागरमेकं तु अष्टपल्योपमैः ।**
**अभ्यधिकमनुभूय देवभवेऽथ च्युतस्ततः ॥ ५५ ॥**

**अत्रैव भरतक्षेत्रे कुशाग्रनगरे भद्रकीर्त्तेः ।**
**राज्ञः प्रियमहिलायाः सुबन्धुदत्तायाः कुक्षौ ॥ ५६ ॥**

**उपपन्न स देवो जातश्च क्रमेण दारकस्ततः ।**
**घनवाहन इति नाम विहितं तस्योचितसमये ॥ ५७ ॥**

**वर्धमानश्च क्रमेण प्राप्तोऽथ यौवनं जनानन्दम् ।**
**अभिसिञ्च्य तं राज्ये जातः श्रमणः पिता तस्य ॥ ५८ ॥ युग्मम् ॥**

**सोऽपि बहुपूर्वलक्षं राज्यं परिपाल्य सम्बुद्धः ।**
**नरवाहनं तु पुत्रं राज्ये स्थापित्वा प्रव्रजितः ॥ ५९ ॥**

---

१. अष्टभिः पल्यैः=पल्योपमैरभ्यधिकमेकं सागरं सागरोपमं, 'आयुः' इति शेषः, अनुभूयेत्यर्थः । २. च्युतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भद्द ! विहुप्पह ! सो हं विहरंतो अज्ज इह पुरे पत्तो ।
अह एगराइयाए ठिओ य पडिमाए अह एत्थ ॥ ६० ॥

सोवि हु कविलो नरए अणुहविउं दारुणं महं दुक्खं ।
सागरमेगं अहियं आउं भोत्तूण उव्वट्टो[१] ॥ ६१ ॥

जाओ मगहाविसए आभीरो साभडोत्ति नामेण ।
काऊण य बालतवं भवणवई सो सुरो जाओ ॥ ६२ ॥

परमाहम्मियदेवो उवरुद्दो नाम सो तहिं जाओ ।
दट्ठूण ममं इहइं समागओ आसुरुत्तोत्ति ॥ ६३ ॥

सुमरंतो तं वइरं समागओ तेण मह वहट्ठाए ।
एयं वइरनिमित्तं समासओ तुह मए सिट्ठं ॥ ६४ ॥

भो चित्तवेग ! तत्तो पुणरवि सो केवली मए पुट्ठो ।
भयवं ! केत्तियमाउं कत्थ व मह होज्ज उप्पत्ती ? ॥ ६५ ॥

---

भद्र ! विधुप्रभ ! सोऽहं विहरन्नद्येहपुरे प्राप्तः ।
अथ एकरात्रिकया स्थितश्च प्रतिमया अथात्र ॥ ६० ॥

सोऽपि खलु कपिलो नरकेऽनुभूय दारुणं महत् दुःखम्।
सागरमेकमधिकमायुर्भुक्त्वा उद्वृत्तः ॥ ६१ ॥

जातो मगधाविषयेऽऽभीरः साभड इति नाम्ना ।
कृत्वा च बालतपो भवनपतिः स सुरो जातः ॥ ६२ ॥

परमाधार्मिकदेव उपरुद्रो नामा स तत्र जातः।
दृष्ट्वा मामिह समागम आशुरुष्ट इति ॥ ६३ ॥

स्मरंस्तं वैरं समागतस्तेन मम वधनार्थे ।
एतद् वैरनिमित्तं समासतस्त्वा मया शिष्टम् ॥ ६४ ॥

भोः चित्रवेग ! ततः पुनरपि स केवली मया पृष्टः ।
भगवन् कियतायुः कुत्र वा मम भवेदुत्पत्तिः ? ॥ ६५ ॥

---

१. उद्वृत्तः=नरकान्निष्क्रान्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

को व पिया मह होही बोहिस्सइ को जिणिंदधम्मम्मि ? ।
एवं च मए भणिओ भयवं ! सो भणिउं[1]माढत्तो ॥ ६६ ॥

चिट्ठइ आउगसेसं एगवीसं वासकोडिकोडीओ ।
तत्तो चइऊण तुमं आउक्खए हत्थिणपुरम्मि ॥ ६७ ॥

सिरिअमरकेउरन्नो देवीकमलावईए कुच्छिम्मि ।
बहुउवयाइयलद्धो उववज्जिसि पुत्तभावेण ॥ ६८ ॥ युग्मम् ॥

जणणीइ समं तत्थ य अवहरिओ पुव्ववेरियसुरेण ।
भो चित्तवेग ! खयराहिवस्स गेहम्मि वड्ढिहिसि ॥ ६९ ॥

एंतेण मह समीवे दिव्वमणी जस्स ढोई[2]ओ तुमए ।
सो च्चिय परमत्थपिया भविस्सइ तम्मि जम्मम्मि ॥ ७० ॥

पासम्मि सुप्पइट्ठस्स सूरिणो पाविऊण गिहिधम्मं ।
अह लद्धुं समणत्तं काहिसि संसारवो[3]च्छेयं ॥ ७१ ॥

---

को वा पिता मम भविष्यति भोत्स्यते को जिनेन्द्रधर्मे ? ।
एवं च मया भणितो भगवन् ! स भणितुमारब्धः ॥ ६६ ॥

तिष्ठति आयुष्कशेषमेकविंशति वर्षकोटीकोट्यः ।
तत श्च्युत्वा त्वमायुः क्षये हस्तिनापुरे ॥ ६७ ॥

श्रीअमरकेतुराज्ञो देवीकमलवत्याः कुक्षौ ।
बहूपयाचितलब्धः उपपदिष्यसे पुत्रभावेन ॥ ६८ ॥ युग्मम् ॥

जनन्या समं तत्र चावहृत पूर्ववैरीसुरेण ।
भो-श्चित्रवेग ! खेचराधिपस्य गेहे वर्धिष्यसे ॥ ६९ ॥

आयता मम समीपे दिव्यमणिर्यस्य ढौकितस्त्वया ।
स एव परमार्थपिता भविष्यति तस्मिन् जन्मनि ॥ ७० ॥

पार्श्वे सुप्रतिष्ठस्य सूरेः प्राप्य गृहधर्मम् ।
अथ लब्ध्वा श्रमणत्वं करिष्यसि संसारव्यवच्छेदम् ॥ ७१ ॥

---

१. आढत्तो=आरब्धः । २. ढौकितः=उपदीकृतः । ३. व्यवच्छेदम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय केवलिणा भणिए तहत्ति बहु मन्निऊण तव्वयणं ।
ति [1]पयक्खिणिऊण पुणोऽभिवंदिओ सो मए भयवं ॥ ७२ ॥

तत्तो [2]उप्पइऊणं समागओ एत्थ तुह समीवम्मि ।
जं तं तुमए पुट्ठं तं सव्वं साहियं एयं ॥ ७३ ॥

भो चित्तवेग ! संपइ कायव्वं जं मए तमाइससु ।
तो भणइ चित्तवेगो सुरवर ! निसुणेसु मह वयणं ॥ ७४ ॥

नहवाहणेण नीया जा सा मह भारिया [3]सुदुक्खत्ता ।
तयवत्थं मं दट्ठुं विलवंती कलुणसद्देण ॥ ७५ ॥

भुयगोहवेढियस्सवि न तारिसं आसि मज्झ मणदुक्खं ।
जह तीए कलुणरोवणविलावसद्दं [4]सुणंतस्स ॥ ७६ ॥

सा कह चिट्ठइ संपइ जीवइ न नवत्ति मज्झ साहेसु ? ।
ओहिन्नाणेण तुमं जाणसि पच्चक्खमिव सव्वं ॥ ७७ ॥

---

**इति केवलिना भणिते तथेति बहु मत्वा तद्वचनम् ।**
**त्रिःप्रदक्षिणीकृत्य पुनरभिवन्दितः स मया भगवान् ॥ ७२ ॥**

**तत उत्पत्य समागतोऽत्र तव समीपे ।**
**यत् तत्त्वया पृष्टं तद् सर्व कथितमेतद् ॥ ७३ ॥**

**भोः चित्रवेग ! संप्रति कर्तव्यं यन्मया तदादिश ।**
**ततो भणति चित्रवेगः सुरवर ! निशृणु मम वचनम् ॥ ७४ ॥**

**नभोवाहनेन नीता या सा मम भार्या सुदुखार्त्ता ।**
**तदवस्थं मां दृष्ट्वा विलपन्ती करुणाशब्देन ॥ ७५ ॥**

**भुजङ्गौघवेष्टितस्याऽपि न तादृशमासीत् मम मनोदुःखम् ।**
**यथा तस्याः करुणरुदनविलापशब्दं स्मरतः ॥ ७६ ॥**

**सा कथं तिष्ठति संप्रति जीवति वा न वेति मम कथय ? ।**
**अवधिज्ञानेन त्वं जानासि प्रत्यक्षमिव सर्वम् ॥ ७७ ॥**

---

१. त्रिः प्रदक्षिणीकृत्य । २. उत्पत्य । ३. सुदुःखार्ता । ४. **संरंतस्स=स्मरतः** ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईसिं[1] हसिऊण तओ देवो वज्जरइ भद्द ! निसुणेसु ।
सा तुह भज्जा नीया गंगावत्तम्मि रुयमाणी ॥ ७८ ॥

नहवाहणेण तत्तो छूढा[2] अंतेउरम्मि निययम्मि।
गुरुसोयपीडियाए किल एवं चिंतयंतीए ॥ ७९ ॥

सो मह दइओ तावय भीसणभुयगेहिं गहियसव्वंगो ।
गुरुवेयणाए मन्ने होही पाणेण परिचत्तो ॥ ८० ॥

अह कहमवि जइ जीवइ तहवि हु मह तेण नत्थिसंजोगो ।
विज्जाबलअहिएणं पावेण इमेण हरियाए ॥ ८१ ॥

ता संपइ मह जुत्तं मरिउं गुरुसोयदुक्ख[3]तवियाए ।
सुविणेवि[4] नेव अन्नो पुरिसो मह लग्गए अंगे ॥ ८२ ॥

इय मंतिऊण तीए अइउग्गविसं तु भक्खियं सहसा ।
भंजिय लोयणजुयलं महीयले निवडिया तत्तो ॥ ८३ ॥

---

ईषद्धसित्वा ततो देवो कथयति भद्र ! निशृणु ।
सा तव भार्या नीता गङ्गावर्त्ते रुदती ॥ ७८ ॥

नभोवाहनेन ततः क्षिप्ता अन्तःपुरे निजके ।
गुरुशोकपीडितया किलैवं चिन्तयन्त्या ॥ ७९ ॥

स मम दयितः तावच्च भीषणभुजङ्गैर्गृहीतसर्वाङ्गः ।
गुरुवेदनया मन्ये भविष्यति प्राणेन परित्यक्तः ॥ ८० ॥

अथ कथमपि यदि जीवति तथाऽपि खलु मम तेन नास्ति संयोगः ।
विद्याबलाधिकेन पापेनाऽनेन हृतायाः ॥ ८१ ॥

तस्मात् संप्रति मम युक्तं मर्तुं गुरुशोकदुःखतप्तायाः ।
स्वप्नेऽपि नैवाऽन्यः पुरुषो मम लगेदङ्गे ॥ ८२ ॥

इति मन्त्रयित्वा तयाऽत्युग्रविषं तु भक्षितं सहसा ।
भग्नं लोचनयुगलं महीतले निपतिता ततः ॥ ८३ ॥

---

१. ईषत् । २. छूढा=क्षिप्ता । ३. तप्तया । ४. स्वप्नेऽपि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदवत्थं तं दट्ठुं हाहासद्दो समुट्ठिओ तत्थ ।
तं सोउं नहवाहणखयरोवि समागओ तत्थ ॥ ८४ ॥

नाऊण विसविर्[1]यारं [2]मंते तंते[3] [4]पउंजई विविहे ।
विसनिम्महणे मणिणो आबंधई तीए अंगम्मि ॥ ८५ ॥

न य तीए कोवि गुणो जाओ विस[5]धारियाए बालाए ।
आहूया अह बहवे विसमंतवि[6]याणया खयरा ॥ ८६ ॥

[7]सव्वायरलग्गेहिवि तेहिवि [8]पउणा न सक्किया काउं ।
ताहे मयत्ति काउं मयकिच्चं तीए काऊण ॥ ८७ ॥

नीया पेयवणम्मी नहवाहणपरियणेण सा बाला ।
चीयाए पक्खिविउं तत्तो उद्दीविओ जलणो ॥ ८८ ॥ युग्मम् ॥

एत्तियमेत्तं साहइ सो देवो जाव चित्तवेगस्स ।
धणदेव ! ताव निसुणसु जं संवित्तं तहिं तइया ॥ ८९ ॥

---

**तदवस्थां तां दृष्ट्वा हाहाशब्दः समुत्थितस्तत्र ।**
**तं श्रुत्वा नभोवाहनखेचरोऽपि समागतस्तत्र ॥ ८४ ॥**

**ज्ञात्वा विषविकारं मंत्रान् तंत्राणि प्रयुङ्क्ते विविधानि ।**
**विषनिर्मथने मणय आबध्नाति तस्या अङ्गे ॥ ८५ ॥**

**न च तस्याः कोऽपि गुणो जातो विषधारिताया बालायाः ।**
**आहूताऽथ बहवो विषमन्त्रविज्ञायकाः खेचराः ॥ ८६ ॥**

**सर्वादरलग्नैरपि तैरपि प्रगुणा न शक्या कर्तुम् ।**
**तदा मृतेति कृत्वा मृतकृत्यं तस्याः कर्तुम् ॥ ८७ ॥**

**नीता प्रेतवने नभोवाहनपरिजनेन सा बाला ।**
**चितायां प्रक्षिप्य तत उदीप्तो ज्वलनः ॥ ८८ ॥ युग्मम् ॥**

**एतावन्मात्रं कथयति स देवो यावत् चित्रवेगस्य ।**
**धनदेव ! तावत् निश्रृणु यत् संवृतं तस्मिन्तदा ॥ ८९ ॥**

---

१. विकारम् । २. मन्त्रान्=देवादिसाधनानि । ३. तन्त्राणि=ओषधीन् । ४. प्रयुङ्क्ते । ५. धारियाए=प्राकारितया व्याप्तयेत्यर्थः । ६. विज्ञायकाः=वेत्तारः । ७. विसहरउवयारेहिवि । ८. प्रगुणा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोउं दइयामरणं दूसहगुरुदुक्खदलियसव्वंगो ।
वज्जासणिभिन्नो इव उग्गभुयंगेण गसिउव्व ॥ ९० ॥

गहिउव्व रक्खसेणं पहओ इव मोग्गरेण गरुएण ।
नीससिय दीहदीहं गुरुसोयाउरिओ खयरो ॥ ९१ ॥

मुच्छानिमीलियच्छो धसत्ति धरणीयलम्मि सो पडिओ ।
नित्रट्ठसयलचेट्ठो संजाओ विगयजीउव्व ॥ ९२ ॥ तिसृभिः कुलकम् ॥

दट्ठूण चित्तवेगं तदवत्थं ताहे तेण देवेण ।
तया भणितं प्रियतम ! संप्रति स्वप्नं मया दृष्टम् ॥ ६० ॥

किल कनकमयः कलशो मम मुखे प्रविश्य विनिष्क्रान्तः ।
केनाऽपि भञ्जनार्थं नीतोः दूरं स कुद्धेन ॥ ६१ ॥

पुनरपि बहुकालात् कथमपि खलु लब्धः स क्षीरप्रतिपूर्णः ।
श्वेतकुसुममालया मयाऽपि संपूजितस्ततः ॥ ६२ ॥

एतद् स्वप्नं दृष्ट्वा मुखकटुकं परिणत्या सुन्दरकम् ।
जातो भयेन कम्पो मम देहे तेन नरनाथ ! ॥ ६३ ॥

तच्छ्रुत्वा नरेन्द्रो जातः शोकातुरो दृढं हृदये ।
कथयति देवि ! स्वप्नो लाभं सूचयति तनयस्य ॥ ६४ ॥

---

१. ऋतुस्नाता । २. स्वप्नम् । ३. वेविर=वेपनशीलम् । ४. अकस्मात् । ५. प्रविश्य विनिष्क्रान्तः । ६. मुखकटुकम्=आरम्भे दुःखदम् । ७. स्वप्नः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसं च सुविणजाणगपुच्छगविहिणा वियाणिउं[1] तुज्झ ।
साहिस्सं मा काहिसि उव्वेगं किंचि हिययम्मि ॥ ६५ ॥
तत्तो पभायसमए गंतुं अत्थाणमंडवे[2] राया ।
आणवइ सुमिणसत्थत्थजाणए झत्ति वाहरह ॥ ६६ ॥
तत्थ निउत्तनरेहिं तहेव संपाडियाए[3] आणाए ।
सामंतमंतिपुरनायगेहिं पुन्नम्मि अत्थाणे[2] ॥ ६७ ॥
कयविणया सुविणन्नू[4] उवविट्ठा अह नरिंदआसन्ने ।
धणदेवोवि हु रन्नो आसन्नो चेव उवविट्ठो ॥ ६८ ॥ युग्मम् ॥
तत्तो रन्ना तेसिं सिट्ठो सुरदंसणाइवुत्तंतो ।
पुव्वुत्तो[5] सव्वोवि हु सुविणगउवलंभअवसाणो ॥ ६९ ॥
सम्मं विणिच्छिऊणं[6] सुविणसरूवं कहेह भो ! तत्तं ।
इय भणिया ते रन्ना अन्नोन्नं जाव चिंतिंति ॥ ७० ॥

---

**शेषं च स्वप्नज्ञापकपृच्छकविधिना विज्ञाय तव ।**
**कथयिष्यामि मा करिष्यसि उद्वेगं किञ्चिद्धृदये ॥ ६५ ॥**
**ततः प्रभातसमये गत्वाऽऽस्थानमण्डपे राजा ।**
**आज्ञापयति स्वप्नशास्त्रार्थज्ञापकान् झटिति व्याहरत ॥ ६६ ॥**
**तत्र नियुक्तनरैस्तथैव संपादितायामाज्ञायाम् ।**
**सामन्तमन्त्रीपुरनायकैः पूर्णेऽऽस्थाने ॥ ६७ ॥**
**कृतविनयाः स्वप्नज्ञा उपविष्टाः अथ नरेन्द्राऽऽसन्ने ।**
**धनदेवोऽपि खलु राज्ञ आसन्नैवोपविष्टः ॥ ६८ ॥ युग्मम् ॥**
**ततो राज्ञा तेषां शिष्टः सुरदर्शनादिवृतान्तः ।**
**पूर्वोक्तः सर्वोऽपि खलु स्वप्नोपलभ्मावसानः ॥ ६९ ॥**
**सम्यग् विनिश्चित्य स्वप्नस्वरुपं कथयत भोः ! तत्वम् ।**
**इति भणिता ते राज्ञाऽन्योन्यं यावच्चिन्तयन्ति ॥ ७० ॥**

---

१. विज्ञाय । २. आस्थानं=सभा । ३. संपादितायां=परिपालितायाम् । ४. स्वप्नज्ञाः ।
५. पूर्वोक्तः । ६. विनिश्चित्य=निर्णीय ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताव य धणदेवेणं भणियं नरनाह ! देसु अवहाणं ।
सुविणपरमत्थजाणणहेउं निसुणेसु वुत्तुंतं ॥ ७१ ॥ युग्मम् ॥

तओ । अह अडवीए दिट्ठो भिल्लवई, तेण[1] जह य सप्पेहिं ।
बद्धो उ चित्तवेगो [2]विमोइओ मणिपभावाओ ॥ ७२ ॥

जह तेण नियचरिए सिट्ठे देवस्स आगमो आसि ।
देवेण केवली अह दिट्ठो य कुसग्गनयरम्मि ॥ ७३ ॥

जह भाविभवं पुट्ठो केवलिणा जह य तस्स आइट्ठं ।
सिरिअमरकेउरन्नो होहिसि पुत्तो तुमं भद्द ! ॥ ७४ ॥

जणणीइ समं तत्थ य अवहरिओ पुव्ववेरियसुरेण ।
ता चित्तवेग ! खयराहिवस्स गेहम्मि वड्ढिहिसि ॥ ७५ ॥

एमाइ पुव्वउत्तं सवित्थरं [3]साहियं नरवइस्स ।
धणदेवेणं जाव य संपत्तो हत्थिणपुरम्मि ॥ ७६ ॥

---

तावच्चधनदेवेनभणितं नरनाथ ! देहि अवधानम् ।
स्वप्नपरमार्थजाननहेतुं निशृणु वृतान्तम् ॥ ७१ ॥ युग्मम् ॥

ततः। अथाऽटव्यां दृष्टो भिल्लपतिस्तेन यथा च सर्पैः ।
बद्धस्तु चित्रवेगो विमोचितो मणिप्रभावात् ॥ ७२ ॥

यथा तेन निजकचरित्रे शिष्टे देवस्याऽऽगमाऽऽसीत् ।
देवेन केवली अथ दृष्टश्च कुशाग्रनगरे ॥ ७३ ॥

यथा भाविभवं पृष्टः केवलिना यथा च तस्याऽऽदिष्टम् ।
श्रीअमरकेतुराज्ञो भविष्यसि पुत्रस्त्वं भद्र ! ॥ ७४ ॥

जनन्या समं तत्र चापहृतो पूर्वभववैरिसुरेण ।
तस्मात् चित्रवेग ! खेचराधिपस्य गेहे वर्त्स्यसि ॥ ७५ ॥

एवमादि पूर्वोक्तं सविस्तारं कथितं नरपतेः ।
धनदेवेन यावच्च संप्राप्तो हस्तिनापुरे ॥ ७६ ॥

---

१. भिल्लपतिना । २. विमोचितः । ३. कथितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता देव ! देविउदरे विहुप्पहो सो सुरो समुप्पन्नो ।
होही, जओ न केवलिवयणं इह अन्नहा होइ ॥ ७७ ॥

पुव्वविरुद्धसुरेणं हरिओ खयरस्स वड्डिओ गेहे ।
साहियबहुविहविज्जो मिलिही सो नियजणणीए ॥ ७८ ॥

इच्छियकन्नादाणं मालाए पूयणंपि मन्ना सि ।
एसो नरिंद ! सुविणयपरमत्थो फुरइ मह हियए ॥ ७९ ॥

एयं धणदेवस्स ओ वयणं सोऊण सुविणयन्नूहिं[1] ।
भणियं अहो ! अउव्वं[2] एयस्स उ बुद्धिकोसल्लं ॥ ८० ॥

सययं तल्लिच्छेहिवि बहुसत्थवियक्खणेहिं अम्हेहिं ।
तव्विहबुद्धिविउत्तेहिं सक्कियं नो विणिच्छेउं ॥ ८१ ॥

[3]सुसिलिट्ठो नणु अत्थो निरूविओ राय ! वणि[4]यउत्तेण ।
सव्वेसिं अम्हाणवि सुसंमओ चेव एसोत्ति ॥ ८२ ॥

---

**तस्मात् देव ! देव्युदरे विधुप्रभः स सुरः समुत्पन्नः।**
**भविष्यति यतो न केवलिवचनमिहाऽन्यथा भवति ॥ ७७ ॥**

**पूर्वविरुद्धसुरेण हृतः खेचरस्य वर्धितो गेहे ।**
**साधितबहुविधविद्यो मिलिष्यते स निजकजनन्याः ॥ ७८ ॥**

**इच्छितकन्यादानं मालाया पूजनमपि मन्ये ( मन्याऽसि ) ।**
**एष नरेन्द्र ! स्वप्नपरमार्थस्स्फुरति मम हृदये ॥ ७९ ॥**

**एवं धनदेवस्य ओ वचनं श्रुत्वा स्वप्नज्ञैः ।**
**भणितं अहो ! अपूर्वमेतस्य तु बुद्धिकौशलम् ॥ ८० ॥**

**सततं तल्लिप्सैरपि बहुशास्त्रविचक्षणैरस्माभिः ।**
**तद्विधबुद्धिवियुक्तैश्शक्यं न विनिश्चेतुम् ॥ ८१ ॥**

**सुश्लिष्टो नन्वर्थो निरूपितो राजन् ! वणिक्पुत्रेण ।**
**सर्वेषामस्माकमपि सुसंमतश्चैवैष इति ॥ ८२ ॥**

---

१ स्वप्नज्ञैः । २ अपूर्वम् । ३ सुश्लिष्टः=सुसंगतः । ४ वणिक्पुत्रेण ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय भणिए ते रन्ना तंबोलपयाणपुव्वयं सव्वे ।
पट्ठविया तह सव्वे सामंतमहंतमाईया ॥ ८३ ॥

तत्तो रन्ना भणियं इण्हिं धणदेव ! किमिह कायव्वं ।
देवीइ समं अम्हं उवट्ठिए दुसहविरहम्मि ॥ ८४ ॥

किं एत्थ अत्थि कोवि हु पडिघायविही सुदुट्ठसुविणस्स ।
भणियं धणदेवेणं न अन्नहा केवलिगिरा ओ ॥ ८५ ॥

तहवि हु एस [1]उवाओ कीरइ मा होज्ज तेण पडिघाओ ।
मंचयपडियाण पुणो तहट्ठिया चेव भूमित्ति ॥ ८६ ॥

पल्लीवइणा तइया दिव्वमणी जो समप्पिओ मज्झ ।
सो एस अंगुलीयगनिवेसिओ चिट्ठउ करम्मि ॥ ८७ ॥

एसो अचिंतसत्ती अणेयठाणेसु दिट्ठ [2]माहप्पो ।
ता एयं देवीए करट्ठियं देव ! कारेह ॥ ८८ ॥ युग्मम् ॥

---

इति भणिते ते राज्ञा तम्बोलप्रदानपूर्वकं सर्वे ।
प्रस्थापिता तथा सर्वे सामन्तमहन्तादिकाः ॥ ८३ ॥

ततो राज्ञा भणितमिदानीं धनदेव ! किमिह कर्तव्यम् ।
देव्या सममस्माकमुपस्थिते दुःसहविरहे ॥ ८४ ॥

किमत्राऽस्ति कोऽपि खलु प्रतिघातविधिः सुदुष्टस्वप्नस्य ।
भणितं धनदेवेन नान्यथा केवलिगिरा ओ ॥ ८५ ॥

तथापि खल्वेष उपायः क्रियते मा भवेत्तेन प्रतिघातः ।
मञ्चकपतितानां पुनस्तथास्थिता चैव भूमीति ॥ ८६ ॥

पल्लीपतिना तदा दिव्यमणि-र्यः समर्पितो मम ।
स एष अङ्गुलीयकनिवेशितस्तिष्ठतु करे ॥ ८७ ॥

एषोऽचिन्त्यशक्तिरन्यस्थानेषु दृष्टमाहात्म्यः ।
तस्मादेतं देव्याः करस्थितं देव ! कारयत ॥ ८८ ॥ युग्मम् ॥

---

१. उपायः । २. माहप्पं=माहात्म्यम् ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वविरुद्धोवि सुरो हरणे देवीइ होज्ज असमत्थो ।
एयस्स पभावाओ, अह कहवि करिज्ज अवहरणं ॥ ८९ ॥

तहवि हु अवगारम्मी सक्किस्सइ नेव वट्टिउं वइरी ।
[1]नाउं इमं नरेसर ! मा सोगं किंचिवि करेह ॥ ९० ॥ अन्नं च ॥

सुविणपडिघायणत्थं कारेसु जिणालएसु महिमाओ ।
पूएसु [2]समणसंघं तदुचियवत्थासणाईहिं ॥ ९१ ॥

दावेसु अभयदाणं विविहाभिग्गहतवेसु [3]उज्जमसु ।
एवं कयम्मि नरवर ! सव्वंपि हु सुंदरं होही ॥ ९२ ॥

इय भणिउं धणदेवो समप्पिउं अंगुलीययं निययं ।
पणमित्ता रायाणं विणिग्गओ रायभवणाओ ॥ ९३ ॥

रन्नावि हु गंतूणं देवीभवणम्मि सयलवुत्तंतो ।
सिट्ठो समप्पियं तह देवीए अंगुलीयं तं ॥ ९४ ॥

---

**पूर्वविरुद्धोऽपि सुरो हरणे देव्या भवेदसमर्थः ।**
**एतस्य प्रभावतोऽथ कथमपि कूर्यादपहरणम् ॥। ८९ ॥**

**तथापि खल्वपकारे शक्ष्यते नैव वर्त्तितुं वैरी ।**
**ज्ञात्वेदं नरेश्वर ! मा शोकं किञ्चिदपि कुरुत ॥ ९० ॥**

**अन्यच्च । स्वप्नप्रतिघातार्थं कारय जिनालयेषु महिमानः ।**
**पूजय श्रमणसङ्घं तदुचितवस्त्रासनादिभिः ॥ ९१ ॥**

**दापय अभयदानं विविधाऽभिग्रहतपस्सु उद्यच्छ ।**
**एवं कृते नरवर ! सर्वमपि खलु सुन्दरं भविष्यति ॥ ९२ ॥**

**इति भणित्वा धनदेवः समर्प्य अङ्गुलीयकं निजकम् ।**
**प्रणम्य राजानं विनिर्गतो राजभवनात् ॥ ९३ ॥**

**राज्ञापि खलु गत्वा देवीभवने सकलवृतान्तम् ।**
**शिष्टं समर्पितं तथा देव्याऽङ्गुलीकं तम् ॥ ९४ ॥**

---

१. ज्ञात्वा । २. श्रमणः=साधुः । ३. उद्यच्छ=उद्यमं कुरुष्व ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणिया य देवी ! एयं खणंपि हत्थाओ नेव मोत्तव्वं ।
एयस्स पभावाओ पभवंति न [1]खुद्दसत्ताई ॥ ९५ ॥
जिणमंदिर[2]जत्ताइं कारवियं ताहि राइणा सव्वं ।
कमलावईवि तत्तो जाया [3]आवन्नसत्तत्ति ॥ ९६ ॥
सु[4]हसंपडंतहियइट्ठवत्थुसुविणीयपरियणजुयाए ।
अह सत्तमम्मि मासे जाओ देवीए दोहलओ ॥ ९७ ॥
लज्जाए तं कस्सवि जाहे न कहेइ ताव कइयावि ।
परिहायंतसरीरा दिट्ठा रन्ना इमं भणिया ॥ ९८ ॥
देवि ! तुह किं न [5]पुज्जइ दीससि अइदुब्बला जओ इण्हिं ।
देवीए तो भणियं दोहलओ एस मे नाह ! ॥ ९९ ॥
वर[6]वारणमारूढा दाणं [7]दिंती य अत्थिलोयस्स ।
तुहउच्छंगनिविट्ठा तुमए छत्तं धरंतेणं ॥ १०० ॥

---

**भणिता च देवि ! एतद् क्षणमपि हस्तान्नैव मोक्तव्यम् ।
एतस्य प्रभावात् प्रभवन्ति न क्षुद्रसत्त्वादयः ॥ ९५ ॥
जिनमन्दिरयात्रादि कारितं तदा राज्ञा सर्वम् ।
कमलावत्यपि ततो जाताऽऽपन्नसत्त्वेति ॥ ९६ ॥
सुखसंपद्यमानहितेष्टवस्तुसुविनीतपरिजनयुक्तायाः ।
अथ सप्तमे मासे जातो देव्या दोहदकः ॥ ९७ ॥
लज्जया तं कस्याऽपि यदा न कथयति तावत् कदाऽपि ।
परिहीयमानशरीरा दृष्टा राज्ञेदं भणिता ॥ ९८ ॥
देवि ! तव किं न पूर्यते दृश्यसेऽतिदुर्बला यत इदानीम् ।
देव्या ततो भणितं दोहदक एष मम नाथ ! ॥ ९९ ॥
वरवारणमारुढा दानं ददती चार्थिलोकस्य ।
तवोत्सङ्गनिविष्टा त्वया छत्रं धारयता ॥ १०० ॥**

---

१. क्षुद्रसत्त्वादयः । २. जत्ता=यात्रा । ३. आपन्नसत्त्वा=संजातगर्भा । ४. सुखेन संपद्यमानैः हितेष्टवस्तुभिः सुविनीतपरिजनेन च युक्ताया देव्याः । ५. पूर्यते । ६. वारणः=हस्ती । ७. देंती=ददती ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिंडामि राय ! नयरे परियरिया सयलभि[१]च्चवग्गेण ।
रन्ना भणियं सुंदरि ! कीरइ अहुणा [२]दुयं एयं ॥ १०१ ॥ युग्मम् ॥

अह पवरपट्टहत्थी सिंगारिय आणि[३]ओ निउत्तेहिं ।
तत्थारूढो राया देवी उण तस्स उच्छंगे ॥ १०२ ॥

उवरि [४]धवलायवत्तं मुत्ताहलरेहिरं [५]सयं रन्ना ।
धरियं तत्तो विविहं [६]पढंतथुइपाढनिवहेण ॥ १०३ ॥

तूरेसु रसंतेसुं वज्जंतेसु य असंखसंखेसु ।
कलपाणएहिं विहिए वियं[७]भमाणे य संगीए ॥ १०४ ॥

अत्थिजणपूरियासं दाणं देंता समत्थनयरम्मि ।
आणंदनिब्भराहिं [८]थुव्वंता नयरनारीहिं ॥ १०५ ॥

आहिंडिऊण विविहं चउक्कतियचच्चरेसु इच्छाए ।
अह पुरवराउ बाहिं नीहरिओ कुंजरो कमसो ॥ १०६ ॥ चतसृभिः कलापकम् ॥

---

**हिण्डे ( भ्रमामि ) राजन् ! नगरे परिवृत्ता सकलभृत्यवर्गेण ।**
**राज्ञा भणितं सुन्दरि ! क्रियते अधुना द्रुतमेतद् ॥ १०१ ॥ युग्मम् ।**

**अथ प्रवरपट्टहस्ती श्रृङ्गारयित्वाऽऽनीतो नियुक्तैः ।**
**तत्राऽऽरूढो राजा देवी पुनस्तस्योत्सङ्गे ॥ १०२ ॥**

**उपरि धवलातपत्रं मुक्ताफलराजितं स्वयं राज्ञा ।**
**धृतं ततो विविधं पठयमानस्तुतिपाठनिवहेन ॥ १०३ ॥**

**तूर्येषु रसत्षु व्रजत्सु चाऽसंख्यसंख्येषु ।**
**कलपानकैर्विहिते विजृम्भमाणे च सङ्गीते ॥ १०४ ॥**

**अर्थिजनपूरिताशं दानं ददता समस्तनगरे ।**
**आनन्दनिर्भराभिस्तूयमाना नगरनारीभिः ॥ १०५ ॥**

**आहिंड्य विविधं चतुष्कत्रिकचत्वरेष्विच्छया ।**
**अथ पुरवरात् बहिर्निःसृतः कुञ्जरः क्रमशः ॥ १०६ चतसृभिः कलापकम् ॥**

---

१ भृत्यः=दासः । २ द्रुतं=शीघ्रम् । ३ आनीतः । ४ धवलातपत्रं=श्वेतच्छत्रम् । ५ स्वयम् । ६ पठयमानस्तुतिपाठनिवहेन । ७ विजृम्भमाणे=संपद्यमाने । ८ स्तूयमाना ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहसच्चिय [1]उम्मिट्ठो वि[2]च्छोलिंतो समत्थजणनियरं ।
अइवेगेण पयट्टो ईसाणदिसामुहो ताए ॥ १०७ ॥

रे ! लेह लेह धावह एस गओ एस जाइ पुरओत्ति ।
एमाइ वाहरंतो भिच्चजणो धाइ पट्ठीए ॥ १०८ ॥

रायावि हु जाहि कहवि हु धरिउं न चएइ करिवरं तं तु ।
ताहे भणिया देवी एस [3]गओ ताव [1]उम्मिट्ठो ॥ १०९ ॥

अइवेगओ पयट्टो चाइज्जइ कहवि नो नियत्तेउं ।
ता उत्तरिमो कहवि हु इयरह अडवीए पाडेही ॥ ११० ॥

कमलावईए भणियं ओयरियव्वं कहं नु नरनाह ! ।
रन्ना भणियं निसुणसु पिच्छसि वडपायवं पुरओ ॥ १११ ॥

एयस्स य हेट्ठेणं जाही हत्थी तओ तुमे देवि ! ।
साहाए लग्गिअव्वं सहसा हत्थिं पमोत्तूण ॥ ११२ ॥

---

**सहसैव उन्मत्तो कम्पयन् समस्तजननिकरम् ।**
**अतिवेगेन प्रवृत्तः ईशानदिग्मुखस्तदाः ॥ १०७ ॥**

**रे! लात लात धावत एष गज एष याति पुरत इति ।**
**एवमादि व्याहरन् भृत्यजनो धावति पृष्ठौ ॥ १०८ ॥**

**राजाऽपि खलु यदा कथमपि खलु धर्त्तु न शक्यते करिवरं तन्तु ।**
**तदा भणिता देवी एष गजस्तावदुन्मत्तः ॥ १०९ ॥**

**अतिवेगतः प्रकृत्तः शक्यते कथमपि न निवर्त्तितुम् ।**
**तस्मादुत्तरावः कथमपि खल्वितरथाऽटव्यां पातयिष्यति ॥ ११० ॥**

**कमलावत्या भणितमवतरितव्यं कथन्नु नरनाथ ! ।**
**राज्ञा भणितं निश्रृणु प्रेक्षसे वटपादपं पुरतः ॥ १११ ॥**

**एतस्य चाऽधः यास्यति हस्ती ततस्त्वं देवि ।**
**शाखायां लगितव्यं सहसा हस्तिनं प्रमुच्य ॥ ११२ ॥**

१. उन्मत्तः । २. विच्छोलिंतो=कम्पयन् । ३. गजः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च जाव राया देविं उल्लवइ ताव सो हत्थी ।
अइवेगेणं पत्तो वडवायवहिट्ठभूभागे ॥ ११३ ॥

दक्खत्तणओ राया झत्ति विलग्गो य तस्स साहाए ।
लग्गसु लग्गसु देवि ! झत्ति एयं भणेमाणो ॥ ११४ ॥

अइवेगओ करिस्सा (स्स?) अदक्खयाए य इत्थिभावस्स ।
गब्भस्स य गरुयत्ता भयवेविरओ सरीरस्स ॥ ११५ ॥

कयअज्झवसायावि हु न सक्किया जाहि तत्थ लग्गेउं ।
ताहे य करिवरो सो झडत्ति तत्तो अवक्कंतो ॥ ११६ ॥ युग्मम् ॥

अह गुरुसोगो राया तहट्ठिओ जा तओ पलोएइ ।
ता पिच्छइ गयणेणं [1]जंतं वेगेण तं करिणं ॥ ११७ ॥

अह विम्हिओ मणेणं चिंतइ राया अहो ! महच्छरियं ।
मोत्तुं भूमिपयारं वच्चइ हत्थी नहयलेण ॥ ११८ ॥ अहवा ॥

---

एवं च यावद्राजा देवीमुल्लपति तावत् स हस्ती ।
अतिवेगेन प्राप्तो वटपादपाधोभूभागे ॥ ११३ ॥

दक्षत्वात् राजा झटिति विलग्नश्च तस्य शाखायाम् ।
लग लग देवि ! झटिति एवं भणन् ॥ ११४ ॥

अतिवेगतः करिणोऽदक्षत्वाच्च स्त्रीभावस्य ।
गर्भस्य च गुरुत्वात् भयवेपनशीलतश्शरीरस्य ॥ ११५ ॥

कृताऽध्यवसायाऽपि खलु न शक्या यदा तत्र लगितुम् ।
तदा च करिवरः स झटिति ततोऽवक्रान्तः ॥ ११६ ॥ युग्मम् ॥

अथ गुरुशोको राजा तथास्थितो यावत्ततः प्रलोकते ।
तावत् प्रेक्षते गगनेन यान्तं तं करिणम् ॥ ११७ ॥

अथ विस्मितो मनसा चिन्तयति राजा अहो ! महदाश्चर्यम् ।
मुक्त्वा भूमिप्रचारं व्रजति हस्ती नभस्तलेन ॥ ११८ ॥

---

१. यान्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वाविरुद्धसुरो सो विलसइ नूणं इमेण रूवेण ।
न हु केवलिणा भणिया भावा इह अन्नहा होंति ॥ ११९ ॥

एवं विचिंतयंतस्स तस्स, हत्थी अदंसणीभूओ ।
ताव अणुमग्गलग्गं रन्नो सिन्नं[1] समणुपत्तं ॥ १२० ॥

अह करिवरमग्गेणं समरप्पियपमुहसुहडसयकलियं ।
देवीगवेसणत्थं पट्ठविउं साहणं[2] राया ॥ १२१ ॥

कहकहवि गरुयसोओ सामंतमहंतगाण वयणेण ।
पत्तो नियनयरम्मी सुन्नो वुन्नो[3] निराणंदो ॥ १२२ ॥ युग्मम् ॥

परिचत्तरज्जचित्तो चिट्ठइ जा कइवि तत्थ दिवसाणि ।
कमलावइसंपावणआसाए धरियनियजीओ ॥ १२३ ॥

ता अन्नदिणे सिन्नं समरप्पियपमुहमागयं सहसा ।
दीणं विमणं खिन्नं लज्जाविणमंतमुहकमलं ॥ १२४ ॥ युग्मम् ॥

---

अथवा ! पूर्वविरुद्धसुरः स विलसति नूनमनेन रूपेण ।
न खलु केवलीना भणिता भावा इहाऽन्यथा भवन्ति ॥ ११९ ॥

एवं विचिन्तयतः तस्य हस्त्यदर्शनीभूतः ।
तावदनुमार्गलग्नं राज्ञः सैन्यं समनुप्राप्तम् ॥ १२० ॥

अथ करिवरमार्गेण समरप्रियप्रमुखसुभटशतकलितम् ।
देवीगवेषणार्थं प्रस्थाप्य साधनं राजा ॥ १२१ ॥

कथंकथमपि गुरुकशोकः सामन्तमहन्तकानां वचनेन ।
प्राप्तो निजनगरे शून्योः वुन्नो निरानन्दः ॥ १२२ ॥ युग्मम् ॥

परित्यक्तराज्यचित्तस्तिष्ठति यावत् कत्यपि तत्र दिवसानि ।
कमलावतीसंप्रापणाऽऽशया धृतनिजजीवः ॥ १२३ ॥

तस्मादन्यदिवसे सैन्यं समरप्रियप्रमुखमागतं सहसा ।
दीनं विमनः खिन्नं लज्जाविनमन्मुखकमलम् ॥ १२४ ॥ युग्मम् ॥

---

१. सैन्यम् । २. कटकम् । ३. वुन्नो=उद्विग्नः ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अह रन्ना आपुट्ठो समरप्पिओ कहसु भद्द ! वुत्ततं ।
किं दिट्ठो दुट्ठकरी देवीवि विमोइया तत्तो ? ॥ १२५ ॥

दीहं नीससिऊणं भणियं समरप्पिएण सुण देव ! ।
करिवरदिसापयट्टा पत्ता अडवीइ ता अम्हे ॥ १२६ ॥

तत्थ य बहुप्पयारं गवेसमाणेहिं देव ! अम्हेहिं ।
दिट्ठो न सो करिवरो नेव य देवी न य पउत्ती ॥ १२७ ॥

अवरावर[1]सवरगणं पुच्छताणं सुदूरपत्ताणं ।
अह अन्नदिणे कहियं [2]कप्पडियनरेण एक्केण ॥ १२८ ॥

तत्तो सत्तमदिवसे पउमोयरनामए सरवरम्मि ।
गयणाउ निवडमाणो महिलासहिओ करी दिट्ठो ॥ १२९ ॥

तत्तो भयभीएणं दूरट्ठियगुविलतरुपविट्ठेण ।
नारीरहिओ पुणरवि पलोइओ तत्थ हत्थित्ति ॥ १३० ॥

---

**अथ राज्ञाऽऽपृष्टः समरप्रियः कथय भद्र ! वृतान्तम् ।**
**किं दृष्टो दुष्टकरी देव्यपि विमोचिता ततः ? ॥ १२५ ॥**

**दीर्घं निश्वस्य भणितं समरप्रियेण शृणु देव ! ।**
**करिवरदिक्प्रवृत्ताः प्राप्ता अटव्यां तस्माद् वयम् ॥ १२६ ॥**

**तत्र च बहुप्रकारं गवेषयमाणै-र्देव ! अस्माभिः ।**
**दृष्टो न स करिवरो नैव च देवी न च प्रवृत्तिः ॥ १२७ ॥**

**परस्परशबरगणं पृच्छतां सुदूरप्राप्तानाम् ।**
**अथाऽन्यदिने कथितं कार्पटिकनरेणैकेन ॥ १२८ ॥**

**ततः सप्तमदिवसे पद्मोदरनाम्नि सरोवरे ।**
**गगनाद् निपतन्महिलासहितः करी दृष्टः ॥ १२९ ॥**

**ततो भयभीतेन दूरस्थितगुपिलतरुप्रविष्टेन ।**
**नारीरहितः पुनरपि प्रलोकितस्तत्र हस्तीति ॥ १३० ॥**

---

१. शबराः=भिल्लाः । २. कार्पटिकः=परिहितजीर्णवस्त्रो यात्रिकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वियरंतो सरतीरे, इय तस्स ओ वयणयं सुणेऊण ।
भणियं दंससु भद्दय ! तं सिग्घं सरवरं अम्ह ॥ १३१ ॥ युग्मम् ॥

अह तेण दंसियं तं पलोइयं सरवरं समं तेण ।
न य उवलद्धा देवी निउणंपि गवेसमाणेहिं ॥ १३२ ॥

सरवरजोयणमित्ते विउत्तपुरिसेहिं पाविओ हत्थी ।
तं घित्तुं निराणंदा इहागया देवमूलम्मि ॥ १३३ ॥

ता किं तत्थेव सरे गभीरनीरम्मि [1]उवरया देवी ।
अह तत्तो उत्तरिउं पत्ता उ कहिंपि [2]वसिमम्मि ? ॥ १३४ ॥

अहवा सावयपउरे वणम्मि केणवि विणसिया होज्ज ।
न य जाणामो किंचिवि नरिंद ! देवीए वुत्तंतं ॥ १३५ ॥

एवं च जाव जंपइ समरप्पिओ पत्थिवस्स से पुरओ ।
ताव य दारनिउत्तो कयविणओ एवमुल्लवइ ॥ १३६ ॥

---

**विचरंस्सरःतीरे, इति तस्य ओ वचनकं श्रुत्वा ।**
**भणितं दर्शय भद्रक ! तत् शीघ्रं सरोवरमस्माकम् ॥ १३१ ॥ युग्मम् ॥**

**अथ तेन दर्शितं तत् प्रलोकितं सरोवरं समं तेन ।**
**न चोपलब्धा देवी निपुणमपि गवेषयमानैः ॥ १३२ ॥**

**सरोवरयोजनमात्रे वियुक्तपुरुषैः प्राप्तो हस्ती ।**
**तं गृहीत्वा निरानन्दा इहाऽऽगता देवमूले ॥ १३३ ॥**

**तस्मात्किं तत्रैव सरसि गभीरनीरे उपरता देवी ।**
**अथ तत उत्तीर्य प्राप्ता तु कस्मिन्नपि वसतौ [ वसिते ] ? ॥ १३४ ॥**

**अथवा श्वापदप्रचुरे वने केनाऽपि विनाशिता भवेत् ।**
**न च जानीमः किञ्चिदपि नरेन्द्र ! देव्या वृतान्तम् ॥ १३५ ॥**

**एवञ्च यावज्जल्पति समरप्रियः पार्थिवस्य तस्य पुरतः ।**
**तावच्च द्वारनियुक्तः कृतविनय एवमुल्लपति ॥ १३६ ॥**

१. उपरता=शान्ता=मृतेति यावत् । २. वसिम=वसितम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दारम्मि सुमइनामो नेमित्ती चिट्ठइति सुणिऊण ।
भणियं रन्ना किं भो ! सो एसो सुमइनेम्मित्ती ? ॥ १३७ ॥

जस्साएसाउ तया दिन्ना नरवाहणेण मह देवी ? ।
पासट्ठिएहिं सिट्ठं, नरिंद ! एवंति, अह रन्ना ॥ १३८ ॥

भणियं पविसउ सिग्धं पुच्छामो जेण देविवुत्तंतं ।
वयणाणंतरमेसो पवेसिओ दारवालेण ॥ १३९ ॥

कयउवयारो रन्ना उवविट्ठो विणयपुव्वयं सुमई ।
आपुट्ठो, किं देवी जीवइ व नवत्ति वज्जरसु ? ॥ १४० ॥

उवओगं दाऊणं भणियं अह सुमइणा जियइति ।
अक्खयदेहा संपइ मिलिया इव बंधुवग्गस्स ॥ १४१ ॥

[1]कइया समागमो मह तीए, किं वा हवेज्ज से गब्भे ? ।
इय पुट्ठो नरवइणा कयउवओगो पुणो भणइ ॥ १४२ ॥

---

**द्वारे सुमतिनामा नैमित्तिकस्तिष्ठति इति श्रुत्वा ।**
**भणितं राज्ञा किं स एष सुमतिनैमित्तिकः ? ॥ १३७ ॥**

**यस्याऽऽदेशात्तदा दत्ता नरवाहनेन मम देवी ? ।**
**पार्श्वस्थितैःशिष्टं, नरेन्द्र ! एवमिति, अथ राज्ञा ॥ १३८ ॥**

**भणितं प्रविशतु शीघ्रं पृच्छामो येन देवीवृतान्तम् ।**
**वचनानन्तरमेष प्रवेशितो द्वारपालेन ॥ १३९ ॥**

**कृतोपचारो राज्ञा उपविष्टो विनयपूर्वकं सुमतिः ।**
**आपृष्टः, किं देवी जीवति वा नवेति कथय ? ॥ १४० ॥**

**उपयोगं दत्त्वा भणितमथ सुमतिना जीवतीति ।**
**अक्षयदेहा संप्रति मीलितेव बन्धुवर्गस्य ॥ १४१ ॥**

**कदा समागम मम तस्याः, किंवा भवेत्तस्या गर्भे ? ।**
**इति पुष्टो नरपतिना कृतोपयोगः पुन-र्भणति ॥ १४२ ॥**

---

१. कदा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइया नरिंद ! सुविणे गिण्हसि विसमट्ठियं कुसुममालं ।
तत्तो य मासमित्ते समागमो तुम्ह देवीए ॥ १४३ ॥

होही तणओ तीए वि[1]जुज्जिही किंतु जायमेत्तो सो।
नियमाऊए, नरवर ! एवं किल कहइ हु निमित्तं ॥ १४४ ॥

पुट्ठो पुणरवि रन्ना जणणिविउत्तो स जीविही किं नो ? ।
कत्थवि वुड्ढि जाही, कइया व समागमे तेण ॥ १४५ ॥

अह सुमई भणइ पुणो बहुकालं जीविही स ते पुत्तो ।
कत्थ य वुड्ढिं जाही एयं पुण नेव जाणामो ॥ १४६ ॥

कुसुमायरउज्जाणे जइया गयणाओ [2]कन्नगा [3]पडिही ।
तत्तो य सिग्घमेव हि समागमो तुम्ह तणएण ॥ १४७ ॥

तव्वयणं सोऊणं गयसोगो पहसिओ भणइ राया ।
भो ! भो ! सुवन्नलक्खं सिग्घं सुमइस्स देहसि ॥ १४८ ॥

---

**यदा नरेन्द्र ! स्वप्ने गृह्णासि विषमस्थितां कुसुममालाम् ।**
**ततश्च मासमात्रे समागम तव देव्या ॥ १४३ ॥**

**भविष्यति तनयस्तस्या वियोक्ष्यते किन्तु जातमात्रः सः ।**
**निजमातुः, नरवर ! एवं किल कथयति खलु निमित्तम् ॥ १४४ ॥**

**पृष्टः पुनरपि राज्ञा जननीवियुक्तः स जीविष्यति किं न ? ।**
**कुत्राऽपि वृद्धिं यास्यति, कदा वा समागमस्तेन ? ॥ १४५ ॥**

**अथ सुमति-र्भणति पुनर्बहुकालं जीविष्यति स तव पुत्रः ।**
**कुत्र च वृद्धिं यास्यति एतद् पुन-र्नैव जानीमः ॥ १४६ ॥**

**कुसुमाकरोद्याने यदा गगनात् कन्यका पतिष्यति ।**
**ततश्च शीघ्रमेव हि समागमस्तव तनयेन ॥ १४७ ॥**

**तद्वचनं श्रुत्वा गतशोकः प्रहृष्टो भणति राजा ।**
**भो ! भोः ! सुवर्णलक्षं शीघ्रं सुमतये देहीति ॥ १४८ ॥**

---

१. वियोक्ष्यते । २. कन्यका । ३. पतिष्यति ।



Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

एयवयणाओ अम्हं देवीविरहम्मि गरुयसोगग्गी ।
पसरंतो ओल्हविओ[1] समागमासाजलोहेण ॥ १४९ ॥

अह निययाभरणेणं सुवन्नलक्खेण पूइओ सुमई ।
नीहरिओ रायावि हु मणयं[2] जाओ विगयसोगो ॥ १५० ॥

अह अन्नया य राया सुत्तो रयणीइ पेच्छए सुमिणं ।
उत्तरदिसामुहेणं वयमाणेणं मए[3] कूवे ॥ १५१ ॥

पडिया अद्धमिलाणा[4] धवला कुसुमाण मालिया दिट्ठा ।
गहिया सहसा जाया पच्चग्गा सुरहिगंधड्ढा ॥ १५२ ॥ युग्मम् ॥

दट्ठूणमिणं सुमिणं पडिबुद्धो चिंतए इमं राया ।
एयं हि सुमइभणियं दिट्ठं सुमिणं मए अज्ज ॥ १५३ ॥

ता होही लहु[5] इण्हिं मज्झ वयंतस्स उत्तरदिसाए ।
विसमदसापत्ताए देवीए संगमोऽवस्सं ॥ १५४ ॥

---

एतद्वचनतोऽस्माकं देवीविरहे गुरुकशोकाग्निः ।
प्रसरन् विध्यापितः समागमाऽऽशाजलौघेन ॥ १४९ ॥

अथ निजकाऽऽभरणेन सुवर्णलक्षेन पूजितः सुमतिः ।
निःसृतो राजाऽपि खलु मनाक् जातो विगतशोकः ॥ १५० ॥

अथाऽन्यदा च राजा सुप्तो रजन्यां प्रेक्षते स्वप्नम् ।
उत्तरदिग्मुखेन व्रजता मया कूपे ॥ १५१ ॥

पतिताऽर्धम्लाना धवला कुसुमानां मालिका दृष्टा ।
गृहीता सहसा जाता प्रत्यग्रा सुरभिगन्धाढ्या ॥ १५२ ॥ युग्मम् ॥

दृष्ट्वेदं स्वप्नं प्रतिबुद्धश्चिन्तयतीदं राजा ।
एवं हि सुमतिभणितं दृष्टं स्वप्नं मयाऽद्य ॥ १५३ ॥

तस्मात् भविष्यति लघु इदानीम् मम व्रजत उत्तरदिशि ।
विषमदशाप्राप्ताया देव्याः सङ्गमोऽवश्यम् ॥ १५४ ॥

---

१. विध्यापितः । २. मनाक् । ३. मया । ४. अर्धम्लाना । ५. लघु=शीघ्रम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय चिंतिऊण राया नियदेसपलोयणच्छलेणं तु ।
गुरुसेणापरियरिओ नीहरिओ हत्थिणपुराओ ॥ १५५ ॥

कइवयपयाणगाइं गंतुं उत्तंगगिरिसमाइन्ने ।
अइगुविलतरुसणाहे अडविपएसम्मि एगम्मि ॥ १५६ ॥

आवासिओ ससेन्नो अह कूवे दीहतणसमोच्छइए ।
कहवि हु पमायवसओ पडिया रन्नो चमरहारी ॥ १५७ ॥ युग्मम् ॥

अह रन्ना आणत्तो पुरिसो रज्जुप्पओगओ तत्थ ।
ओइन्नो संतमसे इओ तओ जाव गविसेइ ॥ १५८ ॥

ता एगत्थनिलुंक्कं पिच्छइ जुवइं तडीइ अगडस्स ।
भयकंपंतसरीरं संतमसे तत्थ अच्चंतं ॥ १५९ ॥

कासि तुमं इह सुंदरि ! इइ पुट्ठा जा न देइ पडिवयणं ।
ताव य जलमज्झगया विलासिणी कंठगयपाणा ॥ १६० ॥

---

**इति चिन्तयित्वा राजा निजदेशप्रलोकनच्छलेन तु ।**
**गुरुसेनापरिवृत्तो निःसृतो हस्तिनापुरतः ॥ १५५ ॥**

**कतिपयप्रयाणकानि गत्वोत्तुङ्गगिरिसमाकीर्णे ।**
**अतिगुपिलतरुसनाथेऽटवीप्रदेशे एकस्मिन् ॥ १५६ ॥**

**आवसितः ससैन्याऽथकूपे दीर्घतृणसमवच्छन्ने ।**
**कथमपि खलु प्रमादवशतः पतिता राज्ञः चामरधारिणी ॥ १५७ ॥ युग्मम् ॥**

**अथ राज्ञाऽऽज्ञप्तः पुरुषो रज्जुप्रयोगतस्तत्र ।**
**अवतीर्ण संतमस इतस्तत यावत् गवेषयति ॥ १५८ ॥**

**तस्मादेकत्र निलीनां प्रेक्षते युवतीं तट्यामवटस्य ।**
**भयकम्पमानशरीरां संतमसे तत्राऽत्यन्तम् ॥ १५९ ॥**

**काऽसि त्वमिह सुन्दरि ! इति पृष्टा यावन्न ददाति प्रतिवचनम् ।**
**तावच्च जलमध्यगता विलासिनी कण्ठगतप्राणा ॥ १६० ॥**

१ गुपिलं=गहनम् । २ दीर्घतृणसमवच्छन्ने । ३ चामरधारिणी । ४ संतमसे=अन्धकूपे ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संपत्ता तेण तओ घित्तूणं तयं कमेण नीहरिओ ।
वज्जरइ राय ! एत्थं अन्नावि हु अच्छए जुवई ॥ १६१ ॥ युग्मम् ॥

आभट्ठावि[1] न भासइ भएण कंपंततणुलया वरई ।
एयं निसम्म रन्नो फुरियं अह दाहिणं नयणं ॥ १६२ ॥

अह विम्हिएण रन्नो विचिंतियं किं हविज्ज सा देवी ।
अहवा इह अडवीए देवीए संभवो कत्थ ? ॥ १६३ ॥

अहवा कम्मवसाणं सत्ताणं नवरि एत्थ संसारे ।
भवियव्वयावसेणं नत्थि तयं जं न संभवई ॥ १६४ ॥

जइ सा हविज्ज देवी ता सुंदरमेव, कावि अह अन्ना ।
तहवि हु उत्तारिज्जउ करुणामूलो जओ धम्मो ॥ १६५ ॥

इय चिंतिउण रन्ना भणिओ पुरिसो तयंपि कड्ढेहि ।
अह सो रज्जूइ पुणो पुरिसो कूवम्मि ओइन्नो[2] ॥ १६६ ॥

---

**संप्राप्ता तेन ततो गृहीत्वा तकां क्रमेण निःसृतः ।**
**कथयति राजन् ! अत्राऽन्याऽपि खल्वास्ते युवती ॥ १६१ ॥ युग्मम् ॥**

**आभाषितापि न भाषते भयेन कम्प्यमानतनुलता वराकी ।**
**एतद् निशम्य राज्ञः स्फुरितमथ दक्षिणं नयनम् ॥ १६२ ॥**

**अथ विस्मयेन राज्ञा विचिन्तितं किं भवेत् सा देवी ।**
**अथवा इहाटव्यां देव्याः संभवः कुतः ? ॥ १६३ ॥**

**अथवा कर्मवशानां सत्त्वानां नवरमत्र संसारे ।**
**भवितव्यतावशेन नास्ति तद् यन्न संभवति ॥ १६४ ॥**

**यदि सा भवेत् देवी तर्हि सुन्दरमेव, काप्यथान्या ।**
**तथापि खलु उत्तार्यतां करुणामूलो यतः धर्मः ॥ १६५ ॥**

**इति चिन्तयित्वा राज्ञा भणितः पुरुषः तकामपि कर्ष ।**
**अथ स रज्ज्वा पुनः पुरुषः कूपेऽवतीर्णः ॥ १६६ ॥**

---

१ आभाषितापि । २ अवतीर्णः । * निलीना ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणिया य सुयणु ! अहयं रन्नो सिरिअमरकेउनामस्स ।
वयणेणं तुहुत्तारणकज्जेणं पुणरवि पविट्ठो॥ १६७ ॥

ता आरुह मंचीए नरगागाराओ अंधकूवाओ ।
जेणुत्तारेमि लहुं एयं च निसम्म सा वयणं ॥ १६८ ॥

आरूढा मंचीए कमेण उत्तारिया तओ देवी ।
दुब्बलदेहा रन्ना कहकहवि हु [1]पच्चभिन्नाया ॥ १६९ ॥ युग्मम् ॥

सावि य दट्ठुं रायं [2]रोवंती घग्घरेण सद्देण ।
चरणविलग्गा रन्ना अंसुजल[3]प्फुन्ननयणेण ॥ १७० ॥

नीया निययावासे देविं दट्ठूण परियणो सव्वो ।
अइगुरुसोगो रोवई विविहपलावेहिं दीणमुहो ॥ १७१ ॥ युग्मम् ॥

अह कयसरीरचिट्ठा पुट्ठा कमलावई नरिंदेण ।
तइया करिणा नीयाए किं तुमे देवि ! अणुभूयं ? ॥ १७२ ॥

---

**भणिता च सुतनो ! अहकं राज्ञः श्रीअमरकेतुनाम्नः ।**
**वचनेन तवोत्तारणकार्येण पुनरपि प्रविष्टः ॥ १६७ ॥**

**तस्मादारोह मञ्चायां नरकागारादन्धकूपतः ।**
**येनोत्तारयामि लघु एतच्च निशम्य सा वचनम् ॥ १६८ ॥**

**आरूढा मञ्चायां क्रमेणोतारित्ता ततो देवी ।**
**दुर्बलदेहा राज्ञा कथंकथमपि खलु प्रत्यभिज्ञाता ॥ १६९ ॥ युग्मम् ॥**

**सापि च दृष्ट्वा राजानं रुदती घर्घरेण शब्देन ।**
**चरणविलग्ना राज्ञा अश्रुजलपूर्णनयनेन ॥ १७० ॥**

**नीता निजकावासे देवीं दृष्ट्वा परिजनः सर्वः ।**
**अतिगुरुशोको रोदिति विविधप्रलापै-र्दीनमुखः ॥ १७१ ॥ युग्मम् ॥**

**अथ कृतशरीरचेष्टा पृष्टा कमलावती नरेन्द्रेण ।**
**तदा करिणा नीतया किं त्वया देवि ! अनुभूतम् ? ॥ १७२ ॥**

---

१. प्रत्यभिज्ञाता=उपलक्षिता । २. रुदती । ३. अप्फुन्नं=पूर्णम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कइया व कहव पडिया भीसणकूवम्मि एत्थ अडवीए ? ।
कमलावईइ भणियं सुणसु महाराय ! साहेमि ॥ १७३ ॥

वडपायवम्मि लग्गे देवे तं विलग्गिउं असत्ता[1] हं ।
वेगपहावियकरिणा हरिया एगागिणी ताव ॥ १७४ ॥

अह सो गिरिसरियाए[2] विसमतडिं पाविऊण सहसत्ति ।
अइवेगभंगभीउव्व नहयलं झत्ति उप्पइओ ॥ १७५ ॥

तत्तो भयभीयाए विचिंतियं हंत ! करिवरपविट्ठो ।
अवहरइ कोवि देवो न जेण करिणो वयंति नहे[3] ॥ १७६ ॥

इय विम्हियहियया हं पुणो पुणो जा महिं पलोएमि ।
पिच्छामि ताव गिरितरुपमुहं समगं[4] व वच्चंतं ॥ १७७ ॥ अविय ॥

एगागिणी अरण्णे महिला बीहिज्ज अडवीमज्झम्मि ।
इय कलिउंव सहाया तरुणो वेगेण धावंति ॥ १७८ ॥

---

**कदा वा कथंवा पतिता भीषणकूपेऽत्राटव्याम् ? ।**
**कमलावत्या भणितं श्रृणु महाराज ! कथयामि ॥ १७३ ॥**

**वटपादपे लग्ने देवे तं विलगितुमशक्ताहम् ।**
**वेगप्रधावितकरिणा हृता एकाकिनी तावत् ॥ १७४ ॥**

**अथ स गिरिसरितो विषमतटीं प्राप्य सहसेति ।**
**अतिवेगभङ्गभीत इव नभस्तलं झटिति उत्पतितः ॥ १७५ ॥**

**ततो भयभीतया विचिन्तितं हन्त ! करिवरप्रविष्टः ।**
**अपहरति कोऽपि देवो न येन करिणो व्रजन्ति नभसि ॥ १७६ ॥**

**इति विस्मितहृदयाहं पुनः पुनर्यावन्महिं प्रलोकयामि ।**
**प्रेक्षे तावत् गिरितरुप्रमुखं समकं वा व्रजन्तम् ॥ १७७ ॥ अपि च ॥**

**ए[illegible]नी अरण्ये महिला बिभीयात् अटवीमध्ये ।**
**इति क[illegible]न्वेव सहायास्तरवो वेगेन धावन्ति ॥ १७८ ॥**

---

१. अशक्ता । २. सरित्=नदी । ३. नभसि । ४. समकं=युगपत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किडियनयरसमाइं चलंतमणुयाइं गामनयराइं ।
जलभरियसरवराइंवि (पि?) महिनिवडियछत्तसरिसाइं ॥ १७९ ॥

दीहरवणराईओ सप्पसरिच्छओ [1]सेच्चविज्जंति ।
पालिसारिच्छा गिरिओ सारणिसरिसाओ सरियाओ ॥ १८० ॥

अह दूरमइगयाए [2]संभरिओ अंगुलीयगमणी सो ।
[3]अवहत्थिय ताहि भयं पहओ सो तेण कुंभयडे ॥ १८१ ॥

अविय । मणिसंजुयकरपहओ वज्जेणिव ताडिओ [4]गइंदो सो ।
मोत्तुं गुरुचीहा[5]डिं अहोमुहो झत्ति गयणाओ ॥ १८२ ॥

जा निवडइ वेगेण ताव य हिट्ठामुहं नियंतीए[6] ।
दिट्ठं महंतमेगं सरोवरं भंगुरतरंगं ॥ १८३ ॥ युग्मम् ॥

परिहत्थमच्छपुच्छच्छडाहि उच्छलियसलिल[7]उप्पीलं ।
महुमत्तमहुयरीविसररुद्धवियसंत[8]त्तामरसं ॥ १८४ ॥

---

**कीटिकानगरसमानि चलन्मनुजानि ग्रामनगराणि ।**
**जलभृतसरोवराण्यपि महीनिपतितछत्रसदृशानि ॥ १७९ ॥**

**दीर्घवनराजयः सर्पसदृशा दृश्यन्ते ।**
**पालिसदृशा गिरयः सारणीसदृशाः सरितः ॥ १८० ॥**

**अथ दूरमतिगतया संस्मृतोऽङ्गुलीयकमणिः सः ।**
**अपहस्तयित्वा तदा भयं प्रहतः स तेन कुभस्तले ॥ १८१ ॥ अपि च ॥**

**मणिसंयुक्तकरप्रहतो वज्रेणेव ताडितो गजेन्द्रः सः ।**
**मुक्त्वा गुरुचीहाडीं (गर्जनां) अधोमुखो झटिति गगनात् ॥ १८२ ॥**

**यावन्निपतति वेगेन तावच्च अधोमुखं पश्यन्त्या ।**
**दृष्टं महतेकं सरोवरं भङ्गुरतरङ्गम् ॥ १८३ ॥ युग्मम् ॥**

**परिहत्थमत्स्यपुच्छच्छटाभिरुच्छलितसलिलोप्पीलम् ।**
**मधुमत्तमधुकरीविसररुद्धविकसत्तामरसं ॥ १८४ ॥ अपि च ॥**

---

१ दृश्यंते । २ संस्मृतः । ३ अपहस्तयित्वा=अवगणय्य । ४ गजेन्द्रः । ५ चीहाडी=दुःखोदभूता=गर्जना 'चीस' इति भाषायाम् । ६ पश्यन्त्या । ७ उप्पीलं=संघातः, स्थपुटश्च । ८. तामरसं=कमलम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविय । फुरंतमणिजालयं तरंतटिट्टिभालयं[1] ।
रहंगपंतिमंडियं विहंगसत्थवड्डुयं[2] ॥ १८५ ॥
भमंतभूरिगोहियं[3] सरोरुहालिसोहियं[4] ।
अणेगसावयाउलं[5] झसोहलुद्धसाउलं[6] ॥ १८६ ॥
चलंतभीमगाहयं[7] रडतदददूरोहयं[8] ।
मरालपंतिसोहियं तमालतालरेहियं[9] ॥ १८७ ॥
रणंतछप्पयालियं बलायपंतिमालियं ।
फुरंतसिप्पिसंपुडं भमंतभीमदीवडं[10] ॥ १८८ ॥
अह तम्मि नीरपुन्ने अणोरपारम्मि सरवरे हत्थी ।
गयणाओ नीसहंगो पडिओ बुड्डो[11] य जलमज्झे ॥ १८९ ॥
अह नीसहे गइंदे बुड्डे[11] गंभीरनीरमज्झम्मि ।
मणिणो माहप्पेणं जलउवरिं चेव थक्का[12] हं ॥ १९० ॥

---

**स्फुरन्तमणिजालकं तरत्टिट्टिभालयम् ।**
**रथाङ्गपङ्क्तिमण्डितं विहङ्गसार्थवड्डुयं ॥ १८५ ॥**
**भ्राम्यद्भूरिगोधाकं सरोरुहालिशोभितम् ।**
**अनेकश्वापदाकुलं झषौघलुब्धसङ्कुलम् ॥ १८६ ॥**
**चलत्भीमगाहाकं रटन्दर्दुरौघकम् ।**
**मरालपङ्क्तिशोभितं तमालतालराजितम् ॥ १८७ ॥**
**रणत्षट्पदालिकं बलाकापङ्क्तिमालिकम् ।**
**स्फुरत्शुक्तिसंपुटम् भ्राम्यद्भीमदीवडम् ॥ १८८ ॥**
**अथ तस्मिन् नीरपूर्णेऽणोरपारे सरोवरे हस्ती ।**
**गगनाद् निःसहाङ्गः ( अशक्ताङ्गः ) पतितो मग्नश्च जलमध्ये ॥ १८९ ॥**
**अथ निःसहे गजेन्द्रे मग्ने गभीरनीरमध्ये ।**
**मणे-र्माहात्म्येन जलोपरिं चैव स्थिताऽहम् ॥ १९० ॥**

---

१ टिट्टिभो=जन्तुविशेषः । २ वड्डुयं=महत् वड्डियं=व्याप्तम् । ३ गोधा=जीवविशेषः । ४ आलिः=समूहः । ५ श्वापदाः=दुष्टजन्तवः । ६ झषाणां मत्स्यानामोघे समूहे लुब्धैः= धीवरैः संकुलं=व्याप्तम् । ७ गाहा=जलजन्तुविशेषः । ८ रटन्तः=शब्दं कुर्वन्तः । ९ रेहियं=राजितं । १० दीवडो=जन्तुविशेषः । ११ बुड्डो=मग्नः । १२ थक्का=स्थिता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसाइयफलगावि य उत्तरिउं सरवरस्स तीरम्मि ।
उपविट्ठा भयभीया गुरुसोगा इय विचिंतंत्ता ॥ १९१ ॥

तारिसरिद्धिजुयावि हु खणेण एगागिणी कहं जाया ।
देसिय[1]जुवईव अहो ! अइगुविलो कम्मपरिणामो ॥ १९२ ॥

सो कत्थ भिच्चवग्गो सा य सिरी सो विणीयपरिवारो ।
होहामि कहं इण्हिं विहिया एगागिणी विहिणा ?॥ १९३ ॥

एमाइ चिंतयंती उवरिमवत्थेण छाइउं वयणं ।
सरणविहुणा सोएणं तत्थ अहं रोविउं लग्गा ॥ १९४ ॥

एत्थतरम्मि केणवि भणिया किं सुयणु ! रोयसे करुणं ? ।
तत्तो ससंभमाए पलोइयं मे तं[2]ओहुत्तं ॥ १९५ ॥

कइवयपुरिससहाओ तरुणनरो वेसरीइ आरूढो ।
[3]कयमुहसंधी पुरओ दिट्ठो उद्धूलियंगिल्लो ॥ १९६ ॥

---

**आसदितफलकाऽपि चोत्तीर्य सरोवरस्य तीरे ।**
**उपविष्टा भयभीता गुरुशोकेति विचिन्तयन्ती ॥ १९१ ॥**

**तादृशर्द्धियुक्ताऽपि खलु क्षणेणैकाकिनी कथं जाता ।**
**देशिकयुवतीव अहो ! अतिगुपिलः कर्मपरिणामः ॥ १९२ ॥**

**स कुत्र भृत्यवर्गः सा च श्रीः स विनीतपरिवारः ।**
**भविष्यामि कथमिदानीं विहिता एकाकीनी विधिना ? ॥ १९३ ॥**

**एवमादि चिन्तयन्ती उपरितनवस्त्रेणच्छादयित्वा वदनम् ।**
**शरणविहूणा शोकेन तत्राऽहं रोदितुम् लग्ना ॥ १९४ ॥**

**अत्रान्तरे केनाऽपि भणिता किं सुतनो ! रोदिषि करुणम् ? ।**
**ततः ससंभ्रमया प्रलोकितं मया तदभिमुखम् ॥ १९५ ॥**

**कतिपयपुरुषसहायस्तरुणनरो वेसर्यामारूढः ।**
**कृतमुखसन्धिः पुरतो दृष्ट उद्धूलिताङ्गवान् ॥ १९६ ॥**

---

१. देशिका=देशे प्रोषिता=प्रवासिनीत्यर्थः । २. तदभिमुखम् । ३. कृतो मुख्यस्य सन्धिः संबन्धो येन सः, संजातदर्शन इत्यर्थः ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सो दट्ठूण ममं विम्हियहियउव्व वेसराहिंतो ।
उत्तरिय मज्झ चलणेसु निवडिओ भणइ एवं तु ॥ १९७ ॥

परिजाणसि भगिणि ! ममं सिरिदत्तो हं कुसग्गनयराओ ।
आसि गओ परवि[१]सए वणिज्जबुद्धीए सत्थजुओ ॥ १९८ ॥

बारसमवच्छराओ पुणरवि चलिओ पुरम्मि निययम्मि ।
सत्थेण समं इण्हि संपत्तो इह पएसम्मि ॥ १९९ ॥

ता भगिणि ! केण विहिणा जाया एगागिणी तुमं एत्थ ? ।
इय भणिया तेण अहं विगयभया झत्ति संजाया ॥ २०० ॥

तत्तो य मए सिट्ठो गयावहारइनिययवुत्तंतो ।
अह दि[२]न्नवयणसोया भणिया वणिएण तेणाहं ॥ २०१ ॥

दूरम्मि हत्थिणपुरं सावयचोरेहिं दुग्गमो मग्गो ।
आसन्नं खु कुसग्गं किं कायव्वं तुमे भगिणि ! ? ॥ २०२ ॥

---

**अथ स दृष्ट्वा माम् विस्मयहृदय इव वेसरात् ।
उत्तीर्य मम चरणयो-र्निपतितो भणति एवन्तु ॥ १९७ ॥**

**परिजानासि भगिनि ! माम् श्रीदत्तोऽहं कुशाग्रनगरात् ।
आसीत् गतः परविषये वणिग्बुद्धया सार्थयुक्तः ॥ १९८ ॥**

**द्वादशवत्सरतः पुनरपि चलितः पुरे निजके ।
सार्थेण सममिदानीं संप्राप्त इह प्रदेशे ॥ १९९ ॥**

**तस्माद् भगिनि ! केन विधिना जातैकाकिनी त्वमत्र ? ।
इति भणिता तेनाऽहं विगतभया झटिति सञ्जाता ॥ २०० ॥**

**ततश्च मया शिष्टो गजाऽपहृतादिनिजकवृतान्तः ।
अथ दत्तवदनशौचा भणिता वणिजा तेनाऽहम् ॥ २०१ ॥**

**दूरे हस्तिनापुरं श्वापदचौरै-र्दुगमो मार्गः ।
आसन्नं खलु कुशाग्रं किं कर्तव्यं त्वया भगिनि ? ॥ २०२ ॥**

---

१. विषयः=देशः । २. दत्तवदनशौचा=कृतमुखशुद्धिकेत्यर्थः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य मए भणियं कुसग्गनयरम्मि वच्चिमो ताव ।
पेच्छामि बंधुवग्गं पभूयकालाओ सिरिदत्त ! ॥ २०३ ॥

अह तेण सहरिसेणं नीया सत्थम्मि नियय आवासे ।
विणओवयारपुव्वं च कारिया सयलदेहठिइं ॥ २०४ ॥

तं देवदिन्नकुंडलपमुहं सव्वंपि नियय आभरणं ।
मोत्तूण अंगुलीयं समप्पियं तस्स वणियस्स ॥ २०५ ॥

तत्तो सत्थेण समं चलिया सिरिदत्तपरियणसमेया ।
किज्जंतविविहविणया वणिएणं, [1]डोलियारूढा ॥ २०६ ॥

सोवि हु सत्थो जाव य लहुयपयाणेहिं वयइ अणुदियहं ।
कइवयपयाणगाइं ता एगदिणम्मि अडवीए ॥ २०७ ॥

[2]अवसउणेणं थक्को दियहे दियहे न जायए सउणं ।
जाव य दि[3]वड्ढमासे वोलीणे सव्वस[4]त्थिल्ला ॥ २०८ ॥

---

ततश्च मया भणितं कुशाग्रनगरे व्रजावस्तावत् ।
प्रेक्षे बन्धुवर्गं प्रभूतकालात् श्रीदत ! ॥ २०३ ॥

अथ तेन सहर्षेण नीता सार्थे निजकावासे ।
विनयोपचारपूर्वकं च कारिता सकलदेहस्थितिम् ॥ २०४ ॥

तद् देवदत्तकुण्डलप्रमुखं सर्वमपि निजकाऽऽभरणम् ।
मुक्त्वाऽङ्गुलीकं समर्पितं तस्य वणिजः ॥ १०५ ॥

ततः सार्थेण समं चलिता श्रीदत्तपरिजनसमेता ।
क्रियमाणविविधविनया वणिजा, शिबिकारूढा ॥ २०६ ॥

सोऽपि खलु सार्थो यावच्च लघुकप्रयाणै-र्व्रजत्यनुदिवसम् ।
कतिपयप्रयाणकानि तस्मात् एकदिनेऽटव्याम् ॥ २०७ ॥

अपशकुनेन स्थितो दिवसे दिवसे न जायते शकुनम् ।
यावच्च द्वितीयार्धमासेऽतिक्रान्ते सर्वसार्थसंबंन्धिनः ॥ २०८ ॥

---

१. डोलिका=शिबिका । २. अपशकुनेन । ३. दिवड्ढं=द्वितीयार्धम्, सार्धैकमित्यर्थः । ४. सत्थिल्ला=सार्थसंबन्धिनो जनाः ।


Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

संबलरहिया तहइं ठाउमसत्ता तओ समुच्चलिया ।
अवगन्निय[1] अवसउणं नियपुरगमणस्स तुरमाणा ॥ २०९ ॥ युग्मम् ॥

तत्तो बीयपयाणे पभायसमयम्मि तम्मि सत्थम्मि ।
सहसा अन्नाउच्चिय दिन्नो भिल्लेहिं ओक्खंदो[2] ॥ २१० ॥

अह कलयलं निसामिय सत्थजणे तत्थ आउलीभूए ।
भिल्लेहिं हम्ममाणे ल्हसिज्जंते[3] य सयराहं[4] ॥ २११ ॥

सज्झसभरिया अहमवि पडिया अडवीइ जाव इक्कल्ला ।
घेत्तूणं एगदिसं नट्ठा अइगुविलतरुगहणे ॥ २१२ ॥

खणमेगं तत्थच्छिय वयामि किल तम्मि सत्थठाणम्मि ।
पुणरवि मिलामि जेणं सत्थस्स अहंति चिंतंती ॥ २१३ ॥

जाव पयट्टा गंतुं ताव न जाणामि कत्थ गंतव्वं ।
कत्तो समागया हं काए व दिसाए सो सत्थो ॥ २१४ ॥ युग्मम् ॥

---

**शंबलरहिता तत्र स्थातुमशक्ता ततः समुच्चलिताः**
**अपगणय्य अपशुकनं निजपुरगमनस्य त्वरमाणाः ॥ २०९ ॥ युग्मम् ॥**

**ततो द्वितीयप्रयाणे प्रभातसमये तस्मिन् सार्थे ।**
**सहसा अज्ञातैव दत्तो भिल्लैरवस्कन्दः ॥ २१० ॥**

**अथ कलकलं निशम्य सार्थजने तत्राऽऽकुलीभूते ।**
**भिल्लै-र्हन्यमाने स्त्रस्यमाने च सयराहं ॥ २११ ॥**

**साध्वसभृताऽहमपि पतिताटव्यां यावदेकाकी ।**
**गृहीत्वा एकदिशं नष्टाऽतिगुपिलतरुगहने ॥ २१२ ॥**

**क्षणमेकं तत्रस्थिता व्रजामि किल तस्मिंस्सार्थस्थाने ।**
**पुनरपि मिलामि येन सार्थस्यऽहमिति चिन्तयन्ती ॥ २१३ ॥**

**यावत् प्रवृत्ता गन्तुं तावन्न जानामि कुत्र गन्तव्यम् ।**
**कुतस्समागताऽहं कया वा दिशा स सार्थः ॥ २१४ ॥ युग्मम् ॥**

---

१. अवगणय्य । २. अवस्कन्दः=घाटिः । ३. स्त्रस्यमाने । ४. शीघ्रम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयकंपंतसरीरा ताहे एयं दिसं गहेऊण ।
संजायदिसामोहा चलिया तरुगहणमज्झेण ॥ २१५ ॥

दूरं गंतूण पुणो वलिया वच्चामि पिट्ठओहुत्तं[१] ।
सिरिदत्तजणगवेसणपरायणा तत्थ वणगहणे ॥ २१६ ॥

अह भयतरलच्छीए इओ तओ तत्थ परिभमंतीए ।
उम्मग्गगमणभज्जंतकंटयाइन्नचरणाए ॥ २१७ ॥

पहसम[२]सुढियाइ दढं पए पए नीसहं [३]कणंतीए ।
[४]वसिमन्नेसणहेउं [५]चडिऊण थलम्मि एगम्मि ॥ २१८ ॥

जा पुलइयं समंता ताव न दीसइ कहंपि वसिमंति ।
वियरंत [६]वालनिवहा समंतओ भीसणा अडवी ॥ २१९ ॥ तिसृभिः कुलकम्॥

अविय । कत्थ य करालकेसरिगुंजियसवणुत्तसंत[७]सारंगा ।
कत्थइ महंतजुज्झंतमत्तवणमहिसयाइन्ना ॥ २२० ॥

---

**भयकंपमानशरीरा तदा एतां दिशं गृहीत्वा ।**
**सञ्जातदिग्मोहा चलिता तरुगहनमध्येन ॥ २१५ ॥**

**दूरं गत्वा पुनर्वलिता व्रजामि पृष्ठतोमुखम् ।**
**श्रीदत्तजनगवेषणपरायणा तत्र वनगहने ॥ २१६ ॥**

**अथ भयतरलाक्ष्या इतस्ततस्तत्र परिभ्राम्यन्त्या ।**
**उन्मार्गगमनभज्यमानकण्टकाऽऽकीर्णचरणाया ॥ २१७ ॥**

**पथश्रमश्रान्तया दृढं पदे पदे निःसहं क्वणन्त्या ।**
**वसतिगवेषणहेतुं चटित्वा स्थलैकस्मिन् ॥ २१८ ॥**

**यावत् दृष्टं समन्तात्तावन्न दृश्यते कथमपि वसतीति ।**
**विचरन्तो व्यालनिवहाः समन्ताद्भीषणाऽटवी ॥ २१९ ॥ तिसृभिः कुलकम्॥**

**अपि च । कुत्र च करालकेसरिगुञ्जितश्रवणोत्त्रस्यत्सारङ्गाः ।**
**कुत्रापि महद्युध्यमानमत्तवनमहिषाकीर्णाः ॥ २२० ॥**

---

१. पृष्टतोमुखम्; प्रत्यावृत्तेति समुदितार्थः । २. सुढिया =श्रान्ता । ३. 'क्वण शब्दे' क्वणन्त्या । ४. वसतियुक्तस्थानगवेषणहेतोः । ५. आरुह्य । ६. वालो=व्यालः । ७. सारङ्गः=हरिणः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कत्थइ गरुय[1]पवंगमविमुक्कबोक्कारबहिरियदियंता ।
कत्थ य वणदव[2]डज्झंतजंतुकयभीसणारावा ॥ २२१ ॥
कत्थइ पयंडगंडयखंडियरु[3]रुविसररुहिरबीभच्छा ।
कत्थइ [4]सरहपलोयणपलायमाणोरुकरिविसरा ॥ २२२ ॥
अविय । वियरं[5]तमहाधणुहत्थलोद्धया [6]सुक्कमयसिरसणाहा ।
जे[7]ट्ठक्कमूलकलिया [8]गुरुचितारोहिणीसमेया ॥ २२३ ॥
[9]भद्दवयसमणसहिया [10]उद्धंतविसाहपयडमंदारा ।
वियरंतभूरिरि[11]क्खा रेहइ अडवी नहसिरिव्व ॥ २२४ ॥
अह तं अडविं सुइरं पलोययंतीइ गाढतिसि[12]याए ।
एक्कम्मि दिसाभाए दिट्ठं जलभरियसरमेगं ॥ २२५ ॥

---

**कुत्रापि गुरुकप्लवङ्गमविमुक्तबुत्कारबधिरितदिगन्ताः ।**
**कुत्र य वनदवदह्यमानजन्तुकृतभीषणारावाः ।। २२१ ॥**
**कुत्राऽपि प्रचण्ऽगण्ऽकखण्डितरुरुविसररुधिरबीभत्साः ।**
**कुत्रापि सरभप्रलोकनपलायमानोरुकरिविसराः ॥ २२२ ॥**
**अपि च । विचरन्महाधनुर्हस्तलुब्धकाः शुष्कमृगशिरसनाथाः ।**
**ज्येष्ठार्कमूलकलिता गुरुचित्रारोहिणीसमेताः ॥ २२३॥**
**भद्रव्रतश्रमणसहिता, उत्तिष्ठद्विशाखप्रकटमन्दाराः ।**
**विचरन्भूरिनक्षत्रा राजतेऽटवी-र्नभःश्रीरिव ॥ २२४ ॥**
**अथ तामटवीं सुचिरं प्रलोकयन्त्या गाढतृषितया ।**
**एकस्मिन् दिग्भागे दृष्टं जलभृतसर एकम् ॥ २२५ ॥**

---

१. प्लवङ्गमः=वानरः। २. डज्झंतो=दह्यमानः। ३. रुरुः=हरिणविशेषः। * हन्यमाने। ४. सरहो=सिंहाः।५. विचरंत इतस्ततः पर्यटन्तो महाधनुर्हस्ताः=बृहत्कोदण्डबाणा लुब्धकाः=व्याधा यस्यामटव्याम्, नमःश्रीपक्षे विचरन्ति विलसन्ति मधा=नक्षत्रम्, धनुः=राशिः, हस्तो=नक्षत्रम्, रलयोरैक्यात् प्राकृतत्वेन रस्य लादेशाद् वा रौद्री=आर्द्रानिक्षत्रं च यस्यां सा । ६. शुष्कैर्मृगाणां शिरोभिः सनाथा युक्ता, पक्षे शुक्र मृगशीर्षसहिता ७. जेष्ठार्काः= अतिवृद्धार्कवृक्षास्तेषां मूलैः कलिता=सहिता, पक्षे ज्येष्ठा=नक्षत्रविशेषः, अर्कः=सूर्यः, मूलम्=नक्षत्रं तैः कलिता । ८. गुर्वीभिश्चित्ररोहीणीभिरोषधिविशेषैः समेता, पक्षे गुरुः= बृहस्पतिः, चित्रा रोहिणी च नक्षत्रविशेषौ। ९. भद्रव्रतैःशोभननियमैः श्रमणैस्तापसादिभिः सहिता, पक्षे भद्रपदा-श्रवणाभिः= नक्षत्रविशेषैः। १०. शाखारहितप्रकटमंदारवृक्षा, पक्षे विशाखा नक्षत्रम्, प्रकटौ च मन्दः=शनिः, आरः=मङ्गलश्च। ११. ऋक्षाणि=नक्षत्राणि, पक्षे ऋक्षाः=भल्लूकाख्याः श्वापदजन्तुविशेषाः। १२ तृषितया ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो [1]तत्तोहुत्तं चलिया भयलोललोयणा अहयं ।
कहकहवि हु संपत्ता तम्मि पएसम्मि किच्छेण ॥ २२६ ॥

पीयं च तत्थ सलिलं उवविट्ठा तरुवरस्स हिट्ठम्मि ।
एत्थंतरम्मि तरणी अंतरिओ पसरिया रयणी ॥ २२७ ॥

तओ । फेक्कारंति सिवाओ जह जह गुंजंति सावया विविहं ।
तह तह भएण हियये कंपए मह तत्थ रन्नम्मि ॥ २२८ ॥

अह अड्डरत्तसमए जाया उदरम्मि दूसहा वियणा ।
तव्वसओ य कणंती लुलामि भूमीए जाव अहं ॥ २२९ ॥

ताव य मिगीव [2]रन्ने अइगुरु वियणाहि पीडियसरीरा ।
सयमेव [3]पसविया हं महाकिलेसेण नरनाह ! ॥ २३० ॥ युग्मम् ॥

मुच्छाविरमे य तओ [4]लुलमाणं महियलम्मि तं बालं ।
घित्तूण निजुच्छंगे गरुयसिणेहेण तत्तो य ॥ २३१ ॥

---

ततस्तदभिमुखं चलिता भयलोललोचना अहकम् ।
कथंकथमपि खलु संप्राप्ता तस्मिन् प्रदेशे कृच्छ्रेण ॥ २२६ ॥

पीतं च तत्र सलिलमुपविष्टा तरुवरस्याऽधः ।
अत्रान्तरे तरणिरन्तरितः प्रसृता रजनी ॥ २२७ ॥

ततः । फेत्कारन्ति शिवा यथा यथा गुञ्जन्ति श्वापदा विविधम् ।
तथा तथा भयेन हृदयं कम्पते मम तत्राऽरण्ये ॥ २२८ ॥

अथ अर्धरात्रसमये जातोदरे दूस्सहा वेदना ।
तद्वशतश्च क्वणन्ती लोलामि भूमौ यावदहम् ॥ २२९ ॥

तावच्च मृगीवाऽरण्येऽतिगुरुवेदनाभिः पीडितशरीरा ।
स्वयमेव प्रसूताऽहं महाक्लेशेन नरनाथ ! ॥ २३० ॥ युग्मम् ॥

मूर्च्छाविरामे च ततो लुठन्तं महीतले तं बालम् ।
गृहीत्वा निजोत्सङ्गे गुरुकस्नेहेन ततश्च ॥ २३१ ॥

---

१. तदभिमुखम् । २. रन्नं=अरण्यम् । ३. प्रसूता । ४. लुठन्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गंतूण जलासन्ने ण्हावित्ता ताहि निययवत्थाइं ।
पक्खालिय एगंते उवविट्ठा तरुलयागहणे ॥ २३२ ॥ युग्मम् ॥

तं दिव्वमणिसणाहं उत्तारिय अंगुलीययं हत्था ।
कंठम्मि मए बद्धं सुयस्स एवं भणंतीए ॥ २३३ ॥

एयस्स पभावाओ मा मह तणयस्स केवि अंगम्मि ।
पहरंतु भूयसावयपिसायदुट्ठग्गहाईया ॥ २३४ ॥

वणवासिणीओ ! निसुणह भो भो वणदेवयाओ ! मह वयणं ।
तणयसमेया संपइ सरणं भवईण[1]मल्लीणा[2] ॥ २३५ ॥

केसरिवग्घाइणं मंसाहारण कूरसत्ताणं ।
भीसणअडवीपडिया रक्खेयव्वा पयत्तेण ॥ २३६ ॥

जइ पुत्त ! इमा रयणी होंतो[3] मह तम्मि हत्थिणपुरम्मि ।
ता एत्तियवेलाए राया वद्धाविओ होंतो ॥ २३७ ॥

---

**गत्वा जलाऽऽसन्ने स्नात्वा तदा निजकवस्त्रादि ।**
**प्रक्षाल्य एकान्ते उपविष्टा तरुलतागहने ॥ २३२ ॥ युग्मम् ॥**

**तं दिव्यमणिसनाथमुत्तार्य अंगुलीयकं हस्ताद् ।**
**कण्ठे मया बद्धं सुतस्यैवं भणन्त्या ॥ २३३ ॥**

**एतस्य प्रभावाद्मा मम तनयस्य केऽपि अङ्गे ।**
**प्रहरंतु भूतश्वापदपिशाचदुष्टग्रहादिकाः ॥ २३४ ॥**

**वनवासिन्यः ! निशृणुत भो भो वनदेवताः ! मम वचनम् ।**
**तनयसमेता संप्रति शरणं भवतीनामालीना ॥ २३५ ॥**

**केसरिव्याघ्रादीनां मांसाहाराणाम् क्रूरसत्त्वानाम् ।**
**भीषणाटवीपतिता रक्षितव्या प्रयत्नेन ॥ २३६ ॥**

**यदि पुत्र ! इयं रजनी अभविष्यत् मम तस्मिन् हस्तिनापुरे ।**
**तर्हि एतावन्वेलायां राजा वर्द्धार्पितोऽभविष्यत् ॥ २३७ ॥**

---

१. भवतीनाम्=युष्माकम् । २. अल्लीणा=आलीना । ३. अभविष्यत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयलस्स परियणस्स य पुरस्स सामंतमंतिवग्गस्स ।
कस्स व न होज्ज तोसो पुत्तय ! तुह जम्मसमयम्मि ॥ २३८ ॥

दुव्विहियविहिविहाणा पडियाए भीसणे य रन्नम्मि ।
जाओ सि मज्झ पुत्तय ! करेमि किं मंदभग्गा[1] हं ? ॥ २३९ ॥

जायम्मि तुमे पुत्तय ! रन्नंपि हु संपयं इमं वसिमं ।
नट्ठं भयं असेसं उच्छंगगए तुमे वच्छ ॥ २४० ॥

तुह मुहपलोयणेणं संपन्नमणोरहा भविस्सामि ।
रविकरपहयंधयारे जायम्मि दिणम्मि सकयत्था ॥ २४१ ॥

एमाइ भणंतीए [2]पहसमखिन्नाए नीसहंगाए ।
वियणाविगमाओ तहिं समागया मे तहिं निद्दा ॥ २४२ ॥

तत्तो खणंतराओ पडिबुद्धा झत्ति मंदभग्गा हं ।
केणावि हु उल्लवियं एयं सद्दं सुणेऊणं ॥ २४३ ॥

---

**सकलस्य परिजनस्य च पुरस्य सामन्तमन्त्रीवर्गस्य ।
कस्य वा न भवेत्तोषः पुत्रक ! तव जन्मसमये ॥ २३८ ॥**

**दुर्विहितविधिविधानात् पतितायाः भीषणे चारण्ये ।
जातोऽसि मम पुत्रक ! करोमि किं मन्दभाग्याऽहम् ? ॥ २३९ ॥**

**जाते त्वयि पुत्रक ! अरण्यमपि साम्प्रतमिदं वसतिम् ।
नष्टं भयमशेषमुत्सङ्गगते त्वयि वत्स ! ॥ २४० ॥**

**तव मुखप्रलोकनेन संपन्नमनोरथा भविष्यामि ।
रविकरप्रहतांऽधकारे जाते दिने सकृतार्था ॥ २४१ ॥**

**एवमादि भणन्त्या पथिश्रमखिन्नया निःसहाङ्गया ।
वेदनाविगमात्तत्र समागता मां तदा निद्रा ॥ २४२ ॥**

**ततः क्षणान्तरतः प्रतिबुद्धा झटिति मन्दभाग्याऽहम् ।
केनाऽपि खलूल्लपितमेतद् शब्दं श्रुत्वा ॥ २४३ ॥**

१. भग्गं=भाग्यम् । २. पथिश्रमखिन्नया ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निउणं[1] जोयंतेणवि पभूयकालाओ पाव ! दिट्ठो सि ।
काहामि वइरअंतं अणुहव दुव्विहियफलमिण्हिं ॥ २४४ ॥
एयं सद्दं सोच्चा भीया, को एस एवमुल्लवइ ? ।
इय चिंतिय जाव अहं नियउच्छंगं पलोएमि ॥ २४५ ॥
ता नत्थि तत्थ पुत्तो विचिंतियं ताहि हा ! किमेयंति ।
किं कहवि होज्ज पडिओ अहवा केणावि अवहरिओ ? ॥ २४६ ॥
किंवा सुमिणं[2] एयं किंवा मइविब्भमो महं एसो ? ।
एमाइ चिंतयंती गवेसिंउ ताहि पारद्धा ॥ २४७ ॥ तिसृभिः कुलकम् ॥
इओ तओ तत्थ गवेसयंती सुयं महाराय ! अपाउणंती[3] ।
सिरम्मि वज्जेणव ताडिया हं घसत्ति मुच्छाइ वसं गयत्ति ॥ २४८ ॥
साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥
एसोवि परिसमप्पइ कमलावइपुत्तहरणनामोत्ति ।
सुरसुंदरिनामाए कहाइ दसमो परिच्छेओ ॥ २५० ॥

---

निपुणं पश्यताऽपि प्रभूतकालतः पाप ! दृष्टोऽसि ।
करिष्यामि वैरान्तं, अनुभव दुर्विहितफलमिदानीम् ॥ २४४ ॥
एतत् शब्दं श्रुत्वा भीता क एष एवमुल्लपति ? ।
इति चिन्तयित्वा यावदहं निजोत्सङ्गं प्रलोकयामि ॥ २४५ ॥
तावन्नास्ति तत्र पुत्रः विचिंतितं तदा हा ! किमेतदिति ।
किं कथमपि भवेत् पतितोऽथवा केनाऽप्यपहृतः ? ॥ २४६ ॥
किं वा स्वप्नमेतद् किं वा मतिविभ्रमो ममैषः ? ।
एवमादि चिन्तयन्ती गवेषयितुं तदा प्रारब्धा ॥ २४७ ॥ तिसृभिः कुलकम् ॥
इतस्ततस्तत्र गवेषयन्ती सुतं महाराज ! अपश्यंती ।
शिरसि वज्रेणेव ताडिताऽहं धस इति मूर्च्छया वशं गतेति ॥ २४८ ॥
साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।
रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥
एषोऽपि परिसमाप्ये कमलावतीपुत्रहरणनामेति ।
सुरसुन्दरिनाम्न्याः कथायाः दशमः परिच्छेदः ॥ २५० ॥

॥ दशमः परिच्छेदः समाप्तः ॥

---

१. निपुणं यथा स्यात्तथा । २. स्वप्नः । ३. अपश्यन्ती ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# एकादशः परिच्छेदः

अह लद्धचेयणा हं मुच्छाविरहम्मि गरुयसोगिल्ला[1] ।
नियहिययं कुट्टिंती पलविउमेवं समाढत्ता ॥ १ ॥

हा ! निद्दएण केणवि अडवीपडियाए दुक्खतवियाए ।
तक्खमेत्तुप्पन्नो पुत्तो हरिओ अहन्नाए ॥ २ ॥

किल पुत्तयस्स वयणं पिच्छिस्समहं पभायसमयम्मि ।
नवरं हयासविहिणा एयं मह अन्नहा विहियं ॥ ३ ॥

अडविपवेसाईयं दुक्खं दाऊण दूसहं देव ! ।
किं अज्जवि न हु तुट्ठो अवहरिओ जेण मह पुत्तो ? ॥ ४ ॥

वणदेवयाओ ! तुम्हं सरणम्मि समागयाए मह पुत्तो ।
हरिओ, ता किं जुज्जइ एत्थवि वेहा[2] करेउं जे ? ॥ ५ ॥

---

**अथ लब्धचेतनाऽहं मूर्च्छाविरहे गुरुशोका ।**
**निजहृदयं कुट्टयन्ती प्रलपितुमेवं समारब्धा ॥ १ ॥**

**हा। निर्दयेन केनाऽपि अटवीपतिताया दुःखतप्तायाः ।**
**तत्क्षणमात्रोत्पन्नः पुत्रो हृतोऽधन्यायाः ॥ २ ॥**

**किल पुत्रस्य वदनं प्रेक्षिष्येऽहं प्रभातसमये ।**
**नवरं हताशविधिनैतद् ममाऽन्यथा विहितम् ॥ ३ ॥**

**अटवीप्रवेशादिकं दुःखं दत्त्वा दुस्सहं देव ! ।**
**किमद्याऽपि न खलु तुष्टोऽपहृतो येन मम पुत्रः ? ॥ ४ ॥**

**वनदेवताः ! युष्माकं शरणे समागताया मम पुत्रः ।**
**हृतस्तस्मात् किं योजयति अत्राऽपि वेधाः कर्तुं ये ॥ ५ ॥**

---

१. गुरुशोका; स्वार्थेऽत्र कः, इल्लश्च । २. वेधाः=विधाता ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

हा पुत्त ! कहमरण्णे मुक्का हं सरणवज्जिया तुमए ।
हा ! कहमुच्छंगगओ सहसा अद्दंसणीभूओ ? ॥ ६ ॥

नूणं निट्ठुररूवं सद्दं सोऊण जस्स पडिबुद्धा ।
तेणं चिय अवहरिओ पिसायरूवेण केणावि ॥ ७ ॥

जस्स पभावाओ तया सहसा गयणाओ गयवरो पडिओ ।
सोवि मणी अकयत्थो जाओ मह मंदभागाए[1] ॥ ८ ॥

जं कंठनिबद्धेवि हु तम्मी अंकट्ठिओवि हा पुत्त ! ।
हरिओ निक्करुणेणं केणावि अदिस्सरूवेण ॥ ९ ॥

एमाइ बहुविगप्पं पलवंतीए तहिं सुदीणाए ।
मद्दुक्खदुक्खिया इव खीणा रयणीवि सहसत्ति ॥ १० ॥

अइकरुणं कंदंतिं दट्ठुंव ममं ससोयवयणिल्ला ।
निवडंतथूलतारयअंसूहिंव रुयइ [2]नहलच्छी ॥ ११ ॥

---

**हा पुत्र ! कथमरण्ये मुक्ताऽहं शरणवर्जिता त्वया ।**
**हा ! कथमुत्सङ्गगतः सहसाऽदर्शनीभूतः ? ॥ ६ ॥**

**नूनं निष्ठुररूपं शब्दं श्रुत्वा यस्य प्रतिबुद्धा ।**
**तेनैवापहृतः पिशाचरूपेण केनाऽपि ॥ ७ ॥**

**यस्य प्रभावात्तदा गगनाद् गजवरः पतितः ।**
**सोऽपि मणिरकृतार्थो जातो मम मन्दभागायाः ॥ ८ ॥**

**यत् कण्ठनिबद्धेऽपि खलु तस्मिन्नङ्कस्थितोऽपि हा पुत्र ! ।**
**हृतो निष्करुणेन केनाऽप्यदृश्यरूपेण ॥ ९ ॥**

**एवमादि बहुविकल्पं प्रलपन्त्यां तत्र सुदीनायाम् ।**
**मद्दुःखदुःखितेव क्षीणा रजन्यपि सहसेति ॥ १० ॥**

**अतिकरुणं क्रन्दन्तीं दृष्टुमिव माम् सशोकवदनिका ।**
**निपततस्थूलतारकाश्रुभिरिव रोदिति नभोलक्ष्मीः ॥ ११ ॥**

---

१. मन्दभागाया:=हतभाग्याया:, । २. नभोलक्ष्मी: ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि सूरो सुयावहारयनिहालणत्थंव[1] ।
नासियघणंधयारो आरुढो उदयगिरिसिहरं ॥ १२ ॥

अह अद्धपहरमेत्ते दियहे अइदुक्खिया अहं तत्थ ।
अइकरुणं कंदंती इओ तओ जाव वियरामि ॥ १३ ॥

ताव कमंडलुहत्था मिउवक्कलवसणधारिणी[2] तत्थ ।
परिणयवया[3] पसन्ना समागया तावसी एगा ॥ १४ ॥ युग्मम् ॥

दट्ठुं ममं रुयंतिं विविहपलावेहिं तत्थ वणगहणे ।
संजायगरुयकरुणा समागया मज्झ पासम्मि ॥ १५ ॥

महुरवयणेण तीए आपुट्ठा सुयणु ! कीस तं रुयसि ।
कत्तो समागया इह भीसणरन्नम्मि[4] इक्कल्ला ? ॥ १६ ॥

काउं तीइ पणामं तत्तो वियलंतअंसुयाए मए ।
कुंजरहरणाईओ सिट्ठो सव्वोवि वुत्तंतो ॥ १७ ॥

---

अत्रान्तरे सूरः सुतापहारकनिभालनार्थमिव ।
नष्टघनान्धकारोऽऽरूढः उदयगिरिशिखरम् ॥ १२ ॥

अथार्धप्रहरमात्रे दिवसेऽतिदुःखिताऽहं तत्र ।
अतिकरुणं क्रन्दन्ती इतस्ततो यावद् विचरामि ॥ १३ ॥

तावत् कमण्डलुहस्ता मृदुवल्कलवसनधारिणी तत्र ।
परिणतवयाः प्रसन्ना समागता तापसी एका॥। १४ ॥ युग्मम् ॥

दृष्ट्वा माम् रुदतीं विविधप्रलापैस्तत्र वनगहने ।
सञ्जातगुरुककरुणा समागता मम पार्श्वे ॥ १५ ॥

मधुरवचनेन तयाऽऽपृष्टा सुतनो! कस्मात्त्वं रोदिषि ।
कुतः समागतेह भीषणारण्यैकाकी ? ॥ १६ ॥

कृत्वा तस्याः प्रणामं ततो विचलदश्रुकया मया ।
कुञ्जरहरणादितः शिष्टः सर्वोऽपि वृतान्तः ॥ १७ ॥

---

१. सुतापहारकनिभालनार्थम्; निभालनम्=दर्शनम् । २. मृदुवल्कलवसन-धारिणी=कोमलवृक्षत्वग्वस्त्रा । ३. परिणतवयाः=वृद्धा । ४. रन्नं=अरण्यम् ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

अह तावसीए भणियं इमस्स[1] जोगा न होसि तं सुयणु ! ।
तहवि हु किमित्थ कीरइ सकम्मवसगम्मि जियलोए ? ॥ १८ ॥

सुंदरि ! कम्मवसाणं सत्ताणं इह भवे वसंताणं ।
एवंविहदुक्खाइं हवंति जं एत्थ न हु चोज्जं[2] ॥ १९ ॥

जं किंचि असुहकम्मं अन्नभवे संचियं तुमे आसि ।
तस्स विवागाओ इमं समागयं सुयणु ! गुरुवसणं ॥ २० ॥

ता अन्नभवविढत्ते[3] दुक्खम्मि समागयम्मि को सोगो ? ।
किं वावि विलविएणं सरीरायासभूएणं ? ॥ २१ ॥

एत्तो उ समासन्नो अच्छइ अम्हाण आसमो रम्मो ।
आगच्छ सुयणु ! अणुचियमेयं ठाणं जओ तुज्झ ॥ २२ ॥

वायइ सीयलपवणो एत्थ ओ तं अभिणवपसूया सि ।
सुकुमालसरीराए मा होज्ज विरूवयं किंचि ॥ २३ ॥

---

**अथ तापस्या भणितमस्य योग्या न भवसि त्वं सुतनो ।**
**तथाऽपि खलु किमत्र क्रियते सकर्मवशगे जीवलोके ? ॥ १८ ॥**

**सुन्दरि ! कर्मवशानां सत्त्वानामिह भवे वसताम् ।**
**एवंविधदुःखानि भवन्ति यदत्र न खलु चोद्यम् ॥ १९ ॥**

**यत्किञ्चिदशुभकर्माऽन्यभवे सञ्चितं त्वयाऽऽसीत् ।**
**तस्य विपाकत इदं समागतं सुतनो ! गुरुव्यसनम् ॥ २० ॥**

**तस्मादन्यभवार्जिते दुःखे समागते कःशोकः ? ।**
**किंवाऽपि विलपितेन शरीरायासभूतेन ? ॥ २१ ॥**

**इतस्तु समासन्ने आस्तेऽस्माकमाश्रमः रम्यः ।**
**आगच्छ सुतनो ! अनुचितमेतद् स्थानं यतस्तव ॥ २२ ॥**

**वाति शीतलपवनोऽत्र ओ त्वमभिनवप्रसूताऽसि ।**
**सुकुमारशरीरया मा भवेत् विरूपकं किञ्चित् ॥ २३ ॥**

---

१. अस्य दुःखस्य । २. चोज्जं=आश्चर्यम् । ३. विढत्तं=अर्जितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय भणिय तावसीए नीया हं आसमम्मि रम्मम्मि ।
पडिजग्गिया य सम्मं निक्कारणवच्छलत्तेण ॥ २४ ॥

अह कइवयदिवसेहिं संजाया सत्थदेहिया मणयं ।
अन्नम्मि दिणे नीया तीए हं कुलवइसमीवे ॥ २५ ॥

तीएवि पुव्वभणिओ वुत्तंतो साहिओ कुलवइस्स ।
करुणापरेण तेणवि अणुसट्ठा महुरवयणेहिं ॥ २६ ॥

वच्छे ! इह संसारे सुलहाइं एरिसाइं दुक्खाइं ।
अकयम्मि सुहनिमित्ते धम्मे परलोयबंधुम्मि ॥ २७ ॥

जायंति दूसहाइं जेणं चिय एत्थ दुसहदुक्खाइं ।
तेणेव [1]चत्तरज्जा वणवासमुवागया धीरा ॥ २८ ॥

एवं भणमाणस्स उ कुलवइणो तीइ तावसीइ अहं ।
कन्ने होउं भणिया भयवं वरनाणजुत्तोऽयं ॥ २९ ॥

---

इति भणित्वा तापस्या नीताऽहमाश्रमे रम्ये ।
प्रतिजागरिता च सम्यक् निष्कारणवात्सल्यत्वेन ॥ २४ ॥

अथ कतिपयदिवसैः सञ्जाता स्वस्थदेहा मनाग् ।
अन्ये दिने नीता तयाऽहं कुलपतसिमीपे ॥ २५ ॥

तयाऽपि पूर्वभणितो वृतान्तः कथितः कुलपतेः ।
करुणापरेण तेनाऽपि अनुशास्ता मधुरवचनैः ॥ २६ ॥

वत्से ! इह संसारे सुलभानि एतादृशानि दुःखानि ।
अकृते शुभनिमित्ते धर्मे परलोकबन्धौ ॥ २७ ॥

जायन्ते दुःसहानि येनैवात्र दुःसहदुःखानि ।
तेनैव त्यक्तराज्या वनवासमुपागता धीराः ॥ २८ ॥

एवं भणतस्तु कुलपतेस्तया तापस्याऽहम् ।
आणेत्तु तुम्ह धूयं जेण समप्पेमि सिग्घंति ॥ १७८ ॥

इय भणिऊणुप्पइओ दइयामुहदंसणुस्सुओ जाव ।
पत्तो इमं पएसं ताव य सहसा मए दिट्ठो ॥ १७९ ॥

---

**पुरुषो भव इदानीं यदि सत्यं सुभटवादमुद्वहसि ।**
**गृहीत्वा तकं केशेषु झटिति अथ मस्तकं च्छिन्नम् ॥ १७४ ॥**

**अथ लूनशीर्षं दृष्ट्वा स्वामिकं परिबलं ससंभ्रान्तम् ।**
**वलित्वा बाणनिकरेण हन्तुं मां समारब्धम् ॥ १७५ ॥**

**अथ तं सुतीक्ष्णशरनिकरधोरणिं वञ्चयित्वा प्रयत्नेन ।**
**प्राप्तः सशोकनरवाहनस्याऽऽस्थानभूमौ ॥ १७६ ॥**

**शत्रुञ्जयस्य शीर्षं पुरतो मुक्त्वा कृतप्रणामेन ।**
**धनदेव ! पूर्वोक्तो वृतान्तः कथितस्तस्य ॥ १७७ ॥**

**तस्मात् आस्स्व निरुद्विग्नोऽहकं पुन-र्यामि रत्नद्वीपतः ।**
**आनीय तव दुहितरं येन समर्पयामि शीघ्रमिति ॥ १७८ ॥**

**इति भणित्वोत्पतितो दयितामुखदर्शनोत्सुको यावत् ।**
**प्राप्त इमं प्रदेशं तावच्च सहसा मया दृष्टः ॥ १७९ ॥**

---

१. लूनशीर्षम् । २. तिक्खं = तीक्ष्णम् । ३. धोरिणः = समूहः । ४. आस्थानम् = सभा।
५. वुतो = उक्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तालतरूदीहजंघो मसिमूसामहिसकालगसरीरो ।
[1]असिलिट्ठलंबवाहू निग्गयदसणो पलंबोट्ठो ॥ १८० ॥

ख[2]ज्जोयदित्तचक्खू निल्लालियजमलजुयलजीहालो ।
[3]अइवीणचिविढनासो वेयालो तावसंजणओ ॥ १८१ ॥

[4]अप्फोडंतो बहुसो अभिगज्जंतो तहट्टहासेहिं ।
[5]पलयघणनीसणेहिं कुणमाणो नहयलं मुहलं ॥ १८२ ॥ चतसृभिः कलापकम् ॥

रे ! रे ! तइया जं दिन्नमासि दइयावहारओ दुक्खं ।
वइरस्स तस्स अंतं करेमि, दिट्ठो कहिं जासि ? ॥ १८३ ॥

रे वइरिय ! बालत्ते जीवंतो ताव कहव छुट्टो सि ? ।
इण्हि नो पुण छुट्टसि छू[6]ढो भीमम्मि जलहिम्मि ॥ १८४ ॥

इय भणिऊणं सहसा पत्तो अद्दंसणं स वेयालो ।
अहमवि गयणाहिंतो धसत्ति पडिओ जलनिहिम्मि ॥ १८५ ॥

---

तालतरुदीर्घजंघो मषिमूसामहिषकालकशरीरः ।
आश्लिष्टलम्बबाहू-निर्गतदशनः प्रलम्बौष्ठः ॥ १८० ॥

खद्योतदीप्तचक्षु-र्निर्लोलितयमलयुगलजिह्वावान् ।
अतिपीनचिपिटनासो वैतालस्तापसज्जनकः ॥ १८१ ॥

आस्फोटयन् बहुशोऽभिगर्जन् तथाट्टहासैः ।
प्रलयघननिःस्वनैः कुर्वन्नभस्तलं मुखरम् ॥ १८२ ॥ चतसृभिः कलापकम् ॥

रे ! रे ! तदा यत् दत्तमासीत् दयितापहारतो दुःखम् ।
वैरस्य तस्याऽन्तं करोमि दृष्टः कुत्र यासि ? ॥ १८३ ॥

रे वैरिन् ! बालत्वे जीवंस्तावत् कथं वा छुटितोऽसि ? ।
इदानीं न पुनः छुटयसि क्षिप्तो भीमे जलधौ ॥ १८४ ॥

इति भणित्वा सहसा प्राप्तोऽदर्शनं स वैतालः ।
अहमपि गगनेभ्यो धस इति पतितो जलनिधौ ॥ १८५ ॥

---

१. असिलिट्ठो=आश्लिष्टः । २. खद्योतदीप्तचक्षुः । ३. अतिपीनचिपिटनासः । ४. आस्फोटयन् । ५. प्रलयघननिस्वनैः । ६. क्षिप्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुणरुत्तजविज्जंती जाव न सा वहइ नहगमा विज्जा ।
ताहे नायं नूणं हरियाओ मज्झ विज्जाओ ॥ १८६ ॥

कोवि हु एस पयंडो वइरी असुरोत्ति चिंतयंतेण ।
धणदेव ! ताव बाहाहिं जलनिहिं तरिउमारद्धो ॥ १८७ ॥

एवं नरिंद ! साहइ जाव य सो मज्झ निययवुत्तंतं ।
निज्जामएण ताव य सभयं एवं समुल्लवियं ॥ १८८ ॥

भो भो नावियपुरिसा ! सकन्नधारा समुज्जया होह ।
दीसइ कयंतवयणंव भीमं[1]मुप्पाइयं जेण ॥ १८९ ॥

सुप्पप्पमाणमुब्भूयमब्भवद्दलयमु[2]अह नहमग्गे ।
खलसंगयंव जं कुणइ संखयं झत्ति वड्ढंतं ॥ १९० ॥

एरिसठाणे जायं एयं उप्पाइयं महाघोरं ।
अ[3]इरा सभडनावियनावाइविणासणं कुणइ ॥ १९१ ॥

---

**पुनरुक्तजप्यमाना यावन्न सा वहति नभोगामी विद्या ।**
**तदा ज्ञातं नूनं हृता मम विद्याः ॥ १८६ ॥**

**कोऽपि खल्वेष प्रचण्डो वैरी असुर इति चिन्तयता ।**
**धनदेव ! तावत् बाहुभ्यां जलनिधिं तरितुमारब्धः ॥ १८७ ॥**

**एवं नरेन्द्र ! कथयति यावच्च स मम निजकवृतान्तम् ।**
**निर्यामकेन तावच्च सभयमेवं समुल्लपितम् ॥ १८८ ॥**

**भो ! भो ! नाविकपुरुषाः ! सकर्णधारा समुद्यता भवत ।**
**दृश्यते कृतान्तवदनमिव भीममौत्पातिकं येन ॥ १८९ ॥**

**सूर्पप्रमाणोत्भूतमब्भ्रवार्दलकं पश्यत नभोमार्गे ।**
**खलसङ्गतमिव यत्करोति सङ्क्षयं झटिति वर्धमानम् ॥ १९० ॥**

**ईदशस्थाने जातमेतदौत्पादिकं महाघोरम् ।**
**अचिरात् सभटनाविकनावादिविनाशनं करोति ॥ १९१ ॥**

१. औत्पातिकम् । २. उअह=पश्यत । ३. अचिरात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयं निसम्म वयणं कूवयखंभग्गसंठियनरस्स ।
पवहणपुरिससमूहो सं[1]खुद्धो विगयजी[2]यासो ॥ १९२ ॥ तओ ॥

मुच्चइ नंगरनिवहो कूवयखंभो तिरि[3]च्छओ विहिओ ।
नावावि सियवडेणं घणेण पच्छाइया सव्वा ॥ १९३ ॥

एत्थंतरम्मि पच्छाइयं नहं कसिणमेहनिवहेण ।
संखोहियसलिलनिही पवाइओ मारुओ चंडो ॥ १९४ ॥

जमजीहव्व चमक्कइ तडिच्छडासंततं समंतेण ।
[4]धाराहराविं गज्जंति भीसणं मच्चुसुहडव्व ॥ १९५ ॥

खरपवणुद्धुयसायरतरंगवेगेहिं हीरए नावा ।
गुरुकल्लोलवसुट्ठियनंगरनियरेण धरियावि ॥ १९६ ॥

अणवरयतरंगेहिं [5]उप्पयनिवयं [6]कुणंतिया वहइ ।
तंदूसयस्स लीलं कोट्टिमकरहम्ममाणस्स ॥ १९७ ॥

---

एतन्निशम्य वचनं कूपकस्तम्भाग्रसंस्थितनरस्य ।
प्रवहणपुरुषसमूहः संक्षुब्धो विगतजीविताशः ॥ १९२ ॥

ततः । मुञ्चति नङ्गरनिवहः कूपकस्तम्भस्तिर्यङ् विहितः ।
नावोऽपि श्वेतपटेन घनेन प्रच्छादिताः सर्वाः ॥ १९३ ॥

अत्रान्तरे प्रच्छदितं नभः कृष्णमेघनिवहेन ।
संक्षुब्धसलिलनिधिः प्रवातो मरुच्चण्डः ॥ १९४ ॥

यमजीह्वेव चमत्करोति तडिच्छटासंततं समन्तेन ।
धाराधरापि गर्जन्ति भीषणं मृत्युसुभट इव ॥ १९५ ॥

खरपवनोद्धूतसागरतरङ्गवेगैः ह्रियते नौः ।
गुरुकल्लोलवशोत्थितनङ्गरनिकरेण धृताऽपि ॥ १९६ ॥

अनवरततरङ्गैरुत्पातनिपातं कुर्वती वहति ।
तिन्दूसस्य ( कन्दुकस्य ) लीलां कुट्टिमकरहन्यमानस्य ॥ १९७ ॥

---

१. संक्षुब्धः । २. जीयासा=जीविताशा । ३. तिरिच्छओ=तिर्यङ् । ४. धाराधरः=मेघः । ५. उत्पातनिपातम् । ६. कुर्वती ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ताव य खणंतराओ खरमारुयखंचणेण जज्जरिया ।
करकरकरस्स तुट्टंति नंगरा वीइवेगेहि ॥ १९८ ॥

पवरतुरंगमतरुणिव्व ताहिं उम्मुक्कबंधणा नावा ।
वीईनोलिज्जंता[1] पहाविया[2] गरुयवेगेण ॥ १९९ ॥

कत्थइ सुसिद्धविज्जा खयरिव्व नहंगणेण उप्पयइ ।
विज्जाविगमे कत्थइ निवडइ खयरिव्व गयणाओ ॥ २०० ॥

डंडाहया भुयंगिव्व जाइ कत्थइ तरंगरंगता ।
महजणसदुत्तत्थव्व धावए कत्थइ अईव ॥ २०१ ॥

कत्थइ झाणोवगया झायइ सा जोगिणिव्व निक्कंपा ।
कत्थइ कंतारगया थेरी[3] इव मंदयं वयइ ॥ २०२ ॥

कत्थइ गुरुजणदिट्ठा वराहकुलबालियव्व लज्जाए ।
घुम्मइ वेविरदेहा सा नावा जलहिमज्झम्मि ॥ २०३ ॥

---

तावच्च क्षणान्तरतः खरमरुत्कर्षनेन जर्जरिता ।
करकरकुर्वतस्त्रुट्यन्ते नङ्गरा वीचिवेगैः ॥ १९८ ॥

प्रवरतुरङ्गमतरणीव तदा उन्मुक्तबन्धना नौः ।
वीचिनोह्यमाना प्रधाविता गुरुकवेगेन ॥ १९९ ॥

कुत्रचित् सुसिद्धविद्या खेचरीव नभोङ्गणेन उत्पतति ।
विद्याविगमे कुत्रचित् निपतति खेचरीव गगनतः ॥ २०० ॥

दण्डाहता भुजङ्गीव याति कुत्रचित्तरङ्गरङ्गता ।
महज्जनसदुक्तार्थ इव धावति कुत्रचिदतीव ॥ २०१ ॥

कुत्रचित् ध्यानोपगता ध्यायति सा योगिनीव निष्कम्पा ।
कुत्रचिन् कन्तारगता स्थविरेव मन्दकं व्रजति ॥ २०२ ॥

कुत्रचित् गुरुजनदृष्टा वरार्हकुलबालिकेव लज्जया ।
घूमति वेपनशीलदेहा सा नौ-र्जलधिमध्ये ॥ २०३ ॥

---

१. नोलिज्जंता=नोद्यमाना=प्रेर्यमाणा । २. प्रधाविता। ३. स्थविरा=वृद्धा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्लोलजलपलावियफलयगलंतोरुबिंदुअंसूहिं ।
रुयइव्व सेमस्सियजणोहपरिरक्खणाऽसत्ता ॥ २०४ ॥
विहडियबंधणफलहोहमुक्कगुरुसद्दविप्पलावेहिं ।
आसन्नभंगभीयव्व विलवंई सरणपरिहीणा ॥ २०५ ॥
उम्मत्तियव्व तत्तो इओ तओ सायरम्मि भममाणा ।
अववरयं विदलंता जलगयमामयसरावुव्व ॥ २०६ ॥
उव्विग्गकन्नधारा आउलविलवंतकोलियकुलोहा ।
उत्तत्थवणियसत्था उद्धयकंदंतकम्मयरा ॥ २०७ ॥
कच्छोट्टंतरगोवियसुवन्नखंडम्मि जणसमूहम्मि ।
नियतणुसंदामियफलयखंडदक्खम्मि वणिनियरे ॥ २०८ ॥
नियकुलदेवयनियरं ओवायंते समत्थलोयम्मि ।
नाविय़जणे य भंडं पविक्खिवंते समुद्दम्मि ॥ २०९ ॥

---

कल्लोलजलप्लावितफलकगलतुरुबिन्द्वश्रुभिः ।
रुदतीव समाश्रितजनौघपरिरक्षणाऽऽसक्ता ॥ २०४ ॥
विघटितबन्धनफलकौघमुक्तगुरुशब्दविप्रलापैः ।
आसन्नभङ्गभीत इव विलपन्ती शरणपरिहीणा ॥ २०५ ॥
उन्मत्तिकेव तत इतस्ततः सागरे भ्राम्यंती ।
अनवरतं त्रुट्यन्ती जलगतामयसराव इव ॥ २०६ ॥
उद्विग्नकर्णधाराऽऽकुलविलपत्कौलिककुलौघा ।
उत्त्रस्तवणिक्सार्था उद्धतक्रन्दत्कर्मकराः ॥ २०७ ॥
कच्छोट्टन्तर्गोपितसुवर्णखण्डे जनसमूहे ।
निजतनुसंदामितफलकखण्डदक्षे वणिग्निकरे ॥ २०८ ॥
निजकुलदेवनिकरं उपयाचमाने समस्तलोके ।
नाविकजने च भाण्डं प्रक्षिपति समुद्रे ॥ २०९ ॥

---

१. पलावियं = प्लावितम् । २. समस्सिओ = समाश्रितः । ३. विदलंता = त्रुटयन्ती । ४. आमं = अपक्वम् । ५. कर्मकरः = दासः । ६. उपयाचमाने ।


Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलच्छाइयपेरंतं एक्कं [1]आसाइऊण गिरिगडयं ।
विदलंतफलयनियरा फुट्टा सहसत्ति सा नावा ॥ २१० ॥ पञ्चभिः कुलकम् ॥

अहमवि तत्तो नरवर ! आसाइयफलहयम्मि संलग्गो ।
अंतेण्णिवेल्लिनोलिज्जमाणलहुमच्छविच्छुरिओ ॥ २११ ॥

कत्थइ असंखसंखोहखोहिओ जलनिहिम्मि बुड्डुंतो ।
कत्थइ [2]गाहगसिज्जंतगोहियामुहविणिम्मुक्को ॥ २१२ ॥

कत्थइ [3]नक्कुक्कत्तियसिप्पिपुडुप्फिडियमोत्तियाइन्नो ।
कत्थइ तरंगवेविरविद्दुमगहणेण रुज्झंतो ॥ २१३ ॥

अवरावरगुरुलहरीतरंगवेगेहिं हीरमाणो हं ।
दिणपंचगेण नरनाह ! पाविओ नीरपेरंतं ॥ २१४ ॥ चतसृभिः कलापकम् ॥

रविकरसंपायपणट्ठपउर[4]जड्डो तओ समुत्तरिउं ।
काउं सुपक्ककयलीफलाइणा [5]पाणवित्तिमहं ॥ २१५ ॥

---

जलाच्छादितपर्यन्तमेकमासाद्य गिरिगडकम् ।
विदलत्फलनिकरा स्फुटा सहसेति सा नौः ॥ २१० ॥ पञ्चभिः कुलकम्॥

अहमपि ततो नरवर ! आसादितफलके संलग्नः ।
अंतर्निवेल्लिनोल्लायमानलघुमत्स्यविच्छुरितः ॥ २११ ॥

कुत्रचिदसङ्ख्यसङ्ख्यौघक्षोभितो जलनिधौ मग्नः ।
कुत्रचित् ग्राहग्रस्यमानगोधिकामुखविर्निमुक्तः ॥ २१२ ॥

कुत्रचित् नक्रोत्कर्तितशुक्तिपुटोद्भ्रष्टमौक्तिकाकीर्णः ।
कुत्रचित् तरङ्गवेपितविद्रुमग्रहणेन रुध्यमानः ॥ २१३ ॥

परस्परगुरुलहरीतरङ्गवेगैः ह्रियमाणोऽहम् ।
दिनपञ्चकेन नरनाथ ! प्राप्तो नीरपर्यन्तम् ॥ २१४ ॥ चतसृभिः कलापकम्॥

रविकरसंपातप्रणष्टप्रचुरशीतं ततः समुत्तीर्य ।
कृत्वा सुपक्वकदलीफलादिना प्राणवृत्तिमहम् ॥ २१५ ॥

---

१. आसाद्य=प्राप्य । २. ग्राहाः=जलचारिजन्तुविशेषाः । ३. नक्राः=जलचरजीवविशेषाः, तदुत्कर्तितशुक्तिपुटोद्भ्रष्टमौक्तिकाकीर्णः । ४. जड्डो=शीतम् । ५. प्राणवृत्तिम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिमुसियनालिएरुग्गएण तिल्लेण काउमब्भंगं ।
ण्हाऊण सरोतीरे चंदणतरुपल्लवरसेण ॥ २१६ ॥

कप्पूरमीसिएणं काऊण विलेवणं पयत्तेण ।
जाइफलेलासहियं समाणिय पवरतंबोलं ॥ २१७ ॥

वररयणसिलावट्टे उवविट्ठो चिंतिउं पयत्तो हं ।
अव्वो ! कह णु अकंडे जाओ धणपरियणविणासो ? ॥२१८ ॥चतसृभिः कलापकम् ॥

कह सो महाणुभावो होही भग्गम्मि जाणवत्तम्मि ? ।
आसाइयफलओ जइ समुत्तरेज्जा [1]भवे [2]लट्ठं ॥ २१९ ॥

एमाइ चिंतयंतो कइवि हु दिवसाणि जाव अच्छामि ।
ता अन्नदिणे केणवि उल्लवियं वयणमेयंति ॥ २२० ॥

भो धणदेव ! महायस ! उव्विग्गो कीस अच्छसे एवं ? ।
तत्तो तत्तोहुत्तं जाव पलोएमि संभंतो ॥ २२१ ॥

---

परिशोषितनालिकेरोद्गतेन तैलेन कृत्वाऽभ्यङ्गम् ।
स्नात्वा सरस्तीरे चन्दनतरुपल्लवरसेन ॥ २१६ ॥

कर्पूरमिश्रितेन कृत्वा विलेपनं प्रयत्नेन ।
जातिफलैलासहितं समानीतः प्रवरतम्बोलम् ॥ २१७ ॥

वररत्नशीलापृष्ठे उपविष्टश्चिन्तयि प्रवृत्तोऽहम् ।
अहो ! कथं नु अकाण्डे जातो धनपरिजनविनाशः ? ॥२१८ ॥चतसृभिः कलापकम् ॥

कथं स महानुभावो भविष्यति भग्ने यानपात्रे ?।
आसादितफलको यदि समुत्तरेत् भवेत् लष्टम् ॥ २१९ ॥

एवमादिचिन्तयन् कत्यपि खलु दिवसानि यावदासे ।
तावदन्यदिने केनाऽपि उल्लपितं वचनमेतदपि ॥ २२० ॥

भो धनदेव ! महायशः ! उद्विग्नः कथं आस्स एवम् ? ।
ततस्तदभिमुखं यावत् प्रलोकयामि संभ्रान्तः ॥ २२१ ॥

---

१. भवेत् । २. सुन्दरम् ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

ताव य दिट्ठो भासुरसरीरधारी पहट्ठमुहकमलो ।
परिहियसखिंखि[1]णीपंचवन्नवरवत्थसोहिल्लो ॥ २२२ ॥

उत्तंसट्ठियभासुरसप्पफणागारचिंधचिं[2]चइओ ।
अइपिच्छणिज्जरूवो कोवि हु देवो महाभागो ॥ २२३ ॥ तिसृभिः विशेषकम् ॥

अह कयअब्भुट्ठाणो अवगूढो तेण सायरं अहयं ।
भणिओ य ममं परिजाणसीह किंवा न तं भद्द ! ॥ २२४ ॥

तत्तो य मए भणियं अज्जवि सम्मं न याणिमो देव ! ।
ता साहिज्जउ अम्हं को सि तुमं कत्थ दिट्ठो वा ? ॥ २२५ ॥

भणियं देवेण तओ आसि तए हत्थिणाउरे नयरे ।
दिट्ठो मणोरमुज्जाणसंठिओ देवसम्मोत्ति ॥ २२६ ॥

लक्खं दाऊण तया जोगियहत्थाओ सुपइट्ठसुओ ।
जयसेणो नामेणं विमोइओ जस्स वयणेण ॥ २२७ ॥

---

**तावच्च दृष्टो भासुरशरीरधारी प्रहर्षितमुखकमलः ।**
**परिहितसकिङ्कणीपञ्चवर्णवरवस्त्रशोभावान् ॥ २२२ ॥**

**अवतंसस्थितभासुरसर्वफणाकारचिह्नमण्डितः ।**
**अतिप्रेक्षणीयरूपः कोऽपि खलु देवो महाभाग् ॥२२३॥**
**तिसृभि-र्विशेषकम्॥**

**अथ कृताभ्युत्थानोऽवगूढः तेन सादरं अहकम् ।**
**भणितश्च माम् परिजानासि, इह किं वा न त्वं भद्र ! ॥ २२४ ॥**

**ततश्च मया भणितमद्याऽपि सम्यक् न जानीमो देव ! ।**
**तस्मात् कथयतु अस्माकं कोऽसि त्वं कुत्र दृष्टो वा ? ॥ २२५ ॥**

**भणितं देवेन ततोऽसीत् त्वया हस्तिनापुरे नगरे ।**
**दृष्टो मनोरमोद्याने संस्थितो देवशर्मेति ॥ २२६ ॥**

**लक्षं दत्त्वा त्वया योगिकहस्तात् सुप्रतिष्ठसुतः ।**
**जयसेनः नाम्ना विमोचितो यस्य वचनेन ॥ २२७ ॥**

---

१. खिङ्खिणी=किङ्कणी=घण्टिका । २. चिंचइओ=मण्डितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो य तया अडवीए सत्थविलोवम्मि सुप्पइट्ठस्स ।
पल्लीवइणो पासे बालग्गाहो तए दिट्ठो ॥ २२८ ॥

तह य कुसग्गपुराओ नियत्तमाणेण दड्ढपल्लीए ।
सीहगुहाए बाहिं करंकमज्झट्ठिओ दिट्ठो ॥ २२९ ॥

परिच्छिन्नचलणजुयलो गुरुपहरणघायजज्जरियदेहो ।
गाढं तिसाभिभूओ जो तइया कंठगयपाणो ॥ २३० ॥

परहियरएण तुमए अरहं देवो सुसाहुणो गुरुणो ।
इय अच्चंतं दाउं सम्मत्तं नियमसंजुत्तं ॥ २३१ ॥

तत्तो य नमोक्कारो दिन्नो संसारसागरुत्तारो ।
जस्सासि तए तइया सो हं भो ! देवसम्मजिओ ॥ २३२ ॥ सप्तभिः कुलकम् ॥

नवकारपभावाओ वेलंधरनागरायमज्झम्मि ।
जाओ सिवओ नामं सामाणियपणयपयकमलो ॥ २३३ ॥

---

यश्च तदाऽटव्यां सार्थविलोपे सुप्रतिष्ठस्य ।
पल्लीपतेः पार्श्वे बालग्राहो त्वया दृष्टः ॥ २२८ ॥

तथा च कुशाग्रपुरतो निवर्तमानेन दग्धपल्ल्याम् ।
सिंहगुफायां वर्हि करङ्कमध्येस्थितः दृष्टः ॥ २२९ ॥

परिच्छिन्नचरणयुगलो गुरुप्रहरणघातजर्जरितदेहः ।
गाढं तृडभिभूतो यस्तदा कण्ठगतप्राणः ॥ २३० ॥

परहितरतेन त्वयाऽर्हन् देवः सुसाधवो गुरवः ।
इति अत्यन्तं दत्त्वा सम्यक्त्वं नियमसंयुक्तम् ॥ २३१ ॥

ततश्च नमस्कारो दत्तः संसारसागरोत्तारः ।
यस्याऽऽसीत् त्वया तदा सोऽहं भो! देवशर्माजीवः ॥२३२॥ सप्तभिः कुलकम्॥

नमस्कारप्रभावतो वेलन्धरनागराजमध्ये ।
जातः शिवको नाम सामानिकप्रणतपदकमलः ॥ २३३ ॥

---

१. तृडभिभूतः=पिपासाक्रान्तः । २. जिओ=जीवः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो य मए भणियं एवं एयंति किंतु पुच्छामि ।
ठाणम्मि कम्मि अच्छइ तुम्हे साहेह मह एयं । ॥ २३४ ॥

अह सुरवरेण भणियं निसुणसु मेरुस्स दक्खिणदिसाए ।
बायालीससहस्साहिं[1] जोयणाणं अणूणाइं[2] ॥ २३५ ॥

लवणसमुद्दं ओगाहिऊण अत्थित्थ पव्वओ रम्मो ।
सत्तरससय एगवीसे उड्ढं उच्चत्तणं जस्स ॥ २३६ ॥

अद्धट्ठजोयणाइं समंतओ निययकंतिपसरेण ।
लवणोहिस्स सलिलं पयासई अंकरयणमओ[3] ॥ २३७ ॥

नामेण दउभासो तस्स य सिहरम्मि अत्थि वरभवणं ।
बावट्ठि[4]जोयणुच्चं रम्मं वररयणचिंचइयं ॥ २३८ ॥

तत्थ य वसामि अहयं सामाणियदससहस्स परियरिओ ।
पलिओवमट्ठिईओ सिवओ वेलंधराहिवई ॥ २३९ ॥ पञ्चभिः कुलकम् ॥

---

ततश्च मया भणितमेवमेतदिति किन्तु पृच्छामि ।
स्थाने कस्मिन् आस्ध्वम् यूयम् कथयथ ममैतद् ? ॥ २३४ ॥

अथ सुरवरेण भणितं निशृणु मेरोर्दक्षिणदिशि ।
द्विचत्वारिंशत्सहस्त्रैः योजनानामनूनानि ॥ २३५ ॥

लवणसमुद्रमवग्राह्यऽस्त्यत्र पर्वतो रम्यः ।
सप्तदशशतमेकविंशति उर्ध्वमुच्चत्वं यस्य ॥ २३६ ॥

अर्धाष्टयोजनानि समन्ततो निजकान्तिप्रसरेण ।
लवणोदधेः सलिलं प्रकाशतेऽङ्करत्नमयः ॥ २३७ ॥

नाम्ना दउभासस्तस्य च शिखरेऽस्ति वरभवनम् ।
द्वाषष्टियोजनमुच्चं रम्यं वररत्नमण्डितम् ॥ २३८ ॥

तत्र च वसाम्यहकं सामानिकदशसहस्त्रं परिवृत्तः ।
पल्योपमस्थितिकः शिवको वेलंधराऽधिपतिः ॥ २३९ ॥ पञ्चभिः कुलकम् ॥

१. बायालीसा = द्विचत्वारिंशत् । २. अनूनानि । ३. अङ्कस्थितरत्नमय इत्यर्थः । ४. बावट्ठी=द्वाषष्टिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लवणसमुद्दे अन्नावि अत्थि सिवया ओ रायहाणी मे ।
जोयणसहस्सबारसवित्थिण्णा सा समंतेण ॥ २४० ॥

सिवयाइ तीइ बहुसो अच्छामि अहं अणेयदेवीहिं ।
परियरिओ दिव्वसुहं भुंजंतो तह दउभासे ॥ २४१ ॥

ता भद्द ! तुह पसायाओ एरिसी पाविया मए रिद्धी ।
कल्लम्मि दउभासम्मि आगओ पव्वए अहयं ॥ २४२ ॥

ओहिन्नाणेण तुमं पत्तं दट्ठुण रयणदीवम्मि ।
आयाओ तुहदंसणकंखी, भण जं मए किच्चं ? ॥ २४३ ॥

अव्वो ! जिणिंदधम्मस्स एरिसं एत्तियस्सवि फलंति ।
ता कीस न गेण्हामो जिणदिक्खं इय विचिंतेंतो ॥ २४४ ॥

भणिओ पुणोवि देवेण होइ देवाण दंसणममोहं ।
तो भव पउणो[1] जेणाहमज्ज बहुरयणसंजुत्तं ॥ २४५ ॥

---

**लवणसमुद्रे अन्याऽप्यस्ति शिवका ओ राजधानी मम ।**
**योजनसहस्रद्वादशविस्तीर्णा सा समन्तेन ॥ २४० ॥**

**शिवकायां तस्यां बहुश आसे अहमनेकदेवीभिः ।**
**परिवृत्तो दिव्यसुखं भुञ्जानस्तथा दउभासे ॥ २४१ ॥**

**तस्मात् भद्र ! तव प्रसादादीदृशी प्राप्ता मया ऋद्धिः ।**
**कल्ये दउभासेऽऽगतः पर्वतेऽहकम् ॥ २४२ ॥**

**अवधिज्ञानेन त्वां प्राप्तं दृष्ट्वा रत्नद्वीपे ।**
**आयातस्तवदर्शनकांक्षी, भण यत् मम कृत्यम् ? ॥ २४३ ॥**

**अहो ! जिनेन्द्रधर्मस्य ईदृशमेतावतोऽपि फलमिति ।**
**तस्मात् कस्मान्न गृह्णीमो जिनदिक्षामिति विचिन्तयन् ॥ २४४ ॥**

**भणितः पुनरपि देवेन भवति देवानां दर्शनममोघम् ।**
**ततो भव प्रगुणो येनाऽहमद्य बहुरत्नसंयुक्तम् ॥ २४५ ॥**

---

१. प्रगुणः=मज्जितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिव्वविमाणारूढं नेमि तुमं हत्थिणाउरे नयरे ।
तत्थ य गयस्स हियइच्छियंपि होही महाभाग ! ॥ २४६ ॥ तिसृभि र्विशेषकम्॥

एवंति मए भणिए दिव्वविमाणं विउव्वियं[1] सहसा ।
भूरिरयणोहसहिओ चडाविओ तम्मि तेणाहं ॥ २४७ ॥

रयणनिवहं तद्दीवत्थं अणेयपयारयं नरवर ! वरं घेत्तुं मज्झं समप्पिय सायरं ।
सिवगपहुणा सम्मं दिव्वे विमाणवरे ठिओ गयपुरपुरं[2] तेणाणीओ खणेण तओ अहं
॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि परिसमप्पइ गयपुरपच्चागमोत्ति नामेण ।
सुरसुंदरीकहाए तेरसमो इह परिच्छेओ ॥ २५० ॥

---

दिव्यविमानारूढं नयामि त्वां हस्तिनापुरे नगरे ।
तत्र च गतस्य हृदयमिच्छितमपि भविष्यति महाभाग् ॥२४६ ॥ तिसृभि-र्विशेषकम्॥

एवमिति मयि भणिते दिव्यविमानं विकुर्व्वितं सहसा ।
भूरिरत्नौघसहित आरोहितस्तस्मिन् तेनाऽहम् ॥ २४७ ॥

रत्ननिवहं तद्द्वीपस्थमनेकप्रकारकं, नरवर !
वरं गृहीत्वा मम समर्पितं सादरम्।
शिवकप्रभुना सम्यग् दिव्ये विमानवरे स्थितो
गजपुरपुरं तेनाऽऽनीतः क्षणेन ततोऽहम् ॥ २४८ ॥

साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।
रागाग्निद्वेषविषधरप्रशमनजलमन्त्रभूतायाः ॥ २४९ ॥

एषोऽपि परिसमाप्यते गजपुरप्रत्यागमोऽपि नाम्नाः ।
सुरसुन्दरीकथायास्त्रयोदश इह परिच्छेदः ॥ २५० ॥

॥ त्रयोदशः परिच्छेदः समाप्तः ॥

---

१. विउव्वियं=विकुर्व्वितम् । २. गजपुरपुरं=हस्तिनापुरनगरम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्दशः परिच्छेदः

एवं च जाव साहइ धणदेवो नरवइस्स वुत्तंतं ।
एत्थंतरम्मि सुरसुंदरीवि गुरुसोयसंतत्ता ॥ १ ॥

हा ! मह इमस्स दुक्खागरस्स हिययस्स वज्जघडियस्स ।
असोयव्वं सोच्चावि फुट्टए जं न सइखंडं[1] ॥ २ ॥

किं धरिएहिं इण्हिं इमेहि पाणेहिं दुक्खनिलएहिं[2] ? ।
मणवल्लहस्स जायम्मि मंगुले[3] जाणभंगम्मि ॥ ३ ॥

सइ दंसणेवि नेहस्स पगरिसो दंसिओ तए नाह ! ।
सत्तुंजएण रुद्धो विमोइओ जेण ताओत्ति ॥ ४ ॥

अवहरिया जेणाहं सुरेण तेणेव छिन्नवरविज्जो ।
कह होहिसि नाह ! तुमं जाणविवत्तीए जलहिम्मि ? ॥ ५ ॥

---

एवञ्च यावत् कथयति धनदेवो नरपतेः वृतान्तम् ।
अत्रान्तरे सुरसुन्दर्यपि गुरुशोकसंतप्ता ॥ १ ॥

हा ! ममास्य दुःखाकरस्य हृदयस्य वज्रघडितस्य ।
अश्रोतव्यं श्रुत्वाऽपि स्फुटति यन्न शतखण्डम् ॥ २ ॥

किं धृतैरिदानीमेभिः प्राणैर्दुःखनिलयैः ? ।
मनोवल्लभस्य जाते मङ्गुले यानभङ्गे ॥ ३ ॥

सकृत् दर्शनेऽपि स्नेहस्य प्रकर्षो दर्शितस्त्वया नाथ ! ।
शत्रुञ्जयेन रुद्धो विमोचितो येन तात इति ॥ ४ ॥

अपहृता येनाऽहं सुरेण तेनैव च्छिन्नवरविद्यः ।
कथं भविष्यसि नाथ ! त्वं यानविपत्तौ जलधौ ? ॥ ५ ॥

---

१. शतखण्डम् । २. निलयं=स्थानम् । ३. मंगुलं=अनिष्टम् ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

हा ! कह ससंककरनिम्मलं मुहं नाह ! तुह पलोइस्सं ।
एवंविहम्मि विहिए विहिणा हयभागधेया हं ? ॥ ६ ॥

चलनेहाओ महिलाओ होंति सच्चो जणप्पवाओऽयं ।
जं एरिसेवि निसुए अज्जवि जीवामि पावा हं ॥ ७ ॥

एमाइ विचिंतेंती सोगावेगाओ विगयचेयन्ना ।
पासट्ठियदेवीए पडिया मुच्छाए उच्छंगे ॥ ८ ॥

कमलावईवि देवी संभावियसुयविओगसोगत्ता ।
बाहजलाविलनयणा विलविउमेवं समाढत्ता ॥ ९ ॥

हा ! पुत्तय ! अडवीए तइया मह जायमित्तओ हरिओ ।
इण्हिंपि अकयदंसण ! कत्थ गओ मह [1]अउन्नाए ? ॥ १० ॥

धन्ना एसा जीए ताव य तुह पुत्त ! पुलइयं वयणं ।
हा ! हा ! अहं [2]अहन्ना जाए जाओवि न हु दिट्ठो ॥ ११ ॥

---

**हा ! कथं शशाङ्ककरनिर्मलं मुखं नाथ ! तव प्रलोकयिष्यामि ।**
**एवंविधे विहिते विधिना हतभाग्यधेयाऽहम् ? ॥ ६ ॥**

**चलस्नेहा महिला भवन्ति सत्यो जनप्रवादोऽयम् ।**
**यदीदृशेऽपि निश्रुते अद्याऽपि जीवामि पापाऽहम् ॥ ७ ॥**

**एवमादि चिन्तयन्ती शोकावेगात् विगतचेतना ।**
**पार्श्वस्थितदेव्याः पतिता मूर्च्छया उत्सङ्गे ॥ ८ ॥**

**कमलावत्यपि देवी संभूतसुतवियोगशोकार्त्ता ।**
**बाष्पजलाविलनयना विलपितुमेवं समारब्धा ॥ ९ ॥**

**हा ! पुत्रक ! अटव्यां तदा मम जातमात्रो हृतः ।**
**इदानीमपि अकृतदर्शन ! कुत्र गतो ममापुन्यायाः ? ॥ १० ॥**

**धन्यैषा यस्यास्तावच्च तव पुत्र ! दृष्टं वदनम् ।**
**हा ! हा ! अहमधन्या जाते जातोऽपि न खलु दृष्टः ॥ ११ ॥**

---

१. अपुन्यायाः । २. अधन्या ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं तइया कुलवइणा आइट्ठं, होज्ज किं नु तं अलियं ।
संपत्तजोव्वणो सो मिलिही किल हत्थिणपुरम्मि ? ॥ १२ ॥
रायावि अमरकेऊ करयलपल्हत्थ[1]वयणविच्छाओ ।
सुयसोयविहुरियंगो बाहजलं मोत्तुमारद्धो ॥ १३ ॥
धणदेवेणं एत्थंतरम्मि सुरसुंदरिं पवीयंती ।
पुट्ठा विलासिणी हंसिया उ संजायसंकेण ॥ १४ ॥
मुच्छानिमीलियच्छी का एसा कन्नगा अउव्वत्ति ।
उज्जाणनिवडणाइं तीइवि से साहियं सव्वं ॥ १५ ॥
संभरियसुमइवयणो धणदेवो ताहि एवमुल्लवइ ।
कीस विसन्नो नरवर ! विलवसि किंवा तुमं देवि ! ॥ १६ ॥
किं तं विसुमरियं भे[2] नेमित्तियसुमइणा जमाइट्ठं ।
कुसुमायरउज्जाणे जइया किर कन्नगा पडिही ॥ १७ ॥

---

यत्तदा कुलपतिनाऽऽदिष्टं, भवेत्किन्नु तमलिकम् ।
संप्राप्तयौवनः स मीलिष्यति किल हस्तिनापुरे ? ॥ १२ ॥
राजाऽपि अमरकेतुः करतलपर्यस्तवदनविच्छायः ।
सुतशोकविधुरितांऽगः बाष्पजलं मोक्तुमारब्धः ॥ १३ ॥
धनदेवेनऽत्रान्तरे सुरसुन्दरीं प्रवीजयन्ती ।
पृष्टा विलासिनी हंसिका तु सञ्जातशङ्केन ॥ १४ ॥
मूर्च्छानिमीलिताक्षी कैषा कन्यकाऽपूर्वेति ।
उद्यानिपतनादि तयाऽपि तस्मै कथितं सर्वम् ॥ १५ ॥
संस्मृतसुमतिवचनो धनदेवस्तदा एवमुल्लपति ।
कस्माद्विषण्णो नरवर ! विलपसि किंवा त्वं देवि ! ॥ १६ ॥
किं तद् विस्मृतं भवतां नैमितिकसुमतिना यदादिष्टम् ।
कुसुमाकरोद्याने यदा किल कन्यका पतिष्यति ॥ १७ ॥

---

१. पल्हत्थो=पर्यस्तः । २. भे=भवताम् ।



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तत्तो सिग्घं होही समागमो तुम्ह निययपुत्तेण ।
ता मा [1]तूरह संपइ मिलिही सो नत्थि संदेहो ॥ १८ ॥ युग्मम् ॥

जं सो जहत्थवाई सुमई उवलद्धपच्चओ बहुसो ।
ता मा कुणह विसायं जाएवि हु जाणभंगम्मि ॥ १९ ॥

एवं च समासासइ धणदेवो जाव निउणवयणेहिं ।
एत्थंतरम्मि सहसा दुंदुहिसद्दो समुच्छलिओ ॥ २० ॥

गयणाओ ओयरंता देवा दीसंति नयरबाहिम्मि ।
सुम्मइ जयजयसद्दो सुरकामिणिगीयसंवलिओ ॥ २१ ॥

किं किं इमंति जंपंति जाव अत्थाणसंठिया लोया ।
ताव य समंतभद्दो समागतो हरिसपडिहत्थो ॥ २२ ॥

भणइ य कयप्पणामो पुरस्स पुव्वुत्तरे दिसाभाए ।
कुसुमायरउज्जाणे जइजणजोग्गम्मि भूमीए ॥ २३ ॥

---

**ततः शीघ्रं भविष्यति समागमस्तव निजकपुत्रेण ।**
**तस्मात्मा त्वरध्वम् संप्रति मीलिष्यति स नास्ति सन्देहः ॥ १८ ॥ युग्मम् ॥**

**यत्स यथार्थवादी सुमतिरुपलब्धप्रत्ययो बहुशः ।**
**तस्मात् मा कुरुत विषादं जातेऽपि खलु यानभङ्गे ॥ १९ ॥**

**एवं च समाश्वसिति धनदेवो यावन्निपुणवचनैः ।**
**अत्रान्तरे सहसा दुन्दुभिशब्दः समुच्छलितः ॥ २० ॥**

**गगनादवतरन्तो देवा पश्यन्ति नगरबाह्ये ।**
**श्रूयते जयजयशब्दः सुरकामिनिगीतसंवलितः ॥ २१ ॥**

**किं किमिदमिति जल्पन्ति यावदास्थानसंस्थिता लोकाः ।**
**तावच्च समन्तभद्रः समागतो हर्षप्रतिपूर्णः ॥ २२ ॥**

**भणति च कृतप्रणामः पुरस्य पूर्वोत्तरे दिग्भागे ।**
**कुसुमाकरोद्याने यतिजनयोग्यायां भूमौ ॥ २३ ॥**

१. तूरह=त्वरध्वम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समणगणसंपरिवुडो समत्थसत्थत्थवित्थरविहिन्नू ।
परवाइवारवारणनिवारणे[1] केसरिसरिच्छो ॥ २४ ॥

विविहतवोविहिनिरओ विसुद्धचारित्तसंजमुज्जुत्तो ।
परहियकरणेक्करओ सूरी सुपइट्ठनामोत्ति ॥ २५ ॥

अज्जेव समोसरिओ तस्स य निद्दड्ढघाइकम्मस्स ।
संपइ अप्पडिवाई उप्पन्नं केवलं नाणं ॥ २६ ॥ चतसृभिः कलापकम् ॥

केवलिमहिमाकरणत्थमित्थ तियसा समागया देव ! ।
तं सोऊण नरिंदो साणंदो वंदिउं चलिओ ॥ २७ ॥

देवि ! तुमंपि हु पउणा सहिया सुरसुंदरीए होहित्ति ।
वंदित्ता भगवंतं पुच्छ तुमं पुत्तवुत्तंतं ॥ २८ ॥

[2]ण्हायविलित्तो राया महया भडचडयरेण संजुत्तो ।
पवरगइंदारूढो पत्तो कुसुमायरुज्जाणं ॥ २९ ॥

---

**श्रमणगणसंपरिवृत्तः समस्तशास्त्रार्थविस्तरविधिज्ञः ।**
**परवादीवारवारणनिवारणे केसरीसदृशः ॥ २४ ॥**

**विविधतपोविधिनिरतो विशुद्धचारित्रसंयमोद्युक्तः ।**
**परहितकरणैकरतः सूरिः सुप्रतिष्ठनामेति ॥ २५ ॥**

**अद्यैव समवसृतस्तस्य च निर्दग्धघातिकर्मणः ।**
**संप्रत्यपतिपाती उत्पन्नं केवलं ज्ञानम् ॥ २६ ॥ चतसृभिः कलापकम् ॥**

**केवलिमहिमा करणार्थमत्र त्रिदशाः समागता देव ! ।**
**तच्छ्रुत्वा नरेन्द्रः सानन्दो वन्दितुं चलितः ॥ २७ ॥**

**देवि ! त्वमपि खलु प्रगुणा सहिता सुरसुन्दर्या भवत इति ।**
**वन्दित्वा भगवन्तं पृच्छ त्वं पुत्रवृतान्तम् ॥ २८ ॥**

**स्नातविलिप्तो राजा महता भटचटकरेण [ आडम्बरेण ] संयुक्तः ।**
**प्रवरगजेन्द्रारूढः प्राप्तः कुसुमाकरोद्यानम् ॥ २९ ॥**

---

१. वारः=समूहः । २. स्नातविलिप्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयलपरिवारसहिओ काउं तिपयक्खिणं मुणिवरस्स ।
पयजुयलं पणमित्ता उवविट्ठो उचियदेसम्मि ॥ ३० ॥

अह कयकेवलिमहिमो सदेवमणुयासुराइपरिसाए ।
गंभीरभारईए सूरी वज्जरिउमारद्धो ॥ ३१ ॥

नारयतिरियनरामरगईसु सत्तेहिं दुक्खतविएहिं ।
कहकहवि माणुसत्तं पाविज्जइ एत्थ संसारे ॥ ३२ ॥

लद्धूणवि तं दुलहं मिच्छत्ताईहिं मोहिया बहवे ।
न कुणंति [1]परत्थ हियं विसयामिसलोलुया जीवा ॥ ३३ ॥

जिणवयणसुइविहीणा कज्जाकज्जाइं नेव जाणंति ।
[2]भक्खेयाभक्खेयं पेयापेयं न लक्खेंति ॥ ३४ ॥

गम्मागम्मविभागं गिद्धा न गणंति विगयमज्जाया ।
धम्मियहियलोएणं वारिज्जंता इय भणंति ॥ ३५ ॥

---

**सकलपरिवारसहितः कृत्वा त्रिप्रदक्षिणां मुनिवरस्य ।**
**पदयुगलं प्रणम्योपविष्ट उचितदेशे ॥ ३० ॥**

**अथ कृतकेवलिमहिमा सदेवमनुजासुरादिपर्षदि ।**
**गंभीरभारत्या सूरिः कथयितुमारब्धः ॥ ३१ ॥**

**नारकतिर्यग्नरामरगतिषु सत्त्वैर्दुखतप्तैः ।**
**कथंकथमपि मानुष्यत्वं प्राप्यतेऽत्र संसारे ॥ ३२ ॥**

**लब्ध्वाऽपि तं दुर्लभं मिथ्यात्वादिभि-र्मोहिता बहवः ।**
**न कुर्वन्ति परत्र हितं विषयामिषलोलुपा जीवाः ॥ ३३ ॥**

**जिनवचनश्रुतिविहीना कार्याकार्याणि नैवं जानन्ति ।**
**भक्ष्याभक्ष्यं पेयापेयं न लक्षयन्ति ॥ ३४ ॥**

**गम्यागम्यविभागं गृद्धा न गणयन्ति विगतमर्यादाः ।**
**धार्मिकहितलोकेन वार्यमाणेति भणन्ति ॥ ३५ ॥**

१. परत्र=परलोकविषयं हितम् । २. भक्ष्याभक्ष्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूढा तुम्हे धुत्तेहिं वंचिया नत्थि कोवि जं जीवो ।
जो परलोयं गच्छइ सुहदुहभोत्ता अमुत्तो[1] वा ॥ ३६ ॥

तस्साभावे पावं हिंसाइकयं हविज्ज कस्सेह ? ।
ता पंचभूयसमुदयमित्तं नन्नं जए किंचि ॥ ३७ ॥

एवंविहपरिणामा निग्घिणहियया कुणंति जियघायं ।
अलियं वयंति, [2]गिण्हंतदत्तयं, जंति[3] परदारं ॥ ३८ ॥

भूरिपरिग्गहनिरया रागद्दोसेहिं मोहियमईया ।
निसिभोयणमंसासी गिद्धा महुमज्जपाणम्मि ॥ ३९ ॥

कोहमयमायलोभेहिं विहुया संकिलिट्ठपरिणामा ।
अविरयमिच्छद्दिट्ठी किलिट्ठकम्मं समज्जंति ॥ ४० ॥

तव्वसगा पुण कालं काउं निवडंति घोरनरएसु ।
निच्चं घणंधयारेसु तिव्वसीउण्हकलिएसु ॥ ४१ ॥

---

**मूढा यूयं धूर्त्तै-र्वञ्चिता नास्ति कोऽपि यज्जीवः ।
यः परलोकं गच्छति सुखदुःखभोक्ताऽमूर्त्तोवा ॥ ३६ ॥**

**तस्याभावे पापं हिंसादिकृतं भवेत् कस्येह ? ।
तर्हि पञ्चभूतसमुदायमात्रं नान्यं जगति किञ्चित् ॥ ३७ ॥**

**एवंविधपरिणामा निर्घृणहृदया कुर्वन्ति जीवघातम् ।
अलिकं वदन्ति, गृहन्त्यदत्तं यान्ति परदारम् ॥ ३८ ॥**

**भूरिपरिग्रहनिरता रागद्वेषै-र्मोहितमतिकाः ।
निशिभोजनमांसाशी-गृद्धा मधुमद्यपाने ॥ ३९ ॥**

**क्रोधमदमायालोभै-र्विद्रुताः संक्लिष्टपरिणामाः ।
अविरतमिथ्यादृष्टिः क्लिष्टकर्म समर्जयन्ति ॥ ४० ॥**

**तद्वशगा पुनः कालं कृत्वा निपतन्ति घोरनरकेषु ।
नित्यं घनान्धकारेषु तीव्रशीतोष्णकलितेषु ॥ ४१ ॥**

१. अमूर्त्तः । २. गृहन्ति+अदत्तम् । ३. यान्ति=सेवन्ते, परदारं=अन्यकलत्रम् ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तत्थ य ते उववन्ना परमाहम्मियसुरेहिं विरसंता[१] ।
छिज्जंति निसिय[२]करवत्तदित्तपरसूहिं सयहूत्तं[३] ॥ ४२ ॥

गुरुतिक्खकंटयाइन्नसिंबली[४]निविडसाहमज्झम्मि ।
आरोविउण बहुसो आकाड्डिज्जंति रज्जूहिं ॥ ४३ ॥

कढकढकढेंतकुंभीसु [५]तेहिं पच्चंति निद्दयमणेहिं ।
पाईज्जंति[६] जलंतं तंबं[७] तिसियत्ति जंपंता ॥ ४४ ॥

ससरीरसमुक्कत्तियमंसं छुहियाण[८] अग्गिसंकासं ।
काउं छुब्भइ वयणे नेरइयाणं अनाहाणं ॥ ४५ ॥

पूइवसरुहिरपुन्नं वेयरणिं निम्मयं[९] विउव्वित्ता[१०] ।
वोलिज्जंति[११] रसंता हा! हा! मायत्ति जंपंता ॥ ४६ ॥

छायत्था संपत्ता असिपत्तवणम्मि निसियपत्तेहिं ।
छिज्जंति विलवमाणा असितोमरकुंतरूवेहिं ॥ ४७ ॥

---

**तत्र च ते उपपन्ना परमाधार्मिकसुरै-र्विरसन्ताः ।**
**छिन्दन्ति निशितकरपत्रदीप्तपरशुभिः शतकृत्वः ॥ ४२॥**

**गुरुतीक्ष्णकण्टकाकीर्णशाल्मलीनिविडशाखामध्ये ।**
**आरोप्य बहुश आकृष्यन्ते रज्जुभिः ॥ ४३ ॥**

**कडकडायमानकुम्भीषु तैः पच्यन्ते निर्दयमनोभिः ।**
**पाय्यन्ते ज्वलन्तं ताम्रं तृषिता इति जल्पन्तः ॥ ४४ ॥**

**स्वशरीरसमुत्कर्तितमांसं क्षुधितानामग्निसङ्काशम्।**
**कृत्वा क्षिप्यते वदने नैरयिकानामनाथानाम् ॥ ४५ ॥**

**पूतिवशरुधिरपूर्णां वैतरणिं निम्नगां विकुर्व्य ।**
**गम्यन्ते रसन्तो हा ! हा ! मातेति जल्पन्तः ॥ ४६ ॥**

**छायार्थी संप्राप्ता असिपत्रवने निशितपत्रैः ।**
**छिद्यन्ते विलपन्तोऽसितोमरकुन्तरूपैः ॥ ४७ ॥**

---

**१. करुणं क्रन्दन्तः। २. निशितं=तीक्ष्णम्। ३. शतकृत्वः। ४. सिंबली=शाल्मलीवृक्षः। ५. तैः=परमाधार्मिकैः। ६. पाय्यन्ते। ७. ताम्रम्। ८. क्षुधितानाम्। ९. निम्नगा=नदी। १०. विकुर्व्य =विकृत्य। ११. गम्यन्ते।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ कयच्छिज्जंता रक्खह सरणागयत्ति जंपंता ।
[1]सुमराविययपुव्वभवा गाढयरं तेहिं हम्मंति ॥ ४८ ॥

किं बहुणा । अच्छिनिमीलियमित्तं नत्थि सुहं दुक्खमेव संतत्तं[2] ।
नरए नेरईयाणं अहोनिसिं पच्चमाणाणं ॥ ४९ ॥

एवं पभूयकालं अणुहविउं दारुणाइं दुक्खाइं ।
कहवि हु उव्वट्टित्ता जायंति तिरिक्खजोणीसु ॥ ५० ॥

तत्थवि छुहापिवासुण्हसीयवहबंधरोयवियणाहिं ।
भाररोवणनत्थणदमणंकुसतोत्तयाईहिं ॥ ५१ ॥

अ[3]वरोप्परभक्खणताडणाइदुक्खाइं विविहरुवाइं ।
पच्चणुभवंति बहुसो पुणो पुणो विविहजोणीसु ॥ ५२ ॥

तत्तो लहंति जइ कहवि दुल्लहं माणुसत्तणं जीवा।
तत्थवि जायइ दुक्खं सारीरं माणसं विविहं ॥ ५३ ॥

---

**तत्र कदर्थ्यमाना रक्षत शरणागता इति जल्पन्तः ।**
**स्मारितपूर्वभवा गाढतरं तैर्हन्यन्ते ॥ ४८ ॥ किं बहुना ॥**

**अक्षिनिमीलितमात्रं नास्ति सुखं दुःखमेव संततम् ।**
**नरके नैरयिकानामहर्निशं पच्यमानानाम् ॥ ४९ ॥**

**एवं प्रभूतकालमनुभूय दारुणानि दुःखानि ।**
**कथमपि हु उद्वर्त्य जायन्ते तिर्यग्योनीषु ॥ ५० ॥**

**तत्राऽपि क्षुधापिपासोष्णशीतवधबन्धरोगवेदनाभिः ।**
**भारारोपणनाथदमनाङ्कुशतोत्रादिभिः ॥ ५१ ॥**

**परस्परभक्षणताडनादिदुःखानि विविधरूपाणि ।**
**प्रत्यनुभवन्ति बहुशः पुनः पुन-र्विविधयोनीषु ॥ ५२ ॥**

**ततो लभन्ते यदि कथमपि दुर्लभं मनुष्यत्वं जीवाः ।**
**तत्राऽपि जायन्ते दुःखं शारीरं मानसं विविधम् ॥ ५३ ॥**

१. सुमराविय=स्मारितम् । २. संतत्तं=संततम्=निरन्तरम् । ३. अवरोप्परं=परस्परम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दारिद्दगरुयमोग्गरनिवायदुहिया करेंति अन्नेसिं ।
नीयाणंवि[1] आणत्तिं कदन्नलवपावणिच्छाए ॥ ५४ ॥

न गणिंति राइदियहं[2] वच्चंति सुदूरविसमदेसंपि ।
पविसंति विसमविवरं लंघति य जलनिहिं दीणा ॥ ५५ ॥

धणपावणवंछाए दुक्खं न गणिंति लोहगहगहिया ।
दिप्पंतकुंतपउरे पविसंति य भीमसंगामे ॥ ५६ ॥

इट्ठजणवियोगाओ अणिट्ठसंपावणे य जं दुक्खं ।
विविहावयाहि य तहा को पुण तं वन्निउं तरइ? ॥ ५७ ॥

बहुविहरोगायंकेहि पीडिया निव्वुइं न पाविंति ।
घिप्पंति जराइ तओ मरेंति तत्तो सुनिव्विन्ना ॥ ५८ ॥

जइ कइवि हु देवत्तं पाविंति तहिंपि जायए दुक्खं ।
ईसाविसायभयसोयलोहसंतत्त[3]चित्ताण ॥ ५९ ॥

---

**दारिद्रगुरुकमुद्गरनिपातदुःखिता कुर्वन्ति अन्येषाम् ।**
**नीचानामप्याज्ञप्तिं कदन्नलवप्रापणेच्छया ॥ ५४ ॥**

**न गणयन्ति रात्रिदिवसं व्रजन्ति सुदूरविषमदेशमपि ।**
**प्रविशन्ति विषमविवरं लङ्घयन्ति च जलनिधिं दीनाः ॥ ५५ ॥**

**धनप्रापणवाञ्छया दुःखं न गणयन्ति लोभग्रहग्रस्ताः ।**
**दीप्यमानकुन्तप्रचुरे प्रविशन्ति च भीमसंग्रामे ॥ ५६ ॥**

**इष्टजनवियोगादनिष्टसंप्रापणे च यद्दुःखम् ।**
**विविधापद्भिश्च तथा कः पुनस्तद्वर्णयितुं शक्यते ? ॥ ५७ ॥**

**बहुविधरोगातङ्कैः पीडिता निवृत्तिं न प्राप्नुवन्ति ।**
**गृह्यन्ते जरया ततो म्रियन्ते ततस्सुनिर्विण्णा ॥ ५८ ॥**

**यदि कदाचिदपि हु देवत्वं प्राप्नुवन्ति तस्मिन्नपि जायते दुःखम् ।**
**ईर्ष्याविषादभयशोकलोभसंतप्तचित्तानाम् ॥ ५९ ॥**

---

१. नीचानाम् । २. रात्रिदिवसम् । ३. संतत्तं= संतप्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पररिद्धिं पेच्छंता भिच्चा विव सामिएण आणत्ता ।
जायंति च[1]वणसमए देवावि हु दुक्खिया धणियं ॥ ६० ॥

[2]चुलसीइजोणिलक्खेक्कसंकुले इह भवे भमंतेहिं ।
तं नत्थि किंपि ठाणं [3]अणंतुखत्तो न जं एंतं ॥ ६१ ॥

सव्वत्थवि दु[4]क्खत्ता जायंति जिणिंदधम्मपरिहीणा ।
ता भो देवाणुपिया! करेह जिणदेसियं धम्मं ॥ ६२ ॥

सो [5]दुविगप्पो भणिओ जइधम्मो तह गिहत्थधम्मो य ।
दुविहस्सवि विन्नेयं सम्मत्तं गुणगणावासं ॥ ६३ ॥

[6]तत्तत्थसद्दहाणं सुहायपरिणामरूवयं तं तु ।
जीवाइणो पयत्था तत्तं पुण होइ विन्नेयं ॥ ६४ ॥

जीवाऽजीवापुन्नं पावासवसंवरा य निज्जरणा।
बंधो मुक्खो य तहा तत्ताणि इमाणि नव होंति ॥ ६५ ॥

---

**परर्द्धिं प्रेक्षमाणा भृत्या इव स्वामिनाऽऽज्ञप्ता ।
जायन्ते च्यवनसमये देवाऽपि खलु दुःखिता गाढम् ॥ ६० ॥**

**चतुरशीतियोनिलक्षैकसङ्कुल इहभवे भ्राम्यद्भिः ।
तन्नास्ति किमपि स्थानमनन्तकृत्वसः न यदायतम् ॥ ६१ ॥**

**सर्वत्राऽपि दुःखार्त्ता जायन्ते जिनेन्द्रधर्मपरिहीनाः ।
तस्माद् भो देवानुप्रियाः ! कुरुत जिनदेशितं धर्मम् ॥ ६२ ॥**

**स द्विविकल्पो भणितो यतिधर्मस्तथा गृहस्थधर्मश्च ।
द्विविधस्याऽपि विज्ञेयं सम्यकत्वं गुणगणावासम् ॥ ६३ ॥**

**तत्त्वार्थश्रद्धानं शुभायपरिणामरूपकं तत्तु ।
जीवादयः पदार्थास्तत्त्वं पुन-र्भवति विज्ञेयम् ॥ ६४ ॥**

**जीवाजीवापुन्यं पापाश्रवसंवराश्च निर्जरा ।
बन्धो मोक्षश्च तथा तत्त्वानीमानि नव भवन्ति ॥ ६५ ॥**

---

१. च्यवनं=मरणम् । २. चुलसीई=चतुरशीतिः । ३. अणंतखुत्तो=अनन्तवारम् । ४. दुःखार्ता । ५. द्विविकल्प=द्विभेदः । ६. तत्त्वार्थश्रद्धानम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुहुमा बायर बेइंदिया य तेइंदिया य चउरिंदी।
सन्नी अस्सन्नी खलु चोद्दस पज्जत्तऽपज्जत्ता। ६६ ॥

धम्माऽधम्माऽऽगासा तियतियभेया य तहेव कालो य ।
खंधा देसपएसा परमाणू अजीव चोद्दसहा ॥ ६७ ॥

सायं [1]उच्चागोयं [2]सत्ततीसं च [3]नामपगईओ ।
तिण्णि य आउणि तहा [4]बायालं पुन्नपग[5]डीओ ॥ ६८ ॥

[6]नाणंतरायदसगं [7]दंसण नव मोहपगइछव्वीसं ।
नामस्स चउत्तीसं तिण्ह य एक्किक्क पावाउ ॥ ६९ ॥

इंदिय कसाय अव्वय किरिणा पण चउर पण य पणवीसा ।
जोगा तिन्नेव भवे बायालं आसवो भणिओ ॥ ७० ॥

समिई गुत्ती धम्मो [8]अणुप्पेहपरीसहा चरित्तं च ।
[9]सत्तावन्नं भेया पणतियभेयाइ संवरणे ॥ ७१ ॥

---

**सूक्ष्मा बादरा द्वीन्द्रियाश्च त्रीन्द्रियाश्च चतुरिन्द्रियाः ।**
**संज्यसंज्ञी खलु चतुर्दश पर्याप्तापर्याप्ताः ॥ ६६ ॥**

**धर्माधर्माकाशनि त्रयत्रयभेदानि च तथैव कालश्च ।**
**स्कन्धा देशप्रदेशाः परमाणुरजीवश्चतुर्दशधा ॥ ६७ ॥**

**शातं उच्चैर्गोत्रं सप्तत्रिंशच्च नामप्रकृतयः ।**
**त्रिणि चायुन्सि तथा द्विचत्वारिंशत् पुन्यप्रकृतयः ॥ ६८ ॥**

**ज्ञानांतरायदशकं दर्शनं नव मोहप्रकृतिषड्विंशति ।**
**नामस्य ( नामकर्मणः ) चतुस्त्रिंशत् त्रयाणांच एकैका पापाः ( पापप्रकृतयः ) ॥ ६९ ॥**

**इन्द्रियकषायाव्रतक्रिया पञ्च चत्वारःपञ्च च पञ्चविंशति ।**
**योगास्त्रय एव भवेत् द्विचत्वारिंशदाश्रवो भणितः ॥ ७० ॥**

**समिति-गुप्ति-धर्मोऽनुप्रेक्षापरीषहाश्चारित्रं च ।**
**सप्तपञ्चाशत् भेदाः पञ्चत्रयभेदादयः संवरणे ॥ ७१ ॥**

---

१. उच्चैर्गोत्रम् । २. सप्तत्रिंशत् । ३. नामकर्मप्रकृतय इत्यर्थः । ४. द्विचत्वारिंशत् । ५. पगडी=प्रकृतिः । ६. ज्ञानावरणाऽन्तरायदशकमित्यर्थः । ७. दर्शनावरणमित्यर्थः ।८. अनुप्रेक्षा=भावना । ९. सप्तपञ्चाशत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणसणभेयाइ तवो बारसहा तेण निज्जरा भणिया ।
कणगावलिभेयाओ अहव तवोऽणेगहा होइ ॥ ७२ ॥

पयइठिईअणुभागपएसभेया चउव्विहो बंधो ।
अट्ठविहकम्मविगमो मोक्खो पुण सासओ भणिओ ॥ ७३ ॥

एएसिं सद्दहाणे अरिहं देवो सुसाहुणो गुरुणो।
इय पडिवत्तिनिमित्तं[1] सम्मत्तं होइ विन्नेयं ॥ ७४ ॥

सावज्जजोगपरिवज्जणं तु मणवयणकायजोगेहिं ।
एसो जईण धम्मो दुरणुचरो[2] मंदसत्ताणं ॥ ७५ ॥

कायव्वा जेण दया छण्हवि पुढवाइयाण जीवाण।
सव्वोवाहिविसुद्धं भणियव्वं सच्चयं वयणं ॥ ७६ ॥

तिणमित्तंपि अदिन्नं न य घित्तव्वं असुद्धचित्तेण ।
धारेयव्वं च सया नव गुत्तिसणाहबंभवयं[3] ॥ ७७ ॥

---

अनशनभेदादि तपो द्वादशधा तेन निर्जरा भणिता ।
कनकावलीभेदाऽथवा तपोऽनेकधा भवति ॥ ७२ ॥

प्रकृतिस्थित्यनुभागप्रदेशभेदाः चतुर्विधो बन्धः ।
अष्टविधकर्मविगमो मोक्षः पुनःशाश्वतो भणितः ॥ ७३ ॥

एतेषां श्रद्धाने अर्हन् देवः सुसाधवो गुरवः ।
इति प्रतिपत्तिनिमित्तं सम्यक्त्वं भवति विज्ञेयम् ॥ ७४ ॥

सावद्ययोगपरिवर्जनं तु मनोवचनकाययोगैः ।
एष यतीनां धर्मो दुरनुचरो मन्दसत्त्वानाम् ॥ ७५ ॥

कर्तव्या येन दया षण्णामपि पृथिव्यादीनां जीवानाम् ।
सर्वोपाधिविशुद्धं भणितव्यं सत्यं वचनम् ॥ ७६ ॥

तृणामात्रमप्यदत्तं न च गृहीतव्यमशुद्धचितेन ।
धर्तव्यं सदा नव गुप्तिसनाथब्रह्मव्रतम् ॥ ७७ ॥

---

१. पडिवत्ती=प्रतिपत्तिः=विज्ञानम् । २. दुरनुचरः=दुरनुष्ठानः । ३. ब्रह्मव्रतम्=ब्रह्मचर्यम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धम्मोवगरणवज्जो थेवोवि परिग्गहो न कायव्वो ।
आहारचउक्कंपि हु रयणीए नेव भोत्तव्वं ॥ ७८ ॥

समिईउ पंच गुत्तीउ तिन्नि निच्चं च सेवियव्वाओ ।
जेयव्वा तह उइया[1] बावीसपरीसहा सम्मं ॥ ७९ ॥

कायव्वं सत्तीए वेयवच्चं च सूरिपमुहाण।
नरतिरिदेवोहकया उवसग्गा तह य सहियव्वा ॥ ८०॥

सद्दाइसु विसएसुं रागद्दोसा न चेव कायव्वा ।
बायालदोससुद्धो भोत्तव्वो कारणे पिंडो ॥ ८१ ॥

वेयणवेयावच्चे ईरियट्ठाए[2] य संजमट्ठाए।
तह पाणवत्तियाए छट्ठं पुण धम्मचिंताए ॥ ८२ ॥

कायव्वो सज्झाओ परिहरियव्वाओ सव्वविकहाओ ।
उज्जमियव्वं सययं सब्भिंतरबाहिरतवम्मि ॥ ८३ ॥

---

**धर्मोपकरणवर्जः स्तोकोऽपि परिग्रहो न कर्तव्यः ।**
**आहारचतुष्कमपि खलु रजन्यां नैवं भोक्तव्यम् ॥ ७८ ॥**

**समितयः पञ्च गुप्तयस्तिस्रो नित्यञ्च सेवितव्याः ।**
**जेतव्यास्तथोदिता द्वाविंशतिपरीषहाः सम्यक्॥ ७९ ॥**

**कर्तव्यं शक्त्या वैयावृत्यं च सूरिप्रमुखानाम् ।**
**नरतिर्यग्देवौघकृता उपसर्गास्तथा च सोढव्याः ॥ ८० ॥**

**शब्दादिषु विषयेषु रागद्वेषौ नैवं कर्तव्यौ ।**
**द्विचत्वारिंशत्दोषशुद्धो भोक्तव्यः कारणे पिण्डः ॥ ८१ ॥**

**वेदनवैयावृत्ये ईरियार्थे च संयमार्थे ।**
**तथा प्राणवृत्तिकायां षष्ठं पुन-र्धर्मचिन्तायाम् ॥ ८२ ॥**

**कर्तव्यः स्वाध्यायः परिहर्तव्याः सर्वविकथाः ।**
**उद्यमितव्यं सततं साभ्यन्तरबाह्यतपसि ॥ ८३ ॥**

---

**१. उदिताः सन्त इत्यर्थः। २. ईर्या = कस्यापि जन्तोर्बाधा न स्यात् तथा भूमिं विलोक्य पादन्यासः।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोत्तूण अट्टरुद्दे झाएयव्वाणि धम्मसुक्काणि।
भवेयव्वो य अणिच्चयाइवरभावणानिवहो ॥ ८४ ॥

अब्भसियव्वो विणओ पावा स[1]च्छंदया न कायव्वा।
निच्चंपि अणुट्ठेओ दसप्पयारोवि जइधम्मो ॥ ८५ ॥

खंती मद्दव अज्जव मु[2]त्ती तवसंजमे य बोद्धव्वे ।
सच्चं सोयं [3]आकिंचणं च बं[4]भं जइधम्मो ॥ ८६ ॥

वसियव्वं मुणिमज्झे नो कायव्वा कुसीलसंसग्गी ।
पंचविहोवि पमाओ परिहरियव्वो पयत्तेण ॥ ८७ ॥

मज्जं विसयकसाया निद्दा विगहा[5] य पंचमी भणिया।
इय पंचविहपमाओ जीवं पाडेइ संसारे ॥ ८८ ॥

किं बहुणा धीदुब्बलमणतावकरो उ जावजीवाए ।
वोढव्वो अट्ठारससीलंगसहस्सपब्भारो ॥ ८९ ॥

---

**मुक्त्वा आर्त्तरौद्रान् ध्यातव्ये धर्मशुक्ले ।**
**भावितव्यश्चानित्यादिवरभावनानिवहः ॥ ८४ ॥**

**अभ्यसितव्यो विनयः पापानि स्वाच्छान्दिकानि न कर्तव्यानि ।**
**नित्यमपि अनुष्ठेयो दशप्रकारोऽपि यतिधर्मः ॥ ८५ ॥**

**क्षान्तिः मार्दव आर्जवो मुक्तिस्तपःसंयमे च बोद्धव्ये ।**
**सत्यं शौचमाकिञ्चन्यं च ब्रह्म यतिधर्मः ॥ ८६ ॥**

**वसितव्यं मुनिमध्ये न कर्तव्या कुशीलसंसर्गीः ।**
**पञ्चविधोऽपि प्रमादः परिहर्तव्यः प्रयत्नेन ॥ ८७ ॥**

**मद्यं विषयकषाया निद्रा विकथा च पञ्चमी भणिता ।**
**इति पञ्चविधप्रमादः जीवं पातयति संसारे ॥ ८८ ॥**

**किं बहुना धीदुर्बलमनस्तापकरस्तु यावज्जीवम् ।**
**वोढव्योऽष्टादशशीलाङ्गसहस्त्रप्राग्भारः ॥ ८९ ॥**

---

१. स्वाच्छान्दिकानि । २. मुक्तिः=लोभाभावः । ३. अकिञ्चन्यम्=अकिञ्चनस्य द्रविणरहितस्य भावः कर्म वेति विगृह्य । ४. बंभं=ब्रह्म । ५. विकथा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कीरंतो जइधम्मो खिप्पं मोक्खम्मि नेइ नरनाह! ।
दीहरकालेणं पुण सावगधम्मोवि तं सव्वं ॥ ९०॥

पंच य अणुव्वयाइं गुणव्वयाइ च होंति तिन्नेव ।
सिक्खावयाइं चउरो सावगधम्मो दुवालसहा[1] ॥ ९१ ॥

एमाइवित्थरेणं दुविहेवि हु साहियम्मि धम्मम्मि।
पत्थावं नाऊणं रन्ना सूरी इमं पुट्ठो ॥ ९२ ॥

कमलावईइ पुत्तो अडवीए जयमेत्तओ केण ।
अवहरिओ, पुव्वकयं किंवा वेरं सरंतेण? ॥ ९३ ॥

वुड्ढिंगओ स कत्थ व भयवं! कइया व अम्ह सो मिलिही? ।
एयं सवित्थरेणं साहेह अणुग्गहं काउं ॥ ९४ ॥

नाऊण य उवगारं कहिज्जमाणे पभूयलोयस्स ।
अह केवलिणा भणियं कहिमो आयन्नसु नरिंद ! ॥ ९५ ॥

---

**क्रियमाणो यतिधर्मः क्षिप्रं मोक्षं नयति नरनाथ ! ।**
**दीर्घकालेन पुनः श्रावकधर्मोऽपि तं सर्वम् ॥ ९० ॥**

**पञ्च चाणुव्रतानि गुणव्रतानि च भवति त्रिण्येव ।**
**शिक्षाव्रतानि चत्वारि श्रावकधर्मो द्वादशधा ॥ ९१ ॥**

**एवमादिविस्तरेण द्विविधेऽपि खलु कथिते धर्मे ।**
**प्रस्तावं ज्ञात्वा राज्ञा सूरिरिदम् पृष्टम् ॥ ९२ ॥**

**कमलावत्याः पुत्रोऽटव्यां जातमात्रतः केन ।**
**अपहृतः, पूर्वकृतं किंवा वैरं स्मरता ? ॥ ९३ ॥**

**वृद्धिं गतः स कुत्र वा भगवन् ! कदा वा अस्माकं स मीलिष्यति ? ।**
**एतत् सविस्तरेण कथयत अनुग्रहं कृत्वा ॥ ९४ ॥**

**ज्ञात्वा चोपकारं कथ्यमाने प्रभूतलोकस्य ।**
**अथ केवलिना भणितं कथयामः आकर्णय नरेन्द्र ! ॥ ९५ ॥**

---

१. द्वादशधा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धायइसंडे दीवे पुरच्छिमद्धम्मि भरहखित्तम्मि ।
अत्थि पुरी पोराणा नामेणं अवरकंकत्ति ॥ ९६ ॥

तीए अंबडवणिणो महिला नामेण अत्थि अच्छुत्ता।
तीए कमेण जाया वररूवा तिन्नि पुत्ताओ ॥ ९७ ॥

मंडणमल्हणचंदणनामा, तेसिं च तिन्नि महिलाओ।
लच्छिसरस्सइसंपयनामाओ पवररूवाओ ॥ ९८ ॥

पयईइ तणुकसाया अन्नोन्नं पवरपीइसंजुत्ता ।
दाणरया संतुट्ठा सुहेण अच्छंति ते वणिणो ॥ ९९ ॥

अह अन्नया कयाइवि लच्छी वंठेणं निन्ननामेण ।
दिट्ठा, अब्भुववन्नो सो तीए रुवलावन्ने ॥ १०० ॥

पत्थेइ य तं बहुसो सा पुण तं नेच्छई मणेणावि ।
अह अन्नया तैलाए तोयैनिमित्तं गया लच्छी ॥ १०१ ॥

---

**धातकीखण्डे द्वीपे पश्चिमार्धे भरतक्षेत्रे ।**
**अस्ति पुरी पौराणां नाम्ना अपरकङ्केति ॥ ९६ ॥**

**तस्यामबडवणिग् महिला नाम्ना अस्त्यक्षुब्धा ।**
**तस्याः क्रमेण जाता वररूपास्त्रयः पुत्राः ॥ ९७ ॥**

**मण्डणमल्हणचन्दननामानस्तेषां च तिस्त्रो महिलाः ।**
**लक्ष्मी-सरस्वती-संपदानाम्न्याः प्रवररूपाः ॥ ९८ ॥**

**प्रकृत्या तनुकषाया अन्योन्यं प्रवरप्रीतिसंयुक्ताः ।**
**दानरतास्संतुष्टा सुखेनाऽऽसते ते वणिजः ॥ ९९ ॥**

**अथान्यदा कदाचिदपि लक्ष्मीः वण्ठेन निम्ननाम्ना ।**
**दृष्टा, अभ्युपपन्नः स तस्या रूपलावण्ये ॥ १०० ॥**

**प्रार्थयति च तां बहुशः सा पुनस्तं नेच्छति मनसाऽपि ।**
**अथ अन्यदा तडागे तोयनिमित्तं गता लक्ष्मीः ॥ १०१ ॥**

१. पुरच्छिमद्धं=पश्चिमार्धम् । २. वंठो=दासः। ३. अभ्युपपन्नः । ४. तडागे । ५. तोयं=जलम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुरयारुढो अह निन्नओवि पत्तोऽणुमग्गओ तीए ।
वियणे गहिया मंड्डाइ[1] रोविया[2] तुरयपट्ठीए ॥ १०२ ॥

विलवंती वेगपहाविएण तुरएण पाडिया अडविं ।
भिल्लेहिं समं जुज्झम्मि मारिओ निन्नओ रंन्ने[3] ॥ १०३ ॥

गहियाभरणा लच्छी मुक्का भिल्लेहिं तत्थ अडवीए ।
हिंडंती तत्थ मूढदिसा असिया सीहेण छुहिएण ॥ १०४ ॥

अह सा मल्हणपत्ती सरस्सती मोहिलेण वणिएण ।
पत्थिज्जंती[4] पइणो साहेइ जहट्ठियं सव्वं ॥ १०५ ॥

अह मल्हणेण रन्नो गंतुं सिट्ठम्मि तम्मि वुतंते ।
उद्दालियदविणो मोहिलोवि निव्वासिओ रन्ना ॥ १०६ ॥

पुव्वसयसहस्साइं बहूणि परिवालिऊण नियमाउं[5] ।
तिन्निवि कालं काउं निबद्धमणुयाउया तत्तो ॥ १०७ ॥

---

तुरगारूढोऽथ निन्नकोऽपि प्राप्तोऽनुमार्गतस्तस्याः ।
विजने गृहीता बलात् रोपिता तुरङ्गपृष्ठे ॥ १०२ ॥

विलपन्ती वेगप्रधावितेन तुरङ्गेण पातिताऽटवीम् ।
भिल्लैस्समं युद्धे मृतो निन्नकोऽराण्ये ॥ १०३ ॥

गृहीताऽऽभरणा लक्ष्मी-र्मुक्ता भिल्लैस्तत्राटव्याम् ।
भ्राम्यन्ती तत्र मूढदिक् भक्षिता, सिंहेन क्षुधितेन ॥ १०४ ॥

अथ सा मल्हणपत्नी सरस्वती मोहिलेन वणिजा ।
प्रार्थ्यमाना पतये कथयति यथास्थितं सर्वम् ॥ १०५ ॥

अथ मल्हणेन राज्ञो गत्वा शिष्टे तस्मिन् वृतान्ते ।
उद्दालितद्रव्यो मोहिलोऽपि निर्वासितो राज्ञा ॥ १०६ ॥

पूर्वशतसहस्त्राणि बहुनि परिपाल्य निजमायुः ।
त्रयोऽपि कालं कृत्वा निबद्धमनुजायुष्कास्ततः ॥ १०७ ॥

---

१. बलात् । २. रोपिता । ३. अरण्ये । ४. प्रार्थ्यमाना । ५. निजमायुः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जंबुद्दीवे एत्थं अत्थि पुरी मेहलावती नाम।
एरवए वरखेत्ते आरियदेसम्मि वित्थिन्ना ॥ १०८ ॥

भीमरहो तत्थासी राया कुसुमावली उ से देवी ।
तीए पुत्तताए[1] उववन्नो मंडणो ताव ॥ १०९ ॥

जाओ य उचियसमए देवकुमारोवमो विसालच्छो ।
कणगरहो से नामं विहियं उचियम्मि समयम्मि ॥ ११० ॥

कमसो जोव्वणपत्तो विसुद्धवंसाण रायकन्नाण ।
रायसिरीपमुहाणं पवराणं गाहिओ पाणिं ॥ १११ ॥

जुवराय पए ठविओ भुजइ माणुस्सए पवरभोए ।
अंतेउरमज्झगओ देवो विव देवलोगम्मि ॥ ११२ ॥

तीइ नयरीइ [2]इब्भा सहोयर दोन्नि आसि [3]सत्थाहा ।
सागरदत्तो य तहा समुद्ददत्तो य सुपसिद्धा ॥ ११३ ॥

---

**जम्बूद्वीपेऽत्रास्ति पुरी मेखलावती नाम्नी ।**
**ऐरावते वरक्षेत्रे आर्यदेशे विस्तीर्णा ॥ १०८ ॥**

**भीमरथस्तत्राऽऽसीत् राजा कुसुमावली तु तस्य देवी ।**
**तस्याः पुत्रतयोपपन्नो मण्डनस्तावत् ॥ १०९ ॥**

**जातश्चोचितसमये देवकुमारोपमो विशालाक्षः ।**
**कनकरथस्तस्य नाम विहितमुचिते समये ॥ ११० ॥**

**क्रमशो यौवनप्राप्तो विशुद्धवंशानां राजकन्यानाम् ।**
**राजश्रीप्रमुखानां प्रवराणां ग्राहितः पाणिम् ॥ १११ ॥**

**युवराजपदे स्थापितो भुनक्ति मानुष्यान् प्रवरभोगान् ।**
**अन्तःपुरमध्यगतो देव इव देवलोके ॥ ११२ ॥**

**तस्यां नगर्यां इभ्यौ सहोदरौ द्वा आस्तां सार्थवाहौ ।**
**सागरदत्तश्च तथा समुद्रदत्तश्च सुप्रसिद्धौ ॥ ११३ ॥**

१. पुत्रतया । २. इब्भो=वणिक्, इभ्य=श्रेष्ठी वा । ३. सार्थवाहौ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सो निन्नयवंठो निहओ भिल्लेहिं तत्थ अडवीए ।
कइवयभवगहणाइं हिंडित्ता तिरियजाईसु ॥ ११४ ॥

[1]उव्वट्टिऊण पुत्तो सागरदत्तस्स सत्थवाहस्स।
धन्नाए भारियाए सुबंधुनामो समुप्पन्नो ॥ ११५ ॥ युग्मम् ॥

सोवि हु मल्हणजीवो कालं काऊण आउपज्जंते ।
जाओ सुदंसणाए भज्जाए समुद्ददत्तस्स ॥ ११६ ॥

पुत्तो धणवइनामो सुरुवजुत्तो कलासु [2]पत्तट्ठो ।
एत्तो य अत्थि नयरी विजया तत्थेव एरवए ॥ ११७ ॥ युग्मम् ॥

तीए समिद्धिजुत्तो धणभूई नाम आसि सत्थाहो ।
महिला सुंदरिनामा पुत्तो य सुधम्मनामोत्ति ॥ ११८ ॥

अह चंदणोवि वणिओ मरिउण तओ सुधम्मनामस्स ।
[3]एगोयरो कणिट्ठो जाओ धणवाहणो नाम ॥ ११९ ॥

---

**अथ स निन्नकवण्ठो निहतो भिल्लैस्तत्राटव्याम् ।**
**कतिपयभवगहनानि भ्रान्त्वा तिर्यग्जातिषु ॥ ११४ ॥**

**उद्वृत्य पुत्रः सागरदत्तस्य सार्थवाहस्य ।**
**धन्याया आर्यायाः सुबन्धुनामा समुत्पन्नः ॥ ११५ ॥ युग्मम् ॥**

**सोऽपि खलु मल्हणजीवः कालं कृत्वा आयुः पर्यन्ते ।**
**जातः सुदर्शनाया भार्यायाः समुद्रदत्तस्य ॥ ११६ ॥**

**पुत्रो धनपतिनामा सुरूपयुक्तः कलासु प्राप्तार्थः**
**इतश्चास्ति नगरी विजया तत्रैव ऐरावते ॥ ११७ ॥ युग्मम् ॥**

**तस्यां समृद्धियुक्तो धनभूति-र्नामाऽऽसीत् सार्थवाहः ।**
**महिला सुन्दरीनाम्नी पुत्रश्च सुधर्मनामेति ॥ ११८ ॥**

**अथ चन्दनोऽपि वणिग् मृत्वा ततः सुधर्मनाम्नः ।**
**एकोदरः कनिष्ठो जाता घनवाहनो नामा ॥ ११९ ॥**

---

१. उद्वृत्त्य=निष्क्रम्य । २. बहुशिक्षितः । ३. एकोदरः=सहोदरः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थेव य एरवए सुपइट्ठपुरम्मि आसि हरिदत्तो ।
इब्भो तस्स य महिला विणयवई विणयसंजुत्ता ॥ १२० ॥

पुत्तो उण वसुदत्तो अह सा लच्छी तया ओ अडवीए ।
सीहहया मरिऊणं भभिऊण तिरिक्खजोणीसु ॥ १२१ ॥

विणयवईए धूया जाया ओ सुलोयणत्ति नामेण ।
वसुदत्तस्स कणिट्ठा सुरुवरुवा सुरुवहुव्व ॥ १२२ ॥ युग्मम् ॥

सावि हु चंदणभज्जा कालं काऊण संपया तत्तो ।
जाया सुलोयणाए कणिट्ठभगिणी अणंगवई ॥ १२३ ॥

एत्थंतरम्मि मल्हाणभज्जावि सरस्सई मेया संती ।
ताणं दोण्हवि लहुई वसुमइनामा समुप्पन्ना ॥ १२४ ॥

एवं च ताओ तिन्निवि वसेण भवियव्वायाइ एगत्थ।
जायाओ भगिणीओ अवरोप्परनेहकलियाओ ॥ १२५ ॥

---

तत्रैव चैरावते सुप्रतिष्ठपुरेऽऽसीत् हरिदत्तः ।
इभ्यस्तस्य च महिला विनयवती विनयसंयुक्ता ॥ १२० ॥

पुत्रः पुन-र्वसुदत्तोऽथ सा लक्ष्मीस्तदा ओ अटव्याम् ।
सिहहता मृत्वा भ्रान्त्वा तिर्यग्योनिषु ॥ १२१ ॥

विनयवत्या दुहिता जाता ओ सुलोचनेति नाम्ना ।
वसुदत्तस्य कनिष्ठा सुरूपरूपा सुरवधूरिव ॥ १२२ ॥ युग्मम् ॥

साऽपि खलु चन्दनभार्या कालं कृत्वा संपदा ततः ।
जाता सुलोचनायाः कनिष्ठभगिनी अनङ्गवती ॥ १२३ ॥

अत्रान्तरे मल्हणमार्याऽपि सरस्वती मृता सती ।
तयो-र्द्वयोरपि लध्वी वसुमतीनामा समुत्पन्ना ॥ १२४ ॥

एवं च तास्तिस्त्रोपि वशेन भवितव्यताया एकत्र ।
जाता भगिन्यः परस्परस्नेहकलिताः ॥ १२५ ॥

---

१. तिर्यग्योनिषु । २. मृता सती ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोव्वणमणुपत्ताओ समाणजाईण रूवजुत्ताण ।
अणुरूवाण वराणं [1]मायावित्तेहिं वरियाओ ॥ १२६ ॥

अविय। जेट्ठा सुलोयणा सा परिणीया निन्नवंठजीवेण ।
सागरदत्तसुएणं सुबंधुनामेण वणिएण ॥ १२७ ॥

बीया अणंगवइया धणभूइसुएण विजयनयरीए ।
धणवाहणनामेणं परिणीया पुव्वदइएण ॥ १२८ ॥

तइया वसुमइनामा मल्हणजीवेण पुव्वदइएण ।
धणवइणा परिणीया तणएण समुद्ददत्तस्स ॥ १२९ ॥

जिट्ठं सुलोयणं वज्जिऊण भवियव्वयानिओएण ।
पुव्वभववल्लहेहिं जुत्ताओ नेहकलिएहिं ॥ १३० ॥

पुव्वभवब्भासाओ सुलोयणा वल्लहा सुबंधुस्स ।
तीए उण [2]सो न [3]तहा, एवं वच्चंति दिवसाइं ॥ १३१ ॥

---

**यौवनमनुप्राप्ताः समानजातीनाम् रूपयुक्तानाम् ।**
**अनुरूपाणाम् वराणाम् मातापितृभ्यां वारिताः [ परिणायिताः ] ॥ १२६ ॥**

**अपि च । ज्येष्ठा सुलोचना सा परिणीता निन्नवण्ठजीवेन ।**
**सागरदत्तसुतेन सुबन्धुनाम्ना वणिजा ॥ १२७ ॥**

**द्वितीयाऽनङ्गवती धनभूतिसुतेन विजयनगर्याम् ।**
**धनवाहननाम्ना परिणीता पूर्वदयितेन ॥ १२८ ॥**

**तदा वसुमतीनाम्नी मल्हणजीवेन पूर्वदयितेन ।**
**धनपतिना परिणीता तनयेन समुद्रदत्तस्य ॥ १२९ ॥**

**ज्येष्ठां सुलोचनां वर्जयित्वा भवितव्यतानियोगेन ।**
**पूर्वभववल्लभै-र्युक्ताः स्नेहकलितैः ॥ १३० ॥**

**पूर्वभवाभ्यासात् सुलोचना वल्लभा सुबन्धोः ।**
**तस्याः पुनः स न तथा, एवं व्रजन्ति दिवसानि ॥ १३१ ॥**

१. मातापितृभ्याम् । २. सः=सुबन्धुः । ३. तथा=वल्लभः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाइवि कणयरहो तुरयवाहणनिमित्तं ।
[1]भडचडयरेण सहिओ निग्गच्छइ रायमग्गेण॥ १३२ ॥

ताव य ना[2]यरियाओ नियनियहम्मियतलेसु चडिऊण ।
कुमरं निग्गच्छंतं पुलइउमेवं पयत्ताओ ॥ १३३ ॥

एक्का विलासपउरं कुमरं दट्ठुं अणंगपडिरूवं ।
क[3]यउन्ना सा जीएँ[4] एसो दइओत्ति चिंतेइ ॥ १३४ ॥

अन्ना कुमरपलोयणतग्गयचित्ता विमुक्कवावारा ।
निप्फंदलोयणजुया सुरवहूलीलं समुव्वहइ ॥ १३५ ॥

अन्ना उण करसंठियमुत्ताहलतारहारिया [5]रेहइ ।
[6]फलिहक्खमालवावडझाणट्ठियजोगिणिसरिच्छा ॥ १३६ ॥

को[7]उगरहसपयट्टा गुरुजणसंकाइ तह नि[8]यत्तंती ।
रेहइ दोलारूढव्व कावि कुमरस्स निग्गमणे ॥ १३७ ॥

---

**अथान्यदा कदाचिदपि कनकरथस्तुरगवाहननिमित्तम् ।**
**भटपटलेन सहितो निर्गच्छति राजमार्गेण ॥ १३२ ॥**

**तावच्च नागरिक्यः निजनिजहर्म्यतलेषु चटित्वा ( आरुह्य ) ।**
**कुमारं निगच्छन्तं द्रष्टुमेवं प्रवृत्ताः ( प्रयताः ) ॥ १३३ ॥**

**एका विलासप्रचुरं कुमारं दृष्ट्वाऽनङ्गप्रतिरूपम् ।**
**कृतपुण्या सा यस्या एष दयित इति चिन्तयति ॥ १३४ ॥**

**अन्या कुमारप्रलोकनतद्गतचित्ता विमुक्तव्यापारा ।**
**निष्पन्दलोचनयुगा सुरवधूलीलां समुद्वहति ॥ १३५ ॥**

**अन्या पुनः करसंस्थितमुक्ताफलतारहारिका राजते ।**
**स्फटिकाक्षमालाव्यापृतध्यानस्थितयोगिनीसदृशी ॥ १३६ ॥**

**कौतुकरभसप्रवृत्ता गुरुजनशङ्कया तथा निवर्तमाना ।**
**राजते दोलरूढेव काऽपि कुमारस्य निर्गमने ॥ १३७ ॥**

---

१. भटपटलेन। २. नागरिक्यः। ३. कृतपुण्या। ४. यस्याः। ५.राजते ६. स्फटिकाक्षमाला-व्यापृतध्यानस्थितयोगिनीसदृशी। ७. कौतुकरभसप्रवृत्ता। ८. निवर्तमाना।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीलाचलंतलोयणकुमरपलोयणविमुक्कनीसासा ।
मयणसरसल्लियंगिव्व नज्जए चउरसहियाहिं[1] ॥ १३८ ॥

कावि हु चुंबइ बालं अन्ना सहियाइ लग्गए गलए ।
अन्ना करेइ गीयं कावि हु उच्चं समुल्लवइ ॥ १३९ ॥

लीलाचलंतगीवो जत्तो जत्तो नियच्छइ[2] कुमारो ।
सोहग्गमहो[3] वड्ढइ तहिं तहिं नयरनारीणं ॥ १४० ॥

एवं च समयणाहिं पुलइज्जंतो[4] स नयरनारीहिं ।
पत्तो कमेण सागरदत्तगिहासन्नभूभागे ॥ १४१ ॥

दिट्ठो सुलोयणाए अवलोयणसंठियाइ तेणावि ।
दिट्ठा इमा सकज्जलसिणिद्धपिहुनयणसोहिल्ला ॥ १४२ ॥

पुव्वभवब्भासाओ अवरोप्परदंसणाओ संजाओ ।
अइगुरुओ अणुराओ तक्खणमेत्तेण दोण्हंपि ॥ १४३ ॥

---

लीलाचलल्लोचनकुमारप्रलोकनविमुक्तनिःश्वासाः ।
मदनशरशल्याङ्गी इव ज्ञायते चतुरसखीभिः ॥ १३८ ॥

काऽपि खलु चुम्बते बालमन्या सख्यु-र्लगति गलके ।
अन्या करोति गीतं काऽपि हु उच्चं समुल्लपति ॥ १३९ ॥

लीलाचलद्ग्रीवो यतो यतः पश्यति कुमारः ।
सौभाग्यमहो वर्धते तत्र तस्मिन् नगरनारीणाम् ॥ १४० ॥

एवञ्च समदनाभि-र्दृश्यमानः स नगरनारीभिः ।
प्राप्तः क्रमेण सागरदत्त गृहासन्नभूभागे ॥ १४१ ॥

दृष्टः सुलोचनयाऽवलोकनसंस्थितया तेनाऽपि ।
दृष्टेयम् सकज्जलस्निग्धपृथुनयनशोभावती ॥ १४२ ॥

पूर्वभवाभ्यासात् परस्परदर्शनतः सञ्जातः ।
अतिगुरुकोऽनुरागस्तत्क्षणमात्रेण द्वयोरपि ॥ १४३ ॥

---

१. चतुरसखीभिः । २. पश्यति । ३. महः=उत्सवः । ४. दृश्यमानः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह निग्गओ तुरंतो तुरंगमारूढविग्गहो कुमरो ।
देहेण न चित्तेणं सुलोयणारूवहयहियओ ॥ १४४ ॥

पुट्ठो अणेण सुमई बालवयंसो वयसं ! कस्सेसा ।
दप्पणवावडहत्था अवलोयणसंठिया जुवई ? ॥ १४५ ॥

एसा कुमर! सुलोयणनामा दइया सुबंधुवणियस्स ।
सागरदत्तसुयस्स ओ इय भणिए सुमइणा कमसो ॥ १४६ ॥

आवाहिऊण तुरए समागओ नियगिहम्मि कणगरहो ।
मयणसरविहुरियंगो चिंतइ तप्पावणोवायं ॥ १४७ ॥

किं मज्झ विभूईए किंवा अंतउरेण रज्जेण?।
जो तीए मुहकमले छप्पयलीलं न पावेमि ॥ १४८ ॥

जइवि हु लोयविरुद्धं सुकुलुप्पन्नाण एरिसं कज्जं ।
तहवि हु तीए विउत्तो सत्तो धरिउं न जीयंपि ॥ १४९ ॥

---

**अथ निर्गतस्त्वरमाणस्तुरङ्गमारूढविग्रहः कुमारः ।**
**देहेन न चित्तेन सुलोचनारूपहतहृदयः ॥ १४४ ॥**

**पृष्टोऽनेन सुमति-र्बालवयस्यो वयस्य ! कस्यैषा ।**
**दर्पणव्यापृतहस्तऽवलोकनसंस्थिता युवती ? ॥ १४५ ॥**

**एषा कुमार ! सुलोचनानाम्नी दयिता सुबन्धुवणिजः ।**
**सागरदत्तसुतस्य ओ इति भणिते सुमतिना क्रमशः ॥ १४६ ॥**

**आवाह्य तुरङ्गान् समागतो निजगृहे कनकरथः ।**
**मदनशरविधुरिताङ्गश्चिंतयति तत्प्रापणोपायम् ॥ १४७ ॥**

**किं मम विभूत्या किंवा अन्तःपुरेण राज्येन ? ।**
**यस्तस्या मुखकमले षट्पदलीलां न प्राप्नोमि ॥ १४८ ॥**

**यद्यपि खलु लोकविरुद्धं सुकुलोत्पन्नानामीदृशं कार्यम् ।**
**तथाऽपि हु तया वियुक्तः शक्तो धर्तुं न जीवितमपि ॥ १४९ ॥**



Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

नाऊण तीए भावं दूईसंपेसणेण चित्तगयं ।
जइ ताव सावि इच्छइ खिवामि अंतेउरे नियए ॥ १५० ॥

इय चिंतिऊण तेणं [1]पडुया [2]पव्वाइया समाणत्ता ।
तह कुणसु तुमं भयवइ! जह सा मए [3]पणइणी होइ ॥ १५१ ॥

तीएवि गंतु वियणे तह सा आभासिया सुनिउणाए ।
जह पयडियसब्भावा हिययगयं झत्ति उल्लवइ ॥ १५२ ॥

उव्विग्गा विव दीससि कीस तुमं पुत्ति! केण भे कज्जं? ।
आणेमि जेण अइदुल्लहंपि नियमंतसत्तीए ॥ १५३ ॥

तीए भणियं भयवइ ! मह हिययं दुल्लहं जणं [4]महइ ।
नि[5]ब्भग्गरोरपुरिसोव्व भोयणं चक्कवट्टिस्स ॥ १५४ ॥

जह कावि [6]सारमेई इच्छइ सीहेण संगममलज्जा ।
तह चेव अहं भयवइ ! संगं इच्छामि कुमरेण ॥ १५५ ॥

---

**ज्ञात्वा तस्या भावं दूतीसंप्रेषणेन चित्तगतम् ।**
**यदि तावत् साऽपीच्छति क्षिपाम्यन्तःपुरे निजके ॥ १५० ॥**

**इति चिन्तयित्वा तेन पट्वी प्रव्राजिका समाज्ञप्ता ।**
**तथा कुरु त्वं भगवति ! यथा सा मम प्रणयिनी भवति ॥ १५१ ॥**

**तयाऽपि गत्वा विजने तथा सा आभाषिता सुनिपुणया ।**
**यथा प्रकटितसद्भावा हृदयगतं झटिति उल्लपति ॥ १५२ ॥**

**उद्विग्नेव दृश्यसे कस्मात्त्वं पुत्रि ! केन भवतां कार्यम् ? ।**
**आनयामि येनातिदुर्लभमपि निजमन्त्रशक्त्या ॥ १५३ ॥**

**तया भणितं भगवति ! मम हृदयं दुर्लभं जनं काङ्क्षति ।**
**निर्भाग्यरोरपुरुष इव भोजनं चक्रवर्त्तिनः ॥ १५४ ॥**

**यथा काऽपि सारमेयीच्छति सिंहेन सङ्गममलज्जा ।**
**तथा चैवाऽहं भगवति ! सङ्गमिच्छामि कुमारेण ॥ १५५ ॥**

---

**१. पटुका=पट्वी=चतुरा । २. प्रव्राजिका=तापसी । ३. प्रणयिनी=वल्लभा । ४. महइ=काङ्क्षति=वाञ्छति । ५. निर्भाग्यरोर( रङ्क )पुरुष इव । ६. सारमेयी=शुनी।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीए भणियं इदंपि पुत्ति! आणेमि मंतसत्तीए ।
कित्तियमेत्तं एयं मह मंतो जत्थ विप्फुरइ ॥ १५६ ॥

मा पुत्ति! कुण विसायं जावं मंतस्स तह पैयच्छिस्सं ।
अज्जवि य कुमारेणं जह संगो जायए तुज्झ ॥ १५७ ॥

तह कायव्वं भयवइ ! न होइ जह मज्झ लाघवं लोए।
इय भणिऊणं तीए दिन्ना मुत्तावली नियया ॥ १५८ ॥

पव्वाइयाए तत्तो गंतुं कुमरस्स साहियं सव्वं ।
हरिसियमणेण तेणवि आंणाविय निययपुरिसेहिं ॥ १५९ ॥

अंतेउरम्मि खित्ता सुलोयणा रागमोहियमणेण ।
अगणिय जंणाववायं उल्लंघियनियमज्जायं ॥ १६० ॥ युग्मम् ॥

विन्नायवइरेहिं च साहियं नायरेहिं नरवइणो ।
तेणवि बहुप्पगारं सिक्खविओ महुरवयणेहिं ॥ १६१ ॥

---

तया भणितमिदमपि पुत्रि ! आनयामि मन्त्रशक्त्या ।
कियन्मात्रमेतद् मम मन्त्रो यत्र विस्फुरति ॥ १५६ ॥

मा पुत्रि ! कुरु विषादं जापं मन्त्रस्य तथा प्रदास्यामि ।
अद्याऽपि च कुमारेण यथा सङ्गो जायते तव ॥ १५७ ॥

तथा कर्तव्यं भगवति ! न भवति यथा मम लाघवं लोके ।
इति भणित्वा तया दत्ता मुक्तावली निजका ॥ १५८ ॥

प्रव्राजिकया ततो गत्वा कुमारस्य कथितं सर्वम् ।
हर्षितमनसा तेनाऽपि आनाय्य निजकपुरुषैः ॥ १५९ ॥

अंतःपुरे क्षिप्ता सुलोचना रागमोहितमनसा ।
अगणय्य जनापवादमुल्लङ्घ्य निजकमर्यादाम् ॥ १६० ॥ युग्मम् ॥

विज्ञातव्यतिकरैश्च कथितं नागरै-र्नरपतेः ।
तेनाऽपि बहुप्रकारं शिक्षयितो मधुरवचनैः ॥ १६१ ॥

---

१. प्रदास्यामि=करिष्यामीत्यर्थः । २. आनाय्य । ३. जनापवादम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न य इच्छइ तं मोत्तुं ताहे नाऊण तस्स निब्बंधं ।
रन्ना पउरा भणिया असमत्था अम्हे कुमरस्स ॥ १६२ ॥

सामेण ता न मुंचइ दंडो कुमरम्मि तीरइ[1] न काउं ।
ता खमह एक्कमेयं अवराहं अम्ह कुमरस्स ॥ १६३ ॥

एयं नरवइवयणं सोऊणं नायराव‍ि दीणमुहा ।
विच्छायनिराणंदा जहागयं पडिगया सव्वे ॥ १६४ ॥

कणगरहोवि हु तीए सुरयसुहासत्तमाणसो निच्चं ।
कमसो सेसंतेउरपरिभोगपरम्मुहो[2] जाओ ॥ १६५ ॥

चिंतेइ न रज्जठिइं न नीई[3] बाहिं न देइ अत्थाणं ।
सहिओ सुलोयणाए अच्छइ विविहाहिं कीलाहिं ॥ १६६ ॥

एवं पभूयकालो वोलीणो तस्स रायतणयस्स ।
तीए अहिणवजोव्वणसुहफासपसत्तचित्तस्स ॥ १६७ ॥

---

**न चेच्छति तां मोक्तुम् तदा ज्ञात्वा तस्य निर्बन्धम् ।**
**राज्ञा पौरा भणिताऽसमर्था वयम् कुमारस्य ॥ १६२ ॥**

**साम्ना तस्मान्न मुञ्चति दण्डः कुमारे शक्यते न कर्तुम् ।**
**तस्मात् क्षमध्वमेकमेतदपराधमस्माकं कुमारस्य ॥ १६३ ॥**

**एवं नरपतिवचनं श्रुत्वा नागराऽपि दीनमुखाः ।**
**विच्छायनिरानन्दा यथागतं प्रतिगताः सर्वे ॥ १६४ ॥**

**कनकरथोऽपि खलु तस्याः सुरतसुखासक्तमानसो नित्यम् ।**
**क्रमशः शेषांतःपुरपरिभोगपराङ्मुखो जातः ॥ १६५ ॥**

**चिन्तयति न राज्यस्थितिं न गच्छति बहि-र्न ददात्यास्थानम् ।**
**सहितः सुलोचनयाऽऽस्ते विविधाभिः क्रीडाभिः ॥ १६६ ॥**

**एवं प्रभूतकालोऽतिक्रान्तस्तस्य राजतनयस्य ।**
**तस्या अभिनवयौवनसुखस्पर्शप्रसक्तचित्तस्य ॥ १६७ ॥**

१. तीरइ=शक्यते । २. परम्मुहो=पराङ्मुखः । ३. नीइ=गच्छति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाइवि परिभूया हं[१]ति जायकोवाए ।
पुव्विं तस्सिट्ठाए देवीए रायसिरियाए ॥ १६८ ॥

परिचरियपरिव्वाइयविदिन्नउम्मायकारओ चुं[२]न्नो ।
एगंतपसुत्ताणं दोण्हवि सिरम्मि पक्खित्तो ॥ १६९ ॥ युग्मम् ॥

तस्स य वसेण दोन्निवि सहसा उम्मत्तयाणि जायाणि ।
गायंति हसंति समुल्लवंति अस[३]मंजसं बहुहा ॥ १७० ॥

भीमरहेणवि तत्तो वा[४]हरिया मंततंतिया बहवे ।
तेवि हु करिंति किरियं भूय[५]विगारोत्ति मन्नंता ॥ १७१ ॥

अविय। काउं सरीररक्खं गाढं गहिऊण केवि मुद्दासु ।
पहणंति गुरुचवेडाघाएहिं कसप्पहारेहिं ॥ १७२ ॥

आलिहिय मंजऽलेसुं केवि हु विणिवेसिऊण उवउत्ता ।
अ[६]हिमंतिय सिद्धत्थयघाएहिं हणंति पुणरुत्तं ॥ १७३ ॥

---

**अथान्यदा कदाचिदपि परिभूताऽहमिति जातकोपया ।**
**पूर्वं तस्येष्टया देव्या राजश्रिया ॥ १६८ ॥**

**परिचितपरिव्राजिकावितत्तोन्मादकारकश्चूर्णः ।**
**एकान्तप्रसुप्तयो-र्द्वयोरपिशिरसि प्रक्षिप्तः ॥ १६९ ॥ युग्मम् ॥**

**तस्य च वशेन द्वावपि सहसा उन्मत्तौ जातौ ।**
**गायतो हसतः समुपल्लपतोऽसमञ्जसं बहुधा ॥ १७० ॥**

**भीमरथेनाऽपि ततो व्याहृता मन्त्रतन्त्रिका बहवः ।**
**तेऽपि खलु कुर्वन्ति क्रियां भूतविकार इति मन्यमाना ॥ १७१ ॥**

**अपि च । कृत्वा शरीररक्षां गाढं गृहीत्वा केऽपि मुद्रयोः ।**
**प्रहतः गुरुचपेटाघातैः कशाप्रहारैः ॥ १७२ ॥**

**आलिख्य मण्डलेषु केऽपि हु विनिवेश्य उपयुक्ताः ।**
**अभिमन्त्र्य सिद्धार्थकघातै-र्हतः पुनरुक्तम् ॥ १७३ ॥**

१. अहमिति । २. चूर्णः । ३. असमञ्जसम्=असंबद्धम् । ४. व्याहृताः=आकारिताः । ५. भूतविकारः । ६. अभिमन्त्र्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवि हु विरालतन्नयपुरीसमीसेहिं गुग्गुलाईहिं ।
उव्वरियम्मी खिवित्ता उद्धूवणियं पयच्छंति ॥ १७४ ॥
वायस्स विगारसंकिरेहिं वेज्जेहिं विविहकिरियाओ ।
पारद्धाओ न उणो कोवि गुणो ताण संजाओ ॥ १७५ ॥
उम्मत्तयरूवेणं पणट्ठचित्ताण वच्चए कालो ।
अह अन्नया पसुत्ते पाहरियजणम्मि रयणीए ॥ १७६ ॥
भंजित्ता नियलाइं निहुयं चिय निग्गयाइं नयरीओ ।
दोन्निवि भमंति सीउण्हवायबहुदुक्खतवियाइं ॥ १७७ ॥ युग्मम् ॥
इय नरवर! संसारे सुहिओ होऊण जायए दुहिओ ।
रायावि भमइ भिक्खं सुवइ महीए निरावरणो ॥ १७८ ॥
पवराहारविलेवणआहरणविभूसियाइं होऊण ।
हिंडंति ताइं भिक्खं गिहे गिहे दुक्खतवियाइं ॥ १७९ ॥

---

**केऽपि खलु बिडालतर्णकपुरीषमिश्रै-र्गुगलादिभिः ।**
**अपवरिकायां क्षिप्त्वोद्धूपनिकां प्रयच्छन्ति ॥ १७४ ॥**
**वातस्य विकाराऽऽशङ्कितृभि-र्वैद्यैः विविधक्रियाः ।**
**प्रारब्धा न पुनः कोऽपि गुणस्तयोः सञ्जातः ॥ १७५ ॥**
**उन्मत्तरूपेण प्रणष्टचित्तयो-र्व्रजति कालः ।**
**अथान्यदा प्रसुप्ते प्राहरिकजने रजन्याम् ॥ १७६ ॥**
**भङ्क्त्वा निगडानि निभृतं ( प्रच्छन्नं ) चैव निर्गतौ नगरीतः ।**
**द्वावपि भ्राम्यतः शीतोष्णवातबहुदुःखतप्तौ ॥ १७७ ॥ युग्मम् ॥**
**इति नरवर ! संसारे सुखिनो भूत्वा जायते दुःखिनः ।**
**राजाऽपि भ्राम्यति भिक्षां स्वपिति मह्यां निरावरणः ॥ १७८ ॥**
**प्रवराहारविलेपनाभरणविभूषितौ भूत्वा ।**
**भ्राम्यतस्ते भिक्षां गृहे गृहे दुःखतप्तौः ॥ १७९ ॥**

---

१. बिडालतर्णकपुरीषमिश्रैः=मूषकारिबालकविष्ठासहितैः । २. अपवरिकायाम् । ३. उद्धूपनिकाम् । ४. विकाराऽऽशङ्कितृभिः । ५. वैद्यैः । ६. निगडानि । ७. निहुयं=तूष्णीकम्=प्रच्छन्नमित्यर्थः । ८. निरावरणः=नग्नः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूलीधूसरियाइं बालोहहसेज्जमाणचेट्ठाइं ।
हिंडंति सुदीणाइं निव्वसियजरदंडिखंडाइं ॥ १८० ॥

बालोहपेच्छणिज्जं बुहजणसंसोयणिज्जमच्चत्थं[1] ।
पिच्छसु नरवर! जायं तं मिहुणं कम्मदोसेणं ॥ १८१॥

एयं च ताव एवं, एत्तो उ पुरीए विजयनामाए ।
रत्तोऽणंगवईए भुंजइ घणवाहणो भोए ॥ १८२ ॥

पडिबोहिओ सुहम्मेण सूरिणा जिट्ठभाउणा एसो ।
सहिओऽणंगवईए पव्वइओ सूरिपासम्मि ॥ १८३ ॥

एत्तो य धणवईवि हु वसुमइयाए सिणेहजुत्ताए ।
सहिओ पंचपयारे भुंजइ माणुस्सए भोए ॥ १८४ ॥

जह सो मोहिलवणिओ रन्ना निव्वासिओ सदेसाओ ।
काऊण तहारुवं सुहफलयं किंपि[2]णुट्ठाणं ॥ १८५ ॥

---

धूलीधूसरितौ बालौघहस्यमानचेष्टौ ।
भ्राम्यतः सुदीनौ निर्वसितजरदण्डिखण्डौ ॥ १८० ॥

बालौघप्रेक्षणीयं बुधजनसंशोचनीयमत्यर्थम् ।
प्रेक्षध्वं नरवर ! जातं तं मिथुनं कर्मदोषेण ॥ १८१ ॥

एतच्च तावदेवं, इतस्तु पुर्यां विजयनामनि ।
रक्तोऽणङ्गवत्यां भुनक्ति धनवाहनो भोगान् ॥ १८२ ॥

प्रतिबोधितः सुधर्मेण सूरिणा ज्येष्ठभ्रात्रा एषः ।
सहितोऽनङ्गवत्या प्रव्रजितः सूरिपार्श्वे ॥ १८३ ॥

इतश्च धनपतिरपि खलु वसुमत्या स्नेहयुक्तया ।
सहितः पञ्चप्रकारान् भुनक्ति मानुष्यान् भोगान् ॥ १८४ ॥

यथा स मोहिलवणिक् राज्ञा निर्वासितः स्वदेशात् ।
कृत्वा तथारूपं शुभफलदं किमप्यनुष्ठानम् ॥ १८५ ॥

१. संसोयणिज्ज=संशोचनीयम् =शोकविषयम् । २. किमप्यनुष्ठानम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उववन्नो वेयड्ढे उत्तरसेढीए वेजयंतपुरे ।
चित्तंगयस्स पुत्तो पुहवीइ सुमंगलो नाम ॥ १८६ ॥

साहियबहुविहविज्जो अह सो गयणंगणेण हिंडंतो ।
कइयावि मेहलावइपुरीए लीलाए संपत्तो ॥ १८७ ॥

हम्मियतलमारुढा ण्हायंती तेण वसुमई दिट्ठा ।
पुव्वभवब्भासाओ रत्तो सो तीइ रुवम्मि ॥ १८८ ॥

काउं धणवइरूवं उवभुत्ता तेण वसुमई मुद्धा ।
तीए सुरयपसत्तो धणवइरूवी ठिओ तत्थ ॥ १८९ ॥

सो पुण धणवइवणिओ पुव्वभवोवत्तकम्मदोसेण ।
अवहरिय तेण मुक्को इहेव भरहे विणीयाए ॥ १९० ॥

सो तत्थ रिसहजिणवरवंसपसूयस्स दंडवीरियस्स ।
केवलिणो पयमूले पव्वइओ जायनिव्वेओ ॥ १९१ ॥

---

**उपपन्नो वैताढये उत्तरश्रेण्यां वैजयन्तपुरे ।**
**चित्राङ्गदस्य पुत्रः पृथिव्याः सुमङ्गलो नामा ॥ १८६ ॥**

**साधितबहुविधविद्योऽथ स गगनाङ्गणेन, भ्राम्यन् ।**
**कदाचिदपि मेखलावतीपुर्यां लीलया संप्राप्तः ॥ १८७ ॥**

**हर्म्यतलमारूढा स्नाती तेन वसुमती दृष्टा ।**
**पूर्वभवाभ्यासात् रक्तः स तस्या रूपे ॥ १८८ ॥**

**कृत्वा धनपतिरूपमुपभुक्ता तेन वसुमती मुग्धा ।**
**तस्याः सुरतप्रसक्तो धनपतिरूपः स्थितस्तत्र ॥ १८९ ॥**

**स पुन-र्धनपतिवणिक् पूर्वभवोपात्तकर्मदोषेण ।**
**अपहृतस्तेन मुक्त इहैव भरते विनीतायाम् ॥ १९० ॥**

**स तत्र ऋषभजिनवरवंशप्रसूतस्य दण्डवीर्यस्य ।**
**केवलिनः पादमूले प्रव्रजितो जातनिर्वेदः ॥ १९१ ॥**

१. उवत्तं=उपात्तं=गृहीतम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वसयसहस्साइं तीसं काऊण उग्गतवचरणं ।
उववण्णो ईसाणे देवो चंदज्जुणो नाम ॥ १९२ ॥

परदारपसत्तो सो सुमंगलो तेण छिन्नवरविज्जो।
मुक्को परओ माणूसनगस्स देवेण कुद्धेण ॥ १९३ ॥

पडिबोहिया उ देवेण वसुमई जायतिव्वसंवेगा।
सूरिसुहम्मपवत्तिणिपयमूले अज्जिया[1] जाता ॥ १९४ ॥

एवं च अणंगवई वसुमइअज्जाइ संजुया तत्थ ।
मयहरि[2]चंदजसाए पयमूले कुणइ उग्गतवं ॥ १९५ ॥

अह अन्नया कयाइवि वियारभूमिं गयाहिं एयाहिं ।
दिट्ठं तं उम्मत्तं मिहुणं बहुडिंभपरियरियं[3] ॥ १९६ ॥

उग्गायंतं बहुहा नच्चंतं धूलिधूसरसरीरं ।
तं दट्ठुमणंगवई सविसाया एवमुल्लवइ ॥ १९७ ॥

---

**पूर्वशतसहस्राणि त्रिंशत् कृत्वा उग्रतपश्चरणम् ।**
**उपपन्न ईशाने देवश्चन्द्रार्जुनो नामा ॥ १९२ ॥**

**परदारप्रसक्तः स सुमङ्गलस्तेन छिन्नवरविद्यः ।**
**मुक्तः परतो मानुष्यनगस्य देवेन कुद्धेन ॥ १९३ ॥**

**प्रतिबोधिता तु देवेन वसुमती जाततीव्रसंवेगा ।**
**सूरिसुधर्मप्रवर्तिनीपादमूले आर्यिका जाता ॥ १९४ ॥**

**एवञ्च अनङ्गवती वसुमत्यार्यया संयुक्ता तत्र ।**
**महत्तराचन्द्रयशसः पादमूले करोति, उग्रतपः ॥ १९५ ॥**

**अथान्यदा कदाचिदपि विचारभूमिं गताभ्यामेताभ्याम् ।**
**दृष्टं तमुन्मत्तं मिथुनं बहुडिम्भपरिकरितं ॥ १९६ ॥**

**उद्गायन्तं बहुधा नृत्यन्तं धूलिधूसरशरीरम् ।**
**तं दृष्ट्वाऽनङ्गवती सविषादैवमुल्लपति ॥ १९७ ॥**

---

१. आर्यिका=साध्वी । २. मयहरा=महत्तरा । ३. परिकरितं=व्याप्तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अज्जे! वसुमइ! एसा भगिणीइ सुलोयणाइ अणुहरइ ।
जरदंडिखंडव[1]सणा गहगहियनरस्स पासत्था ॥ १९८ ॥

भणियं च वसुमईए सुइरं निज्झाइऊण[2] सविसायं ।
एसो सो कणगरहो एसावि सुलोयणा नूणं ॥ १९९ ॥

तत्तो गंतुं दोहिवि महुरं आभासियं तयं जुयलं ।
उग्गायइ हसइ नच्चइ बोल्लइ[3] असमंजसं बहुयं ॥ २०० ॥

ताहे दोवि जणाइं सुहम्मसूरिस्स पायमूलम्मि ।
करुणापराहिं अज्जाहिं ताहिं नीयाइं सविसायं ॥ २०१ ॥

अइसयनाणी य गुरु पुट्ठो उम्मायकारणं ताहिं ।
गुरुणावि ताण सिट्ठो पुव्वुत्तो सयलवुत्तंतो ॥ २०२ ॥

भणिओ अज्जाहिं गुरु भयवं! जइ अत्थि कोवि पडिजोगो ।
ता एयाण पउंजह जइ पिच्छह किंचिं उवगारं ॥ २०३ ॥

---

**आर्ये ! वसुमति ! एषा भगिन्या सुलोचनयाऽनुहरते ।**
**जरदण्डिखण्डवसना ग्रहगृहीतनरस्य पार्श्वस्था ॥ १९८ ॥**

**भणितं च वसुमत्या सुचिरं निध्याय सविषादम् ।**
**एष स कनकरथ एषाऽपि सुलोचना नूनम् ॥ १९९ ॥**

**ततो गत्वा द्वयोरपि, मधुरमाभाषितं तद् युगलम् ।**
**उद्गायति हसति नृत्यति कथयत्यिसमञ्जसं बहुकम् ॥ २०० ॥**

**तदा द्वावपि जनौ सुधर्मसूरेः पादमूले ।**
**करुणापराभ्यामार्याभ्यां ताभ्यां नीतौ सविषादम् ॥ २०१ ॥**

**अतिशयज्ञानी च गुरुः पृष्ट उन्मादकारणं ताभ्याम् ।**
**गुरुणाऽपि तयोः शिष्टः पूर्वोक्तः सकलवृतान्तः ॥ २०२ ॥**

**भणित आर्याभ्यां गुरु-र्भगवन् ! यद्यस्ति कोऽपि प्रतियोगः ।**
**तस्मात् एतयोः प्रयुङ्क्त यदि प्रेक्षध्वं किञ्चिदुपकारम् ॥ २०३ ॥**

---

१. वसनं=वस्त्रम् । २. निध्याय=दृष्ट्वा । ३. बोल्लइ=कथयति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो गुरुणा तेसिं दिन्नो उम्मायनासणपडिट्ठो ।
पडिजोगो जायाइं दोन्निवि अह सत्थचित्ताइं ॥ २०४ ॥

अह ताण वसुमईए सिट्ठो सव्वोवि पुव्ववुत्तंतो ।
एयस्स गुरुपभावा नट्ठो तुम्हाण उम्माओ ॥ २०५ ॥

इय सोऊणं दोन्निवि सुहम्मसूरिस्स परमविणएण ।
वंदंति चरणजुयलं अह सूरी भणिउमाढत्तो ॥ २०६ ॥

भोगसुहलालसाणं परदाररयप्पियाण पुरिसाण ।
बहुविहविडंबणाओ इह परलोए य जायंति ॥ २०७ ॥

पावंति विसयतिसिया वहबंधणमारणाइदुक्खाइं ।
नाऊण कुमर! एवं भोगपिवासं परिच्चयसु[1] ॥ २०८ ॥

परदारपसत्तेणं जं पावं चिक्कणं तंए[2] बद्धं ।
पुप्फसरिसो विवागो रज्जब्भंसाइओ[3] तस्स ॥ २०९ ॥

---

ततो गुरुणा तयो-र्दत्त उन्मादनाशकपटिष्ठः ।
प्रतियोगो जातौ द्वावप्यथ स्वस्थचित्तौ ॥ २०४ ॥

अथ तयो-र्वसुमत्या शिष्टः सर्वोऽपि पूर्ववृतान्तः ।
एतस्यगुरुप्रभावान्नष्टः युवयोरुन्मादः ॥ २०५ ॥

इति श्रुत्वा द्वावपि सुधर्मसूरेः परमविनयेन ।
वन्देते चरणयुगलमथ सूरि-र्भणितुमारब्धः ॥ २०६ ॥

भोगसुखलालसानां परदाररक्तप्रियानां पुरुषाणाम् ।
बहुविधविडम्बना इह परलोके च जायन्ते ॥ २०७ ॥

प्राप्नुवन्ति विषयतृषिता वधबन्धनमारणादिदुःखानि ।
ज्ञात्वा कुमार ! एवं भोगपिपासां परित्यज ॥ २०८ ॥

परदारप्रसक्तेन यत्पापं चिक्कणं [ निकाचितं ] त्वया बद्धम् ।
पुष्पसदृशो विपाको राज्यभ्रंशादिकस्तस्य ॥ २०९ ॥

---

१. परित्यज । २. त्वया । ३. राज्यभ्रंशादिकः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्तोवि अणंतगुणं कडुयविवागं फलं तु परलोए ।
पाविज्जइ दुव्विसहं नारयतिरियाइसंसरणे ॥ २१० ॥

एमाइदेसणाए ओविब्भूयम्मि चरणपरिणामे ।
प[2]व्वावियइं गुरुणा दोन्निवि निव्विन्नचित्ताइं ॥ २११ ॥

मयहरियाए पासे भगिणीजुयलेण संजुया तत्तो ।
सम्मं गुरुविणयरया सुलोयणा कुणइ विविहतवं ॥ २१२ ॥

एवं चंदजसाए पयमूले ताण अच्छमाणीणं ।
तिण्हंपि हु भगिणीणं गयाणि बहुपुव्वलक्खाणि ॥ २१३ ॥

मुणिणो कणगरहस्सवि घणवाहणसाहुणा समेयस्स ।
वोलीणाओ बहुया वरिसाणं कोडिकोडीओ ॥ २१४ ॥

अह अणसणेण सूरि कालं काऊण बीयकप्पम्मि ।
जाओ ससिप्पहसुरो विमाणचंदज्जुणाहिवई ॥ २१५ ॥

---

**एतस्मादप्यनन्तगुणं कटुकविपाकं फलं तु परलोके ।
प्राप्यते दुर्विसहं नारकतिर्यगादिसंसरणे ॥ २१० ॥**

**एवमादिदेशनयाऽऽविर्भूते चरणपरिणामे ।
प्रव्राजितौ गुरुणा द्वावपि निर्विण्णचित्तौ ॥ २११ ॥**

**महत्तरिकायाः पार्श्वे भगिनीयुगलेन संयुक्ता ततः ।
सम्यग् गुरुविनयरक्ता सुलोचना करोति विविधतपः ॥ २१२ ॥**

**एवं चंद्रयशसः पादमूले तासामासीनानाम् ।
तिसृणाम् खलु भगिनीनां गतानि बहुपूर्वलक्षाणि ॥ २१३ ॥**

**मुनेः कनकरथस्याऽपि धनवाहनसाधुना समेतस्य ।
व्युत्क्रान्ता बहुका वर्षाणां कोटिकोटयः ॥ २१४ ॥**

**अथ अनशनेन सूरिः कालं कृत्वा द्वितीयकल्पे ।
जातः शशिप्रभसुरो विमानचन्द्रार्जुनाधिपतिः ॥ २१५ ॥**

---

१. आविर्भूते=प्रकटीभूते । २. प्रव्राजितौ ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धणवाहणोत्ति मरिउं जाओ सामाणिओ सुरो तस्स ।
विज्जुप्पहोत्ति इयरा देवी से चंदरेहत्ति ॥ २१६ ॥

वसुमइअज्जावि तहा पुव्वुवन्नस्स तत्थ देवस्स।
चंदज्जुणस्स जाया देवी चंदप्पहा नाम ॥ २१७ ॥

एत्तो य सो सुबंधू दइयाइ गुरुविरहसोयसंसत्तो ।
हट्टघरकाणणाईसु कत्थवि य धिइं अपाविंतो ॥ २१८ ॥

कणगरहस्स पउट्ठो चिंतेंतो विविहमारणोवायं ।
रोद्दज्झाणोवगओ विलवंतो दीणवयणिल्लो ॥ २१९ ॥

रयरमियहसियजंपियसहरिसअवगुहणाइं[1] दइयाए ।
पुणरुत्तं सुमरंतो[2] जाओ सो गहगहिउव्व ॥ २२० ॥ तिसृभिः विशेषकम् ॥

तओ। नियघरम्मि न चिट्ठइ हिंडइ उज्जाणकाणणइसु ।
कत्थ गया केण हिया कीस निलुक्का[3] सि जंपंतो ॥ २२१ ॥

---

धनवाहनोऽपि मृत्वा जातः सामानिकः सुरस्तस्य ।
विद्युत्प्रभ इतीतरा देवी तस्य चन्द्ररेखेति ॥ २१६ ॥

वसुमत्यार्याऽपि तथा पूर्वोपपन्नस्य तत्र देवस्य ।
चन्द्रार्जुनस्य जाता देवी चन्द्रप्रभा नाम्नी ॥ २१७ ॥

इतश्च स सुबन्धु-र्दयिताया गुरुविरहशोकसंसक्तः ।
हट्ट [ आपण ] गृहकाननादिषु कुत्राऽपि च धृतिमप्राप्नुवन् ॥ २१८ ॥

कनकरथस्य प्रदुष्टश्चिंतयन् विविधमारणोपायम् ।
रौद्रध्यानवशगतो विलपन् दीनवदनवान् ॥ २१९ ॥

रक्तरतहसितजल्पितसहर्षावगूहनादि दयितायाः ।
पुनरुक्तं स्मरन् जातो स ग्रहगृहीत इव ॥ २२० ॥ तिसृभि-र्विशेषकम् ॥

ततः निजकगृहे न तिष्ठति भ्राम्यति उद्यानकाननादिषु ।
कुत्र गता केन हृता कस्मात् निलीनाऽसि जल्पन् ॥ २२१ ॥

---

१. अवगूहनं=आलिङ्गनम् । २. स्मरन्। ३. निलुक्का=निलीना ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कह रुट्ठा मह सुंदरि ! जेण न दंसेसि अप्पयं सिग्घं ।
हुं हुं दिट्ठा दिट्ठा पसीय मह देसु पडिवयणं ॥ २२२ ॥

जं जं पिच्छइ लोयं तं तं पुच्छइ, तंए[1] पिया दिट्ठा ? ।
एमाइं विलवमाणो नीहरिओ ताओ नयरीओ ॥ २२३ ॥

उम्मत्तयरूवेणं हिडंतो विविहगामनयरेसु ।
दुहिओ दीणो वियणो छुहापिवासाहिं संतत्तो[2] ॥ २२४ ॥

कइयावि हु संपत्तो अणेयतावसजणाउरे रम्मे ।
नाणादुमसयगहणम्मि आसमे विविहफलपउरे ॥ २२५ ॥

तत्थ य से कुलवइणा मणयं[3] संजायसत्थचित्तस्स।
नियधम्मो परिकहिओ तस्सवि सो परिणओ ताहे ॥ २२६ ॥

गिण्हिय तावसदिक्खं दइयागुरुविरहजायवेरग्गो[4] ।
कयकंदफलाहारो घोरतवं चरिउमारद्धो ॥ २२७ ॥

---

**कथं रुष्टा मम सुन्दरि ! येन न दर्शयस्यात्मनं शीघ्रम् ॥**
**हुं हुं दृष्टा दृष्टा प्रसीद मम देहि प्रतिवचनम् ॥ २२२ ॥**

**यं यं प्रेक्षते लोकं तं तं पृच्छति, त्वया प्रिया दृष्टा ।**
**एवमादि विलपन् निःसृतस्तस्मात् नगरीतः ॥ २२३ ॥**

**उन्मत्तकरूपेण भ्राम्यन् विविधग्रामनगरेषु ।**
**दुःखितो दीनो विजनः क्षुधापिपासाभिः संतप्तः ॥ २२४ ॥**

**कदाचिदपि खलु संप्राप्तोऽनेकतापसजनाकुले रम्ये ।**
**नानाद्रुमशतगहनेऽऽश्रमे विविधफलप्रचुरे ॥ २२५ ॥**

**तत्र च तस्य कुलपतिना मनाक् सञ्जातस्वस्थचितस्य ।**
**निजधर्मः परिकथितस्तस्याऽपि स परिणतस्तदा ॥ २२६ ॥**

**गृहीत्वा तापसदीक्षां दयितागुरुविरहजातवैराग्यः ।**
**कृतकन्दफलाहारो घोरतपश्चरितुमारब्धः ॥ २२७ ॥**

---

१. त्वया । २. संतत्तो=संतप्तः । ३. मनाक् संजातस्वस्थचित्तस्य। ४. वेरग्गं=वैराग्यम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोमासियतेमासियचउम्मासाइयं तवं विविहं ।
काउं पभूयकालं अंतुट्टवेराणुबंधो सो ॥ २२८ ॥

मरिऊण य उववन्नो परमाहम्मियसुरेसु अंबरिसी ।
उववन्नमेत्तओ सो पुव्वभवालोयणं कुणइ॥ २२९ ॥ युग्मम् ॥

नाऊण पुव्ववइरं विहंगनाणेण आसुरुत्तो सो ।
चिंतेइ कत्थ वइरी सा वा मह दुट्ठमहिलत्ति? ॥ २३० ॥

दुस्सीला सा पावा अणुरत्तं तह ममं परिच्चेइय।
आसत्ता कणगरहे सच्चिय ता वइरिणी पढमं ॥ २३१ ॥

तारिसदुक्खं दिन्नं तइया मह जेहिं दुट्ठसीलेहिं ।
इण्हिं गंतुं दोन्निवि हंतव्वाइं मए ताइं ॥ २३२ ॥

इय चिंतिऊण वेगेण आगओ रोसफुरफुरंतो सो ।
संलेहणसुसियंगो जत्थच्छइ कणगरहसाहू ॥ २३३ ॥

---

द्विमासिकत्रिमासिकचतुर्मासादिकं तपोविविधम् ।
कृत्वा प्रभूतकालमत्रुटितवैरानुबन्धः सः ॥ २२८ ॥

मृत्वा चोपपन्नः परमाधार्मिकसुरेषु अम्बरीषः ।
उपपन्नमात्रात् स पूर्वभवालोकनं करोति ॥ २२९ ॥ युग्मम् ॥

ज्ञात्वा पूर्ववैरं विभङ्गज्ञानेनाऽऽशुरुष्ट सः ।
चिन्तयति कुत्र वैरी सा वा मम दुष्टमहिलेति ? ॥ २३० ॥

दुःशीला सा पापाऽनुरक्तं तथा माम् परित्यज्य ।
आसक्ता कनकरथे सैव तस्मात् वैरिणी प्रथमा ॥ २३१ ॥

तादृशदुःखं दत्तं तदा मम याभ्यां दुष्टशीलाभ्याम् ।
इदानीं गत्वा द्वावपि हन्तव्यौ मया तौ ॥ २३२ ॥

इति चिन्तयित्वा वेगेनाऽऽगतो रोषस्फुरस्फुरन् सः ।
संलेखनशुष्काङ्गो यत्राऽऽस्ते कनकरथसाधुः ॥ २३३ ॥

---

१. अतुट्टं=अत्रुटितम्=अनष्टम् । २. अम्बादिषु पञ्चदशप्रकारेषु पारमाधार्मिकदेवेष्वेक तमोऽम्बरीषनामा सः । ३. परित्यज्य । ४. सुसियं=शुष्कम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धम्मज्झाणोवगयस्स तस्स पडिमागयस्स रयणीए ।
पिउवणठियस्स[1] मुणिणो घोरुवसग्गे कुणइ पावो ॥ २३४ ॥

काउं पिसायरूवं उक्कत्तइ[2] निसियकत्तियाहत्थो ।
मंसाइं सरुहिराइं संभारियपुव्वकयवइरो[3] ॥ २३५ ॥

भीमट्टहासपुव्वं उड्ढं उक्खिविय खिवइ खोणीए[4] ।
दुव्विसहगुरुकसाघायताडणं कुणइ पुणरुत्तं ॥ २३६ ॥

मुंचइ धूलीवरिसं खणेण उवलोहपूरियं कुणई ।
जलणवरिसेण वरिसइ छिंदइ खणेण अंगाइं ॥ २३७ ॥

काऊण हत्थिरूवं सुतिक्खदंतेहिं देई वेहाइं[5] ।
नियकाइयाए सिंचइ लोलइ चलणेहिं भूमीए ॥ २३८ ॥

किं बहुणा भणिएणं निग्घिणहियएण तेण असुरेण ।
मुणिदेहे दुव्विसहा विहिया नरओवमा[6] वियणा ॥ २३९ ॥

---

**धर्मध्यानोपगतस्य तस्य प्रतिमागतस्य रजन्याम् ।**
**पितृवनसंस्थितस्य मुने-र्घोरापसर्गान् करोति पापः ॥ २३४ ॥**

**कृत्वा पिशाचरूपमुत्कृन्तति निशितकर्तिकाहस्तः ।**
**मांसानि सरुधिराणि संस्मारितपूर्वकृतवैरः ॥ २३५ ॥**

**भीमाट्टहासपूर्वमूर्ध्वमुत्क्षिप्य क्षिपति क्षोण्याम् ।**
**दुर्विसहगुरुकशाघातताडनं करोति पुनरुक्तम् ॥ २३६ ॥**

**मुञ्चति धूलीवर्षां क्षणेनौपलौघपूर्णां करोति ।**
**ज्वलनवर्षया वर्षति छिनत्ति क्षणेनाङ्गानि ॥ २३७ ॥**

**कृत्वा हस्तिरूपं सुतीक्ष्णदन्तै-र्ददाति वेधान् ।**
**निजकायिकया सिञ्चति लोलति चरणाभ्यां भूम्याम् ॥ २३८ ॥**

**किं बहुना भणितेन निर्घृणहृदयेन तेनासुरेण ।**
**मुनिदेहे दुर्विसहा विहिता नरकोपमा वेदना ॥ २३९ ॥**

---

१. पितृवनम्=श्मशानम् । २. उत्कृन्तति । ३. संभारियं=संस्मारितम् । ४. क्षोणी=पृथ्वी ।
५. वेधान् । ६. नरकोपमा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीइ वियणाइ साहू अचलियचित्तो पसत्थसुहलेसो[1] ।
धम्मज्झाणोवगओ निंदंतो निययदुच्चरियं[2] ॥ २४० ॥

कयअणसणो महप्पा कालं काऊण बीयकप्पम्मि ।
चंदज्जुणम्मि जाओ विहुप्पहो नाम देवोत्ति ॥ २४१ ॥

अंबरिसी मुणिदेहं पाणविमुक्कंपि गरुयरोसेणं ।
छिंदिय सयहा[3] पत्तो सुलोयणज्जासमीवम्मि ॥ २४२ ॥

सावि हु पभायसमए काउस्सग्गे ठिया सुहज्झाणे ।
साहुणि[4]मज्झोवगया सुमराविय[5]पुव्वदुच्चरिया ॥ २४३ ॥

लोहमयपुरिसपडिमं फुलिंगजालाउलं विउव्विय ।
पावे! परपुरिसपिए! अवगूहसु वल्लहं एयं ॥ २४४ ॥

इय भणिय तेण समयं गाढं बंधितु जलियदंडेहिं ।
हणिऊण तक्खणेणं सावि तओ मारिया तेण ॥ २४५ ॥ तिसृभि-र्विशेषकम् ।

---

**तया वेदनया साधुरचलितचित्तः प्रशस्तशुभलेश्यः ।**
**धर्मध्यानोपगतो निन्दन् निजदुश्चरितम् ॥ २४० ॥**

**कृतानशनो महात्मा कालं कृत्वा द्वितीयकल्पे ।**
**चन्द्रार्जुने जातो विधुप्रभो नामा देव इति ॥ २४१ ॥**

**अम्बरीषो मुनिदेहं प्राणविमुक्तमपि गुरुकरोषेण ।**
**छिन्दित्वा शतधा प्राप्तः सुलोचनार्यासमीपे ॥ २४२ ॥**

**साऽपि हु प्रभातसमये कायोत्सर्गे स्थिता शुभध्याने ।**
**साध्वीमध्योपगता स्मारितपूर्वदुश्चरित्रा ॥ २४३ ॥**

**लोहमयपुरुषप्रतिमां स्फुल्लिङ्गज्वालाकुलां विकुर्व्य ।**
**पापे ! परपुरुषप्रिये ! अवगूह वल्लभमेतम् ॥ २४४ ॥**

**इति भणित्वा तेन समकं गाढं बद्ध्वा - ज्वलितदण्डैः ।**
**हत्वा तत्क्षणेन साऽपि ततो मारिता तेन ॥ २४५ ॥ तिसृभि-र्विशेषकम् ॥**

---

१. प्रशस्तशुभलेश्यः । २. दुच्चरियं = दुश्चरितम् । ३. शतधा । ४. साहुणी = साध्वी।
५. सुमरावियं = स्मारितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविचलियसुद्धभावा कालं काउं विहुप्पहसुरस्स ।
उप्पन्ना पियदेवी सयंपभा नाम तत्थेव ॥ २४६ ॥

इय भो नरवर! दट्ठुं रागद्दोसाण दारुणविवागं ।
दूरेण चयसु संगं रागद्दोसेहिं पावेहिं ॥ २४७ ॥

वहं विहायाऽऽसु पहिट्ठमाणसो मुणीण सो अंबरिसी सुराहमो ।
कयत्थमप्पाण[1] मणे गणंतो जहागयं ताहि गओ सठाणयं ॥ २४८ ॥

साहुधणेसरविरइयसुबोहगाहासमूहरम्माए ।
रागग्गिदोसविसहरपसमणजलमंतभूयाए ॥ २४९ ॥

एसोवि परिसमप्पइ सुलोयणाकणगरहवहो नाम ।
सुरसुंदरीकहाए चोद्दसमो इह परिच्छेओ ॥ २५० ॥

---

**अविचलितशुद्धभावात् कालं कृत्वा विधुप्रभसुरस्य ।
उत्पन्ना प्रियदेवी स्वयंप्रभा नाम्नी तत्रैव ॥ २४६ ॥**

**इति भो नरवर ! दृष्ट्वा रागद्वेषानां दारुणविपाकम् ।
दूरेण त्यज सङ्गं रागद्वैषैः पापैः ॥ २४७ ॥**

**वधं विहायऽऽशु प्रहर्षितमानसो मुनिसाध्व्यौ स अंबरीशः सुराधमः ।
कृतार्थमात्मानं मनसि गणयन् यथागतं तदा गतः स्वस्थानकम् ॥ २४८ ॥**

**साधुधनेश्वरविरचितसुबोधगाथासमूहरम्यायाः ।
रागाग्निद्वेषविषधरप्रशमनजलमंत्रभूतायाः ॥ २४९ ॥**

**एषोऽपि परिसमाप्यते सुलोचनाकनकरथवधो नामा ।
सुरसुन्दरीकथायाः चतुर्दश इह परिच्छेदः ॥ २५० ॥**

**॥ चतुर्दशः परिच्छेदः समाप्तः ॥**

---

१. आत्मानम्, छन्दआनुलोम्यादनुस्वारलोपः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चदशः परिच्छेदः

अह सो कयसमणवहो अंबरिसी मुइयमाणसो तत्थ ।
निच्चं नेरइयाणं कयत्थणा[1]जायगुरुतोसो ॥ १ ॥

बंधितु पावकम्मं तओ चुओ विहवपंसुलीगब्भे[2] ।
उव्वन्नो सो तीए बहुविहकडुखारपाणेहिं ॥ २ ॥

सडियदेहो[3] रोद्दं झाणं आऊरिऊण नरयम्मि ।
मरिऊण सत्तपलिओ उववन्नो पढमपुढवीए ॥ ३ ॥ तिसृभि-र्विशेषकम् ॥

अणुहविय तिव्वदुक्खं नियआउक्खए तओवि उव्वट्टो ।
इह भरहे विप्पसुओ उववन्नो दुग्गओ नाम ॥ ४ ॥

दारिद्ददुक्खतविओ दिक्खं परिवायया[4]ण घित्तूण ।
काउं अन्नणतवं उक्कडरोसो मओ[5] तत्तो ॥ ५ ॥

---

**अथ स कृतश्रमणवधोऽम्बरीषो मुदितमानसस्तत्र ।**
**नित्यं नैरयिकाणां कदर्थनाजातगुरुतोषः ॥ १ ॥**

**बद्ध्वा पापकर्म ततश्च्युतो विधवपांशुलागर्भे ।**
**उपपन्नः स तस्या बहुविधकटुक्षारपानैः ॥ २ ॥**

**शाटितदेहो रौद्रं ध्यानमापूर्य नरके ।**
**मृत्वा सप्तपल्य उपपन्नः प्रथमपृथिव्याम् ॥ ३ ॥ तिसृभि-र्विशेषकम् ॥**

**अनुभूय तीव्रदुःखं निजायुः क्षये ततोऽपि उद्वृत्तः ।**
**इह भरते विप्रसुत उपपन्न दुर्गतो नामा ॥ ४ ॥**

**दारिद्रदुःखतप्तो दिक्षां प्ररिव्राजकानां गृहीत्वा ।**
**कृत्वा अज्ञानतप उत्कटरोषो मृतस्ततः ॥ ५ ॥**

---

१. कयत्थणा=कदर्थना । २. विधवपांशुलागर्भे; पांशुला=पुंश्चली । ३. शाटितदेहः=नष्टशरीरः ।
४. परिव्राजकः=तापसः । ५. मृतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धरणिंदस्स उ जाओ [1]साहियपलियाउओ [2]महाराओ ।
नामेण कालबाणो दिव्वमहारिद्धिसंपन्नो ॥ ६ ॥

तत्थवि सुमरियवइरो उवओगं देइ ताण दोण्हंपि ।
ठाणवियाणणहेउं विभंगनाणेण सकसाओ ॥ ७ ॥

तत्तियनाणाभावाउ बीयकप्पट्ठियाणि एयाणि ।
दिट्ठाणि न तेण तहिं पुणरुत्तकओवओगेवि ॥ ८ ॥

एवं वच्चइ कालो नरिंद ! सेसाउयस्स अह तस्स ।
भुंजित्तु दिव्वभोए थोवूणयअट्ठपलियाइं ॥ ९ ॥

ईसाणकप्पवासी विहुप्पहो सो सुरो तओ चविउं ।
तुह पुत्तो उववन्नो कमलावइदेविकुच्छीए ॥ १० ॥ युग्मम् ॥

दोहलपूरणहेउं परिब्भमंती पुरम्मि हत्थिगया ।
सत्तममासे नरवर! देवी कमलावई एसा ॥ ११ ॥

---

**धरणेन्द्रस्य तु जातः साधिकपल्यायुष्को महाराजः ।**
**नाम्ना कालबाणो दिव्यमहर्द्धिसंपन्नः ॥ ६ ॥**

**तत्राऽपि स्मृतवैर उपयोगं ददाति तयोर्द्वयोरपि ।**
**स्थानविजाननहेतुं विभङ्गज्ञानेन सकषायः ॥ ७ ॥**

**तावज्ज्ञानाभावात् द्वितीयकल्पस्थितावेतौ ।**
**दृष्टौ न तेन तस्मिन् पुनरुक्तकृतोपयोगेऽपि ॥ ८ ॥**

**एवं व्रजति कालो नरेन्द्र ! शेषायुष्कस्याथ तस्य ।**
**भुङ्क्त्वा दिव्यभोगान् स्तोकोनकाष्टपल्यानि ॥ ९ ॥**

**ईशानकल्पवासी विधुप्रभः स सुरस्ततश्च्युत्वा ।**
**तव पुत्र उपपन्नः कमलावतीदेवीकुक्षौ ॥ १० ॥ युग्मम् ॥**

**दोहलपूरणहेतुं परिभ्राम्यन्ती पुरे हस्तिगता ।**
**सप्तममासे नरवर ! देवी कमलवत्येषा ॥ ११ ॥**

---

१. साधिकपल्यायुष्कः । २. महाराओ=सामानिकसुरः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि दिट्ठा कओवओगेण कालबाणेण ।
गब्भट्ठियनियवइरियदंसणसंजायरोसेण ॥ १२ ॥

आगम्म तओ तुरियं अहिट्ठिओ तेण कुंजरो सहसा ।
विच्छोलिंतो[1] लोयं वेगेण पहाविओ तेण ॥ १३ ॥

वडपायवसाहालग्गणेण नरवर! तुमम्मि उत्तरिए[2] ।
गयणेण समुप्पइओ तेणेव अहिट्ठिओ हत्थी ॥ १४ ॥

मणिसंजुयदेविकरपहारपरिविहुरिओ गयं मोत्तुं ।
जणणीसमयं[3] मरिही गयणाओ निवडिओ वइरी ॥ १५ ॥

इय चिंतंतो नरवर! कयकिच्चो सो सुरो गओ ठाणं ।
देवीवि कुंजरगया पडिया गयणाओ सरतीरे ॥ १६ ॥ युग्मम् ॥

उत्तरिऊण य तत्तो मिलिया सिरिदत्तसत्थवाहस्स ।
चलिया सत्थेण समं कुसग्गनयरम्मि नरनाह ! ॥ १७ ॥

---

अत्रान्तरे दृष्टा कृतोपयोगेन कालबाणेन ।
गर्भस्थितनिजवैरीदर्शनसञ्जातरोषेण ॥ १२ ॥

आगम्य ततस्त्वरितमधिष्ठितस्तेन कुञ्जरस्सहसा ।
विक्षोभयन् लोकं वेगेन प्रधावितस्तेन ॥ १३ ॥

वटपादपशाखालग्नेन नरवर ! त्वयि उत्तीर्णे ।
गगने समुत्पतितस्तेनैवाधिष्ठितो हस्ती ॥ १४ ॥

मणिसंयुक्तदेवीकरप्रहारपरिविधुरितो गजं मुक्त्वा ।
जननीसमकं मरिष्यति गगनात् निपतितो वैरी ॥ १५ ॥

इति चिंतयन् नरवर ! कृतकृत्यः स सुरो गतः स्थानम् ।
देव्यपि कुञ्जरगता पतिता गगनात् सरस्तीरे ॥ १६ ॥ युग्मम् ॥

उत्तीर्य च ततो मीलिता श्रीदत्तसार्थवाहस्य ।
चलिता सार्थेन समं कुशाग्रनगरे नरनाथ ! ॥ १७ ॥

---

१. विक्षोभयन् । २. उत्तीर्णे । ३. जनन्या सममित्यर्थः ।



Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

सत्थविलोवे जाए अडवीपडियाए तत्थ देवीए ।
जाओ पुत्तो दिट्ठो कओवओगेण देवेण ॥ १८ ॥

अह पुणरवि सो देवो वइरं सरिऊण निग्घिणसहावो ।
संपत्तो वेगेणं देवीपासम्मि गुरुरोसो ॥ १९ ॥

निउणं जोयंतेणवि पभूयकालाओ पाव! दिट्ठो सि ।
काहामि वइरअंतं अणुहव दुव्विहियफलमिण्हिं ॥ २० ॥

एवं भणमाणेणं पसुत्तकमलावईए अंकाओ ।
नरवर! सो तुह पुत्तो हरिओ सुरकालबाणेण ॥ २१ ॥

गहिऊण य तं बालं चिंतेइ सुरो किलिट्ठपरिणामो ।
मारेमि इमं सत्तुं इण्हिं मलिऊण[१] हत्थेहिं ॥ २२ ॥

खंडाणि अहं काउं करेमि किंवा दिसाबलिं अहवा ।
अच्छोडेमि[२] सिलाए तिलं तिलं किं नु छिंदामि ? ॥ २३ ॥

---

सार्थविलुप्ते जाते अटवीपतितायास्तत्र देव्याः ।
जातः पुत्रो दृष्टः कृतोपयोगेन देवेन ॥ १८ ॥

अथ पुनरपि स देवो वैरं स्मृत्वा निर्घृणस्वभावः ।
संप्राप्तो वेगेन देवीपार्श्वे गुरुरोषः ॥ १९ ॥

निपुणं पश्यताऽपि प्रभूतकालात् पाप ! दृष्टोऽसि ।
करिष्यामि वैरमन्तमनुभव दुर्विहितफलमिदानीम् ॥ २० ॥

एवं भणता प्रसुप्तकमलावत्याऽङ्कात् ।
नरवर स तव पुत्रो हृतः सुरकालबाणेन ॥ २१ ॥

गृहीत्वा च तं बालं चिन्तयति सुरः क्लिष्टपरिणामः ।
मारयामि इमं शत्रुमिदानीं मर्दयित्वा हस्ताभ्याम् ॥ २२ ॥

खण्डान्यहं कृत्वा करोमि किंवा दिग्बलिमथवा ।
आस्फोटयामि शिलायां तिलं तिलं किन्नु छिनद्मि ?॥ २३ ॥

---

१. मर्दयित्वा । २. आस्फोटयामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं हि कए अहवा न होज्ज वियणा पभूयकालीया ।
मरणाउ तक्खणेणं इमस्स अव्वत्तचित्तस्स ॥ २४ ॥

ता गंतूणं कत्थवि मुंचामि अमाणूसम्मि ठाणम्मि ।
तण्हाछुहाभिभूओ मरिही सयमेव दुक्खेण ॥ २५ ॥

इय चिंतिऊण मुक्को वेयड्ढसिलायलम्मि वियणम्मि ।
सो तुह पुत्तो नरवर! सुरोवि पत्तो नियं ठाणं ॥ २६ ॥

नरवर! अच्छउ एयं कहेमि अन्नं कहंतरं ताव ।
ईसाणाओ चविओ विज्जुप्पहो एत्थ वेयड्ढे ॥ २७ ॥

दक्खिणसेढीइ पुरे रमणीए रयणसंचए पवरे ।
पवणगइखयरपुत्तो उववन्नो बउलवइयाए ॥ २८ ॥

नामेण चित्तवेगो एत्तो देवीवि चंदरेहा सा।
चविऊण य उप्पन्ना नयरे सिरिकुंजरावत्ते ॥ २९ ॥

---

एवं हि कृतेऽथवा न भवेत् वेदना प्रभूतकालिकी।
मरणात्तत्क्षणेन अस्याऽव्यक्तचित्तस्य ॥ २४ ॥

तस्मात् गत्वा कुत्रापि मुञ्चाम्यमानुष्ये स्थाने ।
तृष्णाक्षुधाभिभूतो मरिष्यति स्वयमेव दुःखेन ॥ २५ ॥

इति चिन्तयित्वा मुक्तो वैताढयशिलातले विजने ।
स तव पुत्रो नरवर ! सुरोऽपि प्राप्तो निजं स्थानम् ॥ २६ ॥

नरवर ! आस्तामेतद् कथयाम्यन्यं कथांतर तावत् ।
ईशानाच्च्युतो विद्युत्प्रभोऽत्र वैताढये ॥ २७ ॥

दक्षिणश्रेण्यां पुरे रमणीये रत्नसञ्चये प्रवरे ।
पवनगतिखेचरपुत्र उपपन्नो बकुलवत्याः ॥ २८ ॥

नाम्ना चित्रवेग इतो देव्यपि चन्द्ररेखा सा ।
च्युत्वा चोत्पन्ना नगरे कुञ्जरावर्ते ॥ २९ ॥

---

१. प्रभूतकालिकी । २. कथान्तरम्=अन्यां कथाम् ।



Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

खयरस्स अमियगइणो पियाइ भज्जाइ चित्तमालाए ।
अइवल्लहा उ धूया नामेणं कणगमालत्ति ॥ ३० ॥ चत्तसृभिः कलापकम्॥

एत्तो य पुव्वभणिओ सुलोयणाइण आसि जो माया।
वसुदत्तो नामेणं सोवि हु भमिऊण संसारे ॥ ३१ ॥

उप्पन्नो वेयड्ढे गंगावत्तम्मि खयररायस्स ।
सिरिगंधवाहणस्स उ पुत्तो मयणावलीए ओ ॥ ३२ ॥

नहवाहणोत्ति नामं वरिया अह तस्स कणगमाला सा ।
हरिऊण य परिणीया छलेण सा चित्तवेगेण ॥ ३३ ॥ तिसृभिः विशेषकम्॥

नहवाहणेण बद्धो सो खयरो नागिणीइ विज्जाए ।
आणीया निरनयरे विलवंती कणगमालावि ॥ ३४ ॥

[१]परियायंतरपत्तं अणिच्छमाणिंपि इच्छए रमिउं ।
भगिणिंपि पिच्छ नरवर! एसो अन्नाणदोसेण ॥ ३५ ॥

---

खेचरस्याऽमितगतेः प्रियाया भार्यायाः चित्रमालायाः ।
अतिवल्लभा तु दुहिता नाम्ना कनकमालेति ॥ ३० ॥ चतुसृभिः कलापकम्॥

इतश्च पूर्वभणितः सुलोचनादीनामासीत् यो भ्राता ।
वसुदत्तो नाम्ना सोऽपि खलु भ्रान्त्वा संसारे ॥ ३१ ॥

उत्पन्नो वैताढये गङ्गावर्त्ते खेचरराजस्य ।
श्रीगन्धवाहनस्य तु पुत्रो मदनावल्या ओ ॥ ३२ ॥

नभोवाहन इति नामा वृत्ताऽथ तस्य कनकमाला सा ।
हृत्वा च परिणीता छलेन सा चित्रवेगेन ॥ ३३ ॥ तिसृभिः विशेषकम् ॥

नभोवाहनेन बद्धः स खेचर नागिण्या विद्यया ।
आनीता निजनगरे विलपन्ती कनकमालाऽपि ॥ ३४ ॥

पर्यायान्तरप्राप्तामनिच्छन्तीमपि इच्छेत् रन्तुम् ।
भगिनीमपि प्रेक्षस्व नरवर ! एष अज्ञानदोषेण ॥ ३५ ॥

---

१. पर्यायन्तरप्राप्ताम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय नरवर! संसारे अन्नाणंधेहिं एत्थ जीवेहिं ।
भगिणीवि अहिलसिज्जइ धूया सुण्हा[1] व जणणी वा ॥ ३६ ॥

भगिणीवि होइ भज्जा, पियावि पुत्तो, सुयावि जणणित्ति।
भज्जावि जत्थ माया धिरत्थु संसारवासस्स ॥ ३७ ॥

एयं च तुज्झ नरवर! धणदेवेणेव साहियं पुव्वं ।
सहसा सुरेणं पुणरवि उवणीया चित्तवेगस्स ॥ ३८ ॥

बहुविहविज्जाहिं समं जाओ खयराहिवो तओ एसो ।
भुंजइ दइयाए समं वेयड्ढे तत्थ विसयसुहं ॥ ३९ ॥

चंदज्जुणोवि देवो चइऊणं उत्तराए सेढीए ।
नयरम्मि चरमचंचे चित्तगई नाम उववन्नो ॥ ४० ॥

चंदप्पहावि देवी जाया य पियंगुमंजरी तस्स।
भज्जा सो तीइ समं भुंजइ माणुस्सए मोए ॥ ४१ ॥

---

इति नरवर ! संसारे अज्ञानान्धैरत्र जीवैः ।
भगिन्यपि अभिलस्यते दुहिता स्नुषा वा जननी वा ॥ ३६ ॥

भगिन्यपि भवति भार्या, पिताऽपि पुत्रः, सुताऽपि जननीति ।
भार्याऽपि यत्र माता धिगस्तु संसारवासस्य ॥ ३७ ॥

एतच्च तव नरवर ! धनदेवेनैव कथितं पूर्वम् ।
सहसा सुरेण पुनरपि उपनीता चित्रवेगस्य ॥ ३८ ॥

बहुविधविद्याभिस्समं जातः खेचराधिपस्तत एषः ।
भुनक्ति दयितया समं वैताढ्ये तत्र विषयसुखम् ॥ ३९ ॥

चन्द्रार्जुनोऽपि देवश्च्युत्वा उत्तरायां श्रेण्याम् ।
नगर्यां चमरचञ्चायां चित्रगति-र्नामोपपन्नः ॥ ४० ॥

चन्द्रप्रभाऽपि देवी जाता च प्रियङ्गुमञ्जरी तस्य ।
भार्या स तया समं भुनक्ति मानुष्यान् भोगान् ॥ ४१ ॥

---

१. स्नुषा=पुत्रवधूः ।



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

तस्स य उत्तरसेढी समयं विज्जाहिं चित्तवेगेण ।
दिन्ना सिणेहसारं इय ते अच्छंति वेयड्ढे ॥ ४२ ॥

पुव्वभवब्भासाओ सिणेहसाराण ताण दोण्हंपि ।
वोलीणो बहुकालो विसयसुहं अणुहवंताणं ॥ ४३ ॥

अह अन्नया कयाई सहिओ दइयाए कणगमालाए ।
खयरो स चित्तवेगो अट्ठावयवंदओ चलिओ ॥ ४४ ॥

भरहनरेसरकारियजिणिंदपडिमाओ तत्थ भत्तीए ।
वंदित्तु पडिनियत्तो पिच्छइ तं बालयं तत्थ ॥ ४५ ॥

वेयड्ढवणनिउंजं उज्जोयंत[1] सदेहदित्तीए[2] ।
गलबद्धअंगुलीयगविहूसियं लोयणाणंद ॥ ४६ ॥

दट्ठूण अंगुलीयगनिवेसियं तं मणिं स विम्हइओ[3] ।
भणइ य पिए ! स एसो दिव्वमणी सुरवरदिन्नो ॥ ४७ ॥

---

तस्य चोत्तरश्रेणी समकं विद्याभिश्चित्रवेगेन ।
दत्ता स्नेहसारमिति ते आसते वैताढये ॥ ४२ ॥

पूर्वभवाभ्यासात् स्नेहसारयोस्तयो-र्द्वयोरपि ।
व्युत्क्रान्तो बहुकालो विषयसुखमनुभवतोः ॥ ४३ ॥

अथान्यदा कदाचिदपि सहितो दयितया कनकमालया ।
खेचरः स चित्रवेगोऽष्टापदवन्दनश्चलितः ॥ ४४ ॥

भरतनरेश्वरकारितजिनेन्द्रप्रतिमास्तत्र भक्त्या ।
वंदित्वा प्रतिनिवृत्तः प्रेक्षते तं बालकं तत्र ॥ ४५ ॥

वैताढयवननिकुञ्जमुद्द्योतयन्तं स्वदेहदीप्त्या ।
गलबद्धाङ्गुलीयकविभूषितं लोचनानन्दम् ॥ ४६ ॥

दृष्ट्वा अंङ्गुलीयकनिवेशितं तं मणिं स विस्मित्तः ।
भणति च प्रिये ! स एष दिव्यमणिः सुरवरदत्तः ॥ ४७ ॥

---

१. उद्द्योतयन्तम्। २. स्वदेहदीप्त्या=निजशरीरकान्त्या । ३. विस्मितः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जस्स पभावाउ तया भुयंगपरिवेढिओवि न मओ हं ।
ता केण एस बद्धो इमस्स बालस्स गलयम्मि ? ॥ ४८ ॥

अहवा रक्खाहेउं नूणं जणणीए जायमित्तस्स ।
बद्धो हवेज्ज तत्तो केणवि हरिऊण इह मुक्को ॥ ४९ ॥

ता गेण्ह पिए! एयं होउ अपुत्ताए एस तुह पुत्तो ।
सोच्चिय नूणं होही सुरजीवो एस उप्पन्नो ॥ ५० ॥

गहिऊण तयं नरनाह! दोवि पत्ताइं निययनयरम्मि ।
काउं वद्धावणियं पयासियं सयललोयस्स ॥ ५१ ॥

जाओ उ कणगमालाइ गुत्तगब्भाइ संपयं पुत्तो ।
उचियसमयम्मि विहियं नामं से मयरकेउत्ति ॥ ५२ ॥

विज्जाहरिंदभवणे एवं वड्डइ नरिंद! तुह पुत्तो ।
एत्तो य तस्स देवी सयंपभा देवलोगाओ ॥ ५३ ॥

---

**यस्य प्रभावात्तदा भुजङ्गपरिवेष्टितोऽपि न मृतोऽहम् ।**
**तस्मात् केनैष बद्धोऽस्य बालस्य गलके ? ॥ ४८ ॥**

**अथवा रक्षाहेतुं नूनं जनन्या जातमात्रस्य ।**
**बद्धो भवेत् ततः केनाऽपि हत्वेह मुक्तः ॥ ४९ ॥**

**तस्माद् गृहाण प्रिये ! एतद् भवतु अपुत्रतयैष तव पुत्रः ।**
**स चैव नूनं भविष्यति सुरजीव एष उत्पन्नः ॥ ५० ॥**

**गृहीत्वा तकं नरनाथ ! द्वावपि प्राप्तौ निजकनगरे ।**
**कृत्वा वर्धापनिकां[1] प्रकाशितं सकललोकस्य ॥ ५१ ॥**

**जातस्तु कनकमालाया गुप्तगर्भायाः साम्प्रतं पुत्रः ।**
**उचितसमये विहितं नाम तस्य मकरकेतुरिति ॥ ५२ ॥**

**विद्याधरेन्द्रभवनैवं वर्धते नरेन्द्र ! तव पुत्रः ।**
**इतश्च तस्य देवी स्वयंप्रभा देवलोकात् ॥ ५३ ॥**

१. वर्धापनिकाम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चइऊण समुप्पन्ना एसा सुरसंदरी महाराय ! ।
अह कमसो वड्ढंती एसावि हु जोव्वणं पत्ता ॥ ५४॥ युग्मम् ॥

हरिऊण जेण नीया तइया खयरेण रयणदीवंमि ।
सो य सुलोयणजम्मे हरिदत्तो आसि से जणओ ॥ ५५ ॥

इय पिच्छ विरुवत्तं भवस्स दुक्खागरस्स नरनाह !।
इच्छइ भोए भोत्तुं जणओ धूयाए सह जत्थ ॥ ५६ ॥

काउं पिसायरूवं तेणेव सुरेण कालबाणेण।
अवहरिउं विज्जाओ छूढो जलहिम्मि तुह पुत्तो ॥ ५७ ॥

सुरसुंदरिंपि तत्तो जांयपओसो[1] स जाव गयणेण ।
अवहरइ ताव नरवर ! संजाओ चवणसमओ से ॥ ५८ ॥

तस्स य चुयस्स[2] एसा पडिया गयणाओ एत्थ उज्जाणे ।
धणदेवजाणवत्तं पत्तं पुण तुज्झ तणएण ॥ ५९ ॥

---

च्युत्वा समुत्पन्नैषा सुरसुन्दरी महाराज ! ।
अथ क्रमशः वर्धमानैषाऽपि खलु यौवनं प्राप्ता ॥ ५४ ॥ युग्मम् ॥

हृत्वा चेन नीता तदा खेचरेण रत्नद्वीपे ।
स च सुलोचनाजन्मनि हरिदत्तोऽऽसीत् तस्य जनकः ॥ ५५ ॥

इति प्रेक्षस्व विरूपत्वं भवस्य दुःखाकरस्य नरनाथः ।
इच्छति भोगान् भोक्तुं जनको दुहित्रा सह यत्र ॥ ५६ ॥

कृत्वा पिशाचरूपं तेनैव सुरेण कालबाणेन ।
अपहृत्य विद्याः क्षिप्तो जलधौ तव पुत्रः ॥ ५७ ॥

सुरसुन्दरीमपि ततो जातप्रतोषः स यावत् गगनेन ।
अपहरति तावत् नरवर ! सञ्जातश्च्यवनसमयस्तस्य ॥ ५८ ॥

तस्य च च्युतस्यैषा पतिता गगनादत्रोद्याने ।
धनदेवयानपात्रं प्राप्तं पुनस्तव तनयेन ॥ ५९ ॥

१. जातप्रतोषः । २. च्युतस्य=मृतस्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायम्मि जाणभंगे पावियफलहो समुद्दमज्झम्मि ।
दिट्ठो पियंवयाए अह नीओ तेण सट्ठाणं ॥ ६० ॥

तं जं तुमए पुट्ठं तं एयं साहियं नरवरिंद ! ।
मिलिही पुण अज्जेव य वियालसमयम्मि सो तुज्झ ॥ ६१ ॥

सोऊण सूरिवयणं राया सुरसुंदरी य देवी य ।
पत्ता य गुरुपमोयं परिसा सव्वावि संविग्गा ॥ ६२ ॥

तत्तो रन्ना भणियं जाव य पुत्तेण संगमो ताव ।
काहामि तओ सहलं मणुयत्तं तुह पासम्मि ॥ ६३ ॥

एत्थंतरम्मि पणमिय धणदेवो भणइ सुप्पइट्ठगुरुं ।
तइया पल्लीभंगे जाए घोरम्मि संगामे ॥ ६४ ॥

कणगवईइ बलेणं हएसु नट्ठेसु भिल्लसुहडेसु ।
किं जायं तुम्हाणं कहवा समणत्तणं पत्तं ? ॥ ६५ ॥

---

जाते यानभङ्गे प्राप्तफलकः समुद्रमध्ये ।
दृष्टः प्रियंवदयाऽथ नीतस्तेन स्वस्थानम् ॥ ६० ॥

तद्यत् त्वया पृष्टं तदेतद् कथितं नरवरेन्द्र ! ।
मीलिष्यति पुनरद्यैव च विकालसमये स तव ॥ ६१ ॥

श्रुत्वा सूरिवचनं राजा सुरसुन्दरी च देवी च ।
प्राप्ताश्च गुरुप्रमोदं पर्षत् सर्वाऽपि संविग्ना ॥ ६२ ॥

ततो राज्ञा भणितं यावच्च पुत्रेण सङ्गमस्तावत् ।
करिष्यामि ततः सफलं मनुष्यत्वं तव पार्श्वे ॥ ६३ ॥

अत्रान्तरे प्रणम्य धनदेवो भणति सुप्रतिष्ठगुरुम् ।
तदा पल्लीभङ्गे जाते घोरे सङ्ग्रामे ॥ ६४ ॥

कनकवत्या बलेन हतेषु नष्टेषु भिल्लसुभटेषु ।
किं जातं युष्माकं कथं वा श्रमणत्वं प्राप्तम् ? ॥ ६५ ॥



Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

भणियं गुरुणा निसुणसु तइया समरंगणम्मि जुज्झंतो ।
सरनियरवरिसविहुरियदेहो पडिओ धरावट्टे[1] ॥ ६६ ॥

दिट्ठो य तं पएसं समागएणं सुचित्तवेगेणं ।
खयरेण तेण नीओ सिणेहसारेण वेयड्ढे ॥ ६७ ॥

विहिओ य तक्खणं चिय ओसहिसामत्थओ अहं सत्थ ।
दिन्ना य पवरविज्जा पुव्वुवगारं सरंतेण ॥ ६८ ॥

पन्नत्तीनामेणं विहिणा सा साहिया मए तत्थ ।
तत्तो समागओ हं सिद्धत्थपुरम्मि खयरजुंओ[2] ॥ ६९ ॥

कणगवईइ समेयं सुरहं निंद्धाडिऊण[3] देसाओ ।
सिद्धत्थपुरे जाओ राया हं ताहि धणदेव! ॥ ७० ॥

परिवालिऊण रज्जं कइवि हु वरिसाण कोडिकोडीओ ।
अहिसिंचिऊण रज्जे जयसेणं नियपुत्तमहं ॥ ७१ ॥

---

**भणितं गुरुणा निश्रृणु तदा समराङ्गणे युध्यमानः ।**
**शरनिकरवर्षाविधुरितदेहः पतितो धरापृष्ठे ॥ ६६ ॥**

**दृष्टश्च तं प्रदेशं समागतेन सुचित्रवेगेन ।**
**खेचरेण तेन नीतः स्नेहसारेण वैताढये ॥ ६७॥**

**विहितश्च तत्क्षणं चैवौषधिसामर्थ्यतोऽहं स्वस्थः ।**
**दत्ता च प्रवरविद्याः पूर्वोपकारं स्मरता ॥ ६८ ॥**

**प्रज्ञप्तीनाम्ना विधिना सा साधिता मया तत्र ।**
**ततः समागतोऽहं सिद्धार्थपुरे खेचरयुतः ॥ ६९ ॥**

**कनकवत्या समेतं सुरथं निस्सार्य देशात् ।**
**सिद्धार्थपुरे जातो राजाऽहं तदा धनदेव ! ॥ ७० ॥**

**पारिपाल्य राज्यं कत्यपि खलु वर्षाणां कोटिकोटयः ।**
**अभिषिञ्च्य राज्ये जयसेनं निजकपुत्रमहम् ॥ ७१ ॥**

---

१. धरापृष्ठे । २. जुओ=युतः=सहितः । ३. निस्सार्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धणवाहणकेवलिणो पयमूले जायतिव्वसंवेगो ।
पव्वइओ सह पंचहिं सएहिं वररायउत्ताणं ॥ ७२ ॥ युग्मम् ॥

अब्भसियसाहुकिरिओ जाओ कमसो य बारसंगविऊ ।
धणवाहणकेवलिणा अहिसित्तो ताहि सूरिपए ॥ ७३ ॥

काऊण य सेलेसिं खविउं चत्तारि सेसकम्माइं ।
सो अम्ह गुरु पत्तो निव्वाणं भद्द ! धणदेव ! ॥ ७४ ॥

इय सुपइट्ठसूरी जाव य परिकहइ निययवुत्तंतं ।
तावय गयणाहिंतो एगो खयरो समोइन्नो[1] ॥ ७५ ॥

कयसूरिपणामेणं भणियं अह तेण विणयपणएण ।
वेयड्ढाओ वद्धावओ[2] अहं आगओ तुम्ह ॥ ७६ ॥

संसिद्धसयलविज्जो पव्वइउमणेण चित्तवेगेण ।
अहिसित्तो नियपए तुम्ह सुओ मयरकेउत्ति ॥ ७७ ॥

---

घनवाहनकेवलिनः पादमूले जाततीव्रसंवेगः ।
प्रव्रजितः सह पञ्चभिः शतै-र्वरराजपुत्राणाम् ।। ७२ ।। युग्मम् ।

अभ्यसितसाधुक्रियः जातः क्रमशश्च द्वादशाङ्गविद् ।
घनवाहन केवलिनाऽभिषिक्तस्तदा सूरिपदे ।। ७३ ।।

कृत्वा च शैलेशीं क्षपयित्वा चत्वारि शेषकर्माणि ।
सोऽस्माकं गुरुःप्राप्तो निर्वाणं भद्र ! धनदेव ! ।। ७४ ।।

इति सुप्रतिष्ठसूरिर्यावच्च परिकथयति निजकवृतान्तम् ।
तावच्च गगनादेकः खेचरः समवतीर्णः ।। ७५ ।।

कृतसूरिप्रणामेन भणितमथ तेन विनयप्रणतेन ।
वैताढ्यतो वर्धापकोऽहमागतः युष्माकम् ।। ७६ ।।

संसिद्धसकलविद्यः प्रव्रजितुमनसा चित्रवेगेन ।
अभिषिक्तो निजकपदे तव सुतो मकरकेतुरिति ।। ७७ ।।

---

१. समोइन्नो=समवतीर्णः । २. वर्धापकः=वर्धापनकर्ता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो खयरविंदसहिओ तुम्हाणं [1]पायवंदओ एही ।
इय नयरे अज्जेव य इय तुम्ह पियं निवे[2]एमि ॥ ७८ ॥

तव्वयणं सोऊणं हरिसवसूससियरोमकूवेण ।
दिन्नं अंगविलग्गं पभूयदव्वं च से रन्ना ॥ ७९ ॥

आणंदिया देवी ओयारणयं करेइ खयरस्स ।
अंगम्मि अमायंतं हरिसं सुरसुंदरी पत्ता ॥ ८० ॥

पणमिय सूरिं राया पुरं पविट्ठो सपरियणो ताहे ।
आणवेइ कुट्ट[3]वाले सिग्घं नयरं विसोहेह ॥ ८१ ॥

अवणीय [4]कयवराओ सिग्घं सा[5]रवह सयलसरणीओ ।
[6]मयणाहिकुंकुमुम्मीसिएणं नीरेण सिंचेह ॥ ८२ ॥

विरएह सरसतामरसमीसकुसुमोवयारमणवज्जं ।
पच्छाइयगयणाओ करेह वरहट्टसोहाओ ॥ ८३ ॥

---

स खेचरवृन्दसहितो युष्माकं पादवन्दक एष्यति ।
इह नगरेऽद्यैवेति तव प्रियं निवेदयामि ।। ७८ ।।

तद्वचनं श्रुत्वा हर्षवशोश्वशितरोमकूपेन ।
दत्तमङ्गविलग्नं प्रभूतद्रव्यं च तस्मै राज्ञा ।। ७९ ।।

आनन्दिता च देवी ओवारकं करोति खेचरस्य ।
अङ्गेऽमान्तं हर्षं सुरसुन्दरी प्राप्ता ।। ८० ।।

प्रणम्य सूरिं राजा पुरं प्रविष्टः सपरिजनस्तदा ।
आज्ञापयति कोट्टवालान् शीघ्रं नगरं विशोभयत ।। ८१ ।।

अपनीय कचवरान् शीघ्रं समारचयत सकलसरण्यः ।
मृगनाभिकुङ्कुममुन्मिश्रितेन नीरेण सिञ्चयत ।। ८२ ।।

विरचयत सरसताम्ररसमिश्रकुसुमोपचारमनवद्यम् ।
प्रच्छादितगगनाः कारयत वरहट्टशोभाः ॥ ८३ ॥

---

१. पादवन्दकः । २. निवेदयामि । ३. कोट्टं=नगरम् कोट्टवालो=नगराऽऽरक्षकः । ४. कयवरो=तृणाद्युत्करः । ५. समारचयत । ६. मृगनाभिः=कस्तुरिका ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पइमंदिरं च बंधह वंदणालाओ विविहरूवाओ ।
धवलहरमालियाओ विचित्तवन्नेहिं भूसेह ॥ ८४ ॥

निम्मलजलपडिपुन्ने कंचणकलसे ठवेह[1] दारेसु ।
उब्भेह[2] वेंजयंतीओ भवणदारेसु विविहाओ ॥ ८५ ॥

वरफुल्लतोरणाइं मंचाइं करेह एयमग्गम्मि ।
गोरोयणसिद्धत्थयदुव्वाजुयसोत्थियालिहणं[3] ॥ ८६ ॥

अन्नं च एवमाई करेह कारेह पउरलोएण ।
इय ते रन्ना भणिया सविसेसं करिउमाढत्ता ॥ ८७ ॥

हल्लुत्तावलपउरे इओ तओ संचरंतभिच्चयणे ।
अंतेउरम्मि रन्नो पियंवया झत्ति संपत्ता ॥ ८८ ॥

सुरसुंदरीइ दिट्ठा उवगूढा[4] हरिसनिब्भरंगीए ।
दिन्नासणोवविट्ठा अह पुट्ठा पुव्ववुत्तंतं ॥ ८९ ॥

---

प्रतिमन्दिरं च बन्धयत वन्दनमाला विविधरूपाः ।
धवलगृहमालिका विचित्रवर्णैर्भूषयत ॥ ८४ ॥

निर्मलजलप्रतिपूर्णान् कञ्चनकलशान् स्थापयत द्वारेषु।
उध्वींकुरुत वैजयन्त्यो-र्भवनद्वारेषु विविधाः ॥ ८५ ॥

वरफुल्लतोरणानि मञ्चानि कारयत एतन्मार्गे ।
गोरोचनसिद्धार्थकदूर्वायुतस्वस्तिकालेखनम् ॥ ८६ ॥

अन्यञ्च एवमादि कुरुत कारयत पौरलोकेन ।
इति ते राज्ञा भणिताः सविशेषं कर्तुमारब्धाः ॥ ८७ ॥ ?

त्वराप्रचुर इतस्ततः सञ्चरद्भृत्यजने ।
अंतःपुरे राज्ञः प्रियंवदा झटिति संप्राप्ता ॥ ८८ ॥

सुरसुन्दर्या दृष्टाऽवगूढा हर्षनिर्भराङ्गया।
दत्तासनोपविष्टाऽथ पृष्टा पूर्ववृतान्तम् ॥ ८९ ॥

---

१. स्थापयत । २. ऊर्ध्वीकुरुत । ३. गोरोचनसिद्धार्थकदूर्वायुतस्वस्तिकालेखनम् । * त्वरा।
४. आलिङ्गिता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणियं पियंवयाए अत्थि तुमं ताव तेण उक्खित्ता ।
वेयालेण[1] अहं पुय पडिया मुच्छाइ भूमीए ॥ ९० ॥

तत्तो खणंतराओ मुच्छाविरमम्मि सोगसंतत्ता ।
हा ! कत्थ गया भगिणी कीस न सो आगओ भाया ? ॥ ९१ ॥

नूणं तेण पिसाएण होज्ज विहियं असोहणं किंपि ।
एमाइ चिंतयंती गवेसिउं ताहि लग्गा हं ॥ ९२ ॥

अह तत्थ रयणदीवे समंतओ हिंडिऊण गयणत्था ।
भमिया लवणसुद्दे पलोययंती तुमं बहुहा ॥ ९३ ॥

फलयविलग्गो दिट्ठो समुद्दमज्झम्मि वीइ[2]निवहेण ।
तोलिज्जमाणदेहो अह भाया मयरकेउत्ति ॥ ९४ ॥

उक्खिविऊण तत्तो नीओ जिणमंदिरम्मि अह तम्मि ।
पुट्ठो य कह णु पडिओ समुद्दमज्झम्मि, अह तेण ॥ ९५ ॥

---

**भणितं प्रियंवदयाऽस्ति त्वं तावत्तेनोत्क्षिप्ताः ।**
**वेतालेनाऽहं पुनः पतिता मूर्च्छया भूमौ ॥ ९० ॥**

**ततःक्षणान्तरतो मूर्च्छाविरमे शोकसंतप्ता ।**
**हा ! कुत्र गता भगिनी कस्मान्न स आगतो भ्राता ? ॥ ९१ ॥**

**नूनं तेन पिशाचेन भवेद्विहितमशोभनं किमपि ।**
**एवमादि चिन्तयन्ती गवेषयितुं तदा लग्नाऽहम् ॥ ९२ ॥**

**अथ तत्र रत्नद्वीपे समन्ततो भ्रान्त्वा गगनस्था ।**
**भ्रान्ता लवणसमुद्रे प्रलोकयन्ती त्वं बहुधा ॥ ९३ ॥**

**फलकविलग्नो दृष्टः समुद्रमध्ये वीचिनिवहेन ।**
**तोल्यमानदेहोऽथ भ्राता मकरकेतुरिति ॥ ९४ ॥**

**उत्क्षिप्य ततो नीतो जिनमंदिरेऽथ तस्मिन् ।**
**पृष्टश्च कथन्नु पतितः समुद्रमध्ये, अथ तेन ॥ ९५ ॥**

---

**१. वेतालेन । २. वीचिः=तरङ्गः ।**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बेयालदंसणाई विज्जाच्छेयाइसयलवुत्तंतो ।
कहिओ अह मह तेणवि भणियं सुरसुंदरी कत्थ ? ॥ ९६ ॥

भणियं मएवि भाओय पिसायरूवेण सावि अवहरिया ।
इय सोउं गुरुमोग्गरहउव्व सो मुच्छिओ सहसा ॥ ९७ ॥

पासट्ठियखयरेहिं सीयलपवणाइकरणओ बहुहा ।
स[1]त्थीकओवि कुमरो मुच्छिज्ज जाहिं पुणरुत्तं ॥ ९८ ॥

ताहे गंतुं तायस्स साहिओ नहयरेहिं वुत्तंतो ।
तं सोउं गुरुसोगो ताओवि समागओ तत्थ ॥ ९९ ॥

कहकहवि हु संठविउं नीओ वेयड्ढपव्वए कुमरो ।
बहवे खयरकुमारा आणत्ता ताहि ताएण ॥ १०० ॥ युग्मम् ॥

छक्खंडभरहमज्झे गामागरपट्टणेसु भमिऊणं ।
सुरसुंदरिवुत्तंतं आणेह जहट्ठियं सिग्घं ॥ १०१ ॥

---

वेतालदर्शनादिविद्याच्छेदादिसकलवृतान्तः ।
कथितोऽथ मम तेनाऽपि भणितं सुरसुन्दरी कुत्र ? ॥ ९६ ॥

भणितं मयाऽपि भ्राता च पिशाचरुपेण साऽप्यपहृता ।
इति श्रुत्वा गुरुमुद्गरहत इव स मूर्च्छितः सहसा ॥ ९७ ॥

पार्श्वस्थितखेचरैः शीतलपवनादिकरणतो बहुधा ।
स्वस्थीकृतोऽपि कुमारो मूर्च्छयते यदा पुनरुक्तम् ॥ ९८ ॥

तदा गत्वा तातस्य कथितो नभचरैःवृंतान्तः ।
तं श्रुत्वा गुरुशोकस्तातोऽपि समागतस्तत्र ॥ ९९ ॥

कथंकथमपि खलु संस्थाप्य नीतो वैताढ्यपर्वते कुमारः ।
बहवः खेचरकुमारा आज्ञप्तास्तदा तातेन ॥ १०० ॥ युग्मम् ॥

षट्खण्डभरतमध्ये ग्रामाकरपत्तनेषु भ्रान्त्वा ।
सुरसुन्दरीवृतान्तमानयत यथास्थितं शीघ्रम् ॥ १०१ ॥

---

१. स्वस्थीकृतः ।



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

इय भणिउं पट्ठविया बहवे विज्जाहरा ओ ताएण ।
कुमरोवि विणोइज्जइ[1] तायादेसाउ मित्तेहिं ॥ १०२ ॥

पियविरहसोयसंपीडियस्स कुमरस्स कइवि दिवसाणि ।
वच्चंति जाव ताव य अन्नम्मि दिणम्मि तत्थ पुरे ॥ १०३ ॥

संपत्तो चउनाणी चारणसमणो दुवालसंगविऊ ।
दमघोसो नामेणं सहसंबवणे समोसरिओ ॥ १०४ ॥ युग्मम् ॥

तस्स य वंदणहेउं विणिग्गओ कुमरसंजुओ ताओ ।
वंदित्ता उवविट्ठो महिवट्ठे परियणसमेओ ॥ १०५ ॥

संसाररुंद[2] सायरुत्तारणजाणवत्तसंकासो ।
मुणिणावि तेसिं धम्मो अणवज्जो[3] कहिउमाढत्तो ॥ १०६ ॥

सारीरमाणसाणं दुक्खाणं खयं समिच्छमाणेहिं ।
जीवाण अभयदाणं मणवइ[4]काएहिं कायव्वं ॥ १०७ ॥

---

**इति भणित्वा प्रस्थापिता बहवो विद्याधरा ओ तातेन ।**
**कुमारोऽपि विनोद्यते तातादेशात् मित्रैः ॥ १०२ ॥**

**प्रियाविरहशोकसंपीडितस्य कुमारस्य कत्यपि दिवसानि ।**
**व्रजन्ति यावत्तावच्चान्यस्मिन् दिने तत्र पुरे ॥ १०३ ॥**

**संप्राप्तश्चतुर्ज्ञानी चारणश्रमणो द्वादशाङ्गवित् ।**
**दमघोषो नाम्ना सहस्राम्रवने समवसृतः ॥ १०४ ॥ युग्मम् ॥**

**तस्य च वन्दनहेतुं विर्निगतः कुमारसंयुक्तस्तातः ।**
**वन्दित्वोपविष्टो महीपृष्ठे परिजनसमेतः ॥ १०५ ॥**

**संसाररुन्दसागरोत्तारणयानपात्रसङ्काशः ।**
**मुनिनाऽपि तेषां धर्मोऽनवद्यः कथयितुमारब्धः ॥ १०६ ॥**

**शारीरमानसानाम् दुःखानां क्षयं समिच्छद्भिः ।**
**जीवानामभयदानं मनोवाक्कायैः कर्तव्यम् ॥ १०७ ॥**

---

१. विनोद्यते=विनोदं कार्यते। २. रुंदो=विपुलः। ३. अनवद्यः=निर्दोषः। ४. वइ=वाक्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जरमरणदुक्खपउरं संसारं ते तरंति लीलाए ।
सच्चमणवज्जवयणं सयावि भासंति जे जीवा ॥ १०८ ॥

दोगच्चवाहिजरमरणसोयपियविप्पओगवसणाइं ।
जायंति न जीवाणं जे ओ अदिन्नं न गिण्हंति ॥ १०९ ॥

वज्जंति जे अबंभं जीव मणवयणकायजोगेहिं ।
निद्धूयसयलकम्मा वयंति ते सासयं ठाणं ॥ ११० ॥

